No. 11. **अमरुशतकटीका (कामदाख्या।)** By **रविचन्द्रः।** Substance, country-made paper, 16 × 3 inches. Folia, 25. Lines, 9 on a page. Extent, 1,125 çlokas. Character, Bengali. Date, Sk. 1746. Place of deposit, Viṣṇupura, Kádákuli, District Bãkurá, Paṇḍita Rámaprasanna *Bhaṭṭácáryya*. Appearance, fresh. Prose. Incorrect.

Beginning. नमः श्रीकृष्णाय॥ विद्या वितरति मुक्तिं मुक्तिमविद्याया भुजिष्यामः।

या च रमाचरशक्तिः सा नः शिवं सदा दिशतु॥

तदुभयरसपरिपाटीपरिचरणवाटीमिमां रम्यां।

कुरुते ऽमरुशतकटीकां ज्ञानाञ्जनः कलाधारः ॥
योऽसौ भाग्यवता विभक्तवनितज्ञानाम्वतानन्दथु-
र्यो वात्स्यायनकामतन्त्रविलसत्केलिक्रियाकौशलः ।
व्याचष्टेऽत्र रसद्वयं कविकुलालङ्कारचूड़ामणिः
श्रीलश्रीरविचन्द्र एष पिशुना मातृसर्य्यमुत्सृज्यतां ॥
यदि स्यात् परमानन्दे कामानन्दे च वासना ।
तदा संसेव्यतां धीराष्टीकेयं कामदा सदा ॥
क्व चातिकर्कशः शान्तः क्व चातिललितः शुचिः ।
एकत्र वाक्ये व्याख्यातुस्तावद्धो कौशलं कवेः ॥
निर्व्विघ्नं प्रारिप्सितशतककामो ग्रन्थकृदिष्टदेवतां कीर्त्तयन्नाह । ज्येति ।
अम्बिकायाः पार्व्वत्याः कटाक्षोऽपाङ्गदर्शनं त्वां पातु रक्षतु अत्र सम्बो-
धनपदेऽप्यनुक्ते युष्मच्छब्देनापेक्ष्यते ॥ इत्यादि ।

End. हे मुग्धे मायि मानिनि अङ्गारिणि मुखाग्रं मिथ्याज्ञानं मुञ्च । कथमित्याह रामो जगदीश्वरः मुखं चुम्बति सर्व्वथा रामरामेति स्मरामि एकेनाद्वितीयेन अतएव दृशानैरिति (?) मिथ्याज्ञानं मुञ्च इति समेराधन (?) पदानि सुगमानि एतेनैतदुक्तं भवति । नानाविधानाभावात् धर्म्मान् निरूप्य रामस्य स्मरणमेव सर्व्वगरिष्ठमिति सूचितम् ॥

Colophon. इत्यमरुशतकटीका समाप्ता ॥ रामचन्द्रदेवशर्म्मणा लिखितमिदं । शकाब्दा १७४६ ॥

विषयः । अमरुशतकस्य व्याख्यानम् ॥

No. 12. अलङ्कारवादार्थः । Substance, country-made paper, 18×3 inches. Folia, 40. Lines, 6 on a page. Extent, 1,290 çlokas. Character, Bengali. Date, ? Place of deposit, District Bãkurá Visṇupur, Rúparám Bhaṭṭácáryya. Appearance, new. Prose. Generally correct.

Beginning. ॐ रामचन्द्राय नमः । दर्पणकारस्य । ग्रन्थारम्भे इत्यस्य छद्विध्निति इति न्यायात् आरभ्यग्रन्थ इत्यर्थः । निरूपकत्वमेव आधारत्वं तथाच आरभ्यग्रन्थनिरूपकनिर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिष्ठातृतया वाग्देवतायाः साम्मुख्यं आराधनेन स्वार्थसाधनानुकूलत्वमाधत्ते करोति । तथाच आरभ्यग्रन्थनिरूपकसरस्वत्याराधनेन स्वार्थसाधनानुकूलकृतिमान् ग्रन्थकृदित्यन्वयधीः ॥ इत्यादि ।

End. पूर्व्वार्द्धे दीर्घसमासेनैव बोधनान्नदोषः। सुकर्णैरिन्द्राजित(?)कुन्तलोल्लसत्कपोललीनालकमण्डिताननामित्यष्टमे। नन्वच पदान्तराधीन आरूढ़बोधे किमर्थं कर्णपदप्रयोगः कथम्वा मार्कण्डेयपुराणे चीरोदस्तामलं हारमजरे च तथाम्बरे चुड़ामणिं तथा दिव्यं कुण्डले कटकानि च इत्यत्र आरूढ़बोधः॥ उ॥ सुधीभिर्भाव्यं। केचित्तु दानादावारूढ़बोधप्रयोजनाभावात् मार्कण्डेयपुराणे न दोष इति वाच्यम्। न च समस्तास्वपि चेत्यादिदर्शनात् आरूढ़प्रकरणत्वान्न समीचीनम्॥ * ॥

Colophon. इत्यलङ्कारवादार्थः समाप्तः॥ * ॥ श्रीरामचन्द्राय नमः॥

विषयः। साहित्यदर्पणाख्यालङ्कारग्रन्थस्यालङ्काराध्यायस्य विचारः॥

No. 13. अवधूतानुभवः। Substance, country-made paper, 14×4 inches. Folia, 14. Lines, 7 on a page. Extent, 343 çlokas. Character, Bengali. Date, ? Place of deposit, Hálisahar Khásváṭí, Mahádeva Bhaṭṭácáryya. Appearance, new. Prose. Generally correct.

Beginning. ॐ नमः परमात्मने। जनक उवाच।

कथं ज्ञानमवाप्नोति कथं मुक्ति र्भविष्यति।
वैराग्यञ्च कथं प्राप्तं तत्त्वं ब्रूहि मे प्रभो॥
अष्टावक्र उवाच।
मुक्तिमिच्छसि चेत् तात विषयान् विषवत् त्यज।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज॥ इत्यादि।

End. अष्टकं चात्मविश्रान्तौ जीवन्मुक्तौ चतुर्द्दश।
षट्संख्याक्रमविज्ञाने ग्रन्थैकात्म्यमतः परम्॥
विंशत्येकमितैः खण्डैः श्लोकैरात्माग्निमध्यगैः अवधूतानुभूतेस्तु श्लोकसंख्याः क्रमा अमी।(?) संग्रहश्लोकमादाय संख्येयं मतिमन् सदा॥
इति श्रीमदष्टावक्रप्रकरणं संग्रहषट्कं एकविंशतिप्रकरणं समाप्तम्॥

Colophon. इत्यवधूतानुभवः समाप्तः॥ ॥

विषयः। ज्ञानमुक्तिवैराग्यादिनिरूपणम्॥

No. 14. अवयवटिप्पनी। By कणादतर्कवागीशः. Substance, country-made paper, 16×3 inches. Folia, 21. Lines, 8 on a page. Extent, 735 çlokas. Character, Bengali. Date, ? Place of deposit, District Bãkurá Viṣṇupura, Paṇḍita Raghuráma Tarkaratna. Appearance, new. Prose. Generally correct.

Beginning. श्रीहरिः शरणम् । परार्थानुमानप्रयोजकत्वेन स्मृतस्य न्यायादेरुपेक्षानर्हं तया प्रसङ्गसङ्गत्या तन्निरूपयितुमाह तत्रेति । परार्थं परप्रतिपिपादयिषाप्रयोज्यं परो ऽत्र विप्रतिपन्नः न तु मीमांसकमात्रं । तेनाप्तेन परप्रतिपिपादयिषयोद्दीरितेऽपि न्यायत्वमित्यवधेयं । न्यायसाध्यमिति न्यायजन्यज्ञानप्रयोज्यमित्यर्थः । अवयवान् विभजते प्रतिज्ञेति यद्यप्यवयवसामान्यं निरूप्यैव तद्विभागो युक्तस्तथापि इत्यादि प्रतिज्ञादिपञ्चावयवोपेतस्यैवात्र लक्ष्यत्वं ।

End. ननु कण्टकोद्धारवाक्ये वाक्यत्वसत्त्वात्तस्य न्यायत्वं स्यादतः कण्टकेति तथाच तेनापि न्यायत्वपर्य्याप्त्यधिकरणत्वस्य तद्व्यतिरेकेण सत्वान्न तस्य न्यायघटकत्वमिति भावः । अत्र प्रतिज्ञापक्षे हेतूदाहरणमात्रको न्याय इति मीमांसकाः । उदाहरणोपनयमात्रमिति बौद्धाः । प्रतिज्ञामात्रमिति नैयायिकैकदेशिनः । असाधकतानुमाने प्रतिज्ञाहेतुमात्रमिति केचित् । तदेवोपनयसहितमित्याचार्य्याः ॥ ०

Colophon. इति कणादतर्कवागीशभट्टाचार्य्यकृतावयवटिप्पनी सम्पूर्णा ॥ * ॥

विषयः । अनुमानखण्डान्तर्गतावयवव्याख्या ।

No. 15. अशौचदीपिका । By श्यामसुन्दरः. Substance, country-made paper, $10 \times 2\frac{1}{2}$ inches. Folia, 17. Lines, 5 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, Serpur, Mayamansing Paṇḍita Candra kánta Tarkálaŋkára. Appearance, old Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ श्रीश्यामसुन्दरभट्टाचार्य्यकृताशौचदीपिका लिख्यते ।

अथ गर्भस्रावाशौचसंक्षेपः ।—

যে স্ত্রীর গর্ভস্রাব হয় তাহার প্রথম মাসেতে এক দিন দ্বিতীয় মাসে ২ দুই দিন তৃতীয় মাসে ৩ তিন দিন । ইত্যাদি ।

End. ভিন্ন গোত্রপোষ্যপুত্রের জনক জননী এবং জনক সপিণ্ড মরণে অশৌচ নাই সপিণ্ড পোষ্যপুত্র হইলে পরস্পর সপিণ্ডের সহিত জনক মরণে সম্পূর্ণাশৌচ হয় ইতি ॥ * ॥

বিষয়ঃ । गर्भस्रावजननमरणाद्यशौचनिरूपणम् ।

No. 16. **अशौचप्रकाशः** By **चतुर्भुजः.** Substance, country-made paper, 14 × 2½ inches. Folia, 17. Lines, 6 on a page. Extent, 325 çlokas. Character, Bengali. Date, ? Place of deposit, Kãṭhálpárá, Rámatárana Ṭhákur. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय। यत्नाद्वाववनादिकं परिचिन्ती कृत्येषु कर्त्ता
भट्टाचार्य्य चतुर्भुजोऽच्युतपदद्वन्द्वारविन्दं मुदम्।
वन्दित्वा सतुमानसस्य सुहृदोऽशौचप्रकाशं करो-
त्युन्नग्रामकुलोद्भवो भवजभोद्भूतोद्भवाद्यर्चितं॥ (?)
अग्निहोत्रादिविहितब्राह्मणादिचतुर्वर्णेषु जननमरणे चैव यथाक्रमं ज्ञातीनां
दशाहं पञ्चदशाहं मासमेकमशौचम्॥ इत्यादि।

End. खण्डितत्वात् शेषो नास्ति॥

विषयः। जननमरणाद्यशौचनिरूपणं। दाहादिनिरूपणम्। सद्यमरणादिनिरूपणञ्च॥

No. 17. **अष्टमङ्गला।** By **रामकिशोरचक्रवर्त्ती.** Substance, country-made paper, 16 × 3 inches. Folia, 18. Lines, 10 on a page. Extent, 540 çlokas. Character, Bengali. Date, ? Place of deposit, Çáktá, District Dháká Pandita Trilocana Tarkálaṇkár. Appearance, new. Prose. Correct.

Beginning. ॐ नमो गणेशाय।
शिवं रामकिशोरेण प्रणम्यार्थः प्रकाश्यते।
आख्यातष्टमपादीयदौर्गवृत्तेर्यथामति॥
पदान्ते। पदान्ते वर्त्तमानानामिति। नन्वन्तशब्दोऽवयववचनः। तथाच पदान्तानामवयवा एव घुटः। तत्कथं ते पदान्ते वर्त्तन्ते इति। सत्यमन्त-शब्दोऽयं धर्म्मवृत्तिस्तेन पदान्तत्वे वर्त्तमानानां घुटामित्यर्थः। तथाच आदिमध्यान्तशब्दा धर्म्मिणि धर्म्मे च वर्त्तन्ते इति मतमिति गोपीनाथः। इत्यादि।

End. प्रतिषेधस्तु स्थानिवद्भावादेव न पदान्त इत्यादिना परिभाषायास्तानित्यत्वं मन्तव्यमिति तेनाभ्यासे प्रतिषेधार्थं न वक्तव्यमिति॥

Colophon. इति श्रीरामकिशोरचक्रवर्त्तिकृतायामष्टमङ्गलाटीकायामियत्तावच्छिन्नत्वेनाष्टमः पादः समाप्तः।

विषयः। कातन्त्राख्यातष्टमपादीयदौर्गसिंहवृत्ते र्गूढार्थप्रकटनम्।

No. 18. आकाङ्क्षापूर्व्वपक्षरहस्यम् । By मथुरानाथः. Substance, country-made paper, 17 × 3½ inches. Folia, 7. Lines, 8 on a page. Extent, 294 çlokas. Character, Bengali. Date, ? Place of deposit, Dhánuká, Pálang Post office, District Faridpur, Paṇḍita Rajaní kánta Tarkaratna. Appearance old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । प्रसङ्गादाकाङ्क्षां निरूपयितुं इच्छति अथ केयमिति आकाङ्क्षादिकं सहकारीति यदुक्तं तत्राकाङ्क्षा केत्यर्थः अविनाभाव इति । भावः सत्त्वं तदभाव इत्यर्थः तथाच तत्पदार्थे तत्पदार्थाभाव-वद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकाङ्क्षेति भावः । अस्ति चायं घट इत्यादौ इदम्पदार्थे घटपदार्थाभाववद्वृत्तित्वाभावः इति इदम्पदार्थे घट-पदार्थाकाङ्क्षा । इत्तित्वं तादात्म्यसम्बन्धेन बोध्यं अन्यथा चैत्रः पचति रथो गच्छति इत्यादौ चैत्रपदार्थस्य पचति पदार्थसाकाङ्क्षता न स्यात् चैत्रादौ ... ... पदार्थाभाववद्वृत्तित्वाभावाभावात् । इत्यादि ।

End. अजनितेत्यादेरुक्तप्रयोजनं दूषयति चयाणामिति राजपुत्रपुरुषाणामित्यर्थः । तुल्यवत् एकदा प्रथमं अजनितान्वयबोधदशायां यतः तात्पर्य्यधीविरहितः अग्रेऽपि जनितान्वयबोधदशायामपि पुरुषेण ... ... व्यर्थमिति नोक्तप्रयोजकमित्यर्थः यथाश्रुतन्तु सङ्गच्छते घटमानयेत्यादौ धारावाहिकशाब्दबोधवारणायाजनितान्वयबोधकत्व ... ... स्यावश्यक-तया वैयर्थ्याभावात् । ... ... नव्यास्तु धारावाहिकप्रत्यक्षस्यैव धारावाहिकशाब्दबोधस्याभ्युपगमात् वैयर्थ्य-मिति भावः अत एव सिद्धान्तलक्षणे जनितान्वयबोधेऽतिव्याप्तिवारणाय विशेषणं कण्ठतो ग्रन्थकृता नोक्तमित्याहुः ।

Colophon. इत्याकाङ्क्षापूर्व्वपक्षरहस्यम् ॥

विषयः । शाब्दबोधे शब्दज्ञानं यदि निरपेक्षकारणं भवति तदा घटः कर्म्मत्वमानयनं कृतिरिति शब्दात् घटकर्म्मताकबोधः कथं न जायते अतः आकाङ्क्षाज्ञानस्य शब्दज्ञानसह-कारित्वमवश्यमेव वाच्यमित्यादिविचारः ॥

No. 19. आख्यातटीका । Substance, country-made paper, 12 × 2½ inches. Folia, 72. Lines, 7 on a page. Extent, 2,520 çlokas. Character, Bengali. Date, ? Place of deposit, Serpur, Mayamansing Paṇḍita Candra kánta Tarkálaṇkára. Appearance, old. Prose. Correct.

Beginning. श्रीमत्परमात्मने नमः ॥ अथ परस्मै । इह यद्यपि प्रशस्तकर्म्मसमर्था-
धिकारेष्वथ शब्दो वर्त्तते तथापि आनन्तर्य्यार्थ एव गृह्यते ।
ननु भौमपूर्व्वज इति माघस्य स्खलितमिति । केचित्तु (अर्चयमाना)
भौमादि ( ) संप्रयुक्ता इत्येवार्थौ विवक्षित इत्याहुः ॥ * ॥ इत्यादि ।

Colophon. इति तृतीयपादः समाप्तः ॥

विषयः । कलापोक्तधातुरूपादिनिरूपणम् ।

No. 20. आख्यातपञ्जिकाव्याख्या । By नरहरिः । Substance, country-made paper, 17 × 4 inches. Folia, 83. Lines, 7 on a page. Extent, 1,162 çlokas. Character, Bengali. Date, ? Place of deposit, Vidyákúṭa. District Tippera, Paṇḍita Çaraccandra Vidyálaŋkár. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
नत्वा गौरीपदद्वन्द्वं श्रीमन्नरहरिः सुधीः ।
आख्यातपञ्जिकाव्याख्यां तनोति भ्रान्तिशान्तये ॥

टी अथ । ननु अथेत्यादि वृत्तिग्रन्थः कथं संगच्छते तथाहि । इत्यादि ।

End. पुरादेरेत्यत्र प्रपञ्चितमिति ।
खण्डितशेषत्वात् समाप्तिसूचकं वाक्यं नास्ति ।

विषयः । कातन्त्रव्याकरणस्य त्रिलोचनदासकृतपञ्जिकाया व्याख्यानम् ।

No. 21. आख्यातवादटिप्पनी By मथुरानाथतर्कवागीशः. Substance, country-made paper, 16 × 3 inches. Folia, 32. Lines, 8 on a page. Extent, 2,304 çlokas. Character, Bengali. Date, ? Place of deposit, Vajrayoginí, District Dháká, Paṇḍita Çaçibhúṣaṇa Smṛitiratna. Appearance, old. Prose. Correct.

Beginning. ॐ शिवो जयति ।
कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपंक्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमता मथुरानाथतर्कवागीशधीमता ।
आख्यातशक्तिवादस्य क्रियते विवृतिः शुभा ॥
आख्यातशक्यं निरूपयति आख्यातस्येति । आख्यानं यत्नावच्छिन्नशक्य-
तावच्छेदकमित्यर्थः । तेन वक्ष्यमाणहेतोर्न वैयधिकरण्यं । आख्यातत्वञ्च

सङ्केतविशेषसम्बन्धेनाख्यातपदवत्त्वं न तु जातिः। डित्यादिना साङ्कर्य्यात् मानाभावाच्च। शक्यतावच्छेदकन्तु न तत् किन्तु प्रत्येकं डित्यादिकमेव। अन्यथा आख्यातत्वप्रकारेणाज्ञानदशायां कलापव्याकरणानभिज्ञानां डित्यादिनाज्ञानात् शाब्दबोधमात्रस्य शक्तिभ्रमजन्यत्वप्रसङ्गात्। इत्यादि।

End. कर्म्माख्यातस्य फलमेवार्थः। तादृशेति। वर्त्तमानत्वादिविशिष्टस्येत्यर्थः। अनुभवस्वारसिकत्वेन विशेषणीयः। तेन लक्षणया नवानुभव इति निरस्तं। इदमुपलक्षणं। यतत्वमपेक्ष्याश्रयत्वादेर्गुरुत्वादित्यपि द्रष्टव्यमिति संक्षेपः॥

Colophon. इति श्रीमथुरानाथतर्कवागीशविरचिताख्यातवादटिप्पनी समाप्ता।

विषयः। आख्यातशक्तिवादाख्यग्रन्थस्य विवृतिः।

No. 22. आगमतत्त्वविलासः By रघुनाथतर्कवागीशः Substance, country-made paper, 19 x 4 inches. Folia, 427 (the first page is wanting). Lines, 8 on a page. Extent, 13,237 çlokas. Character, Bengali. Date, ? Place of deposit Májpárá, District Dháká, Babu Rásavihári Ráya. Appearance, fresh. Prose and verse. Correct.

Beginning. ॐ गुरुभ्यो नमः।

ॐ नमः श्रीमते तस्मै गुरुदेवाय योगिने।
अशेषासारसंसारसाराय शिवरूपिणे॥
स्वगुरोश्चरणसरोजं
शिरसि सरसिजे स्वरन्मुक्तः श्रीमान्।
आगमतत्त्वविलासं
रचयति रघुनाथतर्कवागीशः॥
तत्र व्यतिक्रमनिबन्धसुधोऽपराधा
ये तान् क्षमध्वमखिलान् मम दैवतानि।
यद्दृष्टयदिह बहुमिह संविहितं मयास्ते
तत्तद्विशोधयत धीरतमा नमो वः॥
स्वतन्त्रतन्त्रं फेत्कारीतन्त्रमुत्तरतन्त्रकम्।
नीलतन्त्रं वीरतन्त्रं कुमारीतन्त्रमुख्यकम्॥
कालीनारायणीतन्त्रे तारिणीतन्त्रमुत्तमम्।
कलातन्त्रञ्च समयातन्त्रं भैरवतन्त्रकम्॥
भैरवीत्रिपुरातन्त्रे वामकेश्वरतन्त्रकम्।

कुक्कुटेश्वरतन्त्रञ्च मातृकातन्त्रमेव च ॥
सनत्कुमारतन्त्रञ्च विशुद्धेश्वरतन्त्रकम् ।
सम्मोहनाख्यतन्त्रञ्च गौतमीयञ्च तन्त्रकम् ॥
बृहद्गौतमीयतन्त्रं भूतभैरवतन्त्रकम् ।
चामुण्डापिङ्गले तन्त्रे वाराहीतन्त्रकं तथा ॥
मुण्डमालाख्यतन्त्रञ्च योगिनीतन्त्रमुत्तमम् ।
मालिनीविजयं तन्त्रं तन्त्रं स्वच्छन्दभैरवम् ॥
महातन्त्रं शक्तितन्त्रं तन्त्रं चिन्तामणिं परम् ।
उन्मत्तभैरवं तन्त्रं त्रैलोक्यसारतन्त्रकम् ॥
विश्वसाराह्वयं तन्त्रं तथा तन्त्रामृताभिधम् ।
महाफेत्कारीतन्त्रञ्च वायवीयञ्च तोड़लम् ॥
मालिनीललितातन्त्रे त्रिशक्तितन्त्रकं तथा ।
राजराजेश्वरीतन्त्रं महामोहस्वरोत्तरम् ॥
गवाक्षतन्त्रं गान्धर्व्वं तन्त्रं त्रैलोक्यमोहनम् ।
हंसमाहेश्वरं हंसपरमेश्वरतन्त्रकम् ॥
कामधेन्वाख्यतन्त्रञ्च तन्त्रं वर्णविलासकम् ।
मायातन्त्रं तन्त्रराजं कुब्जिकातन्त्रमुत्तमम् ॥
विज्ञानलतिकां लिङ्गागमं कालोत्तरं तथा ।
ईशानसंहितां तद्वत् श्रीविनायकसंहिताम् ॥
अगस्त्यसंहितां पुण्यां नन्दिकेश्वरसंहिताम् ।
वशिष्ठसंहितां दक्षसंहितां मनुसंहिताम् ॥
ब्रह्मणः संहितां दिव्यां सनत्कुमारसंहिताम् ।
कुलानन्दसंहिताञ्च वैशम्पायनसंहिताम् ॥
न्टसिंहतापनीयञ्च दक्षिणामूर्त्तिसंहिताम् ।
ब्रह्मयामलकञ्चादियामलं रुद्रयामलम् ॥
बृहद्यामलकं सिद्धयामलं कल्पसूत्रकम् ।
मत्स्यसूक्तं कल्पसूक्तं कामराजं शिवागमम ॥
उड्डीशञ्च कुलोड्डीशमुड्डीशवीरभद्रकम् ।
भूतडामरकं तद्वत् डामरं यक्षडामरम् ॥
कालिकाकुलसर्व्वस्वं कुलसर्व्वस्वमेव च ।
कुलचूड़ामणिं दिव्यं कुलसारं कुलार्णवम् ॥

कुलप्रकाशं वाशिष्ठं सिद्धसारस्वतं तथा ।
योगिनीहृदयं कालीहृदयं मातृकार्णवम् ॥
योगिनीजालकुलकं तथा लक्ष्मीकुलार्णवम् ।
तारार्णवं चन्द्रपीठं मेरुचन्द्रं चतुःशतीम् ॥
तत्त्वबोधं महोग्रञ्च स्वच्छन्दसारसङ्ग्रहम् ।
ताराप्रदीपं सङ्केतचन्द्रोदयमतिस्फुटम् ॥
षट्त्रिंशत्तत्त्वकं लक्षनिर्णयं त्रिपुरार्णवम् ।
विष्णुधर्मोत्तरं मन्त्रदर्पणं वैष्णवामृतम् ॥
मानसोल्लासकं पूजाप्रदीपं भक्तिमञ्जरीम् ।
भुवनेश्वरीपारिजातं प्रयोगसारमुत्तमम् ॥
कामरत्नं क्रियासारं तथैवागमदीपिकाम् ।
बृहच्छ्रीक्रमसंज्ञञ्च तथा श्रीक्रमसंज्ञकम् ॥
नवरत्नेश्वरं सौमभुजगावलिसंज्ञकम् ।
सिद्धान्तशेखरं ग्रन्थं तां गणेशविमर्षिणीम् ॥
मन्त्रमुक्तावलीं तत्त्वकौमुदीं तन्त्रकौमुदीम् ।
मन्त्रतन्त्रप्रकाशाख्यं श्रीरामार्चनचन्द्रिकाम् ॥
शारदातिलकं ज्ञानार्णवं सारसमुच्चयम् ।
कल्पद्रुमं ज्ञानमालां पुरश्चरणचन्द्रिकाम् ॥
आगमोत्तरकं तत्त्वसागरं सारसङ्ग्रहम् ।
देवप्रकाशिनीं तन्त्रार्णवञ्च क्रमदीपिकाम् ॥
तारारहस्यं श्यामाया रहस्यं तन्त्ररत्नकम् ।
तन्त्रप्रदीपं तारायाः विलासं विश्वमातृकाम् ॥
प्रपञ्चसारं तं तन्त्रसारं रत्नावलीं तथा ।
एवं चतुश्शतं ग्रन्थानां स्फुटमागमे ॥
कल्पान् कुमारीकल्पादीन् श्रुतीश्चोपनिषद्गणम् ।
ज्योतिःस्मृतिपुराणानि पाणिनीयादिकौशलम् ॥
गुरूपदेशशुश्रूषाभ्यां विनिष्कृष्यावलम्ब्य च ।
गुरूणाञ्च मतं ज्ञात्वा साधकानां मतं तथा ॥
गुरुं नत्वा गुरुं नत्वा गुरुं नत्वा यथाविधि ।
संक्षिप्तः सर्व्वतन्त्राणां सारमाहृत्य निर्म्मितः ॥
श्रीमांल्लक्षविलासोऽयं वरीवर्त्तु गृहे गृहे ।

उद्दिष्टक्रमोऽत्र दीक्षाया लक्षणं दक्षिणाविधिः ॥
दीक्षाया नित्यकाम्यत्वे दीक्षार्थो योगरूढ़ितः । इत्यादि ।

End. एतेन शिवप्रणीततया आगमशास्त्रस्य निःसन्देहफलकत्वेन सर्व्वदर्शनापेक्षया समुत्कर्षः ॥

— — — — — — — ।

शिवप्रणीतेऽत्र दुरूहशास्त्रे गुरूपदेशाश्रितबुद्धितोऽपि ।
मया समाकृष्य यदत्र बद्धं तस्मिन् सुधीरा मुदमावहन्तु ॥
अस्मिन्नस्मन्निर्म्मिते ग्रन्थरत्ने यत्नेना + नैपुणं सम्प्रणीयम् । (?)
भूयस्तत्र भ्रान्तिसम्मानशान्तेरन्तः सन्तः सन्तु सन्तोषवन्तः ॥

Colophon. इति नपाड़ीयश्रीरघुनाथतर्कवागीशभट्टाचार्य्यविरचिते आगमतत्त्वविलासे पञ्चमः परिच्छेदः । ॐ तत् सत् ।

विषयः । अथ प्रमाणतया उल्लिखितानां तन्त्रादीनां नामकथनम् । अथ गुरूपदेशादिविधिः । मन्त्रविचारविधिः । दीक्षाविधिः । तत्र कालाशुद्ध्यादिनिरूपणम् । चक्रभेदकथनम् । शुद्धमन्त्रविचारः । मन्त्रस्य दशसंस्कारविधिः । अक्षरनिर्णयः । मन्त्राभिधानकथनम् । लक्ष्मीबीजाभिधानकथनम् । स्त्रीबीजाभिधानकथनम् । वर्णाभिधानकथनम् । वर्गाभिधानकथनम् । बीजनिर्णयव्यवस्था । सृष्टिप्रकरणम् । प्रलयवर्णनम् । बीजार्थाभिधानम् । नाड़ीनिरूपणम् । शरीरस्थवायुनिरूपणम् । दीक्षापदार्थनिरूपणम् । अथ गुरुलक्षणकथनम् । स्वप्नलब्धमन्त्रनिरूपणम् । शिष्यलक्षणादिकथनम् । स्त्रीशूद्रयोर्दीक्षायां मन्त्रव्यवस्था । पञ्चाङ्गशुद्धदीक्षानिरूपणम् । देवपर्य्यङ्ककथनम् । राशिचक्रनक्षत्रचक्रादिव्यवस्था । अरिमन्त्रत्यागव्यवस्था । महाविद्यानिर्णयः । मन्त्रोपासनाविवेकः । उपासनाफलकथनम् । मन्त्रदशसंस्कारप्रकरणम् । मातृकामन्त्रक्रमकथनम् । दीक्षाप्रयोगकथनम् । मन्त्रचैतन्यप्रकरणम् । दीक्षान्तरप्रयोगकथनम् । संक्षेपदीक्षाप्रकरणम् । सर्व्वतोभद्रमण्डलविधिः । गुरुशिष्ययोः कृत्यनिरूपणम् । अथ करमालानिरूपणम् । मालाभेदक्रमः । मालासूत्रनियमादिकथनम् । मालाधारणे अङ्गुलिनियमकथनम् । मालासंस्कारादिकथनम् । विशेषतो रुद्राक्षमालाविधिः । महाशङ्खमालासंस्कारादिकथनम् । कपालपात्रशुद्धिनिरूपणम् । अथ यन्त्रसंस्कारविधिः । तिलोदीमुद्राक्रमकथनम् । बलिदानक्रमकथनम् । तत्र छागादिरुधिरदानव्यवस्थादिः । पूजास्थाननिरूपणम् । अशौचादौ सन्ध्यावर्ज्यव्यवस्था । मृताशौचव्यवस्थादिः । क्षौरादिकर्म्मविशेषव्यवस्था । देवताभेदेन वामदक्षिणाचारव्यवस्थादिः । अथ प्रातःकृत्यनिर्णयः । तत्र कालनिर्णयः । स्नानविधिः । सन्ध्याविधिः । तत्र सन्ध्याविधिविवेचनम् । विष्ण्वादिदेवतागायत्रीकथनम् । शक्त्यादिदेवतागायत्रीकथनम् । गायत्रीध्यानप्रकरणम् । अथ वस्त्रादिपरिधानविधिकथनम् । त्रिपुण्ड्रव्यवस्था । पादप्रक्षालनविधिः । कुशविधिः । आचमनविधिः । पुनराचमनविधिः । अथ आसनादि-

विधिः । सलिले आसननियमः । पूजादौ मुखनियमः । भूतशुद्धिनियमः । मातृकान्यासादिविधिः । प्राणायामविधिः । अर्घ्यादिस्थापनविधिः । प्राणप्रतिष्ठाविधिः । अष्टादशोपचारनियमः । षोडशोपचारनियमः । दशोपचारनियमः । पञ्चोपचारनियमः । द्रव्यादिनिवेदनकालविवेचनम् । आसननियमः । पाद्यादिपात्रक्रमकथनम् । धूपनियमः । दीपप्रमाणकथनम् । नैवेद्यनियमः । उपचारपरिभाषा । पूजाकाले गन्धादिद्रव्यदाननियमः । प्रदक्षिणविधिः । नमस्कारविधिः । अथ मुद्रादिक्रमकथनम् । वाद्यनियमादिः । अथ योगाङ्गासनादिविधिः । यन्त्रधारणविधिः । यन्त्रलेखनद्रव्यनियमः । संक्षेपतः सर्व्वदेवनित्यपूजाविधिः । पञ्चायतनीयपूजाविधिः । नैमित्तिकपूजाविधिः । काम्यहोमद्रव्यनिर्णयः । अथ तर्पणविधिः । अथ मारणविधिः । आकर्षणविधिः । वशीकरणविधिः । विद्वेषणविधिः । उच्चाटनविधिः । स्तम्भनविधिः । अभिचारविधिः । षट्कर्मलक्षणकथनम् । अथ भूतोदयविधिकथनम् । भूतमण्डलविधिकथनम् । जपनिरूपणम् । कुल्लुकादिक्रमकथनम् । अथ दशमहाविद्यामन्त्रादिकथनम् । जिह्वादिशोधनविधिः । योनिमुद्रादिमन्त्रार्थनिरूपणं । मन्त्रचैतन्यनिरूपणम् । भूतलिपिविधिः । युगभेदेन जपादिनियमकथनम् । पुरश्चरणविधिः । कूर्मचक्रनिरूपणम् । ग्रहपुरश्चरणविधिः । पुरश्चरणप्रयोगकथनम् । रहस्यपुरश्चरणविधिः । वीरसाधनविधिः । चितादिसाधनविधिः । शवसाधनविधिः । योगिनीसाधनविधिः । मनोहरायोगिनीसाधनविधिः । कनकावतीयोगिनीसाधनविधिः । कामेश्वरीयोगिनीसाधनविधिः । रतिसुन्दरीयोगिनीसाधनविधिः । पद्मिन्यादियोगिनीसाधनविधिः । योगिन्याकर्षणमुद्राक्रमकथनम् । शङ्कटाकिन्नरीसाधनविधिः । यक्षकन्यासाधनविधिः । पिशाचादिसाधनविधिः । योगिन्यादिसाधन कालनिरूपणम् । दृष्टिसिद्धिनिरूपणम् । मन्त्रसिद्धिलक्षणादिनिरूपणम् । मन्त्रदोषादोषकथनम् । मन्त्रदोषशान्तिविधिकथनम् । बालकमन्त्रसंस्कारविधिः । शिवाबलिविधिः । अथ आचारनिरूपणम् । तत्र कुलाकुलवारादिकथनम् । पीठस्थानादिनियमः । स्वयम्भूकुसुमादिविवेचनम् । तत्तत्कुसुमरक्षणविधिः । यन्त्रनियमादिकथनम् । भावरहस्यकथनम् । अन्तर्यागकथनम् । अथ कुमारीपूजादिविधिः । अथ दूतीयागविधिः । कुलपूजाक्रमः । तत्र मदिरादिशोधनविधिः । शक्तिशोधनविधिः । वीरपुरश्चरणविधिः । तत्र पानाधिकारिनिरूपणम् । मांसादिव्यवस्था । अथ वामाचारानुकल्पकथनम् । यन्त्रपात्रादिनिर्णयः । चक्रपादोदकमाहात्म्यादिकथनम् । यन्त्रादिनाशप्रायश्चित्तकथनम् । तत्तत्पूजाधारनिरूपणम् । लिङ्गद्वयादिपूजानिषेधकथनम् । पङ्कशुद्धिनिरूपणम् । कुण्डनिरूपणम् । स्थण्डिलविधिकथनम् । होमविधिकथनम् । तत्र स्रुक्स्रुवादिलक्षणकथनम् । होमद्रव्यनिरूपणम् । वह्निस्थापनादिविधिः । संक्षेपादिहोमप्रयोगकथनम् । अग्नेर्नामकरणादिविधिः । अथ शान्तिविधिः । अथ शान्ताभिषेकविधिः । अथ गणेशपूजाविधिः । सूर्य्यपूजादिविधिः । मार्त्तण्डभैरवपूजाविधिः । इन्द्रादिपूजाविधिः । विष्णुपूजाविधिः । तत्र श्रीरामपूजाविधिः । श्रीकृष्णपूजाविधिः । तत्र रक्षाभिषेकविधिः ।

बालगोपालपूजाविधिः । वासुदेवपूजाविधिः । दधिवामनपूजाविधिः । वराहपूजाविधिः । शिवपूजाविधिः । हरगौरीपूजाविधिः । मृत्युञ्जयपूजाविधिः । अर्द्धनारीश्वरपूजाविधिः । नीलकण्ठपूजाविधिः । चण्डेश्वरपूजाविधिः । चण्डाग्रशूलपाणिपूजाविधिः । मञ्जुघोषपूजाविधिः । अथ आचारनिरूपणम् । आचारस्तवकथनम् । त्र्यम्बकपूजाविधिः । मृतसञ्जीवनीविद्याकथनम् । क्षेत्रपालपूजाविधिः । वटुकपूजाविधिः । लक्ष्मीपूजाविधिः । महालक्ष्मीपूजाविधिः । धनदापूजाविधिः । वागीश्वरीपूजाविधिः । भुवनेश्वरीपूजाविधिः । अन्नपूर्णापूजाविधिः । त्रिपुटापूजाविधिः । त्वरितापूजाविधिः । नित्यापूजाविधिः । वज्रप्रस्तारिणीपूजाविधिः। शूलिनीपूजाविधिः । दुर्गापूजाविधिः । जयदुर्गापूजाविधिः । महिषमर्द्दिनीपूजाविधिः । कालीपूजाविधिः । नव नाममन्त्रभेदकथनम् । गुह्यकालीपूजाक्रमकथनम् । भद्रकालीपूजाक्रमकथनम् । महाकालीपूजाक्रमकथनम् । श्मशानकालीपूजाक्रमकथनम् । तारापूजाक्रमकथनम् । अष्टतारामन्त्रभेदकथनम् । अथ प्रचण्डचण्डिकापूजाक्रमकथनम् । छिन्नमस्तापूजाविधिः । भैरवीपूजाक्रमकथनम् । त्रिपुरसुन्दरीपूजाक्रमकथनम् । श्रीविद्यापूजाक्रमकथनम् । शङ्कटादिपूजाक्रमकथनम् । वगलापूजाक्रमकथनम् । मातङ्गीपूजाक्रमकथनम् । उच्छिष्टचाण्डालिनीपूजाक्रमकथनम् । धूमावतीपूजाक्रमकथनम् । कर्णपिशाचीपूजाक्रमकथनम् । अथ कात्यायनीपूजाक्रमकथनम् । अथ गरुड़मन्त्रादिकथनम् । गरुड़स्तवकथनम् । विषहराग्निमन्त्रकथनम् । अथ हनूमत्कल्पः । अथ आर्द्रपटीविधिः । गणेशस्तवः । हरिद्रागणेशस्तवः । सूर्य्यकवचम् । सूर्य्यस्तवः । श्रीरामस्तवः । रामकवचम् । श्रीकृष्णस्तोत्रम् । गोपालस्तवः । श्रीकृष्णकवचम् । नृसिंहकवचम् । विष्णुनामाष्टकस्तोत्रम् । नारायणोपनिषत् । अपामार्ज्जनस्तोत्रम् । विष्णुस्तवः । सरस्वतीस्तोत्रम् । प्रचण्डचण्डिकास्तोत्रम् । वगलामुखीस्तोत्रम् । अन्नपूर्णास्तोत्रम् । भुवनेश्वरीस्तवः । त्रिपुटास्तवः । दुर्गाशतनामस्तोत्रम् । श्रीविद्यास्तोत्रम् । किङ्किमादिस्तोत्रम् । लक्ष्मीस्तोत्रम् । तारास्तोत्रम् । षोढ़ाकवचम् । महिषमर्द्दिनीस्तोत्रम् । भैरवीस्तवः । शिवस्तोत्रम् । वटुकस्तोत्रम् । मुद्रानिरूपणम् । विशेषतो योगलक्षणादिकथनम् । षट्चक्रनिरूपणञ्च । इति शम् ।

No. 23. **आचारसारतन्त्रम्, वा समयाचारतन्त्रम् ।** Substance, country-made paper, 19×5 inches. Folia, 6. Lines, 10 on a page. Extent, 202 çlokas. Character, Bengali. Date, ? Place of deposit, Májpárá Vikrampur, District Dháká, Babu Rásavihárí Ráya. Appearance, fresh. Mostly verse. Incorrect.

Beginning. ॐ नमो जगन्मात्रे ।

नमामि कालिकां देवीं भक्तानां भक्तवत्सलाम् ।

बालक + + + + + शोभनञ्च कृतं मुदा ॥

अथ सम्बित्स्वीकारविधिः । श्रीदेव्युवाच ।
देवदेव महादेव वद कारुणिक प्रभो ।
कुलाचारस्य माहात्म्यं वद मे करुणानिधे ॥
कुलाचाराम्महादेव महामोक्षः प्रजायते ।
तत्कथं गोपितं देव मम प्राणेश्वर प्रभो ॥
योगिनां किं सदा सेव्यं किमाचारो महेश्वर ।
ममचास्वस्थरणं किं समाधिफलप्रदम् ॥

श्रीशिव उवाच ।

शृणु देवि प्रवक्ष्यामि रहस्यमतिगोपनम् ।
अकथ्यं ते तु चार्व्वङ्गि देवासुरनरेष्वपि ॥
कथयामि तव प्रीत्या गुह्याद् गुह्यतरं महत् ।
श्रुत्वा त्वयापि गोप्तव्यं यत्नेन पद्मपङ्कजे ॥
सम्बिदा चासवश्चैव कालकूटश्च धूस्तुरम् ।
निम्बपवमहिफेनं तरिता नारिता तथा ॥
सम्बिदा सर्व्वसिद्धीनां कारणं परमं पदम् ।
त्रैलोक्यविजयाजज्ञानमेतत् त्रैलोक्यदुर्लभम् ॥ इत्यादि ।

End. इत्यन्तर्यजनं कृत्वा साक्षात्ब्रह्ममयो भवेत् ।
सप्तजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति ॥
योनिस्थभगलिङ्गाम्रतं गृहीत्वा पात्रे संस्थाप्य मूलमन्त्रमष्टोत्तरशतं जप्त्वा मूलेनेदं भगलिङ्गामृतममुकै नमः । ततः क्रोड़े शक्तिं कृत्वा जपेत् ।

Colophon. इति यजनविधिः ॥

विषयः । कौलिकानामाचारनिरूपणम् । तत्रादौ सम्बिदास्वीकारविधिकथनम् । तच्छोधनमन्त्रादिकथनम् । दुग्धादिसंयुक्तसम्बिदापाने फलविशेषकथनम् । त्रिकट्वादिचूर्णमिश्रितघृतभर्ज्जितविजयापानफलमाहात्म्यकथनम् । पञ्चतत्त्वविधिकथनम् । मद्यादिशोधनविधिकथनम् । सुराध्यानादिकथनम् । स्वयम्भूकुसुमशोधनविधिः । पूजाविधिकथनपूर्व्वकं गुरुस्तोत्रकथनम् । पात्रसंख्यानिरूपणम् । पूजाकालं विना पाननिषेधकथनम् । पात्रवन्दनादिविधिः । पशो वर्ज्जनीयकथनम् । शक्तिं विना पाननिषेधकथनम् । पात्रपरिमाणादिकथनम् । कौलिकलक्षणकथनम् । शक्तिशोधनविधिः । रहस्यपुरश्चरणविधिश्च । इति ।

No. 24. आत्मप्रकाशव्याख्या । By काशीरामवाचस्पतिः. Substance, country-made paper, 14×3 inches. Folia, 25. Lines, 9 on a page. Extent, 900 çlokas. Character, Bengali. Date, S'aka 1770. Place of deposit, Viṣṇupur, District Bā̃kura, Paṇḍita Raghuráma Tarkaratna. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीहरिः शरणम् ॥

नीलोत्पलदलश्यामं राधिकाकेलिलालसम् ।
नमामि शिरसा श्रीमन्नन्दनन्दनमद्वयम् ॥
भट्टाचार्य्यशिरोधार्य्यन्यायालङ्कारसूनुना ।
आत्मप्रकाशकव्याख्या काशीरामेण तन्यते ॥

सत्यज्ञानानन्दात्मकमद्वितीयं ब्रह्मैव शुद्धसत्त्वप्रधानमायोपाधिकं ईश्वरभावं मलिनसत्त्वप्रधानाविद्योपाधिकं जीवभावञ्च जगाम । तथाहि मायाभासेन जीवेशौ करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिः ।

End. पितेत्यादि तथाचोक्तम् । पितासि लोकस्य चराचरस्य ... जगतो माता धाता पितामहः

त्वमस्य पूज्यश्च गुरु र्गरीयान् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते । सनातनस्त्वं पुरुषो मतो मे इत्यादि । हृद्यमिति । एतत् हृद्यं प्रियं प्रकथितं यत एतज्ज्ञात्वा सङ्कटात् संसारात् दुःखाद्वा मुच्येत इत्यर्थः । तथाचोक्तं य आत्मानं विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय संसारमनुसंसरेदित्यादि दुःखेनात्यन्तं विमुक्तश्चरतीत्यादि च । किमिच्छन्नित्यनेन स्वेच्छया कस्य कामाय इत्यनेन च परकीयेच्छया संसारानुसरणं परिहृतमिति भावः ॥ इत्यास्तां विस्तरः ॥

ताम्बूलानां चतुष्कं मृदुशिशिरतरं चन्दनञ्च द्विजानां
धीराणामग्रतो यो नरपतितिलकात् श्रीलगोपालसिंहात् ।
लेभे मल्लावनीशात् बुधवररचितग्रन्थटीकां महार्थां
भट्टाचार्य्यार्य्यमूर्द्धामलमणिमुकुटस्यात्मजः स व्यतानीत् ।
श्रीश्रीजाने दयाधाने चरणाब्जतले तव ।
श्रीकाशीरामकृतिना कृतिरेषा समर्पिता ॥

Colophon. इत्यात्मप्रकाशकव्याख्या समाप्ता ॥०
लिखिता श्रीरामरामेण शकाब्दा १७७० ।

विषयः । आत्मप्रकाशकनामकवेदान्तग्रन्थस्य व्याख्यानम् ।

No. 25. आत्ममनोयोगविचारः By मथुरानाथः. Substance, country-made paper, 18×3 inches. Folia, 2. Lines, 9 on a page. Extent, 82 çlokas. Character, Bengali. Date, ? Place of deposit, Brámhaṇa-maṇḍalí, Paṇḍita Ráma-náráyáṇa Bhaṭṭácárrya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो हिमगिरिकन्यायै। आत्मात्ममनोयोगशरीरत्वङ्मनोयोगाः ज्ञानसामान्यहेतवः। तत्रात्मा समवायिकारणम्। आत्ममनोयोगस्त्वसमवायिकारणम्। इत्यादि।

End. यद्यपि संयोगसम्बन्धेनैवात्मत्वेन प्रतिबन्धकत्वकल्पनया उक्तगौरवानवकाशादित्यलं पल्लवितेन॥

Colophon. इत्यात्ममनोयोगविचारः॥

विषयः। आत्मना सह मनसो योग एव ज्ञानमुत्पद्यते नान्यथेत्यादीनां विचारः।

No. 26. आनन्दलहरीटीका By गोपीरमणतर्कपञ्चाननः। Substance, country-made paper, 14×3 inches. Folia, 29. Lines, 6 on a page. Extent, 661 çlokas. Character, Bengali. Date, ? Place of deposit, Çubhádhyá, Dháká, Paṇḍita Kálí-candra Vidyálaṃkára. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय।

यत् पादपद्मयुगलं विधिविष्णुभर्गैः
सेव्यं सदा पुटितपाणिभिरुत्तमाङ्गैः।
सृष्टिस्थितिप्रलयकारण + + प्रयत्नै-
स्तस्मिन् मनः प्रविश चाखिलकार्य्यहीनम्॥
श्रीमदानन्दलहरीटीका सा प्रवितन्यते।
मन्त्रादिपद्यो यत्नात्ते गोपीरमणशर्म्मणा॥

शिव इत्यादि। हे शिवे त्वां स्तोतुं प्रणन्तुं वा कथमकृतपुण्यः प्रभवति। हर्य्यादिभिरप्याराध्यां कथमित्याह शिव ईश्वरः शक्त्या युक्तो यदि भवति तदा प्रभवितुं शक्तो नैवं देवदेवोऽपि शिवः स्पन्दितुमपि न कुशलः॥ इत्यादि।

End. तेन दीप्तं प्रकाशितं मञ्जीरेण शोभितं चरणं यस्यास्तथा। इति।

यत्पुण्यं ग्रन्थनिर्म्माणकौशलेनार्ज्जितं मया।
तेनार्पितेन पदयोः प्रीयतां परमेश्वरी॥

Colophon. इति महामहोपाध्यायश्रीगोपीरमणतर्कपञ्चाननभट्टाचार्य्यकृतानन्दलहरी-टीका समाप्ता ।

विषयः । शङ्कराचार्य्यकृतानन्दलहरीनामकदेवीस्तोत्रस्य व्याख्यानम् ।

No. 27. आनन्दलहरीटीका, समूला । By जगन्नाथचक्रवर्त्ती. Substance, country-made paper, $14\frac{1}{2} \times 3$ inches. Folia, 51. Lines, 5 on a page. Extent, 1,131 çlokas. Character, Bengali. Date, ? Place of deposit, Práṇimaṇḍal, Post office Májpárá, Thána Çrínagar, District Dháká, Bábu Kṛiṣṇa-kumár Caṭṭopádhyáya. Appearance, new. Prose and verse. Generally correct.

Beginning. शिवः परमात्मस्वरूपः शक्त्या प्रकृत्या युक्तो भवति यदि तदा प्रभवितुं जगदुत्पादने प्रभुर्भवितुं शक्तो भवति । तदुक्तं वामकेश्वरतन्त्रे ।

परोऽपि शक्तिरहितः शक्तः कर्त्तुं न किञ्चन ।
शक्तस्तु परमेशानि शक्त्या युक्तो भवेद्यदि ॥

न चेदिति । शक्त्या युक्तो न चेद्देवः शिवः स्पन्दितुं किञ्चिच्चालयितुमपि न कुशलः न समर्थः । जगदुत्पादने का कथा । अतः कारणात् हरिहरविरिञ्च्यादिभिरप्याराध्यां त्वां स्तोतुं प्रणन्तुं वा कथमकृतपुण्यो जनः प्रभवति । अकृतपुण्यानामदीक्षितानामधिकारिता नास्तीति भावः । तदुक्तं यामले । अष्टं विद्यासमं तेषां जलं सूत्रसमं यतः । इदानीमनेन मन्त्रोऽपि केनचिद्व्याख्यायते । यथा शिवः हकारः शक्तिः सकारो विसर्गविन्दुरप्यत्र बोध्यः तेन युक्तो यदि भवति तदा प्रभवितुं सर्व्वमन्त्राणामाद्यो भवितुं शक्तः एवं न चेत् अनुस्वारविसर्गयोर्मिलनं न चेत् तदा स्पन्दितुमपि न कुशलः तदुक्तं गोरक्षसंहितायां ।

सङ्कोचपरमा शक्तिर्विकाशपरमः शिवः ।
सङ्कोचस्य विकाशस्य द्वन्द्वमेवाक्षरद्वयम् ॥

यद्वा शिवः ककारादिक्षकारान्तवर्णः शक्तिः षोड़शस्वराः तया युक्तो यदि भवति तदा प्रभवितुं वेदादिविद्यादिरूपेण शब्दार्थसृष्टिं स्पष्टीकर्त्तुं शक्तो भवति एवं न चेत् स्पन्दितुमपि उच्चारणविषयीभवितुमपि न कुशलः । इत्यादि ।

End. हिमगिरीधरस्य हिमालयस्य कन्यकात्वेनाख्या संज्ञा यस्य तादृशं पार्व्वती-संज्ञकं इदं ज्योतिर्भजामीत्यर्थात् कीदृशं भक्तैरिव शोभमानं चरणं यत्र

वलिभिः शोभमानं मध्यं यच हारेणाभिरामौ मनोज्ञौ कुचौ यच अम्बुज-
श्चानि पद्मानीवायतानि दीर्घाण्यचीणि यच लीलाविलासविशिष्टा
अलकाघूर्णकुन्तला यच ज्ञानस्य प्रदीपं प्रकाशकं ईश्वरः शिव एव दीपस्तेन
दीप्तं प्रकाशितं कल्पितमिति यावत्। या मनसोऽगम्यस्य ज्योतीरूपस्य पर-
ब्रह्मणः पार्व्वतीसंज्ञात्वेन साकारतया प्रकाशः शिवेन ध्यानार्थं कल्पितः।
तथाच निर्गुणस्याशरीरिणः साधकानां हितार्थाय ब्रह्मणो रूपकल्पनेति॥

Colophon. इति श्रीसामन्तसारनिलयजगन्नाथचक्रवर्त्तिकृतानन्दलहरीटीका समाप्ता॥

विषयः। शङ्कराचार्य्यकृतानन्दलहर्य्या व्याख्यानम्। अत्र च ग्रन्थकारेण प्रसङ्गात् वामके-
श्वर-वीर-सिद्धेश्वरतन्त्र-वशिष्ठसंहिता-गोरचसंहिता-कालिकापुराण गन्धर्व्व-
मालिका यामल-शारदादिभ्यः प्रामाणिकग्रन्थेभ्यः समुद्धृतानि कतिचित्
प्रमाणवचनानि।

No. 28. आनन्दलहरीटीका, तत्त्वदीपिका। By गङ्गाहरिशर्म्मा. Substance, country-made paper, 14×2 inches. Folia, 38. Lines, 8 on a page. Extent, 1,216 çlokas. Character, Bengali. Date, ? Place of deposit, Dháká, Vikramapura, Vajrayogini, Paṇḍita Dváraká-nátha Tarkabhúshaṇa. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय।
नत्वा गुरुं गणपतिं देवीं त्रिपुरसुन्दरीम्।
तन्त्राण्यथ समालोक्य ज्ञात्वा गुरुमतं ततः॥
युक्त्या च स्वयमारोप्य श्रीगङ्गाहरिधीमता।
आनन्दलहरी-तत्त्वदीपिका क्रियते मुदा॥
इह खलु शक्तिखण्डनं विकुर्व्वतः श्रीशङ्कराचार्य्यस्य सर्व्वाणीन्द्रियाणि विकु-
ण्ठितान्यासन् पुनरपि कारुण्यवारांनिधेर्जगदम्बिकायाः कृपया हततद्रूपा-
मेकलप्रभावः सर्व्वं शक्त्यधीनमेवेति निश्चित्य तां स्तौति शिव इति। अत्र
युष्मच्छब्दीयद्वितीयान्तषष्ठ्यन्तपदयोरादौ सम्बोधनान्तपदं विना स्थिते-
रभावात् सम्बोधनान्तपदमाचिप्यते। हे शिवे इति। इत्यादि।

End. ईश्वरदीपदीप्तं ईश्वर एव दीपः प्रकाशकः तेन दीप्तं प्रकाशितं शिवं विना
त्वन्माहात्म्यं न कोऽपि जानातीत्यर्थः॥
एवं कृता मया धीर दीपिकेव प्रकाशिका।
दृष्ट्वा सम्यग् यथान्यायमध्यापय यथासुखम्॥

Colophon. इति श्रीगङ्गाहरिविरचिता तत्त्वदीपिका समाप्ता ।

विषय: । शङ्कराचार्य्यकृतानन्दलहरीनामकदेवीस्तोत्रस्य व्याख्यानम् ।

No. 29. आनन्दलहरीरहस्यप्रकाशः By जगदीशपञ्चाननः । Substance, country-made paper, 20×4 inches. Folia, 41. Lines, 6 on a page. Extent, 1,845 çlokas. Character, Bengali. Date, S'aka 1570. Place of deposit, Naiháṭi, Paṇḍita Haraprasáda Çástrí. Appearance, old. Generally correct.

Beginning. ॐ नमो गणेशाय । शङ्करचरणसरोजं श्रीजगदीशद्विजो नत्वा ।
शङ्करकविवरसूक्तौ सरसरहस्यं प्रकाशयति ॥
श्रीशङ्कराचार्य्यः शक्तिप्राधान्यं व्यवस्थापयन् श्रीत्रिपुरसुन्दरीस्तवमारभते
शिवः शक्त्येत्यादिना ।

End. चरणमारभ्यैव देवशरीरं वर्णनीयमित्यालङ्कारिकाः लीलारूपा अलङ्कारस्य
तन्वीनामकं ईश्वरदीपदीशं ईश्वररूपो यो दीपः स एव दीपः प्रकाशो
यस्याः ईश्वरोऽपि तया प्रकाश्यते इति वाक्यार्थ इति शिवम् ॥

Colophon. इति श्रीजगदीशपञ्चाननभट्टाचार्य्यविरचित आनन्दलहरीरहस्यप्रकाशः
सम्पूर्णः ॥
शुभमस्तु शकाब्दा १५७० तारिख ११ चैत्र ॥ ॥ श्रीगोपालशर्म्मणः स्वाक्षर-
मिदं । हरये नमः ।

विषय: । शङ्कराचार्य्यकृतानन्दलहरीनामकदेवीस्तोत्रस्य टीका ।

No. 30. आनन्दवृन्दावनचम्पूः By कविकर्णपूरः । Substance, country-made paper, $10\frac{1}{2} \times 7\frac{1}{2}$ inches. Folia, 371. Lines, 10 on a page. Extent, 10,202 çlokas. Character, Bengali. Date, ? Place of deposit, Tippera, Maháraja's Library. Appearance, new. Verse. Generally correct.

Beginning. वन्दे कृष्णपदारविन्दयुगलं यस्मिन् कुरङ्गीदृशां
वक्षोजप्रणयीकृते विलसति स्निग्धोऽङ्गरागः स्वतः ।
काश्मीरं तलशोणिमोपरिततं कस्तूरिकानीलिमा
श्रीखण्डं नखचन्द्रकान्तिलहरी निर्व्याजमातन्वते ॥ इत्यादि ।

End. स्थितो वृन्दारण्ये सततमपि नाभिर्मधुपुरीं
गतश्वासीं तद्विरहवजमध्यारचितवान् ।
अतोऽतर्क्यैश्वर्य्ये गुरुमहिमनि श्रीभगवति
प्रजेश्वर्य्याः सूनौ न किमपि विचित्रं विलसति ॥

चैतन्यप्रभुकरुणोदितवाग्विभूति
सम्भावजीवनधनस्य जनस्य पुत्रः ।
श्रीनाथपादकमलस्मृतिशुद्धबुद्धि
स्सम्पूर्णमिमां रचितवान् कविकर्णपूरः ॥

Colophon. इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे दोलोत्सवो नाम द्वाविंशतिः स्तवकः । समाप्तश्चायमानन्दवृन्दावनाभिधो ग्रन्थः ।

विषयः । वृन्दावनादिवर्णनं श्रीकृष्णस्य बाल्यलीलावर्णनं, श्रीकृष्णस्य कैशोरलीलादिवर्णनञ्च ।

No. 31. आयुर्व्वेदसारावली By धन्वन्तरिकारः । Substance, country-made paper, 16×3 inches. Folia, 619. Lines, 4 on a page. Extent, 8,975 çlokas. Character, Bengali. Date, ? Place of deposit, Kelomál Tamluk, Babu Sáradá-prasanna Ghoṣa. Appearance, fresh. Verse. Generally correct.

Beginning. नमः शिवाय । गुरोश्चरणपङ्कजं हृदि निधाय बद्धाञ्जलि-
र्नमामि गणनायकं तदनु देवचण्डद्विषं ।
मुरारिचरणाम्बुजं वरदमष्टमूर्त्तिं शिवं
शिवापदसरोरुहं दुरितहारि भक्त्या नतः ॥
आयुर्व्वेदविलासिभिर्विरचितान्यादाय वैशेषिकै-
र्बह्वर्थान् बहुशास्त्रतो वरधिया शास्त्राणि सद्भिः पुरा ।
तान्यालोक्य निबध्यते परहितोपादानकौतूहलैः
श्रीधन्वन्तरिणा करेण भिषजामायुर्व्वेदसारावली ॥
स्वेदौषधादिपरिणामविनिर्णयाख्या
पौष्यादिकाजकतलक्षणलक्षणेयं ।
शारीरपथ्यनिदाननिदानबन्ध-
सारावली मृदुलमञ्जुलवाग्विसिद्धा ॥
नाड़ीज्ञानं समाविश्य रोगसाधनकारणं ।
ततोऽन्यलक्षणं दृष्ट्वा चिकित्सामाचरेत् भिषक् ॥

End. देवदारुकषायञ्च पिबेन्मूत्रेण मानवः ।
विम्लायनाहते चापि स्नेहग्रन्थिक्रमो चितः ॥

कुलत्थोषणपिन्याकपिष्टेश्चोपनाहनम् ।
भोजनं कटु तीक्ष्णोष्णं श्लेष्मवृद्धिमुपाचरेत् ॥

Colophon. अतःपरं खण्डितत्वात् समाप्तिवाक्यं नोपलभ्यते ।

विषयः । शरीरोत्पत्तिनिरूपणम् । नाडीव्यवस्थादिनिरूपणम् । सप्तधातुक्रमनिरूपणम् । ज्वरजनकशरीरनिरूपणम् । कफज्वरादिलक्षणम् । पाटोलादिपाचननिरूपणम् । महाज्वराङ्कुशादिनिरूपणम् । वातश्लेष्मलक्षणादिनिरूपणम् । मेघनादरसादिनिरूपणम् । द्वादशाङ्ग-पाचनादिनिरूपणम् । राजचण्डेश्वररसादिनिरूपणम् । सन्निपातचिकित्सादिः । जीर्णज्वरलक्षणादिः । विषमज्वरान्तकलौहादिनिरूपणम् । असाध्यलक्षणादिकथनम् । पथ्यापथ्यादिनिरूपणम् । मुष्टियोगादिनिरूपणम् । मुनिकण्टकचाङ्गेरीघृतादिनिरूपणम् । विड्भ्रंशलक्षणादिनिरूपणम् । विश्वचिद्दर्पहाररसादिनिरूपणम् । लौहामृतादिनिरूपणम् । पुनर्नवादितैलनिरूपणम् । वासाद्यद्राक्षाघृतादिनिरूपणम् । चन्द्रामृतरसादिनिरूपणम् । कनकसुन्दररसादिनिरूपणम् । चन्द्रशेखररसादिनिरूपणम् । त्रिदोषच्छर्दिलक्षणादिकथनम् । तृष्णारोगचिकित्सादिः । अजीर्णपानविभ्रमादिमदात्ययचिकित्सादिनिरूपणम् । दशमूलकल्याणघृतादिनिरूपणम् । मन्दोपशाचिकघृतादिनिरूपणम् । कुष्माण्डघृतादिनिरूपणम् । वृहच्छागलाद्यघृतादिनिरूपणम् । त्रयोदशाङ्गगुग्गुलादिनिरूपणम् । वृहद्विष्णुतैलादिनिरूपणम् । महासुगन्धिलक्ष्मीविलासतैलादिनिरूपणम् । वातामयचिकित्सादिनिरूपणम् । वातरक्तचिकित्सादिनिरूपणम् । अमृतार्णवतैलादिनिरूपणम् । नागबलातैलादिनिरूपणम् । महद्गुडूचीतैलादिनिरूपणम् । उरुस्तम्भचिकित्सानिरूपणम् । आमवातचिकित्सादिनिरूपणम् । शूलरोगचिकित्सादिनिरूपणम् । उदावर्त्तचिकित्सादिनिर्णयः । रक्तोद्भवगुल्मचिकित्सादिनिरूपणम् । अश्वगन्धाघृतादिनिरूपणम् । श्लेष्मोदरसलक्षणचिकित्साविधिः । वृहच्छीतलकघृतादिनिरूपणम् । वातिकशोथलक्षणादिः । शुष्कमूलाद्यतैलादिनिरूपणम् । दन्तवृद्धिव्रध्नचिकित्सादिश्चेति ।

No. 32. उज्ज्वलनीलमणिः, सटीका । By जीवगोस्वामी. Substance, country-made paper, 16 × 8 inches. Folia, 152. Lines, 20 on a page. Extent, 6,080 çlokas. Character, Nágara. Date, ? Place of deposit, Benares city, Khálispurá Paṇḍita Priyanátha Tattvaratna. Appearance, new. Generally correct.

Beginning. श्रीकृष्णाय नमः ॥ नामाकृष्टरसज्ञः शीलेनोद्दीपयन् सदानन्दं ।
निजरूपोत्सवदायी सनातनात्मा प्रभुर्जयति ॥
मुख्यरसेषु पुरा यः संक्षेपेणोदितो रहस्यत्वात् ।
पृथगेव भक्तिरसराट् सविस्तरेणोच्यते मधुरः ॥

टीकाया — श्रीराधागोविन्ददेवो जयतां । स्विद्यन् दृगन्तचपलाञ्चलवीजितोऽपि
क्षुभ्यन् सकाम्बिनगरान्तरवासितोऽपि ।
तृष्यन् मुहुः स्मितसुधापरिपायितोऽपि
श्रीराधया प्रणमयन् प्रमदं हरिर्नः ॥

End. अयं उज्ज्वलनीलमणिगद्धनमहाघोषसागरप्रभव भजत नवमकरकुण्डल-
परिसरमेवोचितिं देव ।

Colophon. इति श्रीसम्भोगभेदः सम्पूर्णोऽयं उज्ज्वलनीलमणिग्रन्थः ।

विषयः । अलङ्कारग्रन्थोऽयं । अत्र च भगवद्भक्तिविषयकमेवोदाहरणं प्रदर्शितं ।

No. 33. उज्ज्वलनीलमणिविवृतिः, By वल्लभः. Substance, country-made paper, 12 x $4\frac{1}{2}$ inches. Folia, 24. Lines, 8 on a page. Extent, 432 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhálpárá, *via* Naiháṭi, Rámatáraṇa Thákur. Appearance, old. Prose. Incorrect.

Beginning. श्रीराधाकृष्णौ जयेतां ॥ सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभोऽनुजः सोऽयं श्रीरूपो जीवसद्गतिः ॥
श्रीभक्तिरसामृतसिन्धौ जाते प्रवाह इव लोके ।
उज्ज्वलनीलमणौ मम लोचनरोचन्यसौ विवृतिः ॥
तथाहि स एव रसामृतसिन्धुप्रकाशकः । पूर्वं पूर्वस्मादप्यपूर्वमुज्ज्वलाख्यं
रसं किञ्चिदेव विवृत्य कृतकृत्यतां मन्यमानः सम्प्रति पिबत भागवतं रस-
मिति न्यायेन व्यङ्ग्यव्यञ्जकयोरभेदं व्यञ्जयन्नुज्ज्वलनीलमणिनामानं ग्रन्थं
विधाय तं रसमतीव विवृण्वन् श्रीमन्निजदैवतमपि श्रीमन्तं निजगुरुमपि
तन्त्रेण स्तुवन् प्रार्थयते । नाम्नाकृष्टेति । तत्र निजदैवतपक्षे नाम्ना नाम-
मात्रेणाकृष्टास्तद्वतारावतारिभक्तिरसिका येन सः । तथा शीलेन
सुखभावेन सदा नित्यमेव श्रीमन्नन्दनामानं स्वपितरमुद्दीपयन् उद्दीप्तभावं
कुर्वन् तथा निजेन रूपेण सौन्दर्य्येण सर्व्वेभ्य एव उत्सवदायी तथा सना-
तनो नित्यः आत्मा श्रीविग्रहो यस्य सः । प्रादुर्भावमात्रेण लब्धजन्मादि-
व्यवहार इति भावः । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । उज्ज्वलनीलमणिनामकालङ्कारग्रन्थस्य टीका ।

No. 34. उणादिवृत्तिः By दुर्गसिंहः Substance, country-made paper, 15 × 2 inches. Folia, 31. Lines, 5 on a page. Extent, 562 çlokas. Character, Bengali. Date, ? Place of deposit, District Dháká, Váḍḍánagar, Post Office Pilkháná, Paṇḍita Kailása-candra Tarkaratna. Appearance, old. Prose. Correct.

Beginning. ॐ नमः शिवाय ।

नमस्कृत्य शिवं भूरिशब्दसन्तानकारणम् ।
उणादयो विधास्यन्ते बालव्युत्पत्तिहेतवे ॥
कृ-वा-पा-जि-मि स्वदि-साध्य-शू-दू-सनि जनि-चरिभ्य उण् ॥
एभ्य उण् परो भवति । डु कृञ्करणे करोतीति कारुः शिल्पी । वा गति-गन्धयोः वायुः समीरणः । इत्यादि ।

End. असोभोऽन्तश्च । अस्मादसुन् परो भवति । अश्नात्यम्भः सलिलं । आसुरः । अस्मादसुन् परो भवति । उराद्देश्च । उरो वक्षः ॥

Colophon. इति दौर्गसिंह्यां वृत्तौ उणादौ चतुर्थः पादः समाप्तः ।

विषयः । कातन्त्रानुक्तानामुणादिप्रत्ययानां विधानकथनं । प्रयोगादिश्च ।

No. 35. उत्तरतन्त्रम् । Substance, country-made paper, 18 × $4\frac{1}{2}$ inches. Folia, 22. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, Váḍari Mayamansiñha, Ráma-kamala Bhaṭṭ-ácáryya. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय । ॐ नमः परमदेवतायै ॥ देव्युवाच ।

वक्षःस्थलसमासीना देवी पप्रच्छ शङ्करम् ।
भगवन् साधकानाञ्च कथयस्व क्रियाविधिम् ॥
तन्त्राणि सर्व्वतन्त्राणि यामलादीनि वै प्रभो ।
कुत्रापि न श्रुता नाथ क्रियाया विधिरुत्तमम् ॥

End. यज्ञीयकाष्ठसम्भूते खन्ने वापि सुन्दरि ।
पातयेच्छोणितं देवि बीजमन्त्रैर्निवेदयेत् ॥
बलिप्रकार उद्दिष्टो वाराहीसंहिताक्रमात् ।
एतत्ते कथितं देवि बलिदानं सुशोभनम् ।
नव स्नेहान्महादेवि किमन्यत् कथयामि ते ॥

Colophon. इत्युत्तरतन्त्रे देवीश्वरसम्वादे बलिदानप्रसङ्गे षोड़शः पटलः ॥

विषयः । प्रयोगविध्यादिनिरूपणम् । शास्त्रनिन्दादिदोषकथनम् । महाविद्यादीनां पूजनादिनिरूपणम् । भगलिङ्गमाहात्म्यकथनम् । स्नानादिकर्म्मनिरूपणम् । गृहस्थाचारादिनिरूपणम् कर्म्मकालादिनिरूपणम् । प्रश्नोत्तरपदनिरूपणम् । भावनिरूपणम् । पुरश्चरणादिनिरूपणम् । बलिदानादिनिरूपणञ्च ।

No. 36. **उद्धवसन्देशकाव्यम्,** By **रूपगोस्वामी ।** Substance, country-made paper, 12 × 4 inches. Folia, 12. Lines, 11 on a page. Extent, 395 çlokas, Character, Bengali. Date, ? Place of deposit, Visnupura, District Bāँkurá, Pandita Candranáráyana Bhattácāryya. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीश्रीराधाकृष्णः ॥

सान्द्रीभूतैर्नवविटपिनां पुष्पितानां वितानै
र्लक्ष्मीवत्तां दधति मथुरापत्तने दत्तनेत्रः ।
कृष्णः क्रीड़ाभवनवड़भीमूर्ध्नि विद्योतमानो
दध्यौ सद्यस्तरलहृदयो गोकुलारण्यमैत्रीम् ॥

End. गोपेन्द्रस्य व्रजभुवि सखे केवलं यात्रया ते
नाथः सिध्येन्मम बहुमतः किन्तु वाढं तवैव ।
प्रेमोल्लासं परिकलयता गोपसीमन्तिनीनां
स्मर्त्तव्या मे सपदि भवता भारतीसारवेयं ॥
गोष्ठक्रीड़ोल्लसितमनसो न व्यलीकानुरागात्
कुर्व्वाणस्य प्रथितमथुरामण्डले ताण्डवानि ।
भूयो रूपाश्रयपदसरोजन्मनः स्वामिनोऽयं
तस्योद्गारं वहतु हृदयानन्दपूरं पुरस्तः ॥

Colophon. इति श्रीमद्रूपगोस्वामिना विरचितं उद्धवसन्देशं नाम काव्यं समाप्तं ॥

विषयः । गोकुलविरहविधुरेण कृष्णेण दौत्यकर्म्मकरणाय गोकुले प्रेरितस्योद्धवस्य गोपिकानां समीपे कृष्णोक्तसन्देशकथनम् ।

No. 37. **एकादशीविवेकः,** By **शूलपाणिः ।** Substance, country-made paper, 13 × 3 inches. Folia, 3. Lines, 6 on a page. Extent, 76 çlokas. Character, Bengali. Date, Sk., 1763. Place of deposit, Brámhana Mandalí *via* Bárásat, Pandita Rámanáráyana Bhattácáryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ कृष्णाय नमः । अथैकादशीविवेकः ।
नोपोष्या द्वादशीविद्धा सदैवैकादशी नरैः ।
तामुपोष्य नरो जह्यात् पुण्यं वर्षसमुद्भवम् ॥

End. क्षये पूर्व्वा तु कर्त्तव्या वृद्धौ कार्य्या तिथिः परा ।
षण्मुहूर्त्तापि सन्त्यज्या या तिथिः क्षयगामिनी ॥
त्रिमुहूर्त्तापि कर्त्तव्या या तिथि र्वृद्धिगामिनी ॥ ० ॥

Colophon. इति शूलपाणिविरचित एकादशीविवेकः समाप्तः ॥ शाके अग्निरसाम्बुधि शून्यमाने । १७६३ ॥

विषयः । एकादशीव्यवस्थादिकथनम् ।

No. 38. **कपिलादानम् ।** Substance, country-made paper, $13 \times 1\frac{1}{2}$, inches. Folia, 2. Lines, 3 on a page. Extent, 14 çlokas. Character, Bengali. Date, ? Place of deposit, Vidyákúṭa, District Tripurá, Bábu Kedáranátha Bhaṭṭácáryya. Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ कपिलादानम् । कपिलां धेनुं प्राङ्मुखीमवस्थाप्य पठेत् ॐ या लक्ष्मीः सर्व्वभूतानामित्यादि ।

End. इमां साक्षादनां कपिलां धेनुं विष्णुदैवताकां अमुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । परार्थंचेत् ददानीति विशेषः ।

Colophon. इति धेनूत्सर्गः समाप्तः ।

विषयः । धेनूत्सर्गविधानकथनम् ।

No. 39. **कर्पूरादिस्तवटीका,** By **नन्दरामः ।** Substance, country-made paper, $13\frac{1}{2} \times 3$ inches. Folia, 7. Lines, 7 on a page, Extent, 201 çlokas. Character, Bengali. Date, Sk., 1766. Place of deposit, Háḍiyá, Post Vaidyerbázár, District Dhákà, Paṇḍita Rámanáráyaṇa Bhaṭṭácáryya. Appearance, new. Prose. Generally correct.

Beginning. ॐ नमः परमदेवतायै ।
ख्याता कर्पूरादिभूता विषमा कालिकास्तुतिः ।
श्रीनन्दरामसुकृती तस्या वि ... ... इतीः ॥
तत्र प्रथमं कालीबीजोद्धारमाह कर्पूरमिति अनुस्वारान्तं नाम तत् कीदृशं

मध्यमान्तस्वरपररहितं मध्यमौ च अकारोकारौ अन्त्यश्च अकारः ते च तै स्वराश्चेति पश्च रश्च परौ ततः ते च परौ च ताभ्यां रहितं तेन क्रं पुनः सेन्दु इन्दुना नादेन सहितं वामाक्षियुक्तं ईकारसहितं एतेन कालीबीजमात्रोद्धारः सर्व्वसम्मतः एतद्बीजस्य ...... अन्यत् सुगमं। ननु स्वरापेक्षया स्वरस्यादिमध्यान्तता न व्यञ्जनापेक्षया तथात्वे मध्यमः स्वरः ऊकारः अन्त्यस्वरस्तु रेफाद्बहिरकारः अनयो राहित्ये कथमकारान्तस्य ककारस्य परवर्णेन युक्तता सम्भवति व्यञ्जनवर्णस्यैव परयुक्तत्वात् इत्याह मध्यमान्त्येति एतन्मध्ये च तद्रहितं तेन मध्यपदेनाद्यवर्णद्वयं हित्वा यावत् स्वरपरित्यागः। मान्त्य इति बिन्दुरूपो मकारः। तदन्ते इति तेषां मुखकुहराद्वाच एव गद्यपद्यानि च उल्लसन्ति वाङ्मात्राण्येव गद्यपद्यमयानि भूत्वा निःसरन्ति ननु देवी वाग् देवतानामेव इत्याह सर्व्वसिद्धिं गतानां सर्व्वा अणिमाद्या अष्टौ सिद्धयो यस्य स सर्व्वसिद्धिर्महेशस्तं प्राप्तानां। इत्यादि॥

End. हे मातर्वशी जितेन्द्रियः सन् हविष्यभोजनरतः लक्षं मन्त्रं दिवा प्रजपति कीदृशः युष्मच्चरणयुगलध्याननिपुणः भवच्चरणार्पितमानसः क्षितितले सुरहरसमानः स्यात्। पुनः प्रकारमाह परं नक्तमिति नक्तं अष्टमीचतुर्दश्यादिष्वर्धरात्रौ नग्नो दिगम्बरः निधुवनविनोदेन शृङ्गारावेशेन मनुं लक्षं जपन् ... ... हरसमानः॥ हे मातरिदं तव स्तोत्रं मनुसमुद्धारणजनु मनूनां समुद्धारणस्य जनुर्जन्म यत्र तत् पुनः स्वरूपाख्यं स्वरूपाख्यानसिद्धं न तु त्वद्गुणोत्कर्षेण माहात्म्यं गुणोत्कर्षाभावादेव स्वरूपाख्यत्वं स्वरूपा ... ... घटयन्नाह पदाम्बुजयुगलपूजाविधिगुतं नान्यदधिकमिदं स्तोत्रं निशार्द्धे वा पूजासमयमथवा यस्तु पठति तस्य प्रलापि मिथ्या ... ... काव्यामृतधारा प्रभवति प्रकर्षेण निःसरति॥ सम्प्रति स्तवपाठस्य फलमाह कुरङ्गाक्षीवृन्दमिति। दिव्याङ्गनावृन्दं तत्साधकं अनुगच्छति प्रेमतरलं तत्र प्रेम्णा तरलं चञ्चलं उत्कण्ठायमानं वा ...... तस्य क्षौणीपतेः कुबेरप्रतिनिधि ... ...। यद्वा स कुबेरप्रतिनिधिर्भवति। तत्केलिकलया केलीनां षोड़शभागैकभागेन रिपुः कारागारं कलयति ज्ञापयति स भक्त इह चिरं जीवन् आप्रलयं विहरन् तदन्ते जनुं प्रति पुनर्जन्मग्रहं प्रति मुक्तः वर्जितः प्रभवति प्रभुर्भवति॥

Colophon. इति श्रीमहाकालविरचित कर्पूरादिस्तोत्रस्य टीका समाप्ता॥ श्रीगुरुः। श्रीहरिः। श्रीनाथः।

च्चयङ्गते प्रभाकरे च्चपाकराच्चिषे परा-
भिघातिवारवाङ्किते शकादिपार्थिवे गते ।
गुरोर्द्दिने शिवेऽलिखद्भवत्पदाम्बुजे श्रिया-
भिलाषदे मुकुन्द्दिजो विनत्य कृष्णचन्द्रकः ॥ १७६६ । १ । २१ ॥

विषयः । कर्पूरादि-कालिकास्तवस्य व्याख्यानम् ॥

No. 40. कर्म्मोपदेशः, By शिवरामतर्कपञ्चाननः । Substance, country-made paper, 11 × 2 inches. Folia, 37. Lines, 6-8 on a page. Extent, 874 çlokas. Character, Bengali. Date, Sk., 1728. Place of deposit, Vivandigráma, District Dháká, Bhaṭṭácáryya's House. Appearance, old. Prose and verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।
प्रणम्य सूर्य्यं जगदेकनाथम्
ज्योतिर्ब्विदामिष्टफलं ददानम् ।
संच्चेपतः श्रीशिवरामशर्म्मा
कर्म्मोपदेशं तनुते निबन्धम् ॥
सद्विद्या विगतोद्यमा भगवती च्चीणप्रभा भारती
भूपालाः खलु नीचकर्म्मरसिकाः कालो बलीयान् कलिः ।
इत्याशङ्क्य गुणार्ज्जने विमनसः पाण्डित्यविद्वेषिणो
ये बाला अपि ते भवन्तु कृतिनस्तेषां कृते मत्कृतिः ॥
नास्ति व्याकरणादरो न च पुनः सत्काव्यबन्धे रसो
नालङ्कारकुतूहलं श्रुतिकथा प्रच्चीणभावं गता ।
तर्कादावपि नैव सा रसिकता पौराणिकी सत्कथा
नो कीर्त्येति कलौ समादरकरी विद्या भवेज्ज्यौतिषी ॥
विफलान्यन्यशास्त्राणि विवादस्तेषु केवलम् ।
सफलं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साच्चिणौ ॥
शास्त्रप्रशंसा ।
मुहूर्त्ततिथिनच्चत्रनच्चत्रवश्यायनानि च । इत्यादि ।

End. तृतीयवेलायाम् ।
चौराद्भयं बङ्गधनं कलहं सुघोरम्
शत्रोः कथां प्रबलवारणनस्य + + ।

नानाप्रकारपिशितं गुरुदर्शनञ्च
काको भयं कथयतीह किमत्र चित्रम् ॥
चतुर्थवेलायाम् ।
शत्रोर्भयं किमपि कार्य्यमतीव कष्टम्
निर्मार्य्यमाणगमनं विविधाच्च वार्त्ताम् ।
यानं खगेहगमनं द्रविणं तथैव
भाग्यं वरं दिशति वायस + + + + ॥

Colophon. इति शिवरामतर्कपञ्चाननभट्टाचार्य्यविरचिते कर्म्मोपदेशे चतुर्थोऽध्यायः ॥ समाप्तोऽयं ग्रन्थः । शकाब्दाः १७२८ ।

विषयः । ज्योतिषशास्त्रप्रशंसाकथनम् । दैवज्ञप्रशंसाकथनम् । राशिस्वरूपनियमादिकथनम् । राशिवाचकनामकथनम् । मेषादीनां वर्णकथनम् । राशीनां द्विपदादिकथनम् । राशीनां ग्राम्यारण्यादिविभागकथनम् । तेषां विप्रादिसंज्ञाकथनम् । अभिजिन्निरूपणम् । नक्षत्रनिरूपणम् । नक्षत्रदेवतानिरूपणम् । नक्षत्रचक्रस्य ध्रुवादिगणकथनम् । नक्षत्राणां देवनरराक्षसादिगणकथनम् । नित्ययोगकथनम् । विष्कम्भादियोगसंज्ञाकथनम् । करणविवरणम् । तिथिनिरूपणम् । कालवेलाकथनम् । वारवेलाकथनम् । यामार्द्धाधिपकथनम् । दण्डाधिपकथनम् । योगिन्युदयकथनम् । नवग्रहाणां नामान्तरकथनम् । ग्रहाणां वर्णकथनम् । वेदाधिपकथनम् । दिक्पतिग्रहकथनम् । दिग्बलिग्रहकथनम् । ग्रहाणां स्थानबलकथनम् । ग्रहाणां नैसर्गिकभोगकथनम् । ग्रहाणां नैसर्गिकमित्रामित्रकथनम् । समग्रहकथनम् । पापग्रहकथनम् । शुभग्रहकथनम् । ग्रहाणां दृष्टिकथनम् । ग्रहाणां केन्द्रकथनम् । त्रिकोणसंज्ञाकथनम् । उपचयादिहोराकथनम् । तन्वादिद्वादशस्थानकथनम् । नाड़ीनक्षत्रनिरूपणम् । नक्षत्रामृतयोगकथनम् । सिद्धियोगकथनम् । दिनदग्धाकथनम् । मासदग्धाकथनम् । पापयोगकथनम् । अमृताख्ययोगकथनम् । अमृताख्ययोगकथनम् । उत्पातादियोगकथनम् । करकचादियोगकथनम् । चन्द्रशुद्धिनिरूपणम् । अधमदिननिरूपणम् । अहस्पर्शकथनम् । संक्रान्तिनिरूपणम् । रविसंक्रमणगणनविधिकथनम् । अयनांशजसंक्रान्तिनिरूपणम् । समरात्रिन्दिवकालकथनम् । दिवसमानकथनम् । रात्रिमानकथनम् । अङ्गुलिमानेन दिवारात्रिदण्डज्ञानोपायकथनम् । पुष्पनामादिना दण्डज्ञानोपायकथनम् । लग्नमानकथनम् । क्षेत्रकथनम् । होराकथनम् । नवांशद्वादशांशत्रिंशांशकथनम् । रविशुद्धिकथनम् । चन्द्रशुद्धिकथनम् । चन्द्रस्य वर्णादिकथनम् । चन्द्रशुद्धिविवेचनम् । ताराशुद्धिकथनम् । षण्णां ग्रहाणां शुद्धिकथनम् । अष्टवर्गप्रशंसाकथनम् । ग्रहाणां वैगुण्ये औषधादिधारणविधिकथनम् । तारावैगुण्यदोषोपशमनविधिकथनम् । नाड़ीनक्षत्रशान्तिकथनम् । ग्रहणदर्शनफलकथनम् । योगकरणदोषोपशमनविधिकथनम् । संक्रान्तिसंज्ञादिनिरूपणम् । महाविषुवादिफलकथनम् । उत्त

रायणचक्रकथनम् । दक्षिणायनचक्रकथनम् । अनिष्टसंक्रान्तिफलकथनम् । नाड़ीनक्षत्रे पापग्रहसंक्रमणफलकथनम् । भौमचक्रकथनम् । गुरुचक्रकथनम् । शनिचक्रकथनम् । राहुचक्रकथनम् । जन्मतिथिविधिकथनम् । नक्षत्रविशेषे रोगोत्पत्तिफलकथनम् । मरणयोगकथनम् । विवाहकथनम् । द्विरागमनकथनम् । गर्भाधानकथनम् । पुंसवनकथनम् । पञ्चामृतकथनम् । सीमन्तोन्नयनकथनम् । नामकरणकथनम् । निष्क्रामणकथनम् । अन्नप्राशनकथनम् । चूड़ाकरणकथनम् । सामान्यतः चौरविधिकथनम् । कर्णवेधकथनम् । विद्यारम्भकथनम् । उपनयनकथनम् । समावर्त्तनकथनम् । अग्निस्थापनकथनम् । सन्न्यासग्रहणकथनम् । धनुर्विद्यारम्भकथनम् । राज्याभिषेककथनम् । रत्नादिधारणकथनम् । खड्गादिधारणकथनम् । नवशस्त्राद्युपयोगकथनम् । नवयानाद्यारोहणकथनम् । राजदर्शनकथनम् । सेवाचक्रकथनम् । देवताघटनकथनम् । देवविग्रहनिर्म्माणकथनम् । सामान्यतः देवप्रतिष्ठाकथनम् । नौकागठनकथनम् । नौकाचालनकथनम् । परीक्षाकथनम् । औषधकरणादिकथनम् । आरोग्यस्नानकथनम् । वास्तुभूमिनिरूपणम् । नागशयनकथनम् । गृहारम्भकथनम् । गृहप्रवेशकथनम् । जलाशयविधिकथनम् । हलप्रवाहकथनम् । बीजवपनकथनम् । गोचारणकथनम् । धान्यादिच्छेदनकथनम् । नवान्नकथनम् । धान्यादिवृद्धिदानकथनम् । क्रयविक्रयादिषु नक्षत्रादिकथनम् । यात्राविधिकथनम् । कलियुगादिसंख्याकथनम् । राजादिफलकथनम् । मेघाधिपादिकथनम् । आढ़कपरिमाणादिकथनम् । भूमिकम्पज्ञानकथनम् । तत्र समयविशेषे फलभेदकथनम् । काकचरित्रकथनञ्च । इति ।

No. 41. कलापतत्त्वबोधिनी (प्रथमखण्डः), By रामचन्द्रः । Substance, country-made paper, 18 × 1½ inches. Folia, 79. Lines, 4 on a page. Extent, 1,382 çlokas. Character, Bengali. Date, ? Place of deposit, Púḍápáḍá, District Dhákâ, Paṇḍita Jagadbandhu Tarkavágíça. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।

श्रीनाथचरणाम्भोजं नत्वा भूयो दिनन्दिनम् ।
क्रियते रामचन्द्रेण कलापतत्त्वबोधिनी ॥

तत्रादौ समाप्तिकामो मङ्गलमाचरेदिति प्राचीनमतं । समाप्तिप्रतिबन्धकीभूतविघ्नध्वंसकामो मङ्गलमाचरेदिति नवीनमतं । समाप्तिस्तु शास्त्रस्य चरमवर्णोत्पत्तिरूपा कण्ठताल्वादिकरणैरेव जायते । तत्र त्रिलोचनः प्राचीनानुयायी वक्ष्यति धर्म्माभावपक्षस्य शास्त्रान्तरप्रसिद्धेरिति तत्र शिष्यशिक्षार्थं नमस्कारो धर्म्मजनकोऽपि शिष्टक्रियमाणत्वादित्यनुमानमूलशिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारप्रवृत्तेः सम्बन्धप्रयोजनज्ञानाधीनत्वात् सम्बन्धप्रयोजन-

ष्वादौ निबध्नाति प्रणम्येति । सर्व्वं महादेवं ग्रन्थादौ प्रणम्य दुर्गसिंहोक्त-कातन्त्रवृत्तिदुर्गपदानि अहं विवृणोमि इति भविष्यत्सामीप्ये वर्त्तमानता विवरिष्यामीत्यर्थः ॥ इत्यादि ।

End. तस्माद्ग्रहणमसवर्णस्वरे निषेधापत्तिवारणार्थमिति कविराजतात्पर्य्यम् ।
पूर्व्वसूरिकृतं दृष्ट्वा यदत्र लिखितं मया ।
कविराजविरुद्धं तद्विचार्य्यं सुमनीषिभिः ॥

Colophon. इति शिवपुरतपाकीय उत्तरचाद्वग्रामनिवासिकाञ्जीकुलसमुद्भवहरिहरात्म-जश्रीरामचन्द्रशर्म्मकृतायां कलापतत्त्वबोधिन्यां सन्धौ द्वितीयः पादः समाप्तः ।

विषयः । कातन्त्रसन्धिवृत्तेस्त्रिलोचनकृतपञ्जिकाया व्याख्यानम् ।

No. 42. कलापतत्त्वबोधिनी, (द्वितीयखण्डः) By रामचन्द्रः । Substance, country-made paper, 18 × 1½ inches. Folia, 81. Lines, 5 on a page. Extent, 3,000 çlokas. Character, Bengali. Date, ? Place of deposit, Puḍápáḍá, Dháká, Paṇḍita Jagadbandhu Tarkavágíça. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।
नत्वा गुरुपदाम्भोजं श्रीरामचन्द्रशर्म्मणा ।
कलापतत्त्वबोधिन्यां कारकार्थो निबध्यते ॥
तत्र क्रियानिमित्तं कारकमिति लोकोपचारादेव कारकव्यवहारः । परि-शेषसूत्रे कृतेऽपि सम्बन्धे परम्परया क्रियानिमित्ततासत्त्वे अतिव्याप्तिवार-णाय लोकोपचाराश्रयणस्यावश्यकत्वात् । तच्च षड्विधं जातिद्रव्यगुणक्रिया-स्वरूपभेदात् । तद्यथा, वृक्षः, कुण्डं, शुक्लः, पाकः, देवदत्तः । पुनश्च षोढा अपादानादिभेदात् । इत्यादि ।

End. न प्राकाम्ये । धातुयोगे उपसर्गप्राप्तौ निषेधः स्यात् । कथमित्याह इहेति अनुमतिविषयो धात्वर्थस्तद्द्योतकोऽपि पुनरिहेति । अपिना क्रियायाम-नुक्तमपि ॥

Colophon. इति शिवपुरतपाकीय उत्तरचाद्वग्रामनिवासि काञ्जीकुलसमुद्भवहरिहरा-त्मजश्रीरामचन्द्रशर्म्मकृतौ कलापतत्त्वबोधिन्यां कारकव्याख्या सम्पूर्णा ।

विषयः । कातन्त्रकारकप्रकरणीयपरिशिष्टस्य गोपीनाथतर्काचार्य्यकृतायाः व्याख्याया व्या-ख्यानम् ।

No. 43. कलापतत्त्वबोधिनी (तृतीयखण्डः) By रामचन्द्रः । Substance, country-made paper, $18 \times 1\frac{1}{4}$ inches. Folia, 125. Lines, 6 on a page. Extent, 4,125 çlokas. Character, Bengali. Date, ? Place of deposit, Purápádá, Dhaká, Paṇḍita Jagadbandhu Tarkavágiça. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य श्रीनाथपादारविन्द-
मज्ञानसम्मोहतमोभिदापहम् ।
कलापशेषस्य च तत्त्वबोधिनीं
कुर्व्वे कृती श्रीद्विजरामचन्द्रः ॥
उपायाः सन्ति यद्यत्र गोपीनाथादिनिर्म्मिताः ।
विबुद्धिबोधनार्थाय तथाप्येष ममोद्यमः ॥
तत्रादौ शिष्टाचारतयानुमानतः समाप्तिकामो मङ्गलमाचरेदिति प्राचीनाः । तन्नेति नवीनाः । तथाहि समाप्तिर्ग्रन्थस्य चरमवर्णोत्पत्तिः । सा च स्थाने वायुसंयोगादेव उत्पद्यते । तत्कथं समाप्तौ मङ्गलस्य कारणता । अतः समाप्तिप्रतिबन्धकीभूतविघ्नध्वंसकामो मङ्गलमाचरेदिति नवीनमतं । विघ्नाभावे समाप्तिस्तु वायुसंयोगादेव जायते इति मतमवलम्ब्य उच्यते । इह खलु सकलविद्वज्जनगणकुञ्जरसम्मतिपरिप्राप्तनिखिलविघ्नध्वंसोत्पादकारणप्रारब्ध-कर्म्मोपकारकहरिनमस्कारपुरःसरं प्रवृत्तः सम्बन्धप्रयोजनाङ्गतया च सम्बन्धप्रयोजनाभिधानपुरःसरं ग्रन्थमारभमाणः शिष्टप्रतिपादनीयस्तोकमादौ निबध्नाति संसारेति ॥

End. तस्मादेवमकृत्वा संयोगस्य लोप इति विदध्याति । तदधिकारार्थोऽयमित्याह अधिकर्त्तव्यमिति । अतएवावयवसम्बन्धे षष्ठी वक्ष्यमाणैरन्वयार्थं । अन्ये तु संयोगो लोप्य इत्यभेदाकरणादधिकारोऽयं वक्ष्यमाणैरन्वयार्थमवयवसम्बन्धे षष्ठीत्याहुः ॥

Colophon. इति शिवपुरतपाकीय-उत्तरचाड्वग्रामनिवासि-काञ्जीरकुलसमुद्भव-चरित्ररात्मज श्रीरामचन्द्रशर्म्मकृतायां कलापतत्त्वबोधिन्यां परिशिष्टं समाप्तं ॥

विषयः । गोपीनाथतर्काचार्य्यकृतकातन्त्रपरिशिष्टव्याख्याया व्याख्यानम् ॥

No. 44. कलापसारः By रामकुमारन्यायभूषणः । Substance, Foolscap paper, $6\frac{1}{2} \times 8$ inches. Folia, 101. Lines, 12 on a page. Extent,

1,212 çlokas. Character, Bengali. Date, ? Place of deposit, Çrínagara, Dháká, Babu Kálínátha Basu. Appearance, new. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

मूर्द्ध्नि धत्ते विधुं यो हि वलयाकार......... ।

नमस्तस्मै ममाभीष्टदायिनेऽभीष्टसिद्धये ॥

शिवं प्रणम्य मन्दाय बालकज्ञानहेतवे ।

वक्ष्ये कलापसाराख्यं न्यायभूषणसंज्ञकः ॥

अकारादि हकारान्ता वर्णमाला प्रकीर्त्तिता ।

तत्रादौ चतुर्द्दश स्वराः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ।

दश ... ... । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ सजातीयौ... ...

सवर्णौ । अ आ इ ई इत्यादि । अ इ उ ऋ ऌ ... ... ।

इदादिस्वरः ... ... ॥ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ । ए ऐ ओ औ सन्ध्यक्षरं । कादिहान्तं व्यञ्जनं । पञ्चशः पञ्चवर्गाः । कादिमान्तं । वर्गप्रथमद्वितीयशषसा अघोषाः । क ख च छ इत्यादि । अघोषान्ये घोषाः । ग घ ङ इत्यादि । ङ ञ ण न मा अनुनासिकाः । य र ल वा अन्तस्थाः । श ष स हाः शिट् । विभक्त्यन्तं पदं । ते यजन्ते । इति संज्ञापादः । समानः सवर्णो दीर्घः । दण्डाग्रं सागता दधीदं मधूपमं पितॄणं । अवर्ण इवर्णेन ए । तवेहा सेयं । अवर्ण उवर्णेन ओ । तवोदनं गङ्गोदकं । अवर्ण ऋवर्णेन अर् । तवर्द्धिः । ऋण-प्र-वसन-वत्सतर-कम्बल दश-पर्वमासामृणे ......॥ ऋणार्णं इत्यादि । ऋते तृतीयासमासेऽरो दीर्घः । शीतेन ऋतः शीतार्त्तः । इत्यादि ॥

End. अभ्यर्णः सामीप्ये समर्णः न्यर्णः व्यर्णश्च वष्टः वषितः हृष्टः हृषितः पूर्णः पूरितश्च तूर्णः त्वरितश्च आस्वान्तं आस्वनितं दान्तः दमितः शान्तः शमितः पूर्णः पूरितः दस्तः दासितः स्पष्टः स्पाशितः छन्नः छादितः ज्ञप्तः ज्ञपितः । एते निपाताश्च । उक्ता कृत्प्रत्यया अन्यतोऽन्यत्रापि भवन्ति । वारि चरतीति वार्चौ हंसः गिरौ शेते इति गिरिशः एतौ निपातौ ॥ इति कृत्प्रकरणम् ॥

Colophon. ध्यात्वेष्टदेवतां स श्रीरामपूर्व्वः कुमारकः

व्याकरणं मुग्धबोध-सारस्वत-कलापकं ॥

दृष्ट्वा कलापसाराख्यं कुरुते चाशुबोधकम् ।

व्याश्रियां ... ... श्रीलगोपीमोहनभूपतेः ॥

आदेशात् पाचरग्रामनिवासी वन्द्यवंशजः ।

सुधीर-श्रीरामगति-वाचस्पति-सुतो नमः ॥
यन्देऽस्मिन् नाधिकारोऽस्ति न गुर्व्वादिविचारणं ।
सुवसन्देहभङ्गस्य प्रयोगेणैव जायते ॥
सर्व्वविकल्पना सूत्रे विभक्त्यैव लुक् क्वचित् ।
अनेकत्वेकवचनं सुवस्यानित्यता क्वचित् ॥
प्रयोगैरनुमानन्या ज्ञमौ दोषनिवृत्तये ।
निपातनादन्यसिद्धिरिति शास्त्रस्य निर्णयः ॥
कृताञ्जलिरहं याचे विबुधा वः कृपामयाः ।
मत्कृतं ग्रन्थसन्दर्भं शोधितव्यं मयद्गुणैः ॥

विषयः । मुग्धबोधसारस्वतकलापादिव्याकरणेभ्यः सारमादाय सङ्कलितं कलापसाराख्यं संक्षिप्तं व्याकरणम् । अस्मिं चास्य संज्ञा-सन्धि-सुवन्त-कारक-समास-तद्धित-गणसूत्र-धातु-कृदन्त-प्रकरणानि यथाक्रमं सन्निवेशितानि ॥

No. 45. कविरत्नाकरः । Substance, country-made paper, 12×4 inches. Folia, 5. Lines, 12 on a page. Extent, 135 çlokas. Character, Bengali. Date, ? Place of deposit, Brámhaṇamaṇḍalígrám, Rámanáráyaṇa Bhaṭṭácáryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । माधवोमाधवौ वाग्मि माधवोमाधवौ वृद्धि ।
स्मरन्ति साधवः सर्व्वं सर्व्वकार्य्येषु माधवम् ।

End. य एव तातः स एव पुत्रो य एव योगः स एव बोधः ।
यदेव चेत तदेव कर्म्म य एव लोकः स एव धर्म्मः ॥ ० ॥

Colophon. इति समाप्तोऽयं ग्रन्थः ।

विषयः । नीत्युपदेशमूलककतिपयश्लोकाः ।

No. 46. काण्वशाखिश्राद्धप्रयोगः । Substance, country-made paper. 13×2½ inches. Folia, 21. Lines, 5 on a page. Extent, 252 çlokas. Character, Bengali. Date, ? Place of deposit, Rájpur, Post Office Sonárpur, Rájendranáráyaṇa Bhaṭṭácáryya. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय । अथान्त्येष्टिपद्धतिः । गतप्राणं ज्ञात्वा पुत्रादिः स्नात्वा ... कृत्वा स्नापयेत् । ततो गतप्राणं स्नापयित्वा वाससा सर्व्वशरीरमाच्छाद्य शीर्षकुशायां भूमौ दक्षिणशिरसं स्थापयेत् ।

End. ततः पिण्डं गोऽजविप्रेभ्यो दद्यात् । जले वा क्षिपेत् । तत अद्येत्यादि अमुकगोत्रस्य अमुकदेवशर्म्मणः कृतैतदाद्यैकोद्दिष्टश्राद्धकर्म्माच्छिद्रमस्तु अस्त्विति-प्रतिवचनं । ततो वैश्वदेवबलिकर्म्मणी कुर्य्यात् ॥

Colophon. इति यजुर्वेदिकाण्वशाखिनामाद्यैकोद्दिष्टश्राद्धप्रयोगः समाप्तः ॥

विषयः। काण्वशाखिनामन्त्येष्टिपद्धतिः । तथा काण्वशाखिनामाद्यैकोद्दिष्टश्राद्धादिप्रयोगः ।

No. 47. कातन्त्रकौमुदी, By गङ्गेशशर्म्मा । Substance, country-made paper, 13½ × 3 inches. Folia, 7. Lines, 4 on a page. Extent, 85 çlokas. Character, Bengali. Date, ? Place of deposit, Kṛṣṇapura, Post Office Vaidyerbázár, District Dháká, Paṇḍita Kálikṛṣṇa Vidyávinoda. Appearance, new. Prose and verse. Incorrect.

Beginning. ॐ नमो गणेशाय ।

शिवं प्रणम्य सर्व्वेशं सर्व्वज्ञानप्रदायकम् ।
कातन्त्रकौमुदी स्पष्टा कृता गङ्गेशशर्म्मणा ॥
जयति पुनरदृष्टः लुप्ततन्त्रकल्पोऽथ हेतुः
श्रुतिपरिगतकीर्त्तिः कश्चन श्रीद्विजन्मा ।
प्रथितसुचतुरास्यो ... ...
यथाकृतिः सर्व्ववर्म्मणा ... ... ॥
न चन्द्रगोमी न च दुर्गसिंहः कात्यायन ... ... न वेद ।
यथाहमालोकितसर्व्वशास्त्रः कातन्त्रतन्त्रार्थविनिश्चयाद्यः ॥

शर्व्वकृतसूत्रानुसन्देहे विपरीतपदस्य सिद्धिर्ज्ञातव्या । सिद्धो वर्णसमाम्नाय इत्यत्र सिद्धग्रहणात् षड्भ्यामिति संख्यावाचकशब्दस्य बाहुल्यार्थेऽपि द्विवचनं ।

कृत्वा च बहुलं युद्धं प्रविश्य शिविरं पुनः ।
कुरवोत्मचितं मन्त्रं सभायाञ्चक्रिरे मिथः ॥

अस्यार्थः कुरवो बहुलं युद्धं कृत्वा पुनः शिविरं प्रविश्य मिथो निर्ज्जने सभायां आत्मचितं मन्त्रं चक्रिरे । "उभकारयोर्मध्ये" इत्यत्र मध्यग्रहणात् आकारयोरपि मध्ये विसर्गस्योकारः । ... ...

पुनोऽत्र मङ्गलं मन्ये पुनर्भागीरथीतटे ।
न पुनर्मङ्गलं मन्ये रामचन्द्रस्टके क्वचित् ॥

रप्रकृतिरनामिपरोपीत्यत्र अपि ग्रहणात् पुनोऽवेति पदे रेफं बाधित्वा विसर्गस्योकारः । इत्यादि ॥

End. वारिमध्ये स्थितं पद्मं कम्पयेत् केन हेतुना ।

हेतुनेत्यत्र "षष्ठी हेतुप्रयोगे" इति षष्ठ्येव प्राप्नोति । तत्सूत्रस्य नित्यग्रहणादनित्यमपि प्रकरणेऽस्मिन्निति तृतीया ।

अहन्याश्च गुरोर्हन्ति शिष्यं हन्ति चतुर्दशी । इत्यत्रापि ।

सत्यानुरक्ता नरकस्य जिष्णवः गुणैर्नृपाः शार्ङ्गिणमन्वयायिषुः ॥

नृपाः ... गुणैः शार्ङ्गिणं कृष्णं अनुगतवन्तः, नृपाः किम्भूताः नरकस्य जिष्णवः "न निष्ठादिषु" इत्यत्र नञोऽनित्यत्वात् नरकस्येति षष्ठी ॥

Colophon. इति गङ्गेशशर्म्मकृता कातन्त्रकौमुदी समाप्ता ॥

विषयः । ग्रन्थेऽस्मिन् तत्रभवता गङ्गेशशर्म्मणा "सैष दाशरथी रामः सैष राजा युधिष्ठिर" इत्याद्यसंस्कृतपदानां कातन्त्रसूत्राण्युद्धृत्य उद्धृतपदविशेषव्यतिक्रमनिर्द्देशादिभिः समाधानानि कृतानि ॥

No. 48. कातन्त्रचन्द्रिका, वा कातन्त्रपरिशिष्टचन्द्रिका By रामदासचक्रवर्त्ती । Substance, country-made paper, 18 × 1½ inches. Folia, 97 Lines, 11 on a page. Extent, 5,643 çlokas. Character, Bengali. Date, ? Place of deposit, Pañcasáragráma, District Dháká, Paṇḍita Mahendranatha Kávyatírtha. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

नानाटीकां समालोक्य गोपीनाथवचस्तथा ।

निर्म्मिता यत्नतः पुस्ती मन्दधीभिः सुखबुध्यताम् ॥

अपादानं । अथ वक्ष्यमाणं सम्प्रदानमपादानसंज्ञं भवति इति कथं न शक्यते वक्तुं । इत्याह संज्ञान्तरमिति । युक्तिः पुनरियम् ॥ अपादानस्यानन्तरं सम्प्रदानमित्यकरण + + संज्ञान्तरमिति मर्य्यादायामव्ययीभावः ॥ इत्यादि ।

End. सुखदुःखं सुखदुःखे अबध्यानां विरोधिनाञ्च इति समाहारः । इतरेतरश्च टीकाकृता दर्शितः । अन्यत्र विनियमा एषामभिधानव्यवस्था । भाष्येऽप्याकृतिगणोऽयमित्युक्तं ।

दुर्गटीकां समालोक्य कुलचन्द्रादिसंग्रहान् ।

रचितन्यासकाराणां जयादित्यस्य संगतिम् ॥

जिनेन्द्रवद्दासानां सागरस्य च संग्रहान् ।
आदाय धीमता सम्यक् श्रीरामदासशर्म्मणा ।
कातन्त्रपरिशिष्टस्य निबन्धोऽयं कृतो मया ॥
ज्ञातुं सुखेन ये धीराः कातन्त्रार्थविनिश्चयम् ।
तेषां प्राचं मत्प्रणीतटिप्पणीयाचरक्षिता(?) ॥

Colophon. इति श्रीरामदासचक्रवर्त्तिकृतौ कातन्त्रपरिशिष्टचन्द्रिकायां समासप्रकरणं समाप्तम् ॥

विषयः । कातन्त्रपरिशिष्टीयकारकसमासप्रकरणयोर्व्याख्यानम् ॥

No. 49. **कातन्त्रपरिशिष्टप्रबोधप्रकाशिका,** By **शङ्करशर्म्मा** Substance, country-made paper, 20 × 5 inches. Folia, 24. Lines, 10 on a page. Extent, 1,395 çlokas. Character, Bengali. Date, ? Place of deposit, Sáhávázpur, District Tripurá, Paṇḍita Kálinátha Tarkaratna. Appearance, new. Prose. Generally Correct.

Beginning. ॐ नमो गणपतये ।
प्रणम्य मातापितरौ श्रिया शङ्करशर्म्मणा ।
गोपीनाथस्य कियती वाक्प्रणालीः प्रकाश्यते ॥
अस्तं गतवति गुरुतरणौ ग्रन्थार्थपदेशभानुना सचिते ।
अकलङ्कप्रबोधचन्द्रिकेयं शमयतु तमः कालापचाराणाम् ॥
केचिद्विदुः समं ज्ञातं शास्त्रं व्याकरणादिकम् ।
तर्कं यन्त्रसमं ज्ञेयं तैरवश्यं रसार्थिभिः ॥
यथा यन्त्रं विनेक्षूणां न रसः प्रच्युतो भवेत् ।
तथा तर्कं विनाप्येषां नार्थः क्वचिगतो भवेत् ॥
ग्रन्थारम्भे विघ्नविनाशाय कृतमिष्टदेवतानामोच्चारणरूपमङ्गलमादौ शिष्य-
शिक्षार्थमाचरणाः शिष्यावबोधाय प्रतिजानीते यो जात इति । इत्यादि ।

End. (खण्डितम्) ।

विषयः । गोपीनाथकृतकातन्त्रपरिशिष्टटीकायाः शङ्करकृतव्याख्यानम् ।

No. 50. कातन्त्रप्रदीपः By विद्यासागरः । Substance, country-made paper, 12×3 inches. Folia, 115. Lines, 6 on a page. Extent, 2,253 çlokas. Character, Bengali. Date, ? Place of deposit, Mayamansiñha Serpur, Paṇḍita Candrakánta Tarkálaŋkár. Appearance, old. Prose. Correct.

Beginning. ॐ नमो नारायणाय ।
विकसतु नखकुसुमाली
मम हृदि हरिपादपारिजातस्य ।
राहुभयादिव विधुना
कायच्युतो विनिर्म्मितो वियति ॥
गमयति दितिसुततिमिरं
तिमिरकिशरोद्भवः कोऽपि ।
कलयति यच कलशी
मधुकरमिथुनाङ्किते कमले ॥
धातुः स्वं रूपमिति न्यायाद्दात भूप्रभृतय इति ॥ इत्यादि ।

End. सामान्यातिदेशे विशेषस्यानतिदेश इति श्रीपतिनोक्तं । आत्वस्य च विशेषाभावात् । स्यादावित्युक्तत्वादित्याहुः ॥

Colophon. इति महामहोपाध्यायश्रीकान्तपण्डितात्मजविद्यासागरभट्टाचार्य्यपुण्डरीकाक्षकृते कातन्त्रप्रदीपे चतुष्टयस्य तृतीयपादः समाप्तः ॥

विषयः । कातन्त्रव्याकरणस्य व्याख्यानम् ।

No. 51. कातन्त्रवृत्तिः By वररुचिः । Substance, Palm leaf, 13×3 inches. Folia, 85. Lines, 9 on a page. Extent, 2,151 çlokas. Character, Bengali. Date, S. K. 1553 ? Place of deposit, District Faridpura, Post Office Pálang, Village Dhánuká, Paṇḍita Jagadbandhu Vidyábhúṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
देवदेवं प्रणम्यादौ सर्व्वज्ञं सर्व्वदर्शिनम् ।
कातन्त्रस्य प्रवक्ष्यामि व्याख्यानं सार्व्ववर्म्मिकम् ॥
कुमारमाराध्य महेश्वरात्मजम्
कलापतन्त्राख्यमिदञ्चकार यः ।

अनेकशास्त्रप्रतिबद्धबुद्धये
नमोऽस्तु तस्मै भुवि सर्व्ववर्म्मणे ॥
येन व्याकरणार्णवं ... ... लोपागमोर्म्म्याकुलं
धातुग्राह-समास नक्रकुटिलं सर्व्वत्र ... ... मथ्यत् ।
आलोच्य जगतो हिताय लघुतः श्रीसर्व्ववर्म्मा कविः
सिद्धो वर्ण इतीव सूत्रमकरोत् ज्ञानाय तस्मै नमः ॥
अल्पाक्षरमसन्दिग्धं सारवद्गूढ़निर्णयम् ।
निर्द्दोषं हेतुमत्......सूत्रमित्युच्यते बुधैः ॥
संज्ञा च परिभाषा च विधिर्निर्णय एव च ।
प्रतिषेधोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥
संज्ञानिमित्तं कर्त्तारं परिमाणं प्रयोजनम् ।
प्रागुक्ता सर्व्वतन्त्राणां पश्चाद्वृत्तानुवर्णयेत् ॥
इदं पुनर्विधिसूत्रं । सिद्धो वर्णसमाम्नायः सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः के पुनस्ते वर्णा अक्षराणि तेषां समाम्नायः ... ... सूत्र-सिद्धवचनमन्यथानुपदेशार्थं अक्षरसमाम्नायस्य सर्व्वविशिष्टविदिता ... ... व्यवहारानुवृत्तेरचिरकाल ...... । सिद्धो वर्णसमाम्नायवचनं सुवादिसंज्ञाभिधानार्थं कः पुनरसौ वर्णसमाम्नाय ... ... सिद्धकल्पादकारादि हकारपर्य्यन्तं इत्यादि ॥

End. न य्वोः पदाद्योर्वृद्धिरागमः । यकार वकारयोः पदाद्योः समीपस्वरस्य वृद्धिर्न भवति तयोरादौ वृद्धिरागमो भवति स न तद्धिते परतः । व्याकरणं वेत्ति अधीते वा वैयाकरणः ... ... द्वारादीनाञ्चेति वक्तव्यं द्वारे नियुक्तः दौवारिकः द्वारपालस्येदं दौवारपालं ... ... स्वर्ड्गमनमाह सौवर्ड्गमनिकः श्वन इदं शौवनं ... ... स्वागतेन चरति स्वागतिकः सुद्वारेण चरति सुद्वारिकः व्यङ्गस्यापत्यं व्याङ्गिः व्यवहारेण चरति व्यावहारिकः एवमाद्योऽन्ये च द्रष्टव्याः ॥

Colophon. इति वररुचिविरचितायां ... सच ... कायां यशोमानप्रबोधितायां वृत्तौ चतुष्टयप्रकरणं समाप्तम् ॥ नाम्नि चतुष्टये षष्ठः पादः समाप्तः । यथादृष्टम्यादि नमो भगवते वासुदेवाय ॐ नमो गोपालाय ।

विषयः । ग्रन्थेऽस्मिन् सर्व्ववर्म्माचार्य्यस्य कृतौ कातन्त्रव्याकरणे वररुचिसंयोजितायां वृत्तौ नाम-कारक-समास-तद्धितप्रकरणात्मकस्य चतुष्टयस्य वृत्तिरस्ति ॥

No. 52. कातन्त्रवृत्तिचन्द्रिका By हरिरामः । Substance, country-made paper, 13 × 3 inches. Folia, 47. Lines, 6 on a page. Extent, 1,022 çlokas. Character, Bengali. Date, ? Place of deposit, Yaçodala, Mayamansinha, Kálícandra Bhaṭṭácáryya. Appearance new. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
विश्वनाथपदद्वन्द्वं नत्वा गुरुपदं मया ।
भण्यते हरिरामेण व्याख्यासारं समासतः ॥
ग्रन्थारम्भे शिष्टाचारपरिपालनार्थं निखिलविघ्नविघातार्थञ्च शिवनमस्कारं निबध्नाति देवदेवमित्यादि ।

End. अस्मन्मते संयुक्तजातीयनामकस्यानेकस्योच्चारणं प्रति भेदो नास्ति इत्यतो योगविभागेन वक्तव्यः ।

Colophon. इति कातन्त्रवृत्तिचन्द्रिकायां सन्धौ पञ्चमः पादः समाप्तः ॥

विषयः । कातन्त्रवृत्तेर्व्याख्यानम् । अत्र च सन्धिपादपर्य्यन्तमस्ति ।

No. 53. कातन्त्रोत्तरपरिशिष्टं, By त्रिलोचनदासः । Substance, country-made paper, 13½ × 5 inches. Folia, 178 (without 1st to 28th). Lines, 6 on a page. Extent, 2025 çlokas. Character, Bengali. Date, ? Place of deposit, Vásáil, Post Office Rasuniá, District Dháká Paṇḍita Abhaya caraṇa Vidyáratna. Appearance, tolerable. Prose. Generally correct.

Beginning. (खण्डित) हेमन्ताद्वा तलुक् च । अस्मात्त्वेषण् स्यात् तलुक् च वा । हैमनं हैमन्तं पक्षे हैमन्तिकं ॥ प्रावृष एण्यः । अस्मा एण्यः स्यात् प्रावृषेण्यो मेघः । प्रावृषेण्यं पयोवाहमिति रघुः ॥ सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यस्तनट् । सायादेः सूत्रनिपातनात्......एभ्यः कालेभ्यः शेषे तनट् स्यात् । सायन्तनं । सायन्तनीं तिथिप्रणयः पङ्कजानां दिवातनीमिति भट्टिः । चिरन्तनं प्राह्णेतनं प्रगेतनं अव्ययाद्दिवातनं इदं नक्तन्तनं । पौष्यमेतद्दिवातनमिति भट्टिः । पूर्व्वाह्णापराह्णाभ्यां वा । आभ्यां शेषे तनट् स्याद्वा । पूर्व्वाह्णेतनं पौर्व्वाह्णं अपराह्णेतनं आपराह्णिकं । चिरपरुपरारिभ्यस्त्नः । एभ्यः शेषे त्नो वा

स्यात्। चिरत्नं चिरन्तनं परत्नं। तलुक् चेति कश्चित्। परतनं परारित्नं। केचित्परयोर्विभाषां नेच्छन्ति। पुरो नः। पुराशब्दात्क्षेपे न स्याद्वा। पुराणः पुरातनः। उक्तं फलात्। पूर्वाः शेषविषयः। इत्यादि॥

End. सौ पदान्ते वा द्वयो रेफः। ह्यस्तन्यां सौ पदान्ते द्वयोर्वा रेफः स्यात्। अभिनस्त्वं अवणस्त्वं अभिनत्त्वं अवणत्त्वं अनानास्त्वं अनानात्त्वं। सस्य तः। ह्यस्तन्यां सौ पदान्ते धातोः सस्य तो वा स्यात्। अचकात्त्वं अचकास्त्वं। इयवरलकारेभ्यः सेड़ाशीरद्यतनीपरोक्षासु धो ढः। एभ्य एषु धो ढो वा स्यात्। अच्योढ्वं अच्योध्वं। दिद्वीयिढ्वे दिद्वीयिध्वे। अलविढ्वं अलविध्वं। सेड़िति किं तीर्षीध्वं। भूतपूर्व्वनाश्रयन्तस्याश्रयणात् नित्यं। मर्जो मार्जिरगुणेश्वरे। अस्मिन् मर्जो मार्जिः स्याद्वा। परिमार्जन्ति परिमृजन्ति। ढे ढलोपो न ऋतः। अस्मिन् न ऋतो दीर्घः स्यात्। इत्र इढ़ः लढ़ लढ़ः॥

यः क्रूरबुद्धिरिह वक्ति वृथा वसेद्वा
यो वान्यथा लिखति भिन्नमुदाहरेद्वा।
आचार्य्यपाणिनिमुनिप्रभृतेस्तु तस्य
भाले पतेत् सपदि हन्त कठोरशापः॥

Colophon. इति सद्वैद्यमाधवदासकवीन्द्रतनयश्रीत्रिलोचनदासकवीन्द्रविरचितायां कातन्त्रवृत्तावुत्तरपरिशिष्टं समाप्तम्॥

विषयः। श्रीपतिदत्तेन कृतं कातन्त्रव्याकरणस्य परिशिष्टमसम्पूर्णमित्यस्मिन्नुत्तरपरिशिष्टे समास-तद्धित-धातुप्रकरणानि सम्पूर्णानि त्रिलोचनदासेन विहितानि।

No. 54. कामाख्यातन्त्रं, By **शिवः।** Subtance country-made paper, 14×4 inches. Folia, 36. Lines, 6 on a page. Extent, 480 çlokas. Character, Bengali. Date, ? Place of deposit, Májpáḍá District Dháká, Bábu Rása vihári Ráya. Appearance, tolerable. Verse. Incorrect.

Begininng. ॐ नमः परदेवतायै।

श्रीदेव्युवाच।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वविद्याप्रिय प्रभो।
सर्व्वदानन्दहृदय सर्व्वागमप्रकाशक॥
एतानि सर्व्वतन्त्राणि साधनानि च भूरिशः।
विद्यास्ताः सकला देव सफलानि प्रसादतः॥

सारात्सारतमं तन्त्रं किं जानासि वद प्रभो ।
अतीवेदं रहस्यानां तेनाहं श्रवणोद्यता ॥
श्रीशङ्कर उवाच ।
शृणु देवि मुदा भद्रे मदीयप्राणवल्लभे ।
योनिरूपा महाविद्या कामाख्या वरवर्णिनि ॥
वरदानन्ददा नित्या महाविभववर्द्धिनी ।
सर्व्वेषां जननी सापि सर्व्वेषां तारिणी मता ॥
रमणी चैव सर्व्वेषां स्थूलसूक्ष्मतमा शुभा ।
तस्यास्तन्त्रं प्रवक्ष्यामि सावधानावधारय ॥
विद्यासु सकला देव्या ये ये सिध्यन्ति साधकाः ।
यत्र कुत्रापि केनापि कामाख्या फलदायिनी ॥
कामाख्याविमुखा लोका निन्दिता भुवनत्रये ।
विना कामात्मिकां कापि न दात्री सिद्धिसम्पदाम् ॥ इत्यादि

End. कामाख्याख्यमहापूजा त्रिषु लोकेषु दुर्ल्लभा ।
सत्यं सत्यं महादेवि सत्यमेतद्ब्रवीमि ते ॥
भैरवेण पुरा प्रोक्ता कामाख्या पु + + स्थिता ।
पीतपुष्पेण होमेन राज्यं भवति निश्चितम् ॥
रक्तप्रसूनहोमेन वशयेदखिलं जगत् ।
सद्यः प्रलयमायाति सद्यः खेचरतां व्रजेत् ॥

Colophon. इति श्रीकामाख्यातन्त्रे हरपार्व्वतीसंवादे पञ्चदशः पटलः समाप्तः ॥

विषयः । कामाख्याया उपासनेनैव सारूप्यरूपमोक्षप्राप्तिः । तस्या मन्त्रोद्धारादिविधिः । तन्मन्त्रमाहात्म्यादिः । तस्याः पूजाक्रमः । तस्यै जवादिकुसुमदानमाहात्म्यादिकथनम् । पञ्च-तत्त्वविधिः । स्वयम्भूकुसुमादिविधिः । शक्तिं विना कलौ चक्रानुष्ठानदोषकथनम् । योनि-पूजादिविधिः । लतासाधनादिविधिः । गुरुतत्त्वादिकथनम् । दिव्यवीरपशुभावनिरूपणम् तेषामाचारादिकथनञ्च । कालिकादिमन्त्रदीक्षितानां वीराचारस्यावश्यकत्वकथनम् । अथ शत्रुविनाशप्रकारकथनम् । पूर्णाभिषेकविधिः । अभिषेकाधिकारिनिरूपणम् । अथ मुक्ति-तत्त्वनिरूपणम् । तत्र सालोक्य-सारूप्य-सायुज्य निर्व्वाणरूपचतुर्व्विधमुक्तिकथनम् । अथ सिद्धमन्त्रसाधनविधिः । कामाख्यारहस्य पूजनविधिः । कामाख्यातीर्थमाहात्म्यादिकीर्त्तनम् । कालीदुर्गयोरभेदनिरूपणम् । तयोः ध्यानादीनां तुल्यत्वकथनञ्च ॥ इति शम् ।

No. 55. **कारकचक्रतत्त्वम्** । Substance, country-made paper, 17 × 2½ inches. Folia, 8. Lines, 7 on a page. Extent, 343 çlokas. Character, Bengali. Date ? Place of deposit, Visṇupura, Kádákuli, District Báṅkurá, Rámaprasanna Bhaṭṭácáryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य कमलाकान्तं वागीशं वाक्पतिं गुरुम् ।

कारकचक्रस्य तत्वं तन्यते येन केनचित् ॥

क्रिया निरूप्येत्यादि षष्ठ्याः कार्य्यत्वमर्थः । तथाच क्रियाहत्तिकार्य्यतानिरूपित कारणताश्रयत्वं । देवदत्तस्तण्डुलं पचतीत्यादौ स्वनिरूपितस्याश्रयत्वसम्बन्धेन तण्डुलनिष्ठक्रियाहत्तिः । (इत्यादि)

End. स्वण्डितत्वाच्छेषो नास्ति ।

विषयः । कारकचक्रस्य व्याख्यानम् ।

No. 56. **कारकपादटीका**, By **सर्व्वविद्यालङ्कारः** । Substance, country-made paper, 12 × 3 inches. Folia, 82. Lines, 10 on a page. Extent, 3,382 çlokas. Character, Bengali. Date ? Place of deposit, Telivine Post Gadvetá Paṇḍita Candranátha Cúḍámaṇi. Appearance, tolerable. Prose. Generally. Correct.

Beginning. श्रीरामः । विचितत्तद्धितापि नाम्नः कर्त्रादिसंज्ञाविधानपूर्व्वकं प्रथमादिविभक्तिविधानार्थं तद्धितपादानन्तरं कारकपादमारभमाणः कारकेषु मुख्यत्वात् कर्त्तुर्लक्षणं प्रथममभिदधाति । क्रियाप्रकृतिप्रत्ययविभागपरिकल्पनया शब्दसाधुत्वप्रतिपादकशास्त्रस्य व्याकरणत्वे कथं संज्ञासूत्रस्य व्याकरणत्वं॥ कर्त्रादिसंज्ञाविधानेन सुप्प्रत्ययान्तस्य प्रकृतिप्रत्ययविभागोऽत्र क्रियते इत्यदोषः ।

End. षष्ठी । एतत्तु प्रयोगप्राचुर्य्यादुक्तं अर्थान्तरेऽपि सूत्रे विभक्तिदर्शनात् पाठे वार्त्तिकदृष्टे वार्त्तिकानोपचारः । षष्ठ्यन्तपाठस्तु सम्यगेव भावकर्म्मणोरिति । एवञ्च हत्तौ क्वचित् भावकर्म्मणोरात्मनेपदमिति पाठो लिपिकरप्रमादादेव । भावकर्म्मणोरिति पाणिनिसूत्रे आत्मन इत्यस्याभावात् अनुदात्तङित आत्मने पदमित्यादि ॥

Colophon. इति गयहट्टकुलोद्भवसर्व्वविद्यालङ्कारभट्टाचार्य्यविरचितायां पञ्चमकारकपादः समाप्तः ॥

विषयः । कातन्त्रव्याकरणस्य कारकपादस्य व्याख्यानम् ॥

No. 57. **कारकरत्नं,** By **दुर्गसिंहः ।** Substance, country-made paper, 19×6½ inches. Folia, 7. Lines, 10 on a page. Extent, 350 çlokas. Character, Bengali. Date ? Place of deposit, Alágán Mayamansinha Govindadása Kṛtiratna. Appearance, new. Prose. Correct.

Beginning. नमो गणेशाय । वर्जशब्दोऽयमत्यन्ताभाववचनं ततो धातुविभक्त्यत्यन्ताभाव-
वदर्थवस्त्विङ्गमिति कविराजः ।

End. शताथ परिकृतस्याच तदर्थेनैव सिद्धाति असतीति क्रियायोगे (शतेन)
काल उच्यते ।

Colophon. इति दुर्गसिंहविरचितं कारकरत्नं सम्पूर्णम् ॥

विषयः । षट्कारकाणां विचारः ।

No. 58. **कारकरहस्यं,** By **रूपरामन्यायपञ्चाननः ।** Substance, country-made paper, 17×3 inches. Folia, 14. Lines, 8 on a page. Extent, 616 çlokas. Character, Bengali. Date, S.K. 1709 ? Place of deposit, Brámhaṇa maṇdalí Rámanaráyaṇa Bhṭṭácáryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । ॐ नमः सरस्वत्यै ।
कृष्णं प्रणम्य संसारसृष्टिस्थित्यन्तकारकम् ।
कृतं श्रीरूपरामेण रहस्यं कारकस्य हि ॥
पैत्र्यञ्च पदमासाद्य भक्तियुक्तेन चेतसा ।
शिशूनामवधानार्थं सुपद्मस्यानुसारतः ॥
अथ कारकनिर्णयः । तथाहि ।
कर्त्ता कर्म्म च करणं सम्प्रदानमतःपरम् ।
अपादानञ्चाधिकरणं कारकाः षट् प्रकीर्त्तिताः ॥
एतेन षट्कारकनिरूपकेण क्रमनिरूपणं सिद्धम् ।

End. अत्रोच्यते द्विचिकवादिमते उक्ते कारकेऽव्यतिरिक्त प्रातिपदिकार्थस्य कल्पित-
त्वात् । अतएव पद्मकवादी यत् स्वीकरोति तदेतदभिप्रायेण अनुक्ते तु
कैरपि न स्वीकृतः । अतएव सत्तामात्रे अव्यतिरिक्तप्रातिपदिकार्थमात्रनिमित्तं
वाचका भवन्तीति व्याख्यानं सङ्गच्छते ।
तथाचोक्तं यस्मिन् वाच्ये विधीयन्ते त्यादि तव्यादि तद्धिताः ॥

समासो वा भवेद्यत्र स उक्तः प्रथमा ततः । त्यादिविभक्तिः तव्यादिः कृत् । शेषा विभक्तिस्तु तत्तद्व्याकरणेऽनुसन्धेया ॥

Colophon. इति श्रीरूपरामन्यायपञ्चाननभट्टाचार्य्यविरचितं कारकरहस्यं समाप्तम् ॥ ० ॥
नवखाब्धिविधुप्रमिताब्दतमे शुचिपक्षवासरदृक्षिरवौ ।
शिवराम इदं व्यलिखित् पठितुं प्रणिपत्य रघंगतवामनकम् ॥

विषयः । विचारमुखेन कारकादिनिर्णयः ।

No. 59. कालीध्यानटीका । Substance, country-made paper, 18 x 5 inches. Folia, 3. Lines, 9 on a page. Extent, 101 çlokas. Character, Bengali. Date, ? Place of deposit, Varasikurá Mayamansinha Ánanda-mohana Cakravartti. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः काल्यै । करालवदनां घोरां इत्यादि । दक्षिणां कालिकां ध्यायेत् साधकोत्तमः इत्यन्वयः ।

End. पुनः स्मेरमीषत् विकशितमाननसरोरुहमाननपद्मं यस्या स्तां आननं सरोरुहमिवेति लुप्तोपमा । ॥ ० ॥

विषयः । करालवदनामित्यादिकस्य तन्त्रोक्तस्य कालीध्यानस्य व्याख्यानम् ।

No. 60. कालीसर्व्वस्वसम्पुटः, By श्रीकृष्णविद्यालङ्कारः । Substance, country-made paper, 19 x 5 inches. Folia, 134 (without one leaf). Lines, 8 on a page. Extent, 4,256 çlokas. Character, Bengali. Date, ? Place of deposit, Májpará District Dháká, Bábu Rása Bihári Ráya. Appearance, new. Prose and verse. Incorrect.

Beginning. ॐ नमः कालिकायै ।
यामाद्यां परात्परतरां शम्भोः सदा मोदिनीं
ब्रह्माद्यैस्त्रिदशैः सदार्च्चितपदां सिद्धैः सदा सेवितां ।
प्राप्य ज्ञान + + + चक्रमत्र + तां विश्वरूपात्मिकां
वन्दे दक्षिणकालिकां भवभयान्निस्तारकारां शिवां ॥
नमामि कालीं कलिकल्मषघ्नीं
ब्रह्मादिभिः सेवितपादपद्मां ।
भक्तप्रसादप्रतिपादयित्रीं
देवे सदानन्दविधानदात्रीं ॥

गणेशं क्षेत्रपालञ्च योगिनीं बटुकं तथा ।
श्रीगुरुञ्च पुनर्नत्वा ज्ञानमोक्षप्रदायकम् ॥
न्यायवागीशपुत्रेण श्रीश्रीकृष्णेन धीमता ।
क्रियते विदुषां प्रीत्यै कालीसर्व्वस्वसम्पुटः ॥
मल्लीध्वमालोक्य विहाय मत्सरं
बुधाः सदेदं परिहारकञ्च ।
ग्रन्थं सदामोदविधानदक्षं
भूयोऽपि याचे करसम्पुटेन ॥
अत्र च ।
कालीतन्त्रं वीरतन्त्रं भैरवं तन्त्रसंज्ञकम् ।
भैरवी च महातन्त्रं तन्त्रञ्च वीरभद्रकम् ॥
वामकेश्वरमहातन्त्रं तन्त्रं समयसंज्ञकम् ।
फेत्कारीं योगिनीञ्चैव मत्स्यसूक्तञ्च यामलम् ॥
डामरं भूतसंज्ञञ्च सिद्धसारस्वतं तथा ।
योगिनीहृदयञ्चैव कालिकाहृदयं तथा ॥
कालिकाकुलसर्व्वस्वं कुमारीतन्त्रमुत्तमम् ।
कुलावलिमहातन्त्रं चामुण्डातन्त्रमुत्तमम् ॥
मुण्डमालामहातन्त्रं नीलतन्त्रं तथैव च ।
कुलसारं विश्वसारं स्वतन्त्रं शारदां तथा ॥
ज्ञानार्णवञ्च भूतेशं कुब्जिकातन्त्रमुत्तमम् ।
कालीकल्पमहातन्त्रं तथा भावचूडामणिम् ॥
वैष्णवोक्तञ्च यत् तन्त्रं यदन्यच्छक्तितन्त्रकम् ।
कालिकोपनिषत् सूक्तं गुरुवाक्यप्रमाणतः ॥
एतान् निश्चित्य यत्नेन उच्यते ग्रन्थसंग्रहः ॥
तत्रादौ प्रसङ्गादागमप्रशंसामाह रुद्रयामले ।
आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः ।
न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥ इत्यादि ।

End. अथ निषेधमाह यामले ।
गुरुशय्यासनं यानं पादुकोपानत्पीठकम् ।
स्नानोदकं तथा छायां लङ्घयेन्न कदाचन ॥

आसने शयने वापि न तिष्ठेदग्रतो गुरोः ।
अनुज्ञां प्राप्य तिष्ठेच्च नैवं शापं समाप्नुयात् ॥
वामे वा दक्षिणे वापि तिष्ठत्यत्र न चान्यतः ।
अनुज्ञां गृहीत्वा गच्छेत्तु न च स्वेच्छामयं तथा (?) ॥

Colophon. इति न्यायवागीशभट्टाचार्य्यात्मज श्रीश्रीकृष्णविद्यालङ्कारविरचितः कालीसर्व्वस्वसम्पुटो ग्रन्थः समाप्तः ॥

विषयः । अथ दीक्षाप्रसङ्गकथनम् । अष्टविधकालीभेदकथनम् । तत्र कालिकाशब्दनिर्व्वचनम् । तन्मन्त्रोद्धारः । प्रातःकृत्यविधिः । गुरुस्तोत्रादिः । कुलवृक्षनमस्कारादिकथनम् । शौचादिविधिः । स्नानविधिः । सन्ध्याविधिः । सूर्य्योपस्थानविधिः । पूजाविधिः । जपपूजनयोस्तुल्यत्वकथनम् । पञ्चशुद्धिकथनम् । आचमने मुद्रानियमः । कुलचन्दनविधिः । आसनविधिः । प्राणायामविधिः । भूतशुद्धिविधिः । प्राणप्रतिष्ठाविधिः । ऋष्यादिन्यासविधिः । अङ्गन्यासकरन्यासयोः विधिः । मातृकान्यासविधिः । वर्णन्यासविधिः । श्रीकण्ठन्यासविधिः । तत्त्वन्यासविधिः । बीजन्यासविधिः । गुह्यषोढान्यासविधिः । शिवशक्तिन्यासविधिः । नवपीठन्यासकथनम् । अन्तर्यागविधिः । बहिर्यागविधिः । तत्र अर्घ्यादिविधिः । ध्यानादिप्रयोगः । प्राणायामादिविधिः । महाकालपूजाविधिः । आवरणपूजाविधिः । पादोदकमाहात्म्यकथनम् । महाविद्यापूजनादौ सूतकादेरप्रतिबन्धकताकथनम् । रश्मिवृन्दपूजाविधिः । कालाष्टकस्तोत्र । कर्पूरादिस्तोत्र । दक्षिणकालिकास्तोत्र । परशुरामस्तोत्र । ब्रह्मगाथाकथनम् । कालिकोपनिषत् । कालिकाया जगन्मङ्गलकवचम् । कालिकायाः सर्व्वार्थसारकवचम् । कालीकवचकथनम् । कालीकुल्लुकाकवचकथनम् । त्रैलोक्यमङ्गलकवचकथनम् । सर्व्वार्थसाधनकवचम् । अष्टशक्तिस्तवः । त्रैलोक्यमोहनकवचम् । कालीसहस्रनामस्तवः । महाशङ्खादिमालाविधिः । मालासंस्कारविधिः । रुद्राक्षमालादिशोधनविधिः । मन्त्रसंस्कारादिविधिः । मन्त्रसिद्धिलक्षणम् । कुल्लुकादिज्ञानोपायकथनम् । शिवाबलिविधिः । छागादिबलिविधिः । पुरश्चरणविधिः । वीरपुरश्चरणविधिः । नित्यहोमविधिः । विशेषहोमपद्धतिः । होमद्रव्यपरिमाणादिकथनम् । कामनाभेदेन होमद्रव्यविशेषविधिः । कूर्म्मचक्रविधिः । ग्रहणपुरश्चरणप्रयोगः सूर्य्योदयपुरश्चरणप्रयोगः । शरत्कालीनपुरश्चरणप्रयोगः । रहस्यपुरश्चरणप्रयोगः । मन्त्रसिद्धिप्रमाणकथनम् । भूतलिपिविधिः । विलोहीमुद्रालक्षणादिकथनम् । कुलाचारमाहात्म्यादिकथनम् । कुमारीपूजाविधिः । दूतीयागनिरूपणम् । योनिपूजादिविधिः । पञ्चमकारविधिः । विजयाकल्पकथनम् । मांसशोधनविधिः । मत्स्यशोधनविधिः । मुद्राशोधनविधिः । मैथुनशोधनविधिः । शक्त्यङ्गेषु पीठनिरूपणम् । स्वयम्भूकुसुमादिशोधनविधिः । शोणितशुद्धिकथनम् । स्वयम्भूकुसुमादेरनुकल्पकथनम् । वीरसाधनविधिः । तत्र शवलक्षणादिकथनम् । विविधेन प्रकारेण

भवसाधनविधिः। योगिनां नित्यकृत्यकथनम्। अथ षट्कर्मकथनम्। तत्र उच्चाटनविधिः। विद्वेषणविधिः। स्तम्भनविधिः। षड्दर्शनक्रमकथनम्। आकर्षणविधिः। वशीकरणविधिः। गुरुचरणचिन्तनप्रकारकथनञ्च ॥

No. 61. कालीसहस्रनामस्तुतिरत्नटीका, By पूर्णानन्दः। Substance, country-made paper, 18 × 4½ inches. Folia, 40. Lines, 6 on a page. Extent, 990 çlokas. Character, Bengali. Date, ? Place of deposit, Serpur Mayamansiñha, Mahámahopádhyáya Candrakánta Tarkálaŋkára. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः काल्यै ॥

प्रणम्य कालीचरणारविन्दं ब्रह्मादिभिर्ध्येयमनन्तपुण्यं।
सहस्रनामस्तुतिरत्नटीकां तनोति तत्पादरतैकचित्तः ॥
कैलासशिखरे देवी शङ्करं पप्रच्छ कैलासे किम्भूते रम्ये नानारत्नविभूषिते नानावृक्षलताकीर्णे व्याप्ते नानापक्षिरवैर्युते चतुर्मण्डपसंयुक्ते चतुर्मण्डलेति क्वचित् पाठः।

End. यद्वा पाठयेत् पठेदेति दिवसं वन्ध्यं न चरेत् अवन्ध्यं दिवसं कुर्यात् इत्यर्थः।

इति गदितमशेषं कालिकावर्णरूपं
प्रपठति यदि भक्त्या सर्व्वसिद्धीश्वरः स्यात्।
अभिनवसुखकामः सर्व्वविद्याभिरामो
भवति सकलसिद्धिः सर्व्ववीरा समृद्धिः ॥
सर्व्ववीरा सर्व्वश्रेष्ठा सर्व्वाधिका वा समृद्धिर्भवेदिति ॥ ० ॥
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छति।

Colophon. इति पूर्णानन्दपरमहंसविरचिता सुन्दरीवरदानाख्यमेधासाम्राज्यनामकालीसहस्रनामस्तुतिरत्नटीका समाप्ता।

विषयः। कालीसहस्रनामस्तुतिरत्नाख्यस्य कालीस्तोत्रस्य व्याख्यानम्।

No. 62. कालीसहस्रनामस्तोत्रटीका। Substance, country-made paper, 10 × 5 inches. Folia, 48. Lines, 8 on a page. Extent, 608 çlokas. Character, Bengali. Date, Sk. 1744. Place of deposit, Kánṭhálpárá, post office Naiháṭi, Paṇḍita Rámatáraṇa Thákura. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः परमदेवतायै । अथ कालीसहस्रनामटीका ।
कालीं कल्याणकर्त्रीं करकलितकरां कृष्णमूर्त्तिं कृशाङ्गीं ।
(.......) अथ परमकारुणिकः परमशिवो गुह्यातिगुह्यतरां परविद्यां कलिकलुषहरां श्रीमद्दक्षिणकालिकां श्रीविद्याप्रस्तावतः सहस्रनाम्नां टीकां प्रकाशयति कैलास इत्यादिना ॥

End. महाकालसंहिता कालीकालसम्वादे सुन्दरीक्रियाविशेषणमिति व्याख्याय तथा पठन्ति तद्धि भाव्यमिति ।

Colophon. इति श्रीमदादिनाथमहाकालोक्तमहाकालसंहितायां कालीकालसम्वादे सुन्दरीशक्तिदानाख्यकालिकारूपककाराद्यकसहस्रनामस्तोत्रटीका समाप्ता ॥ शकाब्दा १७४४ ॥

विषयः । महाकालसंहितान्तर्गतकालीसहस्रनामस्तोत्रस्य व्याख्यानम् ।

No. 63. कालोत्तरम् । Substance, country-made paper, 11 × 2 inches. Folia, 9. Lines, 4 on a page. Extent, 81 çlokas. Character, Bengali. Date, ? Place of deposit, Usṭhi Mayamansiñha Kálícandra Nyáyálaŋkára. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।
कालोत्तरं प्रवक्ष्यामि राशिमाश्रित्य केवलम् ।
येन विज्ञानमात्रेण सर्व्वज्ञत्वमवाप्नुयात् ॥
स्वभावो लक्षणञ्चैव अपमृत्युस्तथैव च ।
कालमृत्युश्च सर्व्वेषां कालोत्तरः प्रकाशकः ॥
भावचिह्नापमृत्युश्च महामृत्युस्तथैव च ।
राशिक्रमेण विज्ञेया यत्र कालोत्तरो हि यः ॥

End. वरे चायायणे मासि नवम्यां सितपक्षके ।
गुरोऽङ्गिरा वेदद्ण्डे शूलरोगेण नश्यति ॥

Colophon. इति कालोत्तरं समाप्तम् ॥

विषयः । राशिनक्षत्रादियोगक्रमेण अकालमरणादिनिरूपणम् ॥

No. 64. काव्यप्रकाशविस्तारिका, By परमानन्दचक्रवर्त्ती। Substance, country-made paper, 12×3 inches. Folia, 43. Lines, 7 on a page. Extent, 1429 çlokás. Character, Bengali. Date, ? Place of deposit, Naiháṭí, Paṇḍita Haraprasáda Çástrí. Appearance, old. Prose. Generally correct.

Beginning. (अस्य ग्रन्थस्याद्यपत्रत्रयं नास्ति तेन प्रारम्भवाक्याभावात् अष्टादशपत्रस्थित द्वितीयोल्लासस्य प्रारम्भवाक्यं लिख्यते)
व्यञ्जनादृत्तिनिरूपणोद्देश्यत्वशब्दात्मकविभागपरं द्वितीयोल्लासं यावत् तत्-क्रमेणेत्यादि प्रथमं शब्दस्य ततोऽन्यस्येत्यादार्थः क्रमश्च ।

End. (अस्य शेषांशखण्डितत्वात् अनचत्वारिंशत्पत्रस्थद्वितीयोल्लासस्य समाप्तिवाक्यं लिख्यते)
इति सहकारियोऽद्भुटशक्तिमत्त्वेन तादृशशब्दस्यैवान्वयव्यतिरेकान्वयविधानात् अतएव शब्दमूलत्वव्यपदेश इति भावः ॥

Colophon. इति श्रीपरमानन्दचक्रवर्त्तिकृतौ काव्यप्रकाशविस्तारिकायां द्वितीयोल्लासः ॥ *

विषयः। काव्यप्रकाशनामकालङ्कारग्रन्थस्य व्याख्या ।

No. 65. काशीतत्त्वप्रकाशिका, By रघुनाथेन्द्रशिवयोगी। Substance, country-made paper, 14×4 inches. Folia, 41. Lines, 6 on a page. Extent, 645 çlokás. Character, Bengali. Date, ? Place of deposit, Çrínagara, District Dháká, Babu Rajaníkánta Guha. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणपतये । मत्स्यपुराणे ।
यथा नारायणः श्रेष्ठो देवानां पुरुषोत्तमः ।
यथेश्वराणां गिरिशः स्थानानामेतदुत्तमम् ॥
वायुपुराणे ।
मत्समः पुरुषो नास्ति त्वत्समा नास्ति चाङ्गना ।
अविमुक्तसमं क्षेत्रं न भूतं न भविष्यति ॥
ब्रह्मपुराणे । मार्कण्डेय उवाच ।
एकमेव जगन्नाथ इच्छेयं त्वत्प्रसादतः ।
लोकानाञ्च हितार्थाय नानाभारप्रशान्तये ॥

शैवभागवतानाञ्च वेदार्थप्रतिषेधकम् ।
अस्मिन् क्षेत्रवरे पुण्ये निर्म्मले पुरुषोत्तमे ॥
शिवस्यायतनं देव करोमीति परं महत् ।
प्रतिष्ठेयं यथा तत्र तव स्थाने च शङ्करम् ॥
ततो हास्यन्ति लोकेऽस्मिन् एकमूर्त्तौ हरीश्वरौ ।
प्रत्युवाच जगन्नाथः स पुनस्तं महामुनिम् ॥
यदेतत् परमं देवं कारणं भुवनेश्वरम् ।
लिङ्गमाराधनार्थाय यस्य ते मतिरीदृशी ॥
मम हृदयेन विप्रेन्द्र कुरु शीघ्रं शिवालयम् ।
तत्प्रसादात् शिवलोके तिष्ठसि त्वं तथाक्षयम् ॥
शिवे संस्थापिते विप्र ममसंस्थापनं भवेत् ।
नावयोरन्तरं किञ्चिदेकभावो द्विधाकृतौ ॥
यो रुद्रः स स्वयं विष्णुर्यो विष्णुः स महेश्वरः ।
उभयोरन्तरं नास्ति पवनाकाशयोरिव ॥
मोहितो नाभिजानाति स एव गरुडध्वजः ।
वृषध्वजः स एवेति त्रिपुरघ्नस्त्रिविक्रमः ॥

End. पराशरोपपुराणे ।
अत्रैवोत्क्रममात्रस्य जन्ममात्रस्य केवलम् ।
वेदवेदान्तसारस्य प्रणवाख्यस्य पार्व्वति ॥
ब्रह्मणस्त्वथंभूतोऽहं संसारद्रावकश्चिरात् ।
कृपया मामकं रूपं परिपूर्णं परात्परम् ॥
आनन्दं सत्यचिद्रूपं तावकं तमसः परम् ।
स्वयं भूतं निराधारं दास्यामि ...... ॥
अत्रैव मरणं सम्यक् यस्य सिध्यति देहिनः ।
विज्ञानसाधनं तेन सर्व्वं पूर्व्वमनुष्ठितम् ॥
सेवया ... विनश्यन्ति पापानि सकलानि तु ।
सेवयास्य समं नास्ति प्रायश्चित्तं न संशयः ॥
तस्मात् सर्व्वं परित्यज्य क्षेत्रमेतत् समाश्रयेत् ।
त्वया मया च देवेशि सेवितश्च महर्षिभिः ॥
क्षेत्रस्यैवास्य माहात्म्यं मया वक्तुं न शक्यते ।

आवालोपनिषत् साचात् स्वयं जानाति वा न वा ॥
ग्रन्थसंख्या पुराणानि सादरं तस्य पार्श्वति ।
वदन्ति लोकरक्षार्थं महाख्यानस्य भैरवम् ॥

Colophon. इति शिवयोगिरघुनाथेन्द्रविरचिता काशीतत्त्वप्रकाशिका समाप्ता ॥

विषयः । मत्स्यपुराण-वायुपुराण-ब्रह्मपुराण-पराशरोपपुराण-कूर्म्मपुराण-कालीपुराण-पद्म-पुराण-स्कन्दपुराण-महाभारतीयवनपर्व्व- हरिवंश-वृहज्जाबालश्रुति-लघुजाबाल-श्वेताश्वतरोपनि-षन्मेरुतन्त्र-काशीखण्डप्रभृतिभ्यः प्रामाणिकग्रन्थेभ्यः काशीक्षेत्रस्य माहात्म्यसूचकानां वचनानां संग्रहः प्रसङ्गतश्चात्र कपर्द्दीश्वर-धर्म्मेश्वर-केदारेश्वर-कृत्तिवासेश्वर-चौरेश्वर-वीरेश्वर-दुर्गा-मणिक-र्णिकादीनां माहात्म्यकीर्त्तनञ्च ॥

No. 66. काशीभाष्यामृतं, By रामरत्नवन्द्योपाध्यायः। Substance, country-made paper, 12×5 inches. Folia, 355. Lines, 8 on a page. Extent, 8520 çlokas. Character, Bengali. Date, ? Place of deposit, Yaçodala Mayamansiñha, Paṇḍita Harinátha Tarkabhúṣaṇa. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमो गणेशाय । ॐ नमः काश्यै ।
काशीविश्वेशनारायणगणपमुखान् सर्व्वदेवान् प्रणम्य
नत्वा गोस्वामिनं श्रीगुरुमतिविनयैः श्रीधरानन्दसंज्ञं ।
काशी ब्रह्मैव साक्षादिति हृदयसुखं तत्सदाज्ञानुसारात्
काशीभाष्यामृतं संविरचयति मुदा रामरत्नाख्यवन्द्यः ॥
चातराग्रामवास्यादौ काशीवासी ततः परम् ।
श्रीरामरत्नवन्द्यः स कालचन्द्रद्विजार्थदः ॥
श्रीश्यामाचरणाख्यवन्द्यन्वृपतेः काश्यां सभा सत्प्रभा
तस्यां काशीकथा सदा समुचिता तत् काशीभाष्यामृतं ।
स्वीकृत्य तदाज्ञया प्रमुदितः श्रीरामरत्नो द्विजो
वाक्यानां रचनाकृदत्र च मुदा श्रीकालचन्द्रो द्विजः ॥
विश्वेशं माधवं ढुण्ढिं दण्डपाणिञ्च भैरवं ।
वन्दे काशीं गुहं गङ्गां भवानीं मणिकर्णिकाम् ॥
इति उक्तवन्दना । श्रुतिस्मृतिपुराणेतिहासप्रसिद्धा काशीमुक्तिरनुत्तमा इति ।

End.

मुक्तिक्षेत्राणि सर्व्वाणि यत् संसेव्योदितं फलम्
पञ्चरात्रात्तदेवास्तु निषेव्य मणिकर्णिकाम् ॥
प्रयागस्नानपुण्येन यत् पुण्यं स्याच्छिवप्रदम् ।
काशीदर्शनमात्रेण तत् पुण्यं श्रद्धयाखिल ॥
यत् पुण्यमश्वमेधेन यत् पुण्यं राजसूयतः ।
काश्यां तत् पुण्यमाप्नोति त्रिरात्रशयनाद्भ्रमी ॥
तुलापुरुषदानेन यत् पुण्यं सम्यगाप्यते ।
काशीदर्शनमात्रेण तत् पुण्यं श्रद्धयाखिल ॥
इति विष्णोर्वचः श्रुत्वा देवदेवो जगत्पतिः ।
उवाच च प्रसन्नात्मा तथास्तु मधुसूदन ॥

Colophon. इति काशीभाष्यामृतेऽष्टाशीतितमः परिच्छेदः :

विषयः। काशीभाष्यकरणप्रयोजनकथनम् । ज्ञानाद्यभिमानभञ्जनावश्यकत्वकथनम् । भवज्वरादिनिरूपणम् । दिवोदासोच्चाटनवर्णनम् । वारणावतमाहात्म्यादिकथनम् । हिमालयपार्श्वस्थितसौम्यकाशीमाहात्म्यम् । पार्व्वत्या एकाम्रवनगमनादिवर्णनम् । हरिहराभेदनिरूपणम् । पद्मपुराणोक्तकाशीमाहात्म्यादिकथनम् । सर्व्वसम्मतकाशीमुक्तिनिरूपणम् । युगधर्म्मनिरूपणम् । व्यासभिक्षावारणादिकथनम् । काशीसर्व्वोत्तमत्वादिनिरूपणम् । काशीप्रादुर्भावादिकथनम् । कपालमोचनतीर्थमाहात्म्यादिकथनम् । ब्रह्महत्यादिपापनिष्कृतिनिरूपणम् । ज्ञानोपदेशादिनिरूपणम् । काश्याश्रयणनिरूपणम् । निर्व्वाणपरीक्षादिनिरूपणम् । काशीकृतपापप्रायश्चित्तादिनिरूपणम् । त्रिपुण्ड्रोर्द्ध्वपुण्ड्रधारणादिनिरूपणम् । शिवापराधभञ्जनादिप्रकारकथनम् । गङ्गामाहात्म्यादिनिरूपणम् । ब्राह्मणमाहात्म्यादिकथनम् । शिवप्रसादमाहात्म्यादिकथनम् । शिवपूजाविध्यादिः । काश्याश्रितसर्व्वतीर्थनिरूपणम् । तारकोपदेशकथनम् । काशीकृतपापयातनादिवारणप्रकारनिरूपणम् । शिवविष्णुवैषम्यभावभञ्जनादिकथनञ्चेति विस्तरः ॥

No. 67. कौरदूतं, By रामगोपालः । Substance, country-made paper, 14×3 inches. Folia, 12. Lines, 6 on a page. Extent, 238 çlokas. Character, Bengali. Date, S. K. 1778 Place of deposit, Dhánuká, Post office Pálanga, District Faridpura Paṇḍita Jagadbandhu Vidyábhúṣaṇa. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः श्रीकृष्णाय ।

विद्युद्गौरोज्ज्वलनिवसनं शोणपादारविन्दं
बर्होत्तंसं नवजलधरश्याममम्भोरुहाक्षं ।

कुन्दद्वंशीविलसदधरं सुन्दरं स्मेरवक्त्रं
पूर्णानन्दं किमपि ललितं ज्योतिरालोकयामि ॥
वृन्दारण्ये खगमृगकुलाक्रान्दशून्ये लटान्ते
भास्वत्पुत्र्या दयितविरहोत्तापसन्तापितानां ।
गोपस्त्रीणां ...... वृन्दं मण्डले दुःखिनीनां
चाटूक्तिभिः .... नर्म्मभित् सर्व्वदासीत् ॥
मध्ये तासामपि च शुशुभे तप्तकार्त्तस्वराङ्गी
सुश्रोणीनां कमलजदलस्यालसत् कर्णिकेव ।
दीना क्षीणा सजलनयना नीरसा...... कण्ठे
मर्त्युं नैच्छद्विरहदहनोत्तापतप्ता तदा किं ॥
काचिद्गोपी विनयवचनैः सान्त्वयित्वा मृगाक्षीं
भर्तुर्वार्त्तागमनसुलभं जीवनं सानुमेने ।
इत्थं चिन्ताकुलितहृदया पश्चिमं कीरमारात्
प्रीत्यापश्यत् सुरसिकमनोहारिणं विम्बचञ्चुं ॥
प्रत्यूचे तं सुमधुरगिरा प्रीणयित्वा वराङ्गी
कीरास्माकं त्वमतिकुशली दौत्यकर्म्मण्युताखिन् ।
वन्यस्त्रीणां विविधवचनं त्वन्मुखोद्गीतहृद्यं
श्रोष्यत्येव प्रमुदितमना माधवो यादवाग्र्यः ॥ इत्यादि ॥

End

काहं कोवा मम तु दयितो नैव किञ्चित् स्मरामि
श्लोकः कोऽपि स्फुरति हृदये श्यामलाङ्गोऽग्निरूपः ।
कस्माद्धेतोर्दहति स च मां निर्दयः किं करोमी-
त्युक्त्वा भूमौ न्यपतदिव सा संवृतास्यन्दनाक्षी ॥
कृष्णायावेदयितुमपि तां दुर्द्दशां तत् प्रियाया
चत्यौत्कण्ठ्यात् झटिति मथुरां नागराय प्रियाय ।
वृन्दारण्याद्व्यथितहृदयो व्यस्तरूपः प्रतस्थे
कीरो धीरः सुसदुपकृतौ दौत्यकर्म्मैकदक्षः ॥
राधादेवीविरहसहितोपेन्द्रलीलारहस्यं
... नेदं कृतमपि मया कीरदूताख्यकाव्यम् ।
...... प्रभवकविना रामगोपालकेन
प्रेमात्मानोऽमृतमिव सदा सन्त आस्वादयन्तु ॥

दोर्द्दर्पेण वशीकृताः क्षितिभुजो यस्यैव वश्यावनौ
यस्याशेषगुणप्रदीप्तयशसा प्रच्छादितं क्ष्मातलम् ।
वर्त्तन्ते परिषत्सु यस्य कवयः श्रीकालिदासोपमाः
काव्यं कीरवचोहरं वितनुते तस्यैकसभ्यो बुधः ॥ समाप्तोऽयं ग्रन्थः ।

Colophon. शाके वह्निश्शैलक्षितिपरिगणिते मार्गशीर्षे कुजाह्वे
तारिण्याः पादपद्मं स्मरहरहृदि ध्यायमानं मुनीन्द्रैः ।
नत्वा कीराख्यदूतं सुमधुरवचः स्वीयपाठार्थमेतत्
व्यालेखीद्दुर्गारामनाथो वटुरिव च गुरोः संस्मरन् श्रीयुताङ्घ्रिं ॥
श्रीदुर्गाचरणे सदा भवतु मे भक्तिः पदाब्जं गता ॥

विषय । कीरमुखेन मथुरागतं श्रीकृष्णं प्रति श्रीराधायाः सन्देशप्रेरणम् ॥

No. 68. कीर्त्तनचिन्तामणिः, By रघुनाथभट्टः । Substance, country-made paper, 8 × 5 inches. Folia, 8. Lines, 11 on a page. Extent, 176 çlokas. Character, Bengali. Date, ? Place of deposit, Agartalá Vṛddhanagara Paṇḍita Mineçvara Sárbabhauma. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीगौरविधुर्जयति ।
अथ कीर्त्तनचिन्तामणिलक्षणम् ।
श्रीवाल्मीकपुराणे यथा ।
श्रीमद्रूपगोस्वामिपदारविन्दचिन्तया ।
गीतचिन्तामणि ग्रन्थः श्रीरघुनाथेन निर्म्मितः ॥
चरितं यथा ।
निमन्त्रणाधिवासादिभावकानाञ्च गायकाः ।
मान्दपरिधिरागाणां यत् यत् कीर्त्तनलक्षणम् ॥ इत्यादि ।

End. सर्व्वत्र स्मरणमेव(?) गौराङ्गः सदयो भवेत् ।
पार्षदं तथारूपेण प्रतिजन्मसु सङ्गमम्(?) ॥

Colophon. इति श्रीरामाद्भूतिपुराणे भरद्वाजं प्रति श्रीवाल्मीकमुन्युक्तं तदुद्धृतः संग्रहः श्रीरघुनाथभट्टगोस्वामिरचितः कीर्त्तनचिन्तामणिग्रन्थमिति एकशाखपञ्चवोक्ताः सम्पूर्णम् ॥ (?)

विषयः । कीर्त्तनस्य लक्षणादिकथनम् ॥

No. 69. **कुमारिकाखण्डः स्कन्दपुराणीयः ।** Substance, country-made paper, $12 \times 4\frac{1}{2}$ inches. Folia, 182. Lines, 10 on a page. Extent, 7,025 çlokas. Character, Bengali. Date, Sk. 1724. Place of deposit, Calcutta. Çyámapukur Visvakoṣa Office. Bábu Nagendra Nátha Basu. Appearance, new. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः । मुनय ऊचुः ।
दक्षिणार्णवतीरेषु यानि तीर्थानि पञ्च च ।
तानि ब्रूहि विशालाच वर्णयन्त्यति तानि च ॥
सर्व्वतीर्थफलं येषु नारदाद्या वदन्ति च ।
तेषां चरितमाहात्म्यं श्रोतुमिच्छामहे वयम् ॥
उग्रश्रवा उवाच ।
शृणुध्वमद्भुतं पुण्यं तत्कथां कुमारनाथस्य महाप्रभावम् ।
द्वैपायनो यन्मम चाह पूर्व्वं हर्षाम्बुरोमोद्गमचर्च्चिताङ्गः ।
कुमारगीता गाथाश्च श्रूयतां मुनिसत्तमाः ।
या सर्व्वैर्देवैर्मुनिभिश्च पूजिता ॥
साध्वाचारस्तम्भतीर्थं यो निषेवेत मानवः ।
नियतं तस्य वासः स्यान्मम लोके यथा मम ॥

End. इति वो वर्णितः पुण्यो महीसागरसम्भवः ।
शृण्वन् संकीर्त्तयंश्चैनं सर्व्वपापैः प्रमुच्यते ॥
य इदं श्रावयेद्विद्वान् महीमाहात्म्यसम्भवम् ।
सर्व्वपापविनिर्म्मुक्तो रुद्रलोकमवाप्नुयात् ॥
गुप्तक्षेत्रस्य सकलं माहात्म्यं श्रावयेद्यदि ।
सर्व्वैश्वर्य्यमवाप्नोति ब्रह्महत्यां व्यपोहति ॥
श्रुत्वैवमखिलं खण्डं ब्राह्मणाय निवेदयेत् ।
यथाशक्त्या सुवर्णञ्च गां भूमिं प्रयतः शुचिः ॥
सन्तुष्टे ब्राह्मणे तुष्टो महेशो जायते ध्रुवम् ।

Colophon. इति श्रीस्कन्दपुराणे कुमारिकाखण्डे गुप्तक्षेत्रमाहात्म्यं । अत ऊर्द्धं कपिला-
ख्यानोपाख्यानं यस्यायमाद्यश्लोकः । शौनक उवाच ।
सूत माहात्म्यमतुलं गुप्तक्षेत्रस्य सूचितं ।
स्थानस्य कापिलस्यापि माहात्म्यं वक्तुमर्हसि ॥
शुभमस्तु ॥ श्रीसंवत् १८५९ ॥ शकाब्दा १७२४ ॥

विषयः । पञ्चतीर्थादिनिरूपणम् । दानप्रशंसादिकथनम् । युगाद्यादिनिरूपणम् । भारद्वाजप्रतिष्ठादिः । मन्त्रप्रादुर्भावादिकथनम् । कुमारेशमाहात्म्यादिवर्णनम् । तारकविजयादिवर्णनम् । पञ्चलिङ्गोपाख्यानादिः । भूसंस्थित्यादिनिरूपणम् । बर्करेश्वरमाहात्म्यादिकथनम् । मन्त्रादिप्रादुर्भावकथनम् । युगव्यवस्थादिकथनम् । महाकालमाहात्म्यादिकथनम् । भवादित्यमाहात्म्यादिकथनम् । दिव्यवर्णनादिकथनम् । जयादित्यमाहात्म्यादिकथनम् । महाविद्यासाधनादिकथनम् । बर्बरीकोपाख्यानादिः ।

No. 70. कुलचूड़ामणिः । Substance, country-made paper, 12 × 2½ inches. Folia, 28. Lines, 6 on a page. Extent, 504 çlokas. Character, Bengali. Date ? Place of deposit, Hálisahar Khásváṭi Mahádeva Bhattácháryya. Appearance, old. Verse. Incorrect.

Beginning. ॐ नमो गणेशाय । भैरव उवाच ।

चतुःषष्ठ्या त्रिपुरा देवि चतुःषष्ठ्या च कालिका ।
वागीश्वरी महासंख्या तथा तद्वत् कुलाकुला ॥
मातङ्गिनी तथा पूर्णा विमला च सुनायिका ।
त्रिपुरैकजटा दुर्गा यामाख्या कुलसुन्दरी ॥
वैष्णवं गाणपत्यञ्च महासौरमतं तथा ।
शैवं शङ्करजालञ्च तत्किञ्चित् भूतसम्भवम् ॥
चतुःषष्टिश्च तन्त्राणि मातृका गुणमानि च ।
महामाया (सम्भवञ्च) योगिनीयामलसम्भवम् (?) ॥
(तद्वत्स्वरकल्पाम) भैरवाष्टकमेव च ।
(बह्निरूपाष्टकं ज्ञानं) आमलाष्टकमेव च ॥ (?)
तन्त्रज्ञानं वासुकिञ्च महासम्मोहनं तथा ।
महाशङ्खं महादेवं वातुलं वातुलोद्भवं ॥
कामधेनुं मोहमेशं विशुद्धेश्वरमेव च ।
एवमेतानि तन्त्राणि तथान्यदपि कोटिशः ॥
श्रुता देवि न कुत्रापि यातानन्दाषि भैरवि ।
तत् कथं वद सुश्रोणि मयि तत्पादवर्त्तिनि ॥
देव्युवाच ।
शृणु देव परानन्द परमार्थविशारद ।
योगिनीसुखकाङ्क्षा उपायं कथ्यते मया ॥

End. भूतशुद्धिं प्राणायामञ्च बीजं षडङ्गं विधाय बिल्वपत्रे एतन्मन्त्रं विलिख्य
चन्द्रोद्भवां युवतीं समानीय तस्या योनौ भगमालां सम्पूज्य तत्र यन्त्रं
संस्थाप्य ध्यायेत् ।
चलत्कज्जलेन्दुसंकाशां नवयौवनविग्रहाम् ।
चिन्तयेत् योषितां योनौ क्षोभयेत् परमेश्वरीम् ॥
इति ध्यात्वा गन्धादिभिरभ्यर्च्य पुनः शक्त्यै दद्यात् ।
किं पुनर्मानवं देवि त्रैलोक्यमपि मोहयेत् ।
प्रकारान्तरमाह । भूतशुद्धिं प्राणायामञ्च विधाय युवतीमस्तके यन्त्रं
संस्थाप्य ध्यायेत् ।
रक्तवस्त्रां स्त्रियं ध्यात्वा त्वदीयमरसा ततः ।
तस्या मूर्द्ध्नि स्मरेद्दिव्यां स्रवत्पीयूषवर्षिणीम् ॥

विषयः । गुरुनिरूपणम् । स्नानादिनिरूपणम् । कुलदेवतापूजादिनिरूपणम् । कुलाचारादिनिरूपणम् । यन्त्रादिलेखनोपायकथनम् । कुलाचारादिनिरूपणम् । समयाचाररक्षादिनिरूपणम् । मद्यपानादिविधिः । वेतालादिसिद्धिप्रकारः । कुलाचारसङ्केतनिरूपणम् । प्रयोगादिश्चेति ।

No. 71. कुलदीपिका । Substance, country-made paper, 15 × 7 inches. Folia, 47. Lines, 10 on a page. Extent, 940 çlokas. Character, Nágara. Date ? Place of deposit, Káçidháma Vindhyeçvarí-prasáda Dube. Appearance, new. Verse. Incorrect.

Beginning. ॐ नमो गणेशाय । अथ कुलप्रदीपिका लिख्यते । ॐ परापरायै नमः ।
नमामि प्रथमां देवीं आदिमूर्त्तिं सनातनीम् ।
चिन्मयीं परमानन्दां विज्ञानज्ञानरूपिणीम् ॥
विलोक्य कुलशास्त्रञ्च सम्प्रदायत्रयं मम ।
कौलिकानां हितार्थाय क्रियते कुलदीपिका ॥
अथ दक्षिणमे शक्तिसङ्गमे शिव उवाच ।
रहस्यातिरहस्यञ्च कथ्यते शृणु साम्प्रतम् ॥
आदिनारायणः साक्षात् परं ब्रह्मः स एव हि ।

End. आधारविद्याषट्कञ्च पुनरंश्चिद्विधं क्रमात् ।
मूलविद्या परा चैव रहस्ययोगिनी तथा ॥

शाम्भवीतु ष्ट्चलेखा समयापरबोधिनी ।
कुलपञ्चाचरी पञ्चदशाभ्यर्णा सुतरात्मिका (?) ॥
कौलविद्या तथा प्रोक्ता गुरुक्रमविमर्षिणी ।
समानाख्यादिसङ्केता विद्यानुरागपूर्व्विका ॥
वागवादिनी ततः पश्चात् प्रोक्तानुत्तरशाङ्करी ।
षोड्शी मूर्त्तिविद्या च त्रिमूर्त्तिः पुरसुन्दरी ॥
सप्तविंशतितत्त्वान्तं मीनकेतुकलात्मिका ।
अध्वरमिदं दिव्यं षड्प्रसहितं क्रमात् ॥
ऊर्द्धं श्रीपादुका पूर्व्वं चरणान्तं क्रमाद्गुत ।

Colophon. इति श्रीकुलदीपिका समाप्ता ।

विषय: । दशमहाविद्यामन्त्रानुष्ठानादिनिर्णयः ।

No. 72. कुलपञ्जिका, By महेशः । Substance, country-made paper, 19 x 5 inches. Folia, 533. Lines, 11 on a page. Extent, 27,797 çlokas. Character, Bengali. Date ? Place of deposit, Kolágrám, District Dháká, Çrí Hariçcandra Ghaṭaka. Appearance, new. Generally Prose. Incorrect.

Beginning. ॐ नमो गणेशाय । अथ कुलपञ्जिका लिख्यते ।
बालकानां हितार्थाय निर्द्दोषकुलपञ्जिका ।
क्रियते श्रीमहेशेन कुलीनस्योपकारिका ॥
षट्त्रिंशद्वृन्दमालोक्य निर्द्दोषस्तत्र वच्यते ।
निर्द्दोष इति पदमिति इन्दभग्नविषयकः ॥
इन्दशब्देनात्र मुनिरुच्यते ।
फुलिया खड्दहश्चैव बल्लवोऽथ रवीकरः ।
आचारजस्तथा ख्यातः सुराइहड्मेव च ॥
वाणोऽथ शेखरश्चन्द्रः श्रीविद्याधरकस्तथा ।
राढे वङ्गे समाख्याता निर्द्दोषकुलयूथकाः ॥

इत्यादि । यूथं इन्दं मेल इति पर्य्यायः । तन्मेलत्वावच्छिन्नस्य यूथं निर्द्दोषरूपम् । तत्तद्यूथादि प्रकरणभेदेन कथ्यते । इत्यादि ।

End. राजवल्लभस्य कन्या वं कीर्त्तिनारायण पं ततसुतरामगोहनकुलभूषणः तस्य

कन्या विं मुं रामसन्तोष प्रं वं धर्म्मनारायण प्रं तत्सुत रामगतिविद्याभूषणः
अस्य चें मुं रामसन्तोषः प्रं तत्सुताः निमचाँद गोकुल वंशिवदनाः ।

Colophon. (अतःपरं न लिखितं ।)

विषयः । वङ्गीयराढ़ीयकुलीनानां वंशावलीकीर्त्तनम् । तेषामार्सिचेम्यादिकीर्त्तनञ्च ।

No. 73. कुलसंहिता वा नवराचादि कुलसंहिता । Substance, country-made paper, 12 × 3 inches. Folia, 30. Lines, 8 on a page. Extent, 768 çlokas. Character, Bengali. Date ? Place of deposit, District Dháká, Vikramapura Májpáḍá Bábu Rásavihárí Ráya. Appearance, old. Verse. Incorrect.

Beginning. ॐ नमः परदेवतायै ।
कालीतन्त्रं समालोक्य यामलं भूतडामरम् ।
कुब्जिकातन्त्रराजञ्च खेचरीसाधनं तथा ॥
कालीतन्त्रं वीजतन्त्रं विविच्य परया मुदा ।
कथ्यतेऽतिप्रयत्नेन साधकानां हिताय च ॥
मन्दरस्थं महादेवं भगवन्तं महेश्वरम् ।
पप्रच्छ भक्तिसंयुक्ता प्रेमविक्लवमानसा ॥
वक्षःस्थलसमासीना विपरीतरतातुरा ।
श्री पार्व्वत्युवाच ।
केनोपायेन देवेश द्रुतं सिद्धिर्भवेन्नृणाम् ।
तन्मे वद दयासिन्धो भक्तानुग्रहकारक ॥
कौलाचारं विशेषेण शवादिसाधनं तथा ।
वदस्व गिरिजानाथ यदि स्नेहोऽस्ति मत्प्रति ॥
इति देव्या वचः श्रुत्वा भगवान् शङ्करोऽब्रवीत् ।
स्त्रीस्वभावोऽतिदुर्व्वार्य्यो योगिनामपि सुव्रते ॥
लक्षवारसहस्राणि वारितासि मया प्रिये ।
तथापि तव चापल्यं वारितुं नैवमीश्वरः ॥
तवस्नेहेन भक्त्या च प्रेम्णा च गिरिसम्भवे ।
दासोऽहमिति ते ज्ञात्वा वच्म्यहमतिसुनिर्म्मलम् ॥
वदामि जगतां मातः शृणु सावहिता प्रिये । इत्यादि ।

End. सुखदं मोचदश्चैव सर्वैश्वर्य्यप्रदायकम् ।
नवरात्र मिदं देवि गोपनीयं त्वया प्रिये ॥
यथा जारो अनन्यास यथान्यस्य च सङ्गमः ।
यथा जारो गोपनीयो भर्त्तरि प्राणवल्लभे ॥
तथेदं गोपनीयञ्च न प्रकाश्यं त्वया पुनः ॥

Colophon. इति महारत्ने शिवपार्व्वतीसंवादे नवरात्रादिकुलसंहिता समाप्ता ॥

विषयः । तत्र कौलधर्म्मनिरूपणम् । अथ साधकलक्षणादिकथनम् । साधिकालक्षणादिकथनम् । कौलानां पूजाक्रमविधानम् । तत्फलादिकथनम् । पञ्चतत्त्वनिरूपणम् । मत्स्यादिशोधनविधिः । बलिदानविधिः । पात्रपूजादिविधिः । जपविधिः । तर्पणविधिः । कलौ वीरभावस्य प्राशस्त्यकथनम् । साधनविधिः । तत्त्वेशादिनिरूपणम् । कौलानां कर्त्तव्याकर्त्तव्यविधानम् । कौलगुरुलक्षणादिकथनम् । कौलाचाराधिकारनिरूपणम् । गुरुप्रशंसादिकथनम् । कौलरहस्यकथनञ्च ।

No. 74. कुलसाम्भवी । Substance, country-made paper, 18×4½ inches. Folia, 6. Lines, 7 on a page. Extent, 283 çlokas. Character, Bengali. Date ? Place of deposit, Hálisahar Khásváṭí Mahádeva Bhaṭṭácháryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ श्रीगुरवे नमः ॥
नमामि आद्यपुरुषं परं ब्रह्म च सर्व्वदा ।
शब्दस्पर्शरूपरसगन्धाकारविवर्ज्जितम् ॥
साधकानाञ्च चिह्नानां रसहृदय महद् ।
दृष्टिपालनसंचार तत्क्षते हलीयात्मकम् ॥ (?)
प्रथमं सर्व्वलोकानां सर्व्वराज्यसुखप्रदं ।
प्राचीनादव्ययमव्यक्तं शिवाकारमनामयम् ॥
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ्त्यस्मिन् उमा देवी ब्रूहि ज्ञानं महेश्वर ॥

End. अनुपमं निराकारं निःशब्दः शब्द उच्यते ।
अचलं निर्म्मलञ्चैव शून्यश्चापि निरञ्जनम् ॥
वेदान्तसारसर्व्वस्वं उमाये शिवभाषितम् ।
विविधं सर्व्वयोगानां नाम कार्य्या विचारणा ॥

Colophon. इति योगशास्त्रे उमामहेश्वरसम्वादे कुलसारार्णवो समाप्तः ।

विषयः । आध्यात्मिकज्ञानसुद्रातीर्थादिनिरूपणम् ।

No. 75. कृष्णकर्णामृतटीका (सारङ्गरङ्गदा) By कृष्णदासः । Substance, country-made paper, 12 × 5 inches. Folia, 36. Lines, 11 on a page. Extent, 1,188 çlokas. Character, Bengali. Date ? Place of deposit. Váñkurá Kuncekol Bábu Yogíndranátha Siñha Deva. Appearance, old. Prose. Generally correct.

Beginning. श्रीश्रीकृष्णाय नमः ।

यद्भावभावितधियोऽत्र वाचां सुद्रामि दुर्गमतमासुनिपुङ्गवानां । (?)

राधोत्सुकं मदनमोहनमच्युतं तं राधासमेधितरसोल्लसितं नतोऽस्मि ॥

कृपासुधासरिद् यस्य विश्वमाप्लावयन्त्यपि ।

निचगैव सदा भाति तं श्रीचैतन्यमाश्रये ॥

ममन्दो कृष्णमाधुर्यकेलिसौन्दर्यसम्पदम् ।

केचिन्न भावना सम्यग् श्रिया लीलाशुकस्य गीः ॥

मन्दोऽपि कश्चित् श्रीरूपपदाम्भोजमधुव्रतः ।

कृष्णकर्णामृतव्याख्यां विस्तृणोति यथामति ॥

End. चक्षुषे पथि मेऽस्मत्र स्खलत्पदगतेर्मुहुः ।

सक्षपायहिदानेन सन्तः सन्त्ववलम्बनम् ॥

Colophon. श्रीरूपचरणाश्रित कृष्णदासेन निर्म्मिता ।

कृष्णकर्णामृतस्यैषा टीका सारङ्गरङ्गदा ॥

विषयः । कृष्णकर्णामृतनामकस्य भक्तिग्रन्थस्य व्याख्यानम् ।

No. 76. कृष्णनामार्थप्रकाशः । Substance, country-made paper, 12 × 4½ inches. Folia, 16. Lines, 9 on a page. Extent, 468 çlokas. Character, Bengali. Date, ? Place of deposit, Viṣṇupura Kriṣṇaganja Çaçibhúṣaṇa Gosvámí. Appearance, old. Verse. Generally correct.

Beginning. नमः श्रीकृष्णनाम्ने ।

श्रीचैतन्यमुखोद्गीर्णा हरेकृष्णेति वर्णकाः ।

मज्जयन्तो जगत् प्रेम्णि विजयन्तां तदाह्वयाः ॥

कृष्णचैतन्यमद्वैतं नित्यानन्दं सभक्तकम् ।

नत्वा तनोमि तत्प्रीत्यै तन्नामार्थप्रकाशकम् ॥
युगेषु धर्म्मपादानां नियमस्तेषु साधनम् ।
कलौ तु हरिनामैव केवलं गतिरित्यपि ॥
नामिनाम्नोरभिन्नत्वं तस्मादाधिक्यमित्यपि ।
नाम्नां साधनरूपत्वं सर्वसाधनगौरवम् ॥
देशकालादिपात्राणां नियमाभाव इत्यपि ।
बहुजन्मसु गोविन्दसेवालभ्यत्वमेव च ॥
सर्व्वार्थसाधनविधिर्निन्दकानाञ्च दूषणम् ।
कृतार्थत्वं तत्पराणां व्यतिरेकेण गर्हणम् ॥

End. सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत् फलम् ।
एकावृत्त्या तु कृष्णस्य नामैकं तत् प्रयच्छति ॥
पद्मपुराणे ॥
तारकं रामनाम स्यात् कृष्णनाम च पावकम् ।
तारकाज्जायते मुक्तिः प्रेम भक्तिश्च पावकात् ॥
युगलनाममाहात्म्यम् । भविष्योत्तरे नारदं प्रति भगवद्वचनम् ॥
मन्नामलक्षजापेन यत्फलं लभते नरः ।
तत्फलं समवाप्नोति राधाकृष्णेति कीर्त्तनात् ॥
कृष्णेति द्व्यक्षरं नाम राधया सह यो वदेत् ।
आहूत इव तस्याहं वसामि हृदि नारद ॥ * ॥

सत्यमेव जयते

Colophon. इति कृष्णनामार्थप्रकाशः समाप्तः ॥ * ॥ श्रीराधाकृष्णाय नमः ॥

विषयः । युगेषु धर्म्मपादनियमयुगसाधनादिनिरूपणमुखेन हरिनाममाहात्म्यादिनिरूपणम् ॥

No. 77. कृष्णभक्तिप्रकाशः । Substance, country-made paper, $17 \times 3\frac{1}{2}$ inches. Folia, 33. Lines, 9 on a page. Extent, 1,225 çlokas. Character, Bengali. Date, Sk. 1696. Place of deposit, Viṣṇupura District Bāñkurá. Babu Rámavallabha Bhaṭṭácáryya. Appearance, old. Prose. Generally correct.

Beginning. श्रीकृष्णाय नमः ।
श्रीकृष्णचरणाम्भोजं प्रणम्य परया मुदा ।
नानापुराणवाक्येन तस्य भक्तिः प्रकाश्यते ॥

अज्ञानतिमिरध्वंसी परमार्थप्रकाशकः ।
कृष्णभक्तिप्रकाशोऽस्तु प्रमोदाय सतां सदा ॥

अथ प्रारिप्सितग्रन्थपरिसमाप्तिकारणं श्रीकृष्णनमस्कारं मङ्गलमाचरति श्रीभागवतपद्येन ।

नौमीड्य तेऽभ्र वपुषे तदिदं वराय
गुञ्जावतंसपरिपिच्छलसन्मुखाय ।
वन्यस्रजे कवलवेत्रविषाणवेणु-
लक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ॥

तथैव ग्रन्थप्रतिपाद्यं श्रीकृष्णभजनरूपं मङ्गलमाचरति । श्रीविष्णुयामल-संहितावचनेन द्वाभ्यां ।

इह खलु सकलपुरुषार्थमर्थयमानानान्तदुपायमनुसरतां श्रीभगवद्भक्तिमेव परमोपायत्वेन स्वतः पुरुषार्थत्वेन श्रीभागवते परमरहस्यं श्रीवेदव्यास उप-निबबन्ध । ग्रन्थनिरूपणन्तु भक्तिनिरूपणोपकरणमेवेत्याशयेन तत्परश्लोकानां तदर्थप्रतिपादकानाञ्च नानापुराणोक्तश्लोकानां संग्रहेणास्मिन् श्रीकृष्णभक्ति-प्रकाशके ग्रन्थे प्रथममुद्देशक्रमः । तत्र प्रथमकाण्डे श्रीकृष्णभक्तिप्रशंसा । तदभक्तनिन्दा । श्रीकृष्णभजनम् । सर्व्वकालिकनैयत्यं । अधिकारिनियमा-भावः । भक्तिकारणम् । एतानि प्रकरणानि । द्वितीयकाण्डे निष्काम-भक्तेर्गरीयस्त्वम् । भक्तेर्लक्षणं फलञ्च । गुरुपादाश्रयाद्यङ्गनिरूपणम् । कर्म्माद्यङ्गनिरूपणम् । साधनभक्तिनिरूपणं तत्राधिकारिनिरूपणञ्च । नाना-विधभक्त्यादिषु प्राधान्यकथनम् । श्रवणनिरूपणम् । कीर्त्तननिरू-पणम् । नामापराधाः । तदन्ते तत्क्षमापणम् । स्मरणनिरूपणम् । पादसेवानिरूपणम् । तत्रैवार्च्चननिरूपणम् । तत्रैव सेवापराधाः । तदन्ते तत्क्षमापणम् । वन्दननिरूपणम् । दास्यनिरूपणम् । तत्रैव दासभेदाः । सख्यनिरूपणम् । तत्रैव सखिभेदाः । आत्मनिवेदननिरूपणमित्यादि । अथो-द्देशक्रमे एकैकशः प्रकरणमारभमाणो भक्तिप्रवृत्त्यर्थं श्रीभगवद्भक्तप्रशंसामाह । श्रीभागवते भगवद्दासा एव सर्व्वतः कृतार्था इत्याह ।

यन्नामश्रुतिमात्रेण पुमान् भवति निर्म्मलः ।
तस्य तीर्थपदः किम्वा दासानामवशिष्यते ॥

पुमानिति सामान्यपदेन सर्व्वोपकारणम् ॥ इत्यादि ।

End. अर्थो हि द्विधा शब्दस्य पण्डितैरुपपद्यते ।
देह्यहं तत्पदं केचिद्देहः कश्चिन्ममलभाक् ॥

तत्र देवी । यथा यामुनाचार्य्यस्तोत्रे ।
वपुरादिषु योऽपि कोऽपि गुणदोषान् यथाविधि ।
तदयं तव पादपद्मयोरधुनैव(?) मया समर्पितः ॥
देहो यथा जातिविवेके ।
चिन्तां कुर्य्यात् नरगर्णैर्विक्रीतस्य यथा पशोः ।
तथार्पणं हरौ देहं विरचेद्धरचणात्(?) ॥
भक्तिरसामृतसिन्धौ ।
दुष्करत्वेन विरले द्वे सख्यात्मनिवेदने ।
केषाञ्चिदेव धीराणां लभेत साधनार्थताम् ।
इति भक्तिरसामृतसिन्धौ ।
शास्त्री...प्रवलया भक्तमर्य्यादयान्विता ।
वैधी भक्तिरियं केचित् मर्य्यादामार्ग उच्यते ॥

Colophon. इति श्रीकृष्णभक्तिप्रकाशे द्वितीयकाण्डे साधनभक्तिर्नाम पञ्चमप्रकरणं सम्पूर्णम् ॥ हरेकृष्ण ॥
रसाङ्कपङ्क्तिन्दुमितशाके श्रालेखि कृतिना श्रीहरिरामेण ॥

विषयः । प्रथमकाण्डे—

कृष्णभक्तिप्रशंसा । कृष्णभजनं तदभक्तानां निन्दा च । सार्व्वकालिकनैयत्यकथनं अधिकारिनियमाभावः । भक्तिकारणनिरूपणम् ।

द्वितीयकाण्डे—

निष्कामभक्तेर्गरीयस्त्वकथनम् । भक्तिलक्षणफलादिः । गुरुपादाश्रयाद्यङ्गनिरूपणम् । कर्म्माद्यङ्गनिरूपणम् । साधनभक्तिनिरूपणम् । साधनभक्त्यधिकारिनिरूपणम् । नानाविधभक्त्यादिषु तस्याः प्राधान्यकथनम् । श्रवणकीर्त्तनादिः । नामापराधादिनिरूपणम् । स्मरणपादसेवार्च्चनादिनिरूपणम् । सेवापराधवन्दनदास्यादिनिरूपणम् । दासभेदादिकथनम् । सख्यसखिभेदादिनिरूपणम् । आत्मनिवेदनादिश्चेति विस्तरः ।

No. 78. कृष्णयामलतन्त्रम् । Substance, palm-leaf, 18 × $2\frac{1}{2}$ inches. Folia, 73. Lines, 5 on a page. Extent, 1,460 çlokas. Character, Bengali. Date, ? Place of deposit, Usthi, Mayamansiñha. Paṇḍita Navakiçora Bhaṭṭácáryya. Appearance, old. Verse. Generally correct.

Beginning. नमः श्रीकृष्णाय ।
सदाशिव-महाविष्णु-विष्णु-ब्रह्म-शिवादयः ।

यस्यैवांशकलास्तस्मै नमः कृष्णाय हेतवे ॥
इत्येवं द्वादश नमस्काराः । ॐ नमो देव्यै सरस्वत्यै दश नमस्काराः ।
एकदा मुनिभिः सार्द्धं व्यासः सत्यवतीसुतः ।
पिचासने वसन् श्रीमान् श्रीमद्बदरिकाश्रमे ॥ इत्यादि ।

End. नवकमलदलाचं तत्र ....
निजचरणसरोजानन्दमत्तं प्रशान्तं ।
सरसमधुरभावा क्लेशनाशाय हीना
निजपतिमतिहीनं प्राह हीनानुरक्ता ॥

Colophon. इति कृष्णयामलमहातन्त्रे मुचुकुन्ददर्शने नारदसम्भाषणम् ॥ * ॥ समाप्तश्चायं ग्रन्थः ॥

विषयः । व्यासनारदप्रश्नः । शम्भुब्रह्मप्रश्नः । कृष्णरहस्ये शिवब्रह्मप्रश्नः। आराध्येश्वरनिर्णये ब्रह्मविष्णुप्रश्नः । आराध्येश्वरनिर्णये विष्णुमहाविष्णुप्रश्नः । वृन्दावनारोहणनिरूपणम् । विद्याधरादिप्रत्यागमनम् । विद्याधरीं प्रति कृष्णस्य शापः । विद्याधरेण सह नारदनिर्याणम् । कृष्णकिङ्करोत्पत्तिः । महालसोपाख्यानादिः । रत्नध्वजपितृपुरप्रवेशः । कालयवनभस्मादिकथनम् ।

No. 79. केदारखण्डः (स्कान्दपुराणीयः) । Substance, country-made paper, 16 × 4½ inches. Folia, 118. Lines, 9 on a page. Extent, 4,115 çlokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Çyámapukur, Viçvakoṣa Office. Bábu Nagendranátha Vasu. Appearance, fresh. Generally correct.

Beginning. ॐ नमः शिवाय ।
यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्त्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ।
तत्रैव नैमिषारण्ये शौनकाद्यास्तपोधनाः ॥
दीर्घसत्रं प्रकुर्व्वन्ति सत्रिणां स्वमतेन ह ।
तेषां सन्दर्शनोत्सुक्यादागतो हि महातपाः ॥
व्यासशिष्यो महाप्राज्ञो लोमशो नाम नामतः ।
तत्रागतं ते ददृशुर्मुनयो दीर्घसत्रिणः ॥

उपसद्य युगपत् सर्व्वे सार्धञ्चलाः समुत्सुकाः ।
दत्त्वार्घ्यपाद्यमसकृत् मुनयो वीतकल्मषाः ।
तं पप्रच्छुर्महाभागाः शिवधर्मं सुविस्तरम् ॥

मुनय ऊचुः ।

कथयस्व महाप्राज्ञ देवदेवस्य शूलिनः ।
महिमानं महाभाग ध्यानार्चनसमन्वितम् ॥ इत्यादि ।

End. श्वपचोऽपि वरिष्ठाः स्युः प्रसादात् पुष्करस्य च ।
तस्मात् सर्व्वप्रयत्नेन पूजनीयो हि शङ्करः ॥
बहूनां जन्मनामन्ते शिवे भक्तिः प्रजायते ।
ज्ञानिनां क्षतबुद्धीनां जन्मजन्मनि शङ्करः ॥
यिं मया बहुनोक्तेन स सेव्यो हि सदा बुधैः ।
पूजनीयः सदा देवो वन्दनीयः सदा शिवः ॥
चैवोदाहरन्तीममितिहासं पुरातनम् ।
किरातेन कृतं यच्च व्रतं परममद्भुतम् ॥
येनैव भावितं विश्वं जगदेतच्चराचरम् ॥

Colophon. इति स्कन्दपुराणे केदारखण्डे शैवशास्त्रे केतोपाख्यानं द्वात्रिंशत्तमोऽध्यायः ।
समाप्तोऽयं ग्रन्थः ॥

विषयः । प्रथमाध्याये शिवनाममाहात्म्यादिकथनम् । २ । ३ । ४ । ५ अध्याये दक्षयज्ञादिवर्णनम् । ६ । ७ अध्याये लिङ्गमाहात्म्यादिकथनम् । ८ अध्याये शिवार्चनमाहात्म्यादि कथनम् । शिवस्य लिङ्गरूपत्वे कारणनिरूपणञ्च । ९ अध्याये हलाहलप्रसङ्गकथनम् । १० अध्याये शिवस्य जगत्कर्तृत्वादिकथनम् । ११ अध्याये गणाधिपपूजादिनिरूपणम् । १२ अध्याये धन्वन्तर्य्युत्पत्त्यादिकथनम् । १३ अध्याये देवासुरयुद्धादिवर्णनम् । १४ अध्याये शक्रविजयादिवर्णनम् । १५ अध्याये कर्म्मप्रशंसादिः । कर्म्मफलादिनिरूपणञ्च । १६ अध्याये दधीचेरुपाख्यानम् । १७ अध्याये वृत्रासुरवधादिकथनम् । १८ । १९ अध्याये बल्युपाख्यानादिः । २० अध्याये पार्व्वत्युत्पत्त्यादिवर्णनम् । २१ अध्याये पार्व्वत्यास्तपस उद्योगादिवर्णनम् । २२ अध्याये पार्व्वत्याः शिवसेवादिवर्णनम् । २३ । २४ । २५ अध्याये शम्भोर्विवाहादिवर्णनम् । २६ । २७ । २८ । २९ अध्याये तारकयुद्धादिवर्णनम् । ३० अध्याये तारकासुरवधादिवर्णनञ्चेति ॥

No. 80. **केरलशास्त्रोक्तसूत्रम्, (सटीकम्)** । Substance, country-made paper, 6×4 inches. Folia, 40. Lines, 7 on a page. Extent, 245 çlokas. Character, Bengali. Date, ? Place of deposit, Naiháṭi, Paṇḍita Candrakánta Tarkaratna. Appearance, tolerable. Prose and Verse. Incorrect.

Beginning. श्रीदुर्गा ॥

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरं महः किञ्चित् वीणाधरमुपास्महे ॥
फलानि नक्षत्रदशाप्रकरणे विदृणमहे ।
वयं पाराशरीं होरामनुसृत्य यथामति ॥

अस्य टीका,—

सिद्धान्तेति किञ्चित् महःस्वरूपं तेजः सरस्वतीति यावत् तस्यापि विशिष्टत्वात् उपास्महे भजामः । इत्यादि ॥

End. धर्म्मकर्म्माधिनेतारावन्योन्याश्रयसंस्थितौ ।
राजयोगाविति प्रोक्तं विख्यातो विजयी भवेत् ॥ (?)
प्रतिलग्नान् समावीक्ष्य पूर्व्वोदिष्टान् विशेषतः ।
तत्तद्‌भवस्वरूपाणि क्रमेणैव विदृणमहे ॥

Colophon. इति निकषारात्मजीकृतकेरलशास्त्रोक्तसूत्रं समाप्तम् ॥
श्रीदुर्गा । अस्य टीका,—
यथासमाप्तिक्रमेण मेषादीनां फलानि मन्वादिश्लोकैरथाने प्रतिलग्नान् समावीक्ष्य इत्यादि । इति केरलशास्त्रोक्तसूत्रव्याख्या समाप्ता ॥

विषयः । पाराशरीमतानुसारेण नक्षत्रदशाफलनिरूपणमुखेन राजयोगादिनिरूपणम् ॥

No. 81. **केरलिः** । Substance, country-made paper, 16×1 inches. Folia, 40. Lines, 4 on a page. Extent, 526 çlokas. Character, Bengali. Date, Sk. 1732. Place of deposit, Pañcasár, District Dháká, Paṇḍita Mahendracandra Kávyatírtha. Appearance, tolerable. Prose and Verse. Incorrect.

Beginning. ॐ नमः श्रीसूर्य्याय ।
ज्ञानदीपकमादाय वर्णीकृत्य चलाचरैः ।

स्वरभेदेन संयुक्तिं वक्षिज्ञानोत्तराधरैः ॥
अ ए क च ट त प य श वर्गाः । उक्ताः शुभाशुभाक्षराः । एभिश्च जगत् सर्व्वं ज्ञातुमक्षरैश्चेति । अ ए क च ट त प य शाः प्रथमवर्गाः । आ ऐ ख छ ठ थ फ र षा द्वितीयवर्गाः । इ ओ ग ज ड द ब ल साः तृतीयवर्गाः । ई औ घ झ ढ ध भ व हाश्चतुर्थवर्गाः । एभि रेवं ++ अक्षरैर्वर्गस्थापनं । इदानीं स्वरभेदा भाष्यन्ते । इत्यादि ।

End. प्रथमेन द्वितीयन्तु द्वितीयेन तृतीयकम् ।
उभये पञ्च सङ्ग्राह्यमथवा तृतीयमक्षरम् ॥
एते केरलिना बुद्धा चातिविशारदैः (?) ॥

Colophon. इति श्रीचारादिज्ञानागमकेरलिः समाप्ता । शकाब्दाः १७११ ।

विषयः । प्रश्नकर्त्तुः प्रश्नाक्षरविशेषपर्य्यालोचनेन तत्तत्प्रश्नोत्तरकथनप्रकारः ॥

No. 82. कोष्ठीनिर्णयः, By गोपालन्यायपञ्चाननः । Substance, country-made paper, 16 × 3½ inches. Folia, 113. Lines, 5 on a page. Extent, 1,712 çlokas. Character, Bengali. Date, Sk. 1792. Place of deposit, Açujiyá, Mayamansiñha, Bábu Anandakiçora Ráya. Appearance, fresh. Verse. Incorrect.

Beginning. ॐ नमः श्रीसूर्य्याय नमः ।
श्रीकृष्णचरणाम्भोजमकरन्दमधुव्रतः ।
न्यायपञ्चाननो विद्वान् कुरुते कोष्ठीनिर्णयम् ॥
आदित्यादिग्रहाः सर्व्वे नक्षत्राणि च राशयः ।
दीर्घमायुः प्रकुर्व्वन्तु यस्येयं जन्मपत्रिका ॥ इत्यादि ।

End. ग्र रा ह मासः ४ । १० दिन स्वपप्रसादमतुलं लीलाभं रौप्यभूषणम् ।

Colophon. इति श्रीगोपालन्यायपञ्चाननविरचितायां(?) कोष्ठीनिर्णयो नाम अष्टमोऽध्यायः । शाक १७९२ ॥

विषयः । कोष्ठीकरणदर्शनाद्युपायनिरूपणम् ।

No. 83. कोष्ठीसारावली, By रामगोविन्दः. Substance, country-made paper, 14 × 2 inches. Folia, 65. Lines, 8 on a page. Extent, 1,744 çlokas. Character, Bengali. Date ? Place of deposit, Çáktá, via-Keraṇigañja, District Dháká, Pandita Trilocana Tarká[illegible]kara. Appearance, old. Prose and verse. Generally correct.

Beginning.

ॐ नमो गणेशाय ।
गुरुञ्च श्यामदासाख्यं देवीं लेखां तथैव च ।
नवपद्मानुगां वाणीं नमामि शिरसा भुवि ॥
सुरान् नमस्कृत्य विलोक्य शास्त्रं
ज्योतिः सदा कोविदरञ्जनीया ।
श्रीरामगोविन्दद्विजेन कोष्ठी-
सारावली चाद्य वितन्यते वै ॥
न लभ्यं वर्णबोधाय पाठार्थं बालकस्य च ।
ज्योतिःशास्त्रोद्धृतः सारः संक्षेपेण मयोच्यते ॥
आदौ लग्ननिर्णयः ।
रामोऽगवेदै(३।४७।)र्जलधिस्तु शिवै-(४।१७)
र्बाणो रसैः (५।६) पञ्चखसागरैश्च (५।४०) ।
बाणः कुवेदै(५।४१)र्विषयोऽक्षियुग्मैः
(५।२९।) क्रमोत्क्रमान्मेषतुलादिमानम् ॥
लग्नं दण्डपलं द्विघ्नं तत्संख्यं क्रमतः पलम् ।
विपलञ्च रवेर्भोग्यमेवं कल्पनमस्तभे ॥
चतुस्त्रिंशदशीतिश्च शतञ्चैव पुनः शतम् ।
अशीतिश्च चतुस्त्रिंशत् त्रुटिं वृद्धिं समादिशेत् ॥
श्रावणादौ दिवाहानिर्माघादौ वर्द्धते दिवा ।
इति दण्डादिनिर्णयः ॥ इत्यादि ।

End.

ह्यानिर्दुःखं महत्क्लेशो धननाशश्च जायते ।
मरणं घातपातादि तद्दिने जायते ध्रुवम् ॥
तस्मिन् दिने च यो रोगो जायते पुरुषस्य च ।
असाध्यः स भवेद्रोगो मृत्युक्लेशादिदायकः ॥

Colophon. इति कोष्ठीसारावल्यामुदितादिदशानयनं समाप्तम् ॥

विषयः । अथ प्रथमं लग्ननिर्णयः । ग्रहादिनिरूपणम् । लौजनसंख्याकथनम् । दीप्तिस्थितिनिरूपणम् । मेषादीनां वर्णकथनम् । यामार्द्धकथनम् । दण्डाधिपकथनम् । राशिदेवतास्वरूपकथनम् । राशीनां [illegible] सौम्यादिविवेकः । मेषादीनां विशेषसंज्ञाः । ग्रहाणामुच्चनीचत्वकथनम् । मूलत्रिकोणकथनम् । जलदहनमित्रद्रेक्काणकथनम् । सौम्यद्रेक्काणकथनम् । क्षेत्राधिपतिकथनम् । होराकथनम् । नवांशादिनिरूपणम् । पताकाद्यरिष्टकथनम् । जातकारिष्टकथनम् । जातपुरुषचक्रकथनम् । तुङ्गादिफलकथनम् । नपुंसकज्ञानकथनम् । बन्ध्याज्ञानकथनम् । जारजज्ञानकथनम् । सहमरणयोगकथनम् । वैधव्यलक्षणकथनम् । अथ रव्यादिग्रहाणां दृष्टिकथनम् । ग्रहाणां षड्भावविवेचनम् । ग्रहाणां द्वादशभावविवेचनम् । अथ केन्द्रकथनम् । ग्रहाणां नैसर्गिकमित्रत्वकथनम् । ग्रहाणां नैसर्गिकशत्रुत्वकथनम् । तत्कालमित्रताकथनम् । ग्रहाणां दिग्बलकथनम् । ग्रहाणां बलाबलनिरूपणम् । षड्वर्गकथनम् । क्षेत्रफलकथनम् । होराफलकथनम् । द्रेक्काणकथनम् । नवांशफलकथनम् । द्वादशांशादिफलकथनम् । नक्षत्राणां देवादिगणकथनम् । अथ राशिफलकथनम् । जन्ममासफलकथनम् । वारफलकथनम् । तिथिनक्षत्रकरणफलकथनम् । तनुधनादिद्वादशस्थानगतग्रहावस्थानफलकथनम् । ग्रहाणामष्टवर्गफलकथनम् । अथ अपत्यविवेककथनम् । नाक्षत्रिकदशानिरूपणम् । अन्तर्दशाफलकथनम् । वसुदशानिरूपणम् । मास-दिन-क्षणदशानिरूपणम् । योगिनीदशाकथनम् । अष्टमस्थाने ग्रहस्थित्या मरणं ज्ञातव्यमितिकथनम् । अथ आयुर्दायकथनम् । पञ्चस्वरकथनम् । वर्षदशादिफलकथनम् । दशान्तर्दशादिनिरूपणञ्च ।

No. 84. **कौतुकरत्नाकरः** । Substance, country-made paper, $14\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 20. Lines, 6 on a page. Extent, 502 çlokas. Character, Bengali. Date ? Place of deposit, Tripurá, Maháràja's Library. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमो महादेवाय ।

भूतैराहूतवक्त्रासुरभि करहतिं कुर्व्वतीमाननाग्नौ
दन्तैर्दंष्ट्रा रसज्ञां जघनगुरुतया प्रस्खलन्तीं वदन्तीम् ।
पश्यैतां दक्षपत्नीमिति सुरसरिता जल्पिते सोपहासं
तां वीक्ष्य स्मेरवक्त्रः सपदि नतशिराः पातु वः पञ्चवक्त्रः ॥
इत्यादि ।

End. नृप एव तत्सम्यग्जानाति इति सरोषं समुत्थाय तथाविधावस्थ एव राजसन्निधौ प्रस्थितः ॥

Colophon. इत्येतावदस्ति कौतुकरत्नाकरस्य। श्रीहरिः। श्रीरामशङ्करशर्म्मणः स्वाक्षरमिदं पुस्तकञ्च ॥

विषयः। भूलुया-इतिप्रसिद्धराजधानीवास्तव्यस्य गन्धर्व्वमाणिक्यपुत्रस्य लक्ष्मणमाणिक्य-नाम्नः क्ष्मापतेः कवितार्किकापरनामधेयेन पुरोधसा विरचितः प्रहसनविशेषः ॥

No. 85. कौलावलीनिर्णयः, By ज्ञानानन्दपरमहंसः। Substance, country made paper, 19×5 inches. Folia, 37. Lines, 10 on a page. Extent, 1,277 çlokas. Character, Bengali. Date, ? Place of deposit, Májpádá, District Dháká, Babu Rásavihári Ráya. Appearance, new. Verse. Incorrect.

Beginning. श्रीगुरवे नमः।

नत्वा श्रीगुरुपादपद्मयुगलं सिद्धैः सदा सेवितं
शाक्तानां परिभावमोहजनकं कौलावलीनिर्णयम्।
वक्ष्येऽहं कुलवर्द्धनं सुकृतिभिः सेव्यं सदा कौलिकै
र्भावैरेव मनोहरै + + + + + प्रसादालयम् ॥
प्रातरुत्थाय शिरसि सहस्रदलपङ्कजे।
तरुणादित्यकिञ्जल्के विधोर्मण्डलसंयुते ॥
ध्यायन्निजगुरुं धीरो रजताचलसन्निभम्।
वीरासनसमासीनं शुक्लाभरणभूषितम् ॥
शुक्लमाल्याम्बरधरं वरदाभयपाणिकम्।
वामोरुशक्तिसहितं कारुण्येनावलोकितम् ॥
प्रियायाः सव्यहस्तेन धृतचारुकलेवरम्।
वामेनोत्पलधारिण्या रक्ताभरणभूषितम् ॥
ज्ञानानन्दसमायुक्तं स्मरेत् तन्नामपूर्व्वकम्।
मानसैरुपचारैश्च सम्पूज्य कल्पयेत् सुधीः ॥
गन्धं भूम्यात्मकं दद्यात्पुष्पं ततः परम्।
धूपं वाय्वात्मकं दद्यात् तेजसा दीपमेव च ॥
नैवेद्यममृतं दद्यात् दद्याच्च मुकुटं तथा।
चामरं पादुके छत्रं तथालङ्कारभूषणम् ॥
तत्तन्मुद्राविधानेन सम्पूज्य वाग्भवं तथा।

यथाशक्ति जपं कृत्वा समर्प्याथ स्तुतिं पठेत् ॥
इत्यादि ।

End.
अथ कामकला शक्तिः साधको रत्नमन्दिरे ।
रक्तालङ्कारसंयुक्तो रक्तगन्धानुलेपनः ॥
रक्तवस्त्रो रक्तनेत्रो रक्तकामकलात्मकः ।
रक्तपुष्पैश्च विविधै र्नैवेद्यै रक्तसन्निभैः ॥
नानोपचारबलिभिः कुङ्कुमादिविलेपनैः ।
मूलादिब्रह्मरन्ध्रान्तु स्फुर + पमरूपिणीम् ॥
बन्धूककुसुमाकारकाञ्चीभूषितभूषणाम् ।
इक्षुकोदण्डपुष्पेषु वरदाभययुक्कराम् ।
उद्दीप्तकान्तिसिन्दूरभूषितां नयनोज्ज्वलाम् ॥

Colophon. इति ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये दशमोल्लासः ॥

विषयः। अत्र कौलिकानां प्रातःकृत्यनिरूपणम् । कुलगुरुसंख्यादिकथनम् । कुलवृक्षसंख्यादिकथनम् । प्रातःकृत्याकरणे दोषकथनम् । स्नानविधिः । सन्ध्याविधिः । तर्पणविधिः । षट्कर्मनिरूपणम् । तत्र कर्मभेदे वस्त्रभेदकथनम् । पूजास्थाननिरूपणम् । द्वारादिप्रवेशपूजाविधिः । कूर्मचक्रनिरूपणम् । अर्घ्यस्थापनविधिः । आसनादिविधिः । पूजाद्रव्यादिनिरूपणम् । द्रव्यस्थापनस्थानादिकथनम् । फलपुष्पपत्रदानविधिः । पुष्पविवेचनम् । शक्तियुक्तेन पूजा कार्य्येति कथनम् । चक्रमध्ये स्त्रीपुरुषयोरुपवेशनादिव्यवस्था । पूजादौ विजयादिस्वीकारविधिः । विजयादिशोधनविधिः । तत्र अनुपानविधिः । भूतशुद्ध्यादिक्रमकथनम् । अन्तर्यजनविधिः । तत्र दशपुष्पकथनम् । अथ वाह्यपूजाविधिः । तत्र यन्त्रद्रव्यनिरूपणम् । यन्त्रपुष्पनिर्णयः । पञ्चमकारविधिः । पञ्चद्रव्यशुद्धिकथनम् । अर्घ्यपात्रादिविधिः । षोड़शोपचारविधिः । शक्तिविषये धूपनिरूपणम् । दशाङ्गषोड़शाङ्गधूपादिविधिः । कुण्डस्थण्डिलादिविधिः । होमद्रव्यनिरूपणम् । अथ विविधपानलक्षणकथनम् । अन्नपूर्णाध्यानादिकथनम् । अन्नपूर्णामन्त्रादिकथनम् । कौलिकलक्षणादिकथनम् । पानविधिः । सुरादेवीध्यानादिकथनम् । चक्रमध्ये वर्ज्यावर्ज्यकथनम् । ततः शान्तिस्तोत्रम् । तिलकादिविधिः । आत्मसमर्पणविधिः । पर्व्वकृत्यनिरूपणम् । तत्र शक्तिशोधनादिविधिः । स्थानविशेषे पूजायां फलाधिक्यकथनम् । वामाचारभावेन पूजनीयदेवताकथनम् । पूजास्थलकथनम् । शिवाबलिप्रकारकथनम् । कुलवारादिनिरूपणम् । नवकन्यानिरूपणम् । कुलाष्टककथनम् । मङ्गलाष्टककथनम् । शक्तिपूजाप्रकारः । अथ योगिलक्षणादिकथनम् । गुरोरग्रतो निषिद्धकर्म्मकथनम् । गुरुशिष्ययोर्निषिद्धकर्म्मकथनम् । शक्तिप्रशंसाकथनम् । अथ भावनिरूपणम् । अथ कामकलाध्यानादिकथनम् । वीरभाव-

कथनम् । तत्र चिताषाधनादिविधिः । बलिदानविधिः । वीरसाधनविधिः । शवसाधन-विधिः । शवलक्षणादिकथनम् । पञ्चमुण्डीसाधनविधिः । अथ प्रश्चरणविधिः । अथ शरत्कालीनपूजायाः कर्त्तव्यताकथनम् । तत्र कुमारीपूजनादिविधिः । समयाचारविधिः । श्मशानादिदर्शने नमस्कारविधिः । तन्मन्त्रादिकथनञ्च । वज्रपुष्पादिलक्षणविधिः । काम्यपूजा-विधिः । रत्नपूजाविधिः । त्रिपुरावीरसाधनविधिश्चेति ॥

No. 86. क्रमदीपिकावृत्तिः । Substance, country-made paper, Folia, 45. Lines, 6 on a page. Extent, 1,215 çlokas. Character, Bengali. Date, Sk. 1691. Place of deposit, Kánṭhálpáḍá, Post office, Naiháṭí, Paṇḍita Rámatáraṇa Ṭhákura. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
नमोऽस्तु गुरवे तस्मै केशवाय महात्मने ।
यस्यावतारः सर्व्वेषामपवर्गाप्तिसाधनम् ॥
तत्र तावत् प्रथमतः प्रारिप्सितस्याविघ्नेन परिसमाप्त्यर्थमिष्टलाभाय ग्रन्थकारः अभीष्टदेवतास्मरणात्मकमाशीर्व्वादलक्षणं मङ्गलमारब्धं सम्बन्धादिकं सूचयति प्रथमश्लोकेन तस्य प्रयोजनं निःशेषदुःखनिवृत्तिः । इत्यादि ।

End. जगत्सृष्ट्यादिशक्तिमत् निरतिशयप्रकाशानन्दचिद्रूपं परं ज्योतिः यत् प्रकृतिं विधत्ते स्वेच्छाश्रीकृतविराटरूपाधिष्ठानतया तिष्ठति । कृष्णं नौमि प्रकृतितत्त्वं (?) करोमि स्वदेवादिमङ्गीपद्वारेण तन्मय एव भवामि ॥

Colophon. इति क्रमदीपिकावृत्तावष्टमः पटलः ॥ * ॥ शकाब्दा १६९१ ॥

विषयः । क्रमदीपिकाख्यवैष्णवतन्त्रस्य व्याख्यानम् ॥

No. 87. क्षेत्रतीर्थवर्णनम्, (स्कन्दपुराणकाशीखण्डीयम्) । Substance, country-made paper, 14 × 3 inches. Folia, 19. Lines, 6 on a page. Extent, 342 çlokas. Character, Bengali. Date, ? Place of deposit, Yaçodal, District Mayamansiñha, Paṇḍita Kálicandra Bhaṭṭácáryya. Appearance, old. Verse. Generally correct.

Beginning. ॐ विश्वेश्वराय नमः । अगस्त्य उवाच ।
एतत् भविष्यं श्रुत्वाहं व्यासस्य शिवनन्दन ।
आश्चर्य्यभाजनं जातस्तीर्थानि कथयाधुना ।

आनन्दकानने यानि यत्र सन्ति षडानन ।
तानि लिङ्गस्वरूपाणि समाचक्ष्व समासतः ॥ इत्यादि ।

End. इति नन्दिवचः श्रुत्वा देवो देवीसमायुतः ।
दिव्यं रथं समारुह्य निर्जगाम त्रिपिष्टपात् ॥

Colophon. इति स्कन्दपुराणे काशीखण्डे चेत्रतीर्थवर्णनं नाम सप्तनवतितमोऽध्यायः ॥

विषयः । काशीस्थिततीर्थनिचयनिरूपणमुखेन तत्तत्तीर्थानां माहात्म्यादिकथनम् ॥

No. 88. गयापद्धतिः, By रघुनाथभट्टः । Substance, country-made paper. Folia, 19. Lines, 11 on a page. Extent, 440 çlokas. Character, Nágara. Date, Sam. 1886. Place of deposit, Gobardhansarái, Benares, Pandita Vindhyeçvaríprasáda Dube. Appearance, fresh. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ गयापद्धतिर्लिख्यते ।
गदाधरं प्रणम्याथ विष्णवाद्याः परदेवताः ।
रघुनाथो गयाकृत्यं यात्रारम्भादि भाषते ॥
अथ यात्राप्रभृतिसकलगयाकृत्यप्रयोगः । इत्यादि ।

End. मात्तोपन्यासमासारो(?) रघुनाथेन निर्मितः ।
परानुक्षेयसन्दोह्प्रयोगक्रमसंग्रहः ॥
प्रीयतां पितरस्तेन देवश्चादिगदाधरः ।
अन्नयश्च प्रमाद् सौषैः कश्चिदिह मे भवेत् ॥

Colophon. इति श्रीमन्-माधवात्मजभट्टरघुनाथकृता गयानुष्ठानपद्धतिः सम्पूर्णा । गदाधरार्पणमस्तु संवत् १८८६ मार्गशीर्षक दशाहरवौ ग्रन्थसमाप्तिः ॥ शुभं भट्ट आचार्य्येण लिखितं स्वार्थं परार्थम् ।

विषयः । गयातीर्थे यात्रारम्भमारभ्य तत्र कर्त्तव्यस्य पिण्डदानादिकस्य प्रयोगकथनम् ।

No. 89. गयाप्रकाशः । Substance, country-made paper, 10×5 inches. Folia, 21. Lines, 12 on a page. Extent, 315 çlokas. Character,

End. श्रीभोजदेवप्रभवस्य श्रीभोजदेवनामास्य पिता तस्मात् प्रभवस्य जातस्य ।

Colophon. इति श्रीगीतगोविन्दप्रबोधे द्वादशसर्गव्याख्या समाप्ता ।
यदत्र पूर्व्वपूर्व्वासां टिप्पनीनां विरोधिता ।
कृपया मयि तत्सर्व्वं क्षम्यतां सदसद्विदः ॥
ममोक्तिरन्यटीकानां संक्षेप एव केवलम् ।
विशेषो यदि चान्योऽस्ति तदा चिन्त्यो मनीषिभिः ॥
कृतिनः सदसद्विवेचका
भवतास्त्वां कृपया कृतौ मम ।
स्थितये पथि पिच्छिले मुहुः
स्खलतो दण्ड इवावलम्बनम् ॥
यो जातो वसुधासनगुरोर्गोविन्दपादाम्बुज (?)
द्वन्द्वध्यानकराजिराजितहृदः श्रीरामभद्रात् सुतः ।
तेनैवाज्ञमुदे मुदेयमुदिता टीका तरीव श्रियः
प्रायः केलिकलाकलानिखिलसत्काव्याब्धिपारप्रणीः ॥
न तोल + + + द्विजराज शाके
देवीप्रबोधीयतिथौ नवम्यां ।
श्रीगीतगोविन्दकविलटीका-
मिमां रमाकान्तकृतौ लिलेख ॥
समाप्तोऽयं ग्रन्थः ।

विषयः । जयदेवकृतस्य गीतगोविन्दनामकस्य कृष्णलीलावर्णनात्मकस्य काव्यस्य व्याख्यानम् ।

No. 92. गीतासारः । Substance, country-made paper, $13\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 3. Lines, 7 on a page. Extent, 110 çlokas. Character, Bengali. Date, ? Place of deposit, Kálikaccha, Parganá Saráil, District Tripurá, Pandita Kálicandra Nyáyapañcánana. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः कृष्णाय । अथ गीतासारः । अर्ज्जुन उवाच ।
ॐकारस्य च माहात्म्यं रूपं स्थानं स्वरं तथा ।
तत्सर्व्वं श्रोतुमिच्छामि ब्रूहि मे परमेश्वर ॥
श्रीभगवानुवाच ।
साधु पार्थ महाबाहो यन्मे त्वं परिपृच्छसि ॥ इत्यादि ।

End. नश्यन्ति दर्शनात् सर्व्वे गीता यस्य हृदि स्थिता ।
यत्र तत्र श्रीतो भक्त्या स गच्छेत् परमं पदम् ॥ (?)

Colophon. इति श्रीकृष्णार्ज्जुनसम्वादे गीतासारः समाप्तः ॥

विषयः । श्रीकृष्णार्ज्जुनसम्वादच्छलेन ॐकारस्य माहात्म्यरूपस्थानादिनिरूपणम् ॥

No. 93. गुणप्रकाशः By वर्द्धमानोपाध्यायः । Substance, country-made paper, $15\frac{1}{2} \times 2\frac{1}{2}$ inches. Folia, 79. Lines, 5 on a page. Extent, 2,123 çlokas. Character, Bengali. Date, ? Place of deposit, Dhánuká, Post Office, Pálañ, District Pharidpur, Paṇḍita Haramohana Tarkacúḍámaṇí. Appearance, tolerable. Prose. Generally Correct.

Beginning. ॐ नमः शिवाय ।
एकत्र सन्निपतितासितकण्ठविम्ब-
मन्यत्र चन्द्रकिरणाञ्चितशुभ्रभावं ।
सन्ध्याजलाञ्जलिमनङ्गरिपोर्नमामि
हस्तप्रविष्टमिव पुण्यतमं प्रयागम् ॥
नतिवन्नुतेरपि प्रारिप्सितविघ्नविघातकत्वात् तामादौ कृतां निबध्नाति तुष्टेरिति । तुष्टिरनुरक्तिरतुष्टिर्द्वेषः तदुभयमपि बन्धनीयमोचनीययोरीश्वरविषयकमेव ।
परात्परतरं यान्ति नारायणपरायणाः ।
न ते तत्र गमिष्यन्ति यद्विशन्ति महेश्वरम् ॥ इति स्मृतेः ।
यद्वा मोचनेच्छाबन्धनेच्छे तुष्ट्यतुष्टी ते ईश्वरस्यैव तदिच्छाया एकत्वेऽपि तत्तत्फलोपधानात् सिसृक्षासंजिहीर्षावदौपाधिको भेदः सहकारिभेदसमवधानाच्च तस्याः कार्य्यभेदजनकत्वात् तत्र बध्नतः पुनरित्यनेन बन्धस्यावृत्त्या मोक्षानन्तरं बन्ध इत्यर्थे विरोधादतुष्टेः पुनरिति योजना । तथाच व्यवच्छेदार्थः पुनःशब्दो नावृत्त्यर्थं इति नोक्तदोषः । यद्वा बध्नतः पुनरित्यनेन बन्धस्य निरन्तरावृत्तिरुच्यते न मोक्षानन्तरतेति नोक्तदोषः । मुक्तिबन्धौ दुःखसन्तत्यत्यन्तच्छेदनवृत्ती तयोश्च शरीरावच्छेद्यत्वादिश्वपदेन भोगायतनं शरीरमेव .... ।
.... कारो वधे निश्चये च ...... यत्ने पशावपि ।
तुषारशैलेऽपि पुमान् स्त्रियां शक्तिप्रभेदके ॥ इत्यादि ॥

End. न च भट्टैरपेक्षाबुद्धेर्द्वित्वाभिव्यञ्जकत्वाकारा द्दष्टान्तासिद्धिः अस्माभिरपेक्षा बुद्धेर्द्वित्वादिजनकत्वेन नैव प्राक् .... एवं घटविषयकबुद्धेः प्राक् च जनकत्वे सिद्धे तद्दृष्टान्तेनापेक्षाबुद्धेरपि विषयकबुद्धेश्च प्राक् घटजनकत्वमनुमेयं। न चाद्यानुमानेऽपेक्षाबुद्धित्वस्योपाधित्वात् ननु जातो घट इति विशिष्टप्रतीतेः ...... सम्बन्धः सिद्धोत वर्त्तमाने विषये बाधकाभावात् न अतीतानागतादेः तदभावे ...... व्यवहारानापत्तिः तस्य...... जन्यत्वात्। न च ज्ञानविधावेव तद्धीर्विषयो वर्त्तमानेऽपि तथापत्तेः प्रतीत्योर्विषयवैलक्षण्यानुभावात् वस्तुतो जानामीति मानसानुव्यवसायगम्यं ज्ञानं प्रत्यक्षं अन्यथा .... समाश्वासः क्षणिकार्थविशेषगुणत्वाच्च युगपज्ज्ञानसप्रत्यक्षत्वमनुमेयं अन्यथा परमाण्वादि ...... ननु परमाणुवृत्तिः सत्तादिः घटादौ प्रतीयते तत्र ...... परमाणुवृत्तितया च तद्ग्रहः परमाणोरतीन्द्रियत्वेन तदप्रतीत्यैव न स्यात् न परमाणुघटितसन्निकर्षेण स्वयोग्यताभावात् सत्तादिः। (अतःपरं खण्डितम्)

विषयः। रूपादिचतुर्विंशतिसंख्यकानां नैयायिकसम्मतगुणानां यथायथविचारपूर्व्वकं समाधानम्। "तुष्टैर्मोचयतो बन्धात्तुष्टैर्बध्नतः पुनः कारागारमिदं विश्वं यस्य नौमि तमीश्वर"मिति किरणावलीनिर्म्मातुस्तत्रभवत उदयनाचार्य्यस्य गुणग्रन्थस्य मङ्गलाचरणं अस्मिन्नपि तुष्टैरिति माङ्गलिकश्लोकमारभ्य व्याख्यानात् किरणावल्या उपरि किलेयं टीका।

सत्यमेव जयते

No. 94. गुणविवृतिविवेकः, by **विद्यावागीशः.** Substance, country-made paper, 16 × 2½ inches. Folia, 157. Lines, 7 on a page. Extent, 5,600 çlokas. Character, Bengali. Date, ? Place of deposit, Barsikurá, Mayamansiñha, Paṇdita Jayanátha Tarkálañkára. Appearance, very old. Prose. Correct.

Beginning. ॐ नमः शिवाय नमः।

कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः।
मोचयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः॥
श्रीमता मथुरानाथतर्कवागीशधीमता।
गुणप्रकाश ... ...॥

प्रारिप्सितग्रन्थसमाप्तिकामनया कृतं भगवन्नमस्काररूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति ॐ नम इति। व्याख्यातमेतदनुमानदीधितिरहस्ये

... ... प्रकाशफक्किकामवतारयति । विनापीति निरूपणस्य शब्दप्रयोग व्युत्पाद्यादिति भावः । इत्यादि ।

End. यत आह किञ्चेति असमवायिकारणवृत्तेस्तन्मतिवृत्तेः ॥

Colophon. इति महामहोपाध्यायश्रीविद्यावागीशभट्टाचार्य्यविरचितो गुणविवृति-विवेकः समाप्तः ।

विषयः । मथुरानाथकृतस्य गुणप्रकाशविवृतिनामकस्य गुणप्रकाशव्याख्यानग्रन्थस्य व्याख्या ।

No. 95. गुप्तवृन्दावनरहस्यम्, by हरिचरणः. Substance, country-made paper, 10 x 4 inches. Folia, 27. Lines, 10 on a page. Extent, 643 çlokas. Character, Bengali. Date, Sk. 1602. Place of deposit, Visnupur, Krisnaganja, Pandita Çacibhúsana Gosvámí. Appearance, old. Prose. Incorrect.

Beginning. श्रीश्रीकिशोरीकिशोरौ जयतः ॥

प्रपद्य वृन्दावनमध्यमेकतः श्रीशन्नमातुत्कलिकाकुलात्मा ।
उद्घाटयामि ज्वलतः कठोरां वाप्यस्य मुद्रां हृदि सुस्थितस्य ॥
अये वृन्दारण्य त्वरितमिह गोपोत्सवपराः
परामापुः के वा न किल परमानन्दलहरीं ।
अतो गौचैर्याचे स्वयमपि च यो गोचणविधे
र्वरेण्यां मे चेतस्युपदिश दिशं हा कुरु कृपां ॥
... ... विहरते
सदा प्रेयास्यति श्रुतिरपि विरौति स्मृतिरपि ।(?)
इति ज्ञात्वा वृन्दे चरणमभिवन्दे तव कृपां
कुरुष्व क्षिप्रं मे फलतु नितरां तर्षविटपी ॥ इत्यादि ।

End. अन्योन्यं रसकेलिकौतुकविधौ सख्यां रसे मग्नतां
प्राप्तायां रसकोकिलादिविरुतैः कस्मिन् स्थले नोत्सवः ।
पाश्वौ पाण्डवनस्वनेन विहसत्तामां परीहासकृत् (?)
नानारङ्गविहारकौतुकरणे क्रीड़द्विशीन्द्रमन्दिरम् ॥
... ... !
सखि सहचरीवृन्दैरनुचर्य्यादिभिर्नवम् ।
स्वस्थानस्थितयोः सख्यं कुर्म्मस्तत् यथामति ॥

इत्येवं कथितं साधो नैत्यिकं चरितं तयोः ।
यथामति तथा कुर्य्याद्‌यथा तत्र गतिर्भवेत् ॥
इति नत्वा गुरुं तत्र पपात दण्डवद्भुवि ।
तथा भवतु मे नित्यमिति विश्वासयाम्यहम् ॥
श्रीमत्श्रीरसिकश्यामनामा श्रीश्रीगुरुर्मम ।
यत्पादाम्भोजमाधुर्य्यं नवं भावयतु तत्सुखम् ॥ (?)
नाम्ना......हरिचरणः श्रीगुरोः सत्कृपातो
नानातन्त्रप्रकटसुरसैः पुस्तकं चारु चक्रे ।
यद्यप्यास्तेऽप्रकटभजने चित्तवृत्तिर्निगूढे
चित्ताह्लादं सपदि रसिका नित्यमालोकयन्तु ॥
... ... ।
येषां सत्त्वोदन्तनिषेव्यमाणो श्यामो सदा राजत एव चित्ते ॥
हरिचरणकृतेऽत्र वृन्दावनसद्रहस्ये च परिच्छेदस्तृतीयः ।
सेवाप्रकाशः प्रथयतु तान् ॥

Colophon. इति श्रीगुप्तवृन्दावनरहस्ये नित्यसेवाप्रकाशस्तृतीयः परिच्छेदः । शुभमस्तु शकाब्दा १६०२ ॥

विषयः । वैष्णवशास्त्रं । प्रथमपरिच्छेदे-वत्कलिकावस्त्ररीतिनिरूपणं तथा स्थलप्रकाशादिनिरूपणम् । द्वितीयपरिच्छेदे-स्वभावप्रकाशादिनिरूपणम् । तृतीयपरिच्छेदे-नित्यसेवाप्रकाशादिनिरूपणम् ॥

No. 96. **गुरुपादुकास्तोत्रटीका,** by **अनन्तरामः.** Substance, country-made paper, 18 x $3\frac{1}{2}$ inches. Folia, 5. Lines, 8 on a page. Extent, 215 çlokas. Character, Bengali. Date, ? Place of deposit, Hálisahar, Khásváṭí, Paṇḍita Mahádeva Bhaṭṭácárya. Appearance, old. Prose. Generally correct.

Beginning. ॐ गुरवे नमः । अथ गुरुपादुकास्तोत्रटीका द्विजेन रच्यते ।
गुरूपदेशाच्च पण्डितैः सा प्रगृह्यताम् ।
नत्वा श्रीगुरुमच्छोभ्यं प्रत्यक्षं शिवरूपिणम् ।
श्रीमतानन्तरामेण ज्ञात्वा चैव गुरोर्मतम् ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । तन्त्रोक्तस्य गुरुपादुकास्तोत्रस्य व्याख्यानम् ।

No. 97. गुरुपादुकास्तोत्रटीका, by रघुनन्दनन्यायालङ्कारः. Substance, country-made paper, 16×3 inches. Folia, 4. Lines, 7 on a page. Extent, 101 çlokas. Character, Bengali. Date, ? Place of deposit, Yaçodala, Mayamansiñha, Pandita Kálícandra Bhattácáryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ श्रीशिवाय नमः ।
नमस्तस्मै भगवते परमात्मस्वरूपिणे ।
गुरवे श्रीमते ज्ञानदात्रे सर्व्वार्थदर्शिने ॥
सदाशिवपदं ध्यात्वा सद्गुरुं वन्दे मुदा । (?)
करोमि पादुकास्तोत्रव्याख्यानं शिवसेवकः ॥

End. एतत् वचनानुसारेण षडाम्नायागमोक्तमन्त्रोपादानवार्त्ता ये कुर्व्वन्ति तेऽप्यतिशयमन्दबुद्धयः ॥

Colophon. इति रघुनन्दनन्यायालङ्कारविरचिता गुरुपादुकास्तोत्रटीका समाप्ता ।

विषयः । तन्त्रोक्तस्य गुरुपादुकास्तोत्रस्य व्याख्या ।

No. 98. गोत्रप्रवरविवेकः । Substance, country-made paper, 15×2½ inches. Folia, 2. Lines, 8 on a page. Extent, 44 çlokas. Character, Bengali. Date, ? Place of deposit, Kundi, Tháná Ráninagar, District Dháká, Pandita Káliçañkara Vidyálañkára. Appearance, tolerable. Prose and verse. Incorrect.

Beginning. ॐ नमो गणेशाय ।
अथ गोत्रप्रवरविवेको लिख्यते । तत्र—
जमदग्निर्भरद्वाजो विश्वामित्रात्रिगोतमाः ।
वसिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते (?) ।
एतदुपलक्षणम् । अन्येषामपि दर्शनात् । प्रवरस्तु गोत्रप्रवर्त्तको मुनिः
तत्र जमदग्निगोत्रस्य जमदग्न्यौर्व्ववसिष्ठाः । इत्यादि ।

End. दत्तात्रेयगोत्रस्य दत्तात्रेय-आङ्गिरस-बार्हस्पत्यप्रवराः ॥

Colophon. इति गोत्रप्रवरविवेकः समाप्तः ।

विषयः । जमदग्न्यादिगोत्राणां प्रवराणाञ्च सङ्कलनः ।

No. 99. गोरक्षसंहिता, by गोरक्षनाथः. Substance, country-made paper, 19 × 4 inches. Folia, 13. Lines, 7 on a page. Extent, 398 çlokas. Character, Bengali. Date, ? Place of deposit, Káṭiháli, *viá* Mayamansiñha, Paṇḍita Viçvanátha Tarkabhúṣaṇa. Appearance, tolerable. Verse. Incorrect.

Beginning. ॐ नमः शिवाय ।

सच्चित्स्वरूपिणे चिदात्मने सुखस्वरूपिणे ।
षड्भिर्निमित्तादिभिर्निरूपिताय ते नमः ॥
सत्कृतिर्मुनिवर्य्योऽसौ भूतले योगलिप्सया ।
सनकञ्च परित्यज्य नैमिषारण्यमाप्तवान् ॥
सुगन्धिनानाकुसुमैः स्वादुसत्फलसंगतैः ।
शाखिभिः शोभितं पुण्यं जनकाननमण्डितम् ॥
स मुनि विचरंस्तत्र ददर्शास्य तरोरधः ।
वेदिकायां समासीनं दत्तात्रेयं महामुनिम् ॥ इत्यादि ।

End. तस्मादौ शोध्यते शीघ्रं मुक्तायेमेतरे जनाः ।(?)
भवतीति वरं नृणां मुक्तिसोपानसंज्ञकम् ।
गुह्याद्गुह्यतरन्ते तद्गोरक्षेण प्रकाशितम् ॥
नित्यं तेन सुतर्पिताश्च पितरः स्वर्गेश्च भीताः पुन-
र्यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्य्यं मनः ।
× × × × × × ×
× × × × × × × ॥

Colophon. इति गोरक्षसंहितायां मुक्तिसोपानं समाप्तम् ।

विषयः । योगकैवल्योपायादिनिरूपणम् ।

No. 100. गोविन्दकल्पलता, by मीराचार्य्यः. Substance, country-made paper, 12 × 5 inches. Folia, 58. Lines, 12 on a page. Extent, 2,349 çlokas. Character, Bengali. Date, ? Place of deposit, Viṣṇupur, *viá* Báñkurá, Paṇḍita Rúparáma Bhaṭṭácáryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः श्रीकृष्णाय ।
कलयति कलवेणुं मायया मोहयन्तं
स्रवति मधुरविन्दुं कृष्णगोविन्दगीतम् ।
पटुतरवटुनीपैराहृतं गोषु गोपी-
जन इति च समाख्यावल्लभं तच्च नत्वा ॥ (?)
समुदितमिदमेतत् पूजनं श्रीमुरारे
र्विधिवदिति पुरा यन्नारदाद्यैर्मुनीन्द्रैः ।
सकलविभवसाध्यैर्धर्म्मकामार्थमोक्षैः
फलति यदि कदाचित्त्यागतो वा कथञ्चित् ॥
जनेषु मर्त्त्येषु विशुद्धकर्म्मसु
श्रीकृष्णमन्त्रं भवसिन्धुपोतम् ।
नत्वा पुनर्व्वच्मि दयाम्बुधेः श्री-
गुरोः पदं कञ्जजपांशुनिर्म्मलम् ॥
गाणपत्यस्तथा शाक्तः शैवः सौरादिकस्तथा ।
विभिन्नफलदाः प्रोक्ताः प्रभु(?) आसीन बान्धवाः ॥
यतीनां ब्रह्मचारिणां वनस्थानाञ्च योषिताम् ।
सर्व्वेषां गृहमेधिनां विष्णुमन्त्राश्च बान्धवाः ॥
असारे घोरसंसारे सारं कृष्णपदार्च्चनम् ।
तत्पदं नार्च्चितं येन पापिना पापकर्म्मणा ॥
तदर्च्चनं प्रवक्ष्यामि यथा शास्त्रविधानतः ।
गुरुतः शास्त्रतः सम्यक् कुर्य्याद्दीक्षां प्रयत्नतः ॥
आदौ दीक्षां प्रकुर्व्वीत सर्व्वार्थसिद्धिहेतवे ॥ इत्यादि ।

End. ततश्च कृष्णभूतोऽसौ जायते नान्यथा मुने ।
अन्नं दद्यात् साल्वतेभ्यो बहुमानपुरःसरम् ॥
खण्डाद्यभोज्यैश्च ततो वस्त्रालङ्करणादिभिः ।
एतत्ते कथितं पद्मं सर्व्वग्रन्थोत्तमोत्तमम् ॥
अस्य विज्ञानमात्रेण कृष्णात्मैक्यं समश्नुते ।
न प्रकाश्यमिदं पद्मं न देयं यस्य कस्यचित् ॥
मन्त्राः पराङ्मुखा यान्ति आपदश्च पदे पदे ।
इह लोके च दारिद्र्यं परत्र पशुतां व्रजेत् ॥

चुम्बकाय न दातव्यं परदाररताय च ।
शठाय परशिष्याय नास्तिकाय विशेषतः ॥
स्त्रियां सक्ताय दुष्टाय तथा कामातुराय च ।
विदूषकाय शाक्ताय न प्रकाश्यमिदं शुभम् ॥
शिवद्वेषरतायापि देवद्वेषरताय च ।
विप्रद्वेषपरायापि निश्चितं न प्रकाशयेत् ॥
क्षपणाय खलायापि भ्रष्टाचाराय निश्चितम् ।
न प्रकाश्यमिदं ग्रन्थं प्रकाश्यं वैष्णवाय च ॥
शाक्तस्थाने न पाथेदं(?) दुर्जने न प्रकाशयेत् ।
अनाचाराय विप्राय तथा कोपरताय च ॥
न शूद्राय मतिं दद्यान्नोच्छिष्टञ्च कदाचन ।
इह लोके च दारिद्र्यं परत्र पशुतां व्रजेत् ॥
... मध्ये कालिन्द्यास्तटसन्निधौ ।
एतद्गुह्यं समाख्यातं वैष्णवानां हिताय च ॥

Colophon. इति श्रीसमीराचार्य्यविरचितायां गोविन्दकल्पलतायां त्रयोदशः संग्रहः ॥
समाप्तश्चायं ग्रन्थः ॥

विषयः । १ प्रथमसंग्रहे दीक्षादिनिरूपणम् । २ ये मन्त्राधिकार्य्यादिनिरूपणम् । अकडम चक्रादिनिरूपणञ्च । ३ ये मन्त्रचैतन्यादिनिरूपणम् । ४ र्थे मन्त्रसिद्धिलक्षणादिनिरूपणम् । ५ मे कृष्णमन्त्राचारादिनिरूपणम् । ६ ष्ठे आचारगतमासिकपूजादिनिरूपणम् । ७ मे मन्त्र-ऋषि-च्छन्दः-प्रभृतिनिरूपणम् । ८ मे गोपालमन्त्रग्रहणविध्यादिनिरूपणम् । ९ मे यजनविधि-प्रयोगादिनिरूपणम् । १० मे पुरश्चरणविध्यादिनिरूपणम् । ११ शे मन्त्रप्रभेदादिनिरूपणम् । १२ शे कुण्डलक्षणादिकथनम् । १३ शे योगमाहात्म्यादिकथनञ्च ।

No. 101. गोविन्दलीलामृतम्, by रघुनाथदासः. Substance, country-made paper, 12 × 4 inches. Folia, 35. Lines, 8 on a page. Extent, 1,000 çlokas. Character, Bengali. Date, ? Place of deposit, Kāñṭhālpāḍā, *viâ* Naihâtí, Paṇḍita Râmatâraṇa Ṭhâkura. Appearance, very old. Verse. Generally correct.

Beginning. श्रीराधामाधवौ जयेताम् ॥
श्रीगोविन्दं व्रजानन्दं सन्दोहानन्दमन्दिरम् ।
तं वन्दे परमानन्दं श्रीराधासङ्गनन्दितम् ॥
योऽज्ञानमत्तं भुवनं कृपालुरुल्लासयन्नप्यकरोत् प्रमत्तं ।

स्वप्रेमसम्पत्सुधयाद्भुते तं श्रीकृष्णचैतन्यमसुं प्रपद्ये ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति । प्रथमसर्गे श्लोकसंख्या ११७ । द्वितीयसर्गे १०७ ।
तृतीयसर्गे ११० । चतुर्थसर्गे ७८ ।

विषयः । कृष्णस्य कुञ्जनिशान्तकेलिवर्णनम् । तल्पविलासवर्णनम् । भोजनकेलिवर्णनम् ।

No. 102. **गौराङ्गविरुदावली,** by **किशोरिमोहनगोस्वामी.** Substance, country-made paper, 13×5 inches. Folia, 35. Lines, 3 on a page. Extent, 360 çlokas. Character, Bengali. Date, ? Place of deposit, Ágartalá, Vṛddhanagar, Paṇḍita Míneçvara Sárbbabhauma. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीगौरचन्द्राय नमः ।
देवैस्तथा श्रुतिगणैर्महिमा न यस्य
प्रज्ञायते प्रभवता भवतापि ... ।
दुर्वाङ्मलीमसमतिर्मनुजः कथं स्यात्
श्रीगौरचन्द्र भवतः स्तवनेऽस्य शक्तिः ॥ इत्यादि ।

End. येषां निदेशवशतो विरुदावलीयम्
गौरप्रभोर्विरचिता रघुनन्दनेन ।
गोवर्धनक्षितिभृदन्तिकवासिनस्ते
गृह्णन्त्विमां कृतकृपाः कृपणे मदाप्तः ॥

Colophon. इति श्रीकलियुगपावनावतारभगवन्नित्यानन्दकुलजकलानिधि-श्रीरघु--
नन्दनद्वितीयनाम्ना किशोरिमोहनगोस्वामिना कृता गौरविरुदावली ॥

विषयः । श्रीगौराङ्गस्य महिमव्यञ्जकानि विशेषणपदानि ।

No. 103. **गौराङ्गशतनाम,** by **सार्व्वभौमभट्टाचार्य्यः.** Substance, country-made paper, 9×4½ inches. Folia, 2. Lines, 12 on a page. Extent, 48 çlokas. Character, Bengali. Date, ? Place of deposit, Ágartalá, Vṛddhanagar, Paṇḍita Mínesvara Sárbbabhauma. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीगौराङ्गप्रभुर्जयति ।
नमस्कृत्य प्रवक्ष्यामि देवदेवं जगद्गुरुम् ।

नान्नामष्टोत्तरशतञ्चैतन्यस्य महात्मनः ।
विश्वम्भरो जितक्रोधः .... ॥ इत्यादि ।

End. विश्वम्भराय गौराय चैतन्याय महात्मने ।
शचीपुत्राय मित्राय लक्ष्मीशाय नमोनमः ॥

Colophon. इति श्रीसार्व्वभौमभट्टाचार्य्यविरचितं श्रीचैतन्यदेवस्य शतमष्टोत्तरनामस्तोत्रं(?) सम्पूर्णम् ॥

विषयः । श्रीगौराङ्गदेवस्याष्टोत्तरशतनाम स्तोत्रम् ।

No. 104. गौराङ्गस्तोत्रम्, By **विराजगोस्वामी.** Substance, country-made paper, 16×1½ inches. Folia, 1. Lines, 4 on a page. Extent, 8 çlokas. Character, Bengali. Date, ? Place of deposit, Çäktā, Thānā Keränigañja, District Dhākā, Paṇḍita Trilocana Tarkālañkāra. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।
हरिकीर्त्तननर्त्तनकीर्त्तिभृतं
हरिनामविशेषितदेहधरम् ।
धृतभाग्यशचीसुतभागवतं
शरणेऽपि वरेऽङ्घ्रिद्भुतलम् ॥
तुलसीदलनिर्म्मितमाल्यधरं
हरिणा स्फुरतो धृतगौरतनुम् ।
सुरसिन्धुतटे धृतबालरसं
शुकजल्पितभागवतानुभवम् ॥ इत्यादि ।

End. य इदञ्च पठेत् सततमादरतो
नहि वस्तुमलं सुजनस्य फलम् ।
इह चैव परत्र च मुक्तिपदं
लभते लभते ++ कोन समः ॥

Colophon. इति श्रीविराजगोस्वामिविनिर्म्मितं श्रीगौराङ्गस्तोत्रं समाप्तम् ॥

विषयः । गुणकथनव्याजेन श्रीगौराङ्गमहाप्रभो रूपादिवर्णनात्मकं स्तोत्रमेतत् ।

No. 105. गौराङ्गाष्टकालिकम्, By नरहरिसरकारः. Substance, country-made paper, 13×3¼ inches. Folia, 2. Lines, 11 on a page. Extent, 49 çlokas. Character, Bengali. Date, ? Place of deposit, Āgartalā, Vrddhanagara, Paṇḍita Mīneçvara Sārvvabhauma. Appearance, new. Verse. Generally correct.

Beginning. श्रीगौरविधुर्जयति ।

श्रीगौराङ्गमहाप्रभोश्चरणयोर्या केशशेषादिभिः
सेवा-गम्यतया स्वभक्तविहिता सा नै यथा लभ्यते ।
तां तन्मानसिकस्मृतिं प्रथयितुं भाव्यां सदा सत्तमैः
स्तौमि प्रात्यहिकं तदीयचरितं श्रीमन्नवद्वीपजम् ॥ इत्यादि ।

End. श्रीगौराङ्गविधोः स्वधामनि नवद्वीपेऽष्टकालोद्भवां
भाव्यां भावजनेन गोकुलविधोर्लीलास्मृतेरादिमत् ।
लीलां श्लोतयेदत्र दशकं प्रत्यन्वितो यः पठेत् (?)
तं प्रीणाति सदैव यः करुणया तं नौमि ...... ॥

Colophon. इति श्रीनरहरिसरकारप्रणीतं श्रीगौराङ्गमहाप्रभोरष्टकालिकं समाप्तम् ।

विषयः । श्रीगौराङ्गस्याष्टकालिकभजनविधानकथनम् ॥

No. 106. गौरीकञ्चुलिका । Substance, country-made paper, 12×5 inches. Folia, 17. Lines, 9 on a page. Extent, 487 çlokas. Character, Bengali. Date, ? Place of deposit, Çerpur, Mayamansiñha, Bābu Haracandra Caudhurī. Appearance, tolerable. Verse. Incorrect.

Beginning. ॐ नमः काल्यै । देव्युवाच ।

श्रुतं भवत्प्रसादेन यथा कालस्य वञ्चनम् ।
मन्त्रस्य सारसम्भूतमिदानीमौषधं वद ॥
येन सिध्यन्ति देहानि सन्ति तानि हितानि च ।
ज्वररोगहरं कोपं तद्वद त्रिपुरान्तक ॥
सन्त्यौषधान्यनेकानि मनुष्याणां हिताय च ।
पूर्व्वन्तु यत् त्वया प्रोक्तं प्रत्यचं कथयस्व मे ॥

ईश्वर उवाच ।

तिथिनक्षत्रवारेण ऋतुभेदैः परिग्रहः ।
खननोत्पाटनं मन्त्रैः कारयेद्वै चिकित्सकः ॥ इत्यादि ।

End. कालस्य रञ्जनोपायं त्वयि सत्यं वदाम्यहम् ।
विना मृत्युञ्जयं काशीनाथं गर्भाद्भिबोधकम् ।
कालस्य निकटं ज्ञात्वा भज काशीं समाहितः ॥

Colophon. इति गोपालसंहितायां हरगौरीसम्वादे गौरीकञ्चुलिका समाप्ता ॥ ० ॥

विषयः । ईश्वरदेवीसम्वादेन औषधादिनिरूपणमौषधकरणकालादिकथनञ्च ॥

No. 107. ग्रहयागप्रयोगः (कौमुदीसम्मतः) । Substance, country-made paper, 12×3 inches. Folia, 13. Lines, 6 on a page. Extent, 175 çlokas. Charater, Bengali. Date, ? Place of deposit, Varsikurā, Mayamansiñha, Bābu Ānandamohana Cakravartī. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय । अथ कौमुदीसम्मतग्रहयागप्रयोगः । प्रातः कृतनित्यक्रियो यजमानो ब्राह्मणत्रयं वाचयेत् । पुण्याहं स्वस्ति ऋद्धिरस्त्विति । इत्यादि ।

End. धेनुः शङ्खस्तथानड्वान् हेमवासो हयास्तथा ।
कृष्णा गौ र्वायसश्छागो ग्रहाणां दक्षिणा क्रमात् ॥

Colophon. इति कौमुदीसम्मतग्रहयागप्रयोगः समाप्तः ॥

विषयः । विरोधिग्रहाणां शान्त्यै करणीयस्य यागस्य प्रयोगादिनिरूपणम् ।

No. 108. ग्रहयागप्रयोगतत्त्वम् । Substance, country-made paper, 16×3 inches. Folia, 19. Lines, 7 on a page. Extent, 532 çlokas. Character, Bengali. Date, ? Place of deposit, Teliveni, Post Gadbetā, District Medinípura, Appearance, tolerable. Prose. Incorrect.

Beginning. ॐ नमः श्रीसूर्याय ॥ अथ ग्रहयागप्रयोगः ।
ध्यात्वा गुरुपदद्वन्द्वं नत्वा च शङ्करात्मजम् ।
ग्रहयागप्रयोगतत्त्वं वक्ति श्रीरघुनन्दनः ॥ (?)
तत्रादौ रविसोमबुधजीवशुक्रेषु वारेषु शोभनाः । चित्रानुराधामृगशिरोरेवतीपुष्याश्विनीहस्तारोहिणुत्तरात्रयेषु चन्द्रतारानुकूलेषु शुभलग्नेषु कार्य्यः । तत्र बालग्रहभूतनराधिपप्रबलतरशत्रुदुःसहरोगाग्निभयद्भुतदुःस्वप्नपापग्रहदौस्थ्यादिनिमित्तकं शान्तिकं मलमासादावपि कर्त्तव्यमिति ।

प्रष्टदोषैः प्रपीड्यन्त मृत्यु न चापेक्षते ।
अकालेऽपि च कर्त्तव्यं नात्र कालविचारणम् ॥ इत्यादि ।

End. ॐ मन्त्रतन्त्रान्तरच्छिद्रं देशकालार्ह वस्तुतः । (?)
सर्व्वं करोतु निश्छिद्रं नामसङ्कीर्त्तनं हरेः ॥
अज्ञानाद् यदि वा मोहात् प्रच्यवेताध्वरेषु च ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥
ॐ यदक्षरं परिभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
पूर्णं भवतु तत्सर्व्वं श्रीहरेर्नामानुकीर्त्तनात् ॥
ॐ मया कृतं कर्म्म कीदृशं जातं इति पृच्छेत् । ॐ सर्व्वं साङ्गं जातं सर्व्वं वेदोक्तमासीत् प्रत्युत्तरमिति ॥

Colophon. इति वन्द्यघटीयहरिहरभट्टाचार्य्यात्मजश्रीरघुनन्दनभट्टाचार्य्यविरचितं ग्रहयागप्रयोगतत्त्वं समाप्तम् ॥

विषयः । विरोधिग्रहाणां शान्त्यै करणीयस्य ग्रहयागस्य विधिः प्रयोगादिश्च ।

No. 109. घटकर्परकाव्यटीका । Substance, country-made paper, $18 \times 4\frac{1}{2}$ inches. Folia, 3. Lines, 7 on a page. Extent, 102 çlokas. Character, Bengali. Date, ? Place of deposit, Kānibāri, Mayamansiñha, Paṇḍita Mukundacandra Smṛtiratna. Appearance, old. Prose. Correct.

Beginning. ॐ नमः शिवाय । निचितमित्यादि । नीरदैर्मेघैः समाकाशमुपेत्य प्राप्य निचितम् । आच्छादितमित्यर्थः । इत्यादि ।

End. घटकर्परेण छिद्रघटेन तस्मै उदकं वहेयं भावानुरक्तेति आदौ तृतीयातत्पुरुषे पश्चात् कर्म्मधारयः ॥

Colophon. इति घटकर्परस्य टिप्पनी समाप्ता ।

विषयः । वर्षावर्णनात्मकस्य घटकर्परकविप्रणीतस्य घटकर्परकाव्याख्यस्य क्षुद्रकाव्यस्य व्याख्यानम् ।

No. 110. चन्दनधेनुदानतत्त्वम्, By वाचस्पतिमिश्रः. Substance, country-made paper, $18 \times 3\frac{1}{2}$ inches. Folia, 8. Lines, 6 on a page. Extent, 186 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭihāli, Mayamansiñha, Paṇḍita Navakiçora Tarkacúdāmaṇi. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
नत्वा शिवं चन्दनचर्च्चिताया
धेनोः प्रदाने सविधिं प्रयोगम् ।
रत्नाकरादेर्लिखितं विलोक्य
तनोति वाचस्पतिरग्रबुद्धिः ॥ इत्यादि ।

End. जीवत्पितृकवृषोत्सर्गनिषेधे पतिपुत्रवत्याः वृषगुपसंहारः । सोऽपि तस्याः पुत्रानधिकारभावप्रत्युक्तवृषोत्सर्गाभावः ॥

Colophon. इति वाचस्पतिमिश्रविरचितं चन्दनधेनुदानतत्त्वं समाप्तम् ॥

विषयः । पतिपुत्रवत्या नार्य्या मृतायाः स्वर्गार्थं वृषोत्सर्गनिषेधात् तदनुकल्पीभूतचन्दन-धेनुदानविधिः तत्प्रयोगादिश्च ।

No. 111. चन्दनधेनूत्सर्गपद्धतिः, By रत्ननाथभट्टाचार्य्यः. Substance, palm-leaf, $16 \times 1\frac{1}{2}$ inches. Folia, 37. Lines, 3 on a page. Extent, 472 çlokas. Character, Bengali. Date, Sk. 1687. Place of deposit, Visnupura, Kādākuli, District Vāñkurā, Paṇḍita Raghurāma Tarkaratna. Appearance, old. Generally correct.

Beginning. ॐ कृष्णाय नमः ।
प्रणम्य पीताम्बरपादपङ्कजं
पिनाकि-पद्मोद्भवसेवितं सदा ।
वितन्यते चन्दनधेनुपद्धतिः
श्रीरत्ननाथेन मुदे सतामियम् ॥
देवलः ।
पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः ।
चन्दनेनाङ्किता धेनुस्तस्याः स्वर्गाय दीयते ।
अत्र अग्रत इति वचनात् । प्रोषितभर्त्तृकाया वृषोत्सर्गं कुर्य्यादिति केचित् तन्मन्दं । यदाह जातूकर्णः ।
चन्दनेनाङ्कितं कृत्वा दद्यात् धेनुं द्विजातये ।
वृषं नैवोत्सृजेत्तस्या यावद्भर्त्ता स जीवति ॥ इत्यादि ।

End. उदाहरति वेदार्थान् यज्ञविद्याः स्मृतीरपि ।
श्रुतिस्मृतिसमापन्नमाचार्य्यं तं प्रचक्षते ॥

इति परिशिष्टवचनाद्यज्ञादिकर्त्तुर्गायत्र्यादिवेदार्थाध्यापकस्य चाचार्य्यत्वम् ।
शूद्राणां तदसम्भवात्तान्त्रिकमन्त्रदातुरेव । तथाच नरसिंहपुराणम् ।
श्रुतिस्मृतिपुराणेभ्यो हीनस्य शूद्रजन्मनः ।
गर्भाधानादिसंस्कारैर्युतस्य च महामुने ॥
इयमेव परा शुद्धिर्दीक्षा या तान्त्रिकी भवेत् ।
यस्माच्च लभते मन्त्रं शूद्रः सेवेत तं सदा ॥
प्राणैरर्थैर्धिया वाचा स एवाचार्य्य उच्यते ।
न मर्त्त्यबुद्ध्या ज्ञातीयाद्विष्णुरूपी गुरुर्मतः ॥

Colophon. इति नवद्वीपीयरत्ननाथभट्टाचार्य्यकृता चन्दनधेनूत्सर्गपद्धतिः समाप्ता ॥
शकाब्दाः १६८७

विषयः । पतिपुत्रवत्या नार्य्या मृतायाः स्वर्गार्थं वृषोत्सर्गनिषेधात् तदनुकल्पीभूतस्य चन्दनधेनूत्सर्गस्य विधिः प्रयोगादिश्च ॥

No. 112. चाटुपुष्पाञ्जलिः । Substance, country-made paper, 9×6 inches. Folia, 4. Lines, 5 on a page. Extent, 34 çlokas. Character, Bengali. Date, ? Place of deposit, Tripurā, Mahārāja's Library. Appearnce, tolerable. Verse. Generally correct.

Beginning. श्रीराधिकायै नमः ।
नवगोरोचनागौरीं प्रवरेन्दीवराम्बराम् ।
मणिस्तवकविद्योतिवेणी .... ॥ इत्यादि ।

End. करुणां मुहुरर्थये परां
तव वृन्दावनचक्रवर्त्तिनि !
अपि केशिरिपोर्य्यया भवेत्
स चाटुप्रार्थनभाजनं जनः (?) ॥
इमं वृन्दावनेश्वर्य्या जनो यः पठति स्तवम् ।
चाटुपुष्पाञ्जलिं नाम स स्यादस्याः कृपास्पदः ॥

Colophon. इति चाटुपुष्पाञ्जलिः समाप्ता ।

विषयः । वृन्दावनेश्वर्य्याः स्तवात्मकानि कतिपयानि पद्यानि ।

No. 113. चिकित्सारत्नम्, By **जगन्नाथदत्तः.** Substance, country made paper, 16 × 3 inches. Folia, 101. Lines, 6 on a page. Extent, 2,110 çlokas. Character, Bengali. Date, Sk. 1715. Place of deposit, Dhākā, Bābu Bhagavāncandra Dāsa Kavirāja. Appearance, old. Prose and verse. Incorrect.

Beginning. ॐ नमो गणेशाय ।

पञ्चाननाय फणिराजविभूषणाय
स्वर्गापवर्गफलदाय फलात्मकाय ।
गौरीप्रियाय भुवनत्रयवन्दिताय
तेजोमयाय च नमः परमेश्वराय ॥
प्रणम्य गुरुपादाब्जं दृष्ट्वा बहुभिषङ्मतम् ।
श्रीजगन्नाथदत्तेन चिकित्सारत्नमुच्यते ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चाज्ज्ञानपूर्व्वं समाचरेत् ॥
आसुरी मानुषी दैवी चिकित्सा त्रिविधा स्मृता ।
रसप्रधाना दैवी स्याच्छेदभेदादिकासुरी ॥
षड्रसा मानुषी प्रोक्ता होमपूजादिसंस्कृता ।
कलौ चाल्प + + लोके मानुषी तेन पूजिता ॥
वटिका गुड़िका लेहचूर्णारिष्टश्च पिण्डकाः ।
घृतं तैलं गुड़ो लेपः स्वेदाञ्जनकषायकाः ॥
पुटपाकस्तथा ग्रन्थाभरणौ धूमधारणे ।
वक्ष्याणि यथायोग्यान्यनेकानि यथा तथा ॥ इत्यादि ।

End निद्रास्तम्भनमेतद्धि मूलदेवेन भाषितम् ।
माक्षिकं नवनीतञ्च कुष्ठञ्च मधुयष्टिका ॥
सौभाग्यं भगलेपेन दासवच्च भवेत् पतिः ।
निम्बकाष्ठस्य धूपेन धूपयित्वा भगं स्त्रियः ॥
सुभगाः स्युः पतिस्तासां दासवच्च भवेद्ध्रुवम् ।

Colophon. इति स्तम्भनाधिकारः । इति चिकित्सारत्नं समाप्तम् । शकाब्दाः १७१५ ॥

विषयः । ज्वरादिरोगाणां चिकित्साकथनम् । तत्र दैवी-मानुषी-आसुरी चेति चिकित्सा त्रिविधेति निरूपणम् । अथ सामान्यज्वरचिकित्सा । तत्र षड़ङ्गजलविधानम् । नाम-

रादिपाचनकथनम् । गुडूच्यादिपाचनकथनम् । अथ वातज्वरे हिङ्गुलेश्वररसकथनम् । अथ पित्तज्वरे यवपटोलविधानम् । धान्यशर्कराविधानम् । घनचन्दनादिविधानम् । दाहप्रतिक्रियाविधानम् । ज्वरकेशरिरसकथनम् । शीतभञ्जीरसकथनम् । अथ कफज्वरे कट्फलादिविधानम् । पर्णखण्डेश्वरविधानम् प्रचण्डेश्वररसकथनम् । कफकेतुरसकथनम् । अथ वातपित्तज्वरे नवाङ्गपाचनविधानम् । पञ्चभद्रविधानम् । नवज्वरे अङ्कुशविधानम् । चण्डेश्वररसविधानम् । अथ वातकफज्वरे वालुकास्वेदविधानम् । पञ्चकोलविधानम् । शीतारिरसकथनम् । रसचन्द्रिकाकथनम् । सौभाग्यवटिकाकथनम् । अथ पित्तश्लेष्मज्वरे कण्टकार्य्यादिविधानम् । धान्यपटोलविधानम् । अमृताष्टकविधानम् । चन्द्रशेखररसकथनम् । अथ सन्निपातज्वरे लङ्घनस्वेदनज्वरनिष्ठीवनादिविधानम् । अष्टाङ्गावलेहिकविधानम् । बृहन्नवाङ्गविधानम् । मृत्युञ्जयरसविधानम् । बृहत्पञ्चमूल्यादिविधानम् । दशमूली-चतुर्द्दशमूल्यादिविधानम् । लक्ष्मीविलासरसकथनम् । वेतालरसकथनम् । भैरवेश्वररसकथनम् । पञ्चवक्त्ररसकथनम् । अथ कर्णशोथे प्रलेपविधानम् । अथ जीर्णज्वरे भार्ग्यादिपाचनविधानम् । मेघनादरसकथनम् । सर्व्वज्वरलौहकथनम् । अथ विषमज्वरे मुस्तकादिपाचनविधानम् । दार्व्यादिपाचनविधानम् । भेदिज्वराङ्कुशकथनम् । ज्वराशनिरसकथनम् । त्रैलोक्यज्वरजिद्रसकथनम् । अर्द्धनारीश्वररसकथनम् । महाज्वराङ्कुशरसकथनम् । बृहत्सर्व्वज्वरलौहकथनम् । अथ कम्पज्वरे शीतमातङ्गसिंहरसकथनम् । विजयायोगकथनम् । अथ धातुस्थज्वरे सुदर्शनचूर्णकथनम् । बृहत्सर्व्वज्वरहरलौहकथनम् । अङ्गारकतैलकथनम् । लाक्षादितैलकथनम् । बृहल्लाक्षादितैलकथनम् । अष्टाङ्गधूपकथनम् । अथ चतुर्थज्वरे दूर्व्वाद्यतैलविधानम् । अथ ज्वरातिसारे ह्रीवेरादिपाचनविधानम् । उशीरपञ्चमूल्यादिपाचनविधानम् । आनन्दभैरवरसकथनम् । कनकसुन्दररसकथनम् । प्राणेश्वररसकथनम् । अथ आमातिसारचिकित्सा । तत्र धान्यपञ्चक-धान्यचतुष्कादिविधिः । अथ पक्वातिसारे कफकटादिविधानम् । मोचादिचूर्ण-मुस्तादिचूर्णस्वल्पपञ्चमूल्यादिविधानम् । कुटजावलेहविधानम् । शिवादिचूर्णकथनम् । गङ्गाधरचूर्णकथनम् । लवङ्गचतुःसमविधानम् । लवङ्गप्रयोगविधानम् । कुटजाष्टकविधानम् । पाठादिचूर्णविधानम् । रसाञ्जनादिचूर्णविधानम् । अथ सर्व्वातिसारे बृहद्गङ्गाधरयोगादिकथनम् । अथ प्रवाहिकायां जातिफलाद्यविधानम् । अथ अभयानरसिंहरसकथनम् ।

अथ ग्रहणीरोगचिकित्सा । तत्र कुटजावलेहादिविधानम् । लवङ्गवटिकाविधानम् । गङ्गाधरचूर्णविधानम् । जीरकाद्यचूर्णविधानम् । जातीफलाद्यचूर्णविधानम् । महागन्धकविधानम् । रूपवज्रभरसविधानम् । ग्रहणीगजेन्द्रवटिकाविधानम् । पानीयभक्तवटिकाविधानम् । रसपर्प्पटीविधानम् । लौहपर्प्पटीविधानम् । स्वर्णपर्प्पटीविधानम् । अथ संग्रहणग्रहण्यां चाङ्गेरीघृतविधानम् । श्रीलवङ्गादिमोदकविधानम् । जीरकाद्यमोदकविधानम् । ग्रहणीमिहिरतैलविधानम् ।

अथ अर्शोरोगचिकित्सा। तत्र शूरणमोदकविधानम्। प्राणदागुडिकाविधानम्। कुटजावलेहविधानम्। अर्शोमण्डूरविधानम्। यमानिकामोदकविधानम्। अथ अजीर्णरोगचिकित्सा। तत्र हिंग्वष्टकविधानम्। रामबाणरसकथनम्। वाडवानलरसकथनम्। बृहदग्निकुमाररसकथनम्। महाशङ्खवटिकाकथनम्। सुकुमारमोदककथनम्। हरीतकीखण्डकथनम्। अथ क्रिमिरोगचिकित्सा। तत्र क्रिमिमुद्गररसकथनम्। कीटवज्ररसकथनम्। क्रिमिघातिनीवटिकाकथनम्। विडङ्गादिघृतकथनम्। अथ पाण्डुरोगचिकित्सा। तत्र नारायणलौहविधानम्। पुनर्नवामण्डूरविधानम्। पुनर्नवाद्यतैलविधानम्। अथ रक्तपित्तरोगचिकित्सा। तत्र एलादिगुडिकाकथनम्। कुष्माण्डखण्डकथनम्। अथ यक्ष्मरोगचिकित्सा। तत्र त्रयोदशाङ्गविधानम्। रास्नादशमूलविधानम्। वासावलेहकथनम्। तालिशादिमोदकविधानम्। यक्ष्मान्तमोदककथनम्। शृङ्गाराभ्रविधानम्। महाकल्पतरुरसकथनम्। मृगाङ्करसकथनम्। बृहच्चन्दनाद्यतैलकथनम्। अथ कासरोगचिकित्सा। तत्र समशर्करचूर्णकथनम्। कण्टकार्य्यवलेहकथनम्। काससंहारभैरवकथनम्। चन्द्रामृतरसकथनम्। राजमृगाङ्करसकथनम्। अथ हिक्काचिकित्सा। तत्र नस्यविधानम्। पिप्पल्यादिलौहकथनम्। अथ हिक्काश्वासे पुरन्दररसविधानम्। श्वासकुठाररसकथनम्। अथ स्वरभेदचिकित्सा। तत्र कल्याणावलेहकथनम्। सारस्वतघृतकथनम्। अथ अरोचकचिकित्सा। तत्र अमृतसुन्दररसकथनम्। अथ छर्द्दिचिकित्सा। तत्र एलादिचूर्णविधानम्। अथ तृष्णाचिकित्सा। अथ मूर्च्छाचिकित्सा। अथ मदात्ययचिकित्सा। अथ उन्मादचिकित्सा। तत्र कल्याणघृतविधानम्। चौरकल्याणघृतकथनम्। शिवाघृतकथनम्। शिवातैलविधानम्। अथ अपस्मारचिकित्सा। तत्र गन्धकादिलौहविधानम्। महाचैतसघृतकथनम्। पाषाणवज्ररसकथनम्। अथ वातरोगचिकित्सा। तत्र रसोनपिण्डविधानम्। त्रयोदशाङ्गगुग्गुलुकथनम्। विष्णुतैलकथनम्। मध्यमनारायणतैलकथनम्। कुब्जप्रसारणीतैलकथनम्। सिद्धार्थकतैलकथनम्। बृहच्छतपुष्पादितैलकथनम्। हिमसागरतैलकथनम्। वातारिगुग्गुलुकथनम्। वातकुलान्तकतैलकथनम्। बृहद्वातारितैलकथनम्। वंसनागघृतविधानम्। वंसादिघृतकथनम्। वातगजाङ्कुशरसकथनम्। महाराजेश्वररसकथनम्। अथ वातरक्तचिकित्सा। तत्र विविधगुग्गुलुविधानम्। गुडूच्यादिलौहकथनम्। रसमाणिक्यविधानम्। द्वादशाङ्गयवकथनम्। बृहद्गुडूचीतैलकथनम्। बृहद्गुडूच्यादितैलकथनम्। अथ ऊरुस्तम्भचिकित्सा। तत्र त्रयोदशाङ्गगुग्गुलुविधानम्। अथ वातरोगचिकित्सा। तत्र रास्नापाकविधानम्। रास्नासप्तकविधानम्। योगराजगुग्गुलुकथनम्। बृहद्रसोनपिण्डकथनम् व्याधिशार्दूलगुग्गुलुकथनम्। आमवातारिगुग्गुलुकथनम्। बृहत्सैन्धवाद्यतैलकथनम्। अथ शूलरोगचिकित्सा। तत्र परिणामशूले वैश्वानरलौहकथनम्। पित्ताधिक्ये नारिकेलखण्डविधानम्। गुवाकखण्डविधानम्। धात्रीलौहविधानम्। शूलवज्रिणीवटिकाकथनम्। शूलगजेन्द्रतैलकथनम्। अथ उदावर्त्तरोगचिकित्सा। तत्र नाराचयोगकथनम्। अथ गुल्मरोग-

चिकित्सा । तत्र अभयावटिकाविधानम् । नाराचरसकथनम् । गुल्मकालानलरसकथनम् ।
अथ हृद्रोगचिकित्सा । तत्र अर्ज्जुनघृतकथनम् । हृदयार्णवरसकथनम् । अथ उरोग्रह-
चिकित्सा । अथ मूत्रकृच्छ्रचिकित्सा । तत्र कुशावलेहकथनम् । कर्पूरमोदककथनम् । अथ
मूत्राघातचिकित्सा । तत्र गोक्षुरघृतकथनम् । अथ मूत्रातिसारचिकित्सा । तत्र निदानादि-
कथनम् । धात्रीघृतकथनम् । तारकेश्वररसकथनञ्च । अथ अश्मरीचिकित्सा । तत्र कुलत्थाद्य-
घृतविधानम् । अथ मेहरोगचिकित्सा । तत्र न्यग्रोधादिपञ्चकविधानम् । मेहमुद्गरवटिका-
कथनम् । दाड़िमाद्यघृतविधानम् । प्रमेहगजसिंहघृतकथनम् । अथ स्थौल्यदौर्गन्ध्यादि-
चिकित्सा । तत्र विडङ्गादिलौहकथनम् । त्र्यूषणाद्यलौहकथनम् । अथ अत्यन्तक्षोभचिकित्सा ।
अथ कार्श्यचिकित्सा । तत्र निदानकथनम् । अश्वगन्धाघृतकथनम् । अथ उदररोगचिकित्सा ।
तत्र पुनर्नवाष्टकविधानम् । उदराारिरसकथनम् । सामुद्राद्यचूर्णकथनम् । अथ शोथोदर-
चिकित्सा । तत्र मानमण्डादिविधानम् । इच्छाभेदिरसकथनम् । अग्निमुखचूर्णकथनम् । बिन्दु-
घृतकथनम् । अथ प्लीहरोगचिकित्सा । तत्र मणिगुड़िकादिविधानम् । अभयालवणविधानम् ।
बृहद्गुड़पिप्पलीकथनम् । ताम्रकल्परसकथनम् । पञ्चामृतरसकथनम् । प्लीहवज्रिणीवटिका-
कथनम् । लौहमृत्युञ्जयकथनम् । प्लीहगजेन्द्ररसकथनम् । अथ शोथचिकित्सा । तत्र
सिंहास्यादिपाचनविधानम् । पुनर्नवाष्टककथनम् । शोथशार्दूलरसकथनम् । अग्निमुखमण्डूर-
कथनम् । दुग्धवटिकाकथनम् । तत्र मण्डूरकथनम् । बृहच्छुष्कमूलकादितैलविधानम् । अथ
वृद्धिरोगचिकित्सा । तत्र वृद्धिहरयोगकथनम् । नित्यानन्दरसकथनम् । अथ गलगण्डादि-
चिकित्सा । अथ श्लीपदचिकित्सा । तत्र प्राणवल्लभरसकथनम् । अथ विद्रधिचिकित्सा । अथ
व्रणशोथचिकित्सा । तत्र विड़ङ्गादिगुग्गुलुकथनम् । अथ व्रणचिकित्सा । तत्र सप्तदशाङ्गपाच-
नादिकथनम् । व्रणराक्षसतैलकथनम् । अथ दग्धव्रणचिकित्सा । अथ भग्नचिकित्सा । अथ
नाड़ीव्रणचिकित्सा । अथ भगन्दरचिकित्सा । तत्र सप्तविंशतिगुग्गुलुकथनम् । अथ उपदंश-
चिकित्सा । तत्र श्रीमन्मथरसकथनम् । सामान्यप्रयोगकथनम् । अथ शूकदोषचिकित्सा । अथ
कुष्ठरोगचिकित्सा । तत्र पञ्चनिम्बविधानम् । पञ्चतिक्तघृतकथनम् । उदयभास्कररसकथनम् ।
महातालेश्वररसकथनम् । अमृताङ्कुरलेहकथनम् । बृहन्मरिच्यादितैलकथनम् । महारुद्रतैल-
विधानम् । कन्दर्पप्रसारतैलकथनम् । अथ शीतपित्तचिकित्सा । अम्लपित्तचिकित्सा । तत्र
सितामण्डूरादिविधानम् । नारिकेलामृतविधानम् । अथ विसर्पचिकित्सा । तत्र अमृतादि-
पाचनविधानम् । अथ विस्फोटकचिकित्सा । अथ स्नायुरोगचिकित्सा । अथ मसूर्य्यादि-
चिकित्सा । तत्र पापान्तकरसकथनम् । अथ क्षुद्ररोगचिकित्सा । तत्र कुष्ठादितैलविधानम् ।
अथ गुदभ्रंशचिकित्सा । तत्र भृङ्गराजादितैलविधानम् । अथ मुखरोगचिकित्सा । तत्र माल-
त्याद्यचूर्णविधानम् । सव्यादिचूर्णकथनम् । खदिरवटिकाकथनम् । अथ कर्णरोगचिकित्सा ।
तत्र शम्बूकतैलकथनम् । दशमूलतैलकथनम् । अथ नासारोगचिकित्सा । तत्र सामान्य-

योगकथनम् । दशमूलाद्यतैलकथनम् । अथ नेत्ररोगचिकित्सा । तत्र कुमारीवर्त्तिकाकथनम् । चन्द्रोदयवर्त्तिकाकथनम् । नयनामृतविधानम् । अथ रात्र्यन्धचिकित्सा । अथ शिरोरोगचिकित्सा । तत्र गगनसुन्दररसकथनम् । षड्बिन्दुतैलकथनम् । महादशमूलादितैलकथनम् । महाफलकतैलादिकथनम् । बृहद्धुस्तूराद्यतैलकथनम् । महारुद्रतैलकथनम् । अथ प्रदररोगचिकित्सा । तत्र अशोकघृतकथनम् । प्रदरान्तकरसकथनम् । अथ सोमरोगचिकित्सा । अथ योनिव्यापकचिकित्सा । तत्र विविधतैलविधानम् । अथ निर्लोमकरणविधिः । तत्र कर्पूरादितैलकथनम् । अथ ऋतुकारणकथनम् । ऋतुशूलचिकित्सा । अथ बन्ध्याचिकित्सा । तत्र फलघृतकथनम् । अथ गर्भस्रावचिकित्सा । तत्र सहचरादियोगकथनम् । गर्भविलासरसकथनम् । गर्भचिन्तामणिरसकथनम् । अथ प्रसवविधानकथनम् । अथ मक्कल्लशूलचिकित्सा । अथ सूतिकाचिकित्सा । तत्र सूतिकादशमूलविधानम् । सहचरादिविधानम् । सूतिकारसविधानम् । सौभाग्यशुण्ठीकथनम् । अथ स्तनरोगचिकित्सा । तत्र वज्रकाञ्जिकविधानम् । अथ बालरोगचिकित्सा । तत्र बालघातुर्भद्रिकाविधानम् । धातक्यादियोगकथनम् । रजन्यादिचूर्णकथनम् । बालचतुःसमविधानम् । शिशुपथ्यककथनम् । अष्टमङ्गलघृतकथनम् । अथ शय्यामूत्ररोगचिकित्सा । अथ विषचिकित्सा । तत्र विषवज्रपातरसकथनम् । कुक्कुरविषशान्तिकथनम् । अथ रसायनविधिः । तत्र चतुर्मुखरसकथनम् । वसन्ततिलकरसकथनम् । रससिन्दूरकथनम् । श्रीकामदेवरसकथनम् । पूर्णचन्द्ररसकथनम् । अथ वाजीकरणविधिः । तत्र श्रीमन्मथरसकथनम् । पूर्णचन्द्ररसकथनम् । श्रीमदेश्वररसकथनम् । रतिवल्लभमोदककथनम् । कामदीपकविधिः । अथ ध्वजभङ्गचिकित्सा । तत्र महारिरसकथनम् । अथ स्तम्भनादिविधिश्च । इति शम् ।

सत्यमेव जयते

No. 114. चिकित्सासारदीपिका, By हरानन्ददासकविराजः. Substance, country-made paper, $14 \times 2\frac{1}{2}$ inches. Folia, 271. Lines, 7 on a page. Extent, 6,925 çlokas. Character, Bengali. Date, Sk. 1705. Place of deposit, Dhākā, Bhagavāncandra Kavirāja. Appearance, old. Prose and verse. Correct.

Beginning. ॐ नमः शिवाय ।

जयत्यधरपल्लवामृतरसेन सम्पूरयन्

जगज्जनमनोहरस्वनितचारुवंशं मुहुः ।

अभीष्टफलदायकः शरणदः शरण्यैषिणां

हरिः कलमदगुणोत्तमकदम्बमूलस्थितिः ॥

श्रीहरानन्ददासेन कविचन्द्रेण धीमता ।

क्रियते बालबोधाय चिकित्सासारदीपिका ॥

अथ शास्त्रावतारः ।

वक्त्रेभ्यः पद्मसंख्यामतेभ्यो
वेदा जाता ऋक्यजुःसामभेदाः ।
आयुर्वेदोऽथर्ववेदश्च तस्मिन्
आस्तां शम्भोः श्रीकणादस्य भक्तिः ॥
आस्ते वेदः पञ्चमो वैद्यकाख्यो
वेत्ता कश्चित् तस्य नास्ते महेशात् ।
तस्माज्ज्ञाताध्यैत तस्मात् तुराषाट्
तस्माज्ज्ञात्वा वक्तुमर्हामि शास्त्रम् ॥
धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
रोगास्तस्यापहर्त्तारः श्रेयसो जीवितस्य च ॥
क्वचिदर्थः क्वचिद्धर्मः क्वचिन्मैत्रं क्वचिद्यशः ।
कर्माभ्यासः क्वचिच्चापि चिकित्सा नास्ति निष्फला ॥
व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥
यावत् कण्ठगताः प्राणा यावन्नास्ति निरिन्द्रियम् ।
तावच्चिकित्सा कर्त्तव्या कालस्य कुटिला गतिः ॥ इत्यादि ।

End. काकोली-बाला-चन्दन-जातिफल-लवङ्ग-दारुचिनि-एलाचि-तेजपत्र-नागेश्वर-पिप्पली, एषां प्रति २ पल मृगमदकस्तूरी माषा ४ एकीकृत्य मृत्तिका-मध्ये स्थापयेत् । ततो जातरसं पाययेत् । दशमूलारिष्टिः ॥

Colophon. इति श्रीचरानन्ददासकविचन्द्रविरचितायां चिकित्सासारदीपिकायामासव-धानं(?) समाप्तम् ॥ समाप्तोऽयं ग्रन्थः ।
संक्षेपान्मूलशास्त्रश्च लिखित्वा ग्रन्थगौरवात् ।
श्रीजगन्नाथदासेन किञ्चिद्विस्तारतः कृतम् ॥
यद्यपि कविचन्द्रेण रचिता सारदीपिका ।
विस्तारेण मया प्रोक्तश्चिकित्सासागरः शुभः ॥

इति शकाब्दाः १७०५ ।

विषयः । अत्र प्रथममायुर्वेदागमप्रशंसा, ततः शान्तिकर्मादिकथनम् । अथ शारीराधिकारः । तत्र मूत्रादिपरीक्षाविधिः । नासिकापरीक्षाकथनम् । नाडीपरीक्षाकथनम् । अथ

परिभाषाकथनम् । दाहकर्म्मनिरूपणम् । स्नेहपानस्वेदवमनादिविधिः । वस्तिकर्म्मकथनादिकम् । नस्यधूमपानादिकरणविधिः । गण्डूषविधिः । अञ्जनविधिः । देशनिरूपणम् । द्रव्यगुणकथनम् । तत्र रसादिनिरूपणम् । धान्यादिवर्गनिरूपणम् । फलशाकमूलादिनिरूपणम् । मत्स्यमांसादिनिरूपणम् । पानीयक्षीरदधितक्रादिगुणकथनम् । औषधादिगुणकथनम् । व्यायामादिगुणकथनम् । हिमादिगुणकथनम् । औषधकरणादिदिननिरूपणम् । अनुपानादिविधिः । तैलमूर्च्छनादिविधिः । गन्धमात्रादिकथनम् । रसायनविधिः । तत्र यन्त्रनिरूपणम् । रसादिशुद्धिकथनम् । षड्गुणगन्धकनिरूपणम् । रसकर्पूरादिविधिः । पीतसूतभस्मसूतादिनिरूपणम् । रससिन्दूरादिविधिः । महाद्रावकादिविधिः । स्वर्णरौप्यताम्रादिधातूनां मारणशोधनादिविधिः । मनःशिलाशङ्खादिशुद्धिकथनम् । मत्स्यादिपित्तशुद्धिकथनम् । अथ विषादिशोधनप्रकारः ।

अथ चिकित्साप्रकरणम् । तत्र ज्वरस्य पूर्व्वरूपादिकथनम् । पथ्यापथ्यकथनम् । सामान्यज्वरे नागरादिपाचनविधिः । एवं क्षुद्रादिपाचनविधिः । गुडूच्यादिपाचनविधिश्च । अथ वातज्वरनिदानादिकथनम् । तत्र बृहत्पञ्चमूल्यादिपाचनविधिः । शालपर्ण्यादिपाचनविधिः । हिङ्गुलेश्वररसादिकथनञ्च । अथ पित्तज्वरनिदानादिकथनम् । तत्र कट्फलादिपाचनविधिः । धान्यशर्करादिविधिः । वनचन्दनादिविधिः । लेपनविधिः । ज्वरकेशरिरसविधिः । शीतभञ्जीरसविधिः । ज्वरभैरवरसविधिश्च । अथ कफज्वरनिदानादिकथनम् । तत्र अवलेहादिविधिः । हुताशनरसकथनम् । पर्णखण्डेश्वररसकथनम् । प्रचण्डेश्वररसकथनम् । पञ्चाननरसकथनम् । कफकेतुरसकथनम् । महाकफकेतुरसकथनम् । श्लेष्मकालानलरसकथनञ्च । अथ वातपित्तज्वरनिदानादिकथनम् । तत्र नवाङ्गपाचनादिकथनम् । पञ्चभद्रपाचनकथनम् । त्रिपुरभैरवरसकथनम् । जयावटिकाकथनम् । ज्वरधूमकेतुरसकथनम् । रत्नगिरिरसकथनम् । नवज्वराङ्कुशरसकथनम् । चण्डेश्वररसकथनञ्च । अथ वातश्लेष्मज्वरनिदानादिकथनम् । तत्र पञ्चकोलादिपाचनादिविधिः । रसचन्द्रिकारसकथनम् । सौभाग्यवटिकाकथनम् । अथ पित्तश्लेष्मज्वरनिदानादिकथनम् । तत्र कण्टकार्य्यादि—धान्यपटोलादि गुडूच्यादिपाचनविधिः । चन्द्रशेखररसकथनञ्च । अथ सन्निपातज्वरादिनिदानकथनम् । तत्र बालुकास्वेदादिविधिः । नस्यनिष्ठीवनादिविधिः । अष्टाङ्गावलेहादिविधिः । बृहन्नवाङ्गादिपाचनविधिः । बृहत्पञ्चमूल्यादिपाचनविधिः । एवं दशमूल्यादिपाचनविधिः । लक्ष्मीविलासरसकथनम् । वेतालरसकथनम् । भैरवेश्वररसकथनम् । त्रिदोषनीहारसूर्य्यरसकथनम् । सन्निपातसूर्य्यरसकथनम् । सूचिकाभरणरसकथनम् । लोकनाथरसकथनम् । अग्निकुमाररसकथनम् । नीलकण्ठरसकथनम् । चिन्तामणिरसकथनम् । सन्निपातशूलानलरसकथनम् । भैरवनादरसकथनम् । सन्निपातकालानलरसकथनम् । जलयौगिकरसकथनम् । विल्वमूर्त्तिरसकथनम् । वारिसागररसकथनम् । वीरभद्ररसकथनम् । त्रिनेत्ररसकथनम् । पञ्चवक्त्ररसकथनम् । नस्यभैरवरसकथनम् । अञ्जनभैरवरसकथनम् । रसचूडामणिरसकथनम् । भस्मेश्वररसकथनम् । उन्मत्तभैरवरसकथनञ्च । अथ अभिन्यासज्वर-

निदानादिकथनम् । तत्र शृङ्ग्यादिपाठीनिरूपणम् । स्वच्छन्दनायकरसकथनम् । अथ कर्णशोथनिदानादिकथनम् । तत्र मुष्टिक्रियाकथनम् । अथ जीर्णज्वरनिदानादिकथनम् । तत्र निदिग्धिकादिविधिः । भार्ग्यादिविधिः । मुष्टियोगकथनम् । धात्रीमोदकविधिः । मेघनादरसकथनम् । अथ विषमज्वरनिदानादिकथनम् । तत्रमुष्टियोगकथनम् । मुस्तकादि-द्राक्षादिपाचनविधिः । महाज्वराङ्कुशरसकथनम् । विद्यावल्लभरसकथनम् । ज्वरराजरसकथनम् । विषमज्वरान्तकलौहकथनम् । सर्व्वज्वरलौहकथनम् । जीरकादिमोदककथनम् । बृहत्सर्व्वज्वरलौहकथनम् । त्रैलोक्यज्वरजिद्रसकथनम् । रविसुन्दररसकथनम् । शीतभञ्जीरसकथनम् । शीतारिरसकथनम् । अर्द्धनारीश्वररसकथनम् । अथ रात्रिज्वरनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । विश्वेश्वररसकथनम् । अथ कम्पज्वरनिदानकथनम् । तत्र कण्टकार्य्यादिपाचनविधिः । शीतमातङ्गसिंहरसकथनम् । विजयायोगकथनम् । धारणतर्पणादिविधिः । अथ ह्याहिकादिज्वरकथनम् । तत्र महौषधादिकथनम् । अथ त्र्याहिकादिज्वरचिकित्सा । त्र्याहिकारिरसकथनम् । अथ चातुर्थकज्वरे मुष्टिक्रियाकथनम् । चातुर्थकारिरसकथनम् । सुदर्शनचूर्णकथनम् । ज्वरभैरवचूर्णकथनम् । अङ्गारकतैलविधिः । स्वल्पलाक्षादितैलकथनम् । बृहल्लाक्षादितैलकथनम् । पिप्पल्यादितैलकथनम् । अष्टाङ्गधूपकथनम् । अपराजिताधूपकथनम् । अथ अन्तर्ज्वरे दूर्व्वादितैलकथनम् । ज्वरबलिदानविधिः । नक्षत्रबलिदानादिविधिः । अथ ज्वरातिसारचिकित्सा । तत्र ह्रीवेरादियोगकथनम् । उशीरादियोगकथनम् । बृहद्गुडूचीपञ्चमूल्यादि-दशमूलशुण्ठ्यादिपाचनकथनम् । व्योषादिचूर्णकथनम् । कुटजावलेहादिकथनम् । आनन्दभैरवरसकथनम् । कनकसुन्दररसकथनम् । अमृतार्णवरसकथनम् । महाभ्रवटिकाकथनम् । अथ अतिसारनिदानकथनम् । आमातिसारचिकित्सा । धान्यपञ्चकादिकथनम् । चतुःसमगुड़कादिकथनम् । कञ्चटादिमुष्टियोगकथनम् । तत्र कुटजपुटपाकादिविविधौषधकथनम् । अथ रक्तातिसारचिकित्सादिः । तत्र मुष्टिक्रियाकथनम् । कुटजाष्टकादिपाचनकथनम् । पाठादिचूर्णविधिः । रक्तातिसारे मुष्टियोगकथनम् । अथ प्रवाहिकायां मुष्टियोगकथनम् । अभयनरसिंहरसकथनम् । मृतसञ्जीवनरसकथनम् । अथ ग्रहणीचिकित्सा । तत्र मुष्टिक्रियाकथनम् । लवङ्गवटिकाकथनम् । कुटजावलेहकथनम् । हंसपट्टलीरसकथनम् । गङ्गाधरचूर्णकथनम् । बृहद्गङ्गाधरचूर्णकथनम् । लवङ्गादिचूर्णकथनम् । बृहल्लवङ्गादिचूर्णकथनम् । जीरकादिचूर्णकथनम् । विजयभैरवचूर्णकथनम् । जातिफलाद्यचूर्णकथनम् । महागन्धककथनम् । नृपवल्लभरसकथनम् । ग्रहणीगजेन्द्रवटिकाकथनम् । ग्रहणीवटिकाकथनम् । ग्रहणीगजसिंहकथनम् । ग्रहणीकवाटकथनम् । त्रिपुररसकथनम् । रसपर्प्पटीकथनम् । रसशुद्धिगन्धकशुद्ध्यादिनिरूपणम् । पञ्चामृतपर्प्पटीकथनम् । विजयपर्प्पटीकथनम् । लौहपर्प्पटीकथनम् । सुवर्णपर्प्पटीकथनम् । पञ्चामृतलौहकथनम् । गगनसुन्दररसकथनम् । विद्यानाथवटिकाकथनम् । ग्रहणीवज्रकवाटकथनम् । अथ सङ्ग्रहग्रहण्यां कामाचारमण्डूरकथनम् । चाङ्गेरीघृतकथनम् । कल्याणगुड़कथनम् । ग्रहणी-

भिन्दिरतैलकथनम् । कष्टावलेहकथनम् । मदनमोदककथनम् । बृहच्छतावरीमोदककथनम् । कामेश्वरमोदककथनम् । जीरकाद्यमोदककथनम् । लवङ्गाद्यमोदककथनम् । स्वल्पनायिका-चूर्णकथनम् । नायिकाचूर्णकथनम् । जातिफलाद्यवटिकाकथनम् । महाभ्रवटिकाकथनम् । ग्रहणीकवाटरसकथनम् । विजयाभैरवचूर्णकथनम् । अथ शोथग्रहण्यां वारिशोषणरसकथनम् । लवङ्गादिमण्डूरकथनम् । अथ अर्शोनिदानकथनम् । धूपनलेपनादिविधिः । शूरणमोदक-कथनम् । व्योषादिचूर्णकथनम् । बृहच्छूरणमोदककथनम् । प्राणदागुड़िकाकथनम् । बाङ्क-शीलगुड़कथनम् । लवणोत्तमादियोगकथनम् । कुटजावलेहकथनम् । चन्द्रप्रभावटिकाकथनम् । तीक्ष्णमुखरसकथनम् । अर्शोघ्नरसकथनम् । अथ अजीर्णनिदानकथनम् । तत्र हिङ्ग्वष्टकचूर्ण-कथनम् । सिन्ध्वादिचूर्णकथनम् । अग्निमुखचूर्णकथनम् । अथ विष्टम्भविसूचिकाचिकित्सा । तत्र मुष्टिक्रियाकथनम् । मेथिमोदककथनम् । हरीतकीखण्डकथनम् । रामबाणरसकथनम् । हुताशनरसकथनम् । अग्निकुमाररसकथनम् । महाशङ्खवटीकथनम् । बृहच्छङ्खवटिकाकथनम् । महोदधिरसकथनम् । बृहन्महोदधिरसकथनम् । अजीर्णकण्टकरसकथनम् । क्रव्यादरसकथनम् । राजवल्लभरसकथनम् । भुक्तपाकवटिकाकथनम् । अग्निजननीवटिकाकथनम् । आनन्दोदयरस-कथनम् । सुकुमारमोदककथनम् । अथ क्रिमिनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । विडङ्गादिघृतकथनम् । क्रिमिमुद्गररसकथनम् । कीटब्रह्मरसकथनम् । क्रिमिकोठानलरस-कथनम् । क्रिमिघातिनीगुड़िकाकथनम् । अथ पाण्डुनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । त्रिफलादियोगकथनम् । नारायणलौहकथनम् । पुनर्णवामण्डूरकथनम् । त्रिकत्रयलौहकथनम् । पाण्डुनिग्रहरसादिकथनम् । अथ रक्तपित्तनिदानकथनम् । तत्र एलादिगुड़िकादिकथनम् । वासाघृतकथनम् । कुष्माण्डखण्डकथनम् । शर्करादिलौहकथनम् । त्रैलोक्यसुन्दररसकथनम् । अथ राजयक्ष्मनिदानादिकथनम् । तत्र लवङ्गादिचूर्णकथनम् । तालिशादिमोदककथनम् । वासावलेहकथनम् । छागलाद्यघृतकथनम् । चन्दनादितैलकथनम् । यक्ष्मान्तकलौहकथनम् । शृङ्गाराभ्रकथनम् । रजतादिचूर्णकथनम् । मृगाङ्करसकथनम् । धान्यदशमूलकथनम् । रास्ना-दशमूलकथनम् । बृहच्चन्दनादितैलकथनम् । रत्नगर्भपोटलीकथनम् । अथ कासनिदानादि-कथनम् । तत्र मुष्टिक्रियाकथनम् । हरीतक्यादिमोदककथनम् । अगस्त्यहरीतक्यादिकथनम् । कण्टकार्य्यवलेहकथनम् । स्वल्परसेन्द्रगुड़िकाकथनम् । रसगुड़िकाकथनम् । कासमंहारभैरव-कथनम् । चन्द्रामृतरसकथनम् । राजमृगाङ्ककथनम् । भार्गीशर्करावलेहकथनम् । अथ हिक्कानिदानादिकथनम् । पिप्पल्यादिलौहकथनम् । अथ श्वासनिदानादिकथनम् । तत्र भार्गीगुड़कथनम् । सूर्य्यावर्त्तरसकथनम् । पुरन्दररसकथनम् । श्वासारिलौहकथनम् । अथ स्वरभेदनिदानकथनम् । तत्र कल्याणावलेहकथनम् । निदिग्धिकावलेहकथनम् । ब्राह्मीघृतकथनम् । कर्पूरमोदककथनम् । अथ अरोचकनिदानकथनम् । तत्र मुष्टिक्रिया-कथनम् । कलहंसकाञ्जिककथनम् । अथ छर्दिनिदानादिकथनम् । तत्र मुष्टिक्रियाकथनम् ।

छर्दिहेतुकथनम् । एलादिचूर्णकथनम् । शिखरीमन्त्रकथनम् । कुमुदेश्वररसकथनम् । अथ तृष्णानिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । अथ मूर्च्छानिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । शीतलरसकथनम् । अथ मदात्ययाध्यायकथनम् । अथ गुल्मादिनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । कल्याणघृतकथनम् । चैतसघृतकथनम् । शिवाघृतकथनम् । शिवातैलकथनम् । त्रिकत्रयाद्यलौहकथनम् । अथ अपस्मारनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । धूपाञ्जनादिविधिः । ब्राह्मीघृतकथनम् । महाचैतसघृतकथनम् । अथ वातनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । रसोनपिण्डकथनम् । त्रयोदशाङ्गगुग्गुलुकथनम् । पथ्यागुग्गुलुकथनम् । महाकल्याणघृतकथनम् । बृहच्छागलादिघृतकथनम् । स्वल्पविष्णुतैलकथनम् । बृहद्विष्णुतैलकथनम् । मध्यमनारायणतैलकथनम् । महानारायणतैलकथनम् । कुब्जप्रसारणीतैलकथनम् । स्वल्पमाषतैलकथनम् । बृहन्माषतैलकथनम् । सप्तप्रस्थमाषतैलकथनम् । शीतारिरसकथनम् । वातारिगुग्गुलुकथनम् । विजयभैरवतैलकथनम् । हिमसागरतैलकथनम् । बृहद्वातारितैलकथनम् । वातकुलान्तकतैलकथनम् । बृहच्छतपुष्पादितैलकथनम् । स्वल्पगुडूचीतैलकथनम् । बृहद्गुडूचीतैलकथनम् । कैशोरगुग्गुलुकथनम् । वज्रगुग्गुलुकथनम् । भैरवगुग्गुलुकथनम् । गुडूच्यादिलौहकथनम् । रसमाणिक्यकथनम् । महातालेश्वरकथनम् । द्वादशाङ्गयवकथनम् । वाडवारितैलकथनम् । विषविन्दुकतैलकथनम् । अथ ऊरुस्तम्भनिदानकथनम् । तत्र चिकित्साकथनम् । अथ आमवातनिदानकथनम् । तत्र रास्नासप्तकादिकथनम् । रास्नादशमूलादिकथनम् । लेपनादिकथनम् । बृहद्रसोनपिण्डकथनम् । योगराजगुग्गुलुकथनम् । महारसोनपिण्डकथनम् । सिंहनादगुग्गुलुकथनम् । आमवातगजसिंहमोदककथनम् । स्वेदादिविधिः । बृहत्सैन्धवाद्यतैलकथनम् । आमवातहररसकथनम् । आमवातारिगुडिकाकथनम् । अथ शूलनिदानकथनम् । तत्र मुष्टियोगकथनम् । चतुःसमचूर्णकथनम् । त्रिफलामण्डूरकथनम् । चतुःसमलौहकथनम् । परिणामे मुष्टिक्रियाकथनम् । नारिकेलखण्डकथनम् । आमलकीखण्डकथनम् । शतावरीमण्डूरकथनम् । धात्रीलौहकथनम् । शुण्ठीखण्डकथनम् । विद्याधराभ्रकथनम् । शूलगजेन्द्रतैलकथनम् । अथ उदावर्त्तनिदानकथनम् । तत्र नाराचचूर्णकथनम् । मुष्टिक्रियाकथनम् । अथ गुल्मनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । काङ्कायनगुडिकाकथनम् । गुल्मकालानलरसकथनम् । दन्तीहरीतकीकथनम् । विद्याधररसकथनम् । नाराचरसकथनम् । अथ हृद्रोगनिदानकथनम् । तत्र मुष्टियोगकथनम् । अर्ज्जुनघृतकथनम् । अथ उरोग्रहचिकित्सा । अथ मूत्रकृच्छ्रनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । त्रिकटुकादिघृतकथनम् । कुशावलेहकथनम् । शर्करावलेहकथनम् । अथ मूत्रघातनिदानकथनम् । तत्र मुष्टियोगकथनम् । गोक्षुरामृतकथनम् । अथ मूत्रातिसारनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । धात्रीघृतकथनम् । तारकेश्वररसकथनम् । अथ अश्मरीशर्करानिदानकथनम् । तत्र मुष्टियोगकथनम् । कुलत्थाद्यघृतकथनम् । वरुणगुडकथनम् । अथ प्रमेहनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् ।

दाडिमादिघृतकथनम् । इन्द्रवटीकथनम् । बृहद्दाडिमाद्यघृतकथनम् । सोमेश्वररसकथनम् । बृहद्रामनाथरसकथनम् । मेहमुद्गरतैलकथनम् । बृहन्मेहमुद्गरतैलकथनम् । कर्पूरमोदककथनम् । अथ स्थौल्यदौर्गन्ध्यनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । विडङ्गादिलौहकथनम् । अथ कार्श्यचिकित्सा । अथ उदररोगनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । सामुद्राद्यचूर्णकथनम् । अग्निमुखचूर्णकथनम् । पुनर्नवाष्टककथनम् । बिन्दुघृतकथनम् । मानमण्डविधिः । नाराचरसकथनम् । उदरारिरसकथनम् । इच्छाभेदिरसकथनम् । बृहदुदरारिरसकथनम् । उदरहरताम्रयोगकथनम् । अथ प्लीहनिदानादिकथनम् । तत्र मुष्टिक्रियाकथनम् । मानादिगुडिकाकथनम् । अभयालवणकथनम् । यकृतानिलरसकथनम् । लोकनाथरसकथनम् । अथ शोथनिदानादिकथनम् । तत्र मुष्टियोगकथनम् । शिंचास्यादियोगकथनम् । वंशहरीतकीविधानम् । कटुकाद्यलौहकथनम् । त्रिकट्वादिलौहकथनम् । शुष्कमूलादितैलकथनम् । वासुकिभूषणरसकथनम् । दशमूलगुडकथनम् । बृहच्छुष्कमूलादितैलकथनम् । अथ वृद्धिनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । शतपुष्पादिघृतकथनम् । नित्यानन्दरसकथनम् । वृद्धिहररसकथनम् । अथ गलगण्डमालार्बुदादिचिकित्सा । अथ श्लीपदनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । लेपादिशोधनविधिः । विषतैलकथनम् । व्रणलेपनविधिः । शारीरव्रणचिकित्सा । विपरीतमल्लतैलकथनम् । व्रणराक्षसतैलकथनम् । अथ दग्धव्रणचिकित्सा । अथ भग्नचिकित्सा । अथ नाडीव्रणचिकित्सा । तत्र सप्ताङ्गगुग्गुलुकथनम् । अथ भगन्दरनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । सप्तविंशतिगुग्गुलुकथनम् । विष्यन्दनतैलकथनम् । भगन्दरहररसकथनम् । अथ उपदंशनिदानकथनम् । तत्र मुष्टियोगकथनम् । श्रीमन्मथरसकथनम् । सामान्यप्रयोगकथनम् । अथ शूकदोषचिकित्सा । अथ कुष्ठनिदानकथनम् । तत्र पञ्चनिम्बकथनम् । विश्वेश्वररसकथनम् । पञ्चतिक्तघृतकथनम् । अमृतभल्लातककथनम् । महाभल्लातककथनम् । सिन्दूराद्यतैलकथनम् । अर्कतैलकथनम् । बृहन्मरीच्यादितैलकथनम् । महारुद्रतैलकथनम् । विषतैलकथनम् । बृहत्सोमराजतैलकथनम् । कन्दर्पप्रसारतैलकथनम् । अमृताङ्कुरलौहकथनम् । उदयभास्कररसकथनम् । तालकेश्वररसकथनम् । हरितालभस्मविधानम् । महातालेश्वररसकथनम् । अथ शीतपित्तचिकित्सा । अथ अम्लपित्तचिकित्सा । तत्र नारिकेलामृतकथनम् । शतावरीघृतकथनम् । औपपत्तिकचूर्णकथनम् । सितामण्डूरकथनम् । आमलक्यादिलौहकथनम् । अथ विसर्पचिकित्सा । तत्र अमृतादिपाचनकथनम् । बृहदमृतादिपाचनकथनम् । कालाग्निचन्द्ररसकथनम् । अथ विस्फोटकचिकित्सा । अथ स्नायुरोगचिकित्सा । अथ मसूरिकाचिकित्सा । अथ क्षुद्ररोगनिदानकथनम् । तत्र मालत्यादितैलकथनम् । कुष्ठादितैलकथनम् । गुञ्जातैलकथनम् । अथ गुदभ्रंशचिकित्सा । तत्र क्षुद्रचाङ्गेरीघृतकथनम् । भृङ्गराजतैलकथनम् । अथ मुखरोगचिकित्सा । अथ दन्तरोगचिकित्सा । अथ

जिह्वाचिकित्सा । तालुचिकित्सा । तत्र कालकचूर्णकथनम् । पथ्यादिचूर्णकथनम् । खदिरवटिकाकथनम् । बृहत्खदिरवटिकाकथनम् । अथ कर्णरोगनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । क्षारतैलकथनम् । दशमूलतैलकथनम् । जातितैलकथनम् । शम्बूकतैलकथनम् । धुस्तूराद्यतैलकथनम् । बृहच्छम्बूकाद्यतैलकथनम् । अथ नासारोगनिदानम् । तत्र चित्रहरीतकीकथनम् । मुष्टियोगकथनम् । गृहधूमाद्यतैलकथनम् । अथ नेत्ररोगनिदानकथनम् । तत्र मुष्टिक्रियाकथनम् । बृहद्द्राक्षादिविधानम् । चन्द्रोदयवर्त्तिकथनम् । कुमारीवर्त्तिकथनम् । त्रिफलावर्त्तिकथनम् । बृहत्त्रिफलावर्त्तिकथनम् । सप्तामृतलौहकथनम् । अञ्जनविधानम् । अथ शिरोरोगचिकित्सा । तत्र षड्बिन्दुतैलकथनम् । अथ सूर्य्यावर्त्तचिकित्सा । तत्र मयूरघृतकथनम् । दशमूलतैलकथनम् । बृहद्दशमूलतैलकथनम् । श्लेष्ममर्द्दनतैलकथनम् । कणकतैलकथनम् । महाकणकतैलकथनम् । महासप्तराजतैलकथनम् । बृहद्धुस्तूराद्यतैलकथनम् । बृहत्कणकतैलकथनम् । महादशमूलतैलकथनम् । महारुद्रतैलकथनम् । अथ प्रदरनिदानकथनम् । तत्र मुष्टियोगकथनम् । शीतकल्याणघृतकथनम् । अशोकघृतकथनम् । प्रदरान्तकरसकथनम् । अथ सोमरोगनिदानकथनम् । तत्र चिकित्सा । अथ योनिव्यापच्चिकित्सा । तत्र मूषिकतैलकथनम् । अथ दन्तशूलचिकित्सा । अथ निर्लोमीकरणविधिः । अथ बन्ध्याचिकित्साविधानम् । तत्र फलघृतकथनम् । सोमघृतकथनम् । अथ गर्भोत्पादनविधानम् । अथ पुंसवनविधानम् । अथ मूढगर्भचिकित्सा । अथ गर्भचिकित्सा । अत्र चन्दनादिपाचनकथनम् । ह्रीवेरादिपाचनकथनम् । अथ गर्भविनाशकथनं तत्र मुष्टियोगकथनम् । गर्भचिन्तामणिरसकथनम् । अथ प्रसवविधिः । तत्र मन्त्रविधिः । अथ मक्कल्लशूलचिकित्सा । अथ सूतिकादशमूलकथनम् । सहचरादिपाचनकथनम् । वज्रकाञ्जिककथनम् । सौभाग्यशुण्ठीकथनम् । सूतिकाहररसकथनम् । सूतिकारसकथनम् । अथ स्तनविद्रधिचिकित्सा । तत्र स्तनरोगचिकित्सा । तत्र काशीशतैलकथनम् । अथ शिशुचिकित्सा । तत्र ज्वरादौ चातुर्भद्रिकापाचनविधिः । धातक्यादिपाचनकथनम् । रजन्यादिचूर्णकथनम् । बालचतुःसमादिकथनम् । बालरसकथनम् । अश्वगन्धाघृतकथनम् । अष्टमङ्गलघृतकथनम् । अथ दन्तकड्मड़िचिकित्सा । अथ शय्यामूत्रचिकित्सा । अथ विषाधिकारचिकित्सा । तत्र मुष्टियोगकथनम् । विषवज्ररसकथनम् । अथ रसायनाधिकारः । तत्र पूर्णचन्द्ररसकथनम् । चतुर्मुखरसकथनम् । महाकल्पतरुरसकथनम् । वसन्ततिलकरसकथनम् । श्रीकामदेवरसकथनम् । रसकर्पूरकथनम् । अथ वाजीकरणविधिः । तत्र आम्रखण्डकथनम् । पूगखण्डकथनम् । कामाग्निसन्दीपनरसकथनम् । रतिवल्लभमोदककथनम् । मन्मथरसकथनम् । पूर्णचन्द्ररसकथनम् । महेश्वररसकथनम् । परमानन्दरसकथनम् । कामदीपकरसकथनम् । अथ ध्वजभङ्गचिकित्सा । अथ वीर्य्यस्तम्भनविधिः । अथ वशीकरणविधिः । तत्र आसवधानविधानम् । मध्वासवकथनम् । वरुणारिष्टकथनम् । दशमूलारिष्टकथनञ्च ॥ इति शम् ।

No. 115. चिन्तामणितन्त्रं, By शिवः Substance, country-made paper, 19×5 inches. Folia, 7. Lines, 7 on a page. Extent, 252 çlokas. Character, Bengali. Date, ? Place of deposit, Dhākā, Vikramapur, Mājpāḍā, Bābu Rāsavihāri Rāya. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमः परदेवतायै ।
पार्व्वत्युवाच ।
देवदेव महादेव नीलकण्ठ तपोधन ।
शूलपाणे महादेव कथ्यतां चन्द्रशेखर ॥
सर्व्वं हि परमानन्द श्रुतं तव मुखाम्बुजात् ।
एवं इच्छामि देवेश गुह्यतत्त्वं महेश्वर ॥
मन्त्रतत्त्वं महेशान चैतन्यञ्च तपोधन ।
योनिमुद्रां महेशान तत्त्वत्रयं परायणम् ।
एतद्देव महादेव कथ्यतां मे पिनाकधृक् ॥
ईश्वर उवाच ।
शृणु पार्व्वति वक्ष्यामि दासोऽहं तव सुव्रते ।
अतिगुह्यं महत्पुण्यं तत्त्वत्रयं वरानने ॥
सारात्सारतरं मन्त्रमतिगोप्यं शुचिस्मिते ।
शङ्कापि जायते देवि कथं तत्कथयाम्यहम् ॥
कथयामि महादेवि दासोऽहं तव सुव्रते ।
न चेत्तत्कथ्यते देवि मम क्रोधः प्रजायते ।
त्वया क्रोधे कृते देवि हानिः स्यान्मम कामिनि ॥
मन्त्रार्थं मन्त्रचैतन्यं धर्म्मार्थकामदं प्रिये ।
योनिमुद्रां महेशानि साक्षान्मोक्षप्रदायिनीम् ॥ इत्यादि ।

End. एतन्मन्त्रमतं कृत्वा जीवन्मुक्तः स एव तु ।
एतन्मन्त्रमतं देवि सर्व्वतन्त्रेषु शस्यते ॥
शिवे विष्णौ महेशानि तथाच गणनायके ।
शक्तिश्रेष्ठेषु देवेशि सर्व्वविद्यासु शस्यते ॥
सत्यं सत्यं पुनः सत्यं सत्यमेव वदाम्यहम् ।
यत्नेन कुरु देवेशि हृदये धारणं चरेत् ॥ (?)

Colophon. इति श्रीचिन्तामणितन्त्रे मुद्रामन्त्रार्थ-चैतन्यनिरूपणे पार्व्वतीश्वरसंवादे सप्तमः पटलः ॥

विषयः । शिवाशिवयोः संवादेन योनिबीजादिकथनम् । रहस्ययोनिमुद्राकथनम् । कुण्डलिनीध्यानादिकथनम् । योनिकवचकथनम् । आधारचक्रादिक्रमेण कवचपाठफलकथनम् । तत्कवचधारणफलकथनञ्च । षट्चक्रक्रमेण मन्त्रार्थकथनम् । षड्दलवर्णनम् । मणिपूर-वर्णनम् । हृत्पद्मवर्णनम् । विशुद्धाख्यवर्णनम् । आज्ञापुरवर्णनम् । मन्त्रचैतन्यप्रकारकथनम् । मुद्रामन्त्रार्थनिरूपणम् । चैतन्यरहस्यकथनञ्च ॥

No. 116. चैतन्यकल्पः (ब्रह्मयामलान्तर्गतः) । Substance, country-made paper, 13 × 3½ inches. Folia, 8. Lines, 7 on a page. Extent, 196 çlokas. Character, Bengali. Date, ? Place of deposit, Kānthālpāḍā *viâ* Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Prose. Incorrect.

Beginning. श्रीचैतन्यचन्द्राय नमः ।

कलौ पूर्णानन्दस्त्रिभुवनजयी गौरसुतनु-
र्नवद्वीपे जातः सुरधुनीसमीपे शचीसुतः ।
इदत्वापिभ्योऽपि सकलजनमपि स्वैर्नाम निखिलं
तरिला पापाद्दि जगति विजयते गौरचन्द्रावतारः ॥ (?)

पार्व्वत्युवाच ।

भगवन् देवदेवेश सृष्टिस्थित्यन्तकारक ।
चैतन्यकल्पं भगवन् कथयस्व मयि प्रभो ॥
नवद्वीपे कथं कृष्णो भगवान् भक्तवत्सलः ।
जातः किं कर्म्म कृत्वा च शच्याः पुत्रः प्रभूय च ।
तदहस्व महादेवो श्रद्धा ते यदि जायते ॥ इत्यादि ।

End. भक्तप्रियो गौरचन्द्रो भक्तवश्यः शचीसुतः ।
तस्मात् तं ये भजन्तीह तेषां वश्यः शचीसुतः ॥
श्रुत्वा चैतन्यकल्पं हरिभजनविधिं विस्मिता शैलपुत्री
आनन्दाश्रुप्रमुदितमुखी शङ्करं स्तावयन्ती ।
गायन्त्युच्चैर्हरिगुणमयं लोकविस्तारकल्पं
श्रुत्वा श्रुत्वा हिमगिरिसुता मङ्गला संबभूव ॥

Colophon. इति ब्रह्मयामले श्रीचैतन्यकल्पे शिवदुर्गासम्वादे चैतन्यकल्पं नाम पञ्चमोऽध्यायः ।

श्रीचैतन्यनित्यानन्दाभ्यां नमः । हरये नमः ।

विषयः । अत्र प्रथमं हरपार्व्वतीसंवादेन चैतन्यदेवस्य अवतारप्रयोजनकथनम् । नानाविधं चैतन्यस्य महिमादिवर्णनम् । ततः श्रीचैतन्यदेवस्य स्तोत्रादिः ।

No. 117. चैतन्यविलासामृतम्, *By* नन्दकुमारगोस्वामी. Substance, country-made paper, 13 × 3 inches. Folia, 178. Lines, 6 on a page. Extent, 2,937 çlokas. Character, Bengali. Date, ? Place of deposit, Caämasinā, Post office Rādhānagara, District Vāṅkurā, Çrī Nikuñjavihāri Gosvāmī. Appearance, new. Verse. Correct.

Beginning. श्रीश्रीकृष्णचैतन्यचन्द्राय नमः ।

गुरोः पादाम्बुजं नौमि करुणारसपूरितम् ।
यस्य ध्यानानुलेशोऽपि सर्व्वसिद्धिप्रदायकः ॥
नीलाब्दद्युतिनिन्दिदेहरुचिरं विद्युद्दुकूलावृतं
न्यग्रोष्ठाधरवेणुमिन्दुवदनं कन्दर्पदर्पाकुलम् ।
गुञ्जास्रग्रुचिरोरसं निरुपमं बल्लालकामण्डितं
चूडाबद्धमयूरपुच्छकुसुमं वन्दे व्रजेन्द्रात्मजम् ॥
बालार्कप्रतिमारुणाम्बुजपदद्वन्द्वं सुखर्व्वाकृतिं
शुभ्रस्फाटिकधिक्कृतैकदशनं लम्बोदरं सुन्दरम् ।
द्वीप्यचारुकरीन्द्रवक्त्रमनिशं कृष्णाङ्घ्रिसंधारिणं
वन्दे शैलसुतासुतं गणपतिं तं विघ्नविध्वंसिनम् ॥
वन्दे व्यासपराशरादियमिनो भीष्माम्बरीषार्ज्जुन-
प्रह्लादांश्च विभीषणं कपिपतिं भक्ताग्रगण्यं परम् ।
अक्रूरोद्धवशौनकादिसहितश्चौत्तानपादात्मजं
वाल्मीकिं शुकनारदप्रभृतिकं भक्ताङ्घ्रिमूलान्यपि ॥
संदग्धहेमरुचिरांशुसुचारुरूपं
बालार्कतुल्यवसनं कमलाक्षमीशम् ।
राधासुभावगलदश्रुविधौतदेहं
प्रेमार्णवं द्विजवरं प्रणमामि गौरम् ॥

वन्दे श्रीकृष्णचैतन्यं करुणाकरविग्रहम् ।
प्रेमार्द्रिताङ्गरुचिरं कीर्त्तनानन्दमोहितम् ॥
नित्यानन्दं प्रभुं वन्दे श्रीवासाद्वैतसुन्दरौ ।
गदाधरं स्वरूपञ्च गौरभक्तगणान्यपि ॥
वन्दे रूपसनातनौ रघुवरं श्रीजीवगोपालकौ
दासश्रीरघुनाथमीश्वरपदे दातुं सुभक्तिञ्च ये ।
नानाशास्त्रपुराणवेदनिगमादुद्धृत्य सारानलं
प्रातन्वन् व्रजराजनन्दनगुणग्रन्थान् बहून् सुन्दरान् ॥
कीदृक् प्रेम प्रणयिनि पराराधिकाया मयीतः
स्वादुत्वं वा स्मरविशिखजं पीडनञ्चापि कीदृक् ।
ज्ञातुं तत्तद्व्रजघनविभामापिधाय व्रजेश-
स्तस्या देहद्युतिमनुदधच्चाविरासीत्कृपौजः ॥
आख्यावलीं प्रेमरसस्य संदद
ज्जनान् समुद्धर्तुमिवाविरभवत् ।
श्रीकृष्णदासादिभिरेव विस्तृता
लीलास्तदीयाश्चरितामृतादिषु ॥
प्रवक्तुमेषां चरणप्रसादतः श्रीगौरलीलालवमेवमुत्सुके ।
ममैष यत्नः किमु दर्शनाय ते सतां न गौराङ्गचरित्रवर्णनम् ॥
मतिच्युतेन मया रचितोऽप्ययं
जनमलं ननु नाशयिता ध्रुवम् ।
अहिभवोपि मणिर्न तमश्चयं
किमु न नाशयति स्वधमस्थितः ॥

भो भोः साधवः कृतावधानं क्रियतां, द्वापरयुगावसानमवगत्यात्यन्ताह्लादित-चेतःप्रारूढप्रचण्डप्रबलतरसुदीर्घभीषणकल्मषतरङ्गं सम्पूर्णमुद्गरखड्गचर्मशरा-सनाद्यायुधघनचूर्णितरक्तोत्पलप्रतिमाच्छिदयघोरतरारिकुलसंमर्दकप्रचण्डदोर्द-ण्डप्रतापकम्पितब्रह्माण्डमण्डल-विविधयातनाकर-कर्कश-कुलिशकुल-धिक्कृत-श्रीमत्कलिराजो मर्त्यभूमाववततार । ततः स एव अधर्म्मनिर्दयक्रोधकामा-दिरिपुपुङ्गवाः ! आगच्छत द्रुतं कर्म साध्यतां मम संप्रति ।

ततोऽधर्म्मो निर्दयश्चागत्य कामादिभिः सह प्रणम्य पार्श्वे नृपतिमाश्रित्य स्थिता कृताञ्जलिः ।

किमर्थमाकृष्टौ राजन् किम्वा कार्य्यं भवत् प्रभो ।
साधयामो वयं सद्य एवासाध्यमपि द्रुतम् ॥

ततः कलिः ।

धन्यौ तौ निर्द्दयाधर्म्मौ तुष्टोऽहं भवनेन वः ।
भाम्यतं पृथिवीमध्ये धर्म्मादिः कुरुतं क्षयम् ॥ इत्यादि ।

End. इत्याद्याक्षेपणं वाक्यमुक्त्वा श्रीगौरसुन्दरः ।
भक्तैर्लीलां चकाराग्र्यां श्रोतृश्रुतिसुखप्रदाम् ॥
शचीतनयतत्त्वतद्गुणचरित्रलीलादिकं
मुनीन्द्रसुरपुङ्गवैरपि न वेद्यमन्येन किम् ।
वदेच्च यदि शारदा युगसहस्रमेवानिशं
सहस्रवदनोऽपि तौ न खलु तत्र किञ्चित् क्षमौ ॥
यैर्न श्रुतं गौरगुणानुकीर्त्तनं यैर्नार्च्चितं तस्य पदाम्बुजद्वयम् ।
यैर्नो कृतसज्जनसङ्ग आदरात् ते मूढमर्त्या यमदूतशासनाः ॥

× × × ×

× × × × ।

ते सर्व्वपापैर्वियुता नराधमा दुष्टाः कृतघ्ना भवकूपवासिनः ॥
श्रूयतां श्रूयतां भक्ताश्चैतन्यगुणकीर्त्तनम् ।
तस्माच्च परमानन्दप्राप्तिः स्यान्नात्र संशयः ॥
आचार्य्यश्रीनिवासप्रभुकुल-चद्मावक्षवङ्कतिभाक्-सु
जातः पञ्चाननाख्यो जनकुलविदितः प्राज्ञ ईशानुकम्प्यः ।
तत्पुत्रेणेह किञ्चिद्रचितमिह मया ज्ञानहीनेन यत्नात्
श्रीश्रीगौराङ्गलीलामृतमिति कृपया नोपहास्यं भवद्भिः ॥
श्रीरामचन्द्रेण विशोधिते वकुपलाञ्छिते विष्णुपुरिनिवासिना ।
ग्रन्थेऽत्र दोषो यदि वर्त्तते कियद्दयाद्र दुष्यः सुधियो विविच्यताम् ॥ ।

Colophon. इति श्रीनन्दकुमारगोस्वामिविरचिते श्रीचैतन्यविलासामृतग्रन्थे अन्त्यकाण्डे प्रोषितभर्त्तृकारसास्वादनं नाम पञ्चमो विलासः ॥ समाप्तश्चायं ग्रन्थः ।

विषयः । अत्र आदिकाण्डे प्रथमविलासे कलेरूपाख्यानवर्णनम् । २ ये प्रभोर्जन्मलीला-वर्णनम् । ३ ये गौराङ्गोद्वाहादिवर्णनम् । ४ र्थे विवाहादिलीलावर्णनम् । ५ मे सन्न्यासोपक्रमादिवर्णनम् । मध्यकाण्डे प्रथमविलासे गौराङ्गसन्न्यासग्रहणवर्णनम् । २ ये नीलाचलगम-

नादिवर्णनम् । ३ ये चौरचौरगोपीनाथचरित्रवर्णनम् । ४ र्थे सार्व्वभौमोपदेशवर्णनम् । ५ मे रामानन्देन सह मेलनादिवर्णनम् । ६ ष्ठे गौराङ्गस्य तीर्थाटनादिवर्णनम् । ७ मे गौड़वासिभक्तैः सह मेलनवर्णनम् । ८ मे पुनर्नीलाचलप्रत्यागमनम् । ९ मे वृन्दावनभ्रमणवर्णनम् । १० मे श्रीमद्रूपाद्युपदेशादिवर्णनम् । अन्त्यकाण्डे प्रथमविलासे श्रीमद्रूपमेलनादिवर्णनम् । २ ये हरिदासनिर्याणादिवर्णनम् । ३ ये नवानुरागरसास्वादननिरूपणम् । ४ र्थे अभिसारादिरसवर्णनम् । ५ मे प्रोषितभर्तृकारसास्वादनम् । इति ।

No. 118. चौरपञ्चाशत्काव्यस्य कालिकापक्षटीका, By श्रीराधाकृष्णशर्म्मा. Substance, country-made paper, 7×2 inches. Folia, 15. Lines, 8 on a page. Extent, 482 çlokas. Character, Bengali. Date, Sk. (?) Place of deposit, Kānṭhālpāḍā *viâ* Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Prose. Generally correct.

Beginning. श्रीदुर्गा ।

नत्वा कालीपदद्वन्द्वं सेवितं सुरराशिभिः ।
राधाकृष्णेन व्याख्यातं काव्यं सौन्दरमेव च ॥
अभिरामात्मजः श्रीमान्नन्दरामसमाश्रयः ।
एकदा संसदि प्राह व्याख्यां कर्त्तुं द्रुतञ्च माम् ॥
वर्द्धमाने महाकाल्याः पक्षं व्याख्यातुमाहतः ॥ इत्यादि ।

End.

× × × ×
× × × × ।

श्रीराधाकृष्णविप्रस्त्विनगिरिसुतापक्षमस्मिन् सुकाव्ये
शास्त्रे प्रख्यातबुद्धिः सुविदितमकरोन्नन्दरामेण चोक्तः ॥
शाके चन्द्राङ्करामाम्बुधिसुतगणिते रत्नगर्भस्य सूनुः
अन्तर्यं कोविदैस्तन्मम यदविदितं प्राञ्जलिं वै करोमि ।

× × × ×
× × × × ॥

Colophon. इति चौरसुन्दरराजकृते पञ्चाशच्छ्लोककाव्ये श्रीराधाकृष्णकृतकालिकापक्षव्याख्या सम्पूर्णा ॥ श्रीदुर्गा ॥

विषयः । चौरपञ्चाशदपरनामकस्य शृङ्गाररसात्मकस्य सौन्दरकाव्यस्य कालिकापक्षे व्याख्यानम् ।

No. 119. जपरहस्यम्. Substance, country-made paper, 13 × 4⅘ inches. Folia, 8. Lines, 10 on a page. Extent, 360 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṇṭhālpāḍā *viâ* Naihāṭī, Paṇḍita Navīnacandra Ṭhākura. Appearance, new. Verse. Generally correct.

Beginning. ॐ परमदेवतायै नमः । अथ जपरहस्यम् । तत्रादौ प्रातः कर्त्तव्यमाह ।
प्रातःकाले च शय्यायां जपस्य निर्णयं शृणु ।
पूर्व्वोक्तमातृकान्यासं विन्यसेन्मातृकास्थले ॥
तथा एकादशद्वारे चौरमन्त्रांश्च विन्यसेत् ।
दशधा चैव मन्त्रस्तु एकधा वापि संजपेत् ॥ इत्यादि ।

End. पुनर्णकारमारभ्य श्रीकण्ठान्तं मनुं जपेत् ।
विलोम इति विख्यातः ञकारं केवलं जपेत् ॥
अष्टवर्गाद्यवर्णैश्च सह मूलमथाष्टकम् ।
अष्टोत्तरशतं जप्त्वा समर्प्य प्रणमेद्धिया ॥
सर्व्वान्तरात्मनिलये .... स्वरूपिणि ।
गृहाणान्तर्जपं मातरन्नपूर्णे नमोऽस्तु ते ॥
समर्प्य जपमेतेन ...... प्रणमेद्धिया ॥

Colophon. ॐ गुरुभ्यो नमः ॥

विषयः । जपनिर्णयः । जपक्रमनिरूपणम् । कुल्लुकादिनिरूपणम् । सेतुनिरूपणम् । मुखजिह्वादिशोधननिरूपणम् । दीपिनीनिरूपणम् । मन्त्रचैतन्यादिनिरूपणम् । जपकाल-कर्त्तव्यनिरूपणम् । मानसपूजादिनिरूपणञ्चेति ।

No. 120. जातकदीपः, By लौहित्यवत्सेनः. Substance, palm-leaf, 17 × 1 inches. Folia, 100. Lines, 4 on a page. Extent, 1,831 çlokas. Character, Bengali. Date, Śk. 1747. Place of deposit, Dhākā, Pañcasāra, Paṇḍita Mahendracandra Kāvyatīrtha. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ नमो गणेशाय ।
जयति कमलबन्धुर्जीवलोकैकचक्षु-
स्त्रिगुणमयशरीरो ब्रह्मरूपोऽशरेद्वः ।

अनुगतजनभर्त्ता रोगशोकैकहर्त्ता
भुवनजननरक्षानाशहेतुर्विवस्वान् ॥
अन्यस्मिन् मनुजादीनां न हि जन्मफलान्विते ।
एकत्र कथितान्येव मनुभिर्मतभेदतः ॥ (?)
तच्छास्त्रपयसां सारैः + + येव प्रकाशकः ।
एकत्र ज्ञानबोधार्थं क्रियते ज्ञातदीपकः ॥
शास्त्रमेतत् पुरा यच्च कृतं कर्म्म शुभाशुभम् ।
व्यञ्जयत्यन्धकारे तद्द्रव्यं दीप इवोज्ज्वलः ॥
तत्र राशिग्रहाणाञ्च भेद आदौ निगद्यते ।
नो ज्ञात्वा भेदमेतेषां को दैवं वक्तुमर्हति ॥
शास्त्रप्रशंसा । इत्यादि ।

End. ज्योतिर्ग्रन्थघटीपयोनिधिमटीनिःशेषसारोद्धृतै-
र्देवानां सदसद्विचाररचनावैदग्ध्यसन्दर्भवित् ।
श्रीलौहित्यवरेण वैद्यकुलजेनाकारि यो यत्नतो
ग्रन्थस्तेन विरामसत्परगुणाः सज्ज्ञातदीपं जनाः ॥

Colophon. इति लौहित्यवरसेनविरचिते ज्ञानकदीपके निर्व्वाणो नाम पञ्चविंशतितमोऽध्यायः । समाप्तोऽयं ग्रन्थः ॥

विषयः । अत्र प्रथमं राशिभेदनिरूपणम् । तत्र राशीनां स्वभावादिभेदकथनम् । ग्रहभेदनिरूपणम् । तेषां क्रूरसौम्यादिकथनम् । गोचरनिरूपणम् । नवांशादिकथनम् । षड्वर्गादिकथनम् । मूलत्रिकोणादिकथनम् । वश्यावश्यनिरूपणम् । केन्द्रादिकथनम् । ग्रहवर्णादिकथनम् । द्रेक्काणादिनिरूपणम् । ग्रहाणामुच्चनीचत्वादिकथनम् । राहुकेत्वोर्मूलत्रिकोणादिकथनम् । दिक्पतिराशिकथनम् । पृष्ठोदयादिकथनम् । राशिबलाबलकथनम् । तन्वादिसंज्ञाकथनम् । लग्नमानकथनम् । उपचयसंज्ञाकथनम् । केन्द्रादिकथनम् । नृपादिसंज्ञाकथनम् । क्रूरसौम्यज्ञाननिरूपणम् । दिक्पतिविवेकः । नपुंसकाद्यधिपकथनम् । जात्यधिपादिकथनम् । तत्कालमित्रामित्रकथनम् । दृष्टिनिरूपणम् । गोचरफलकथनम् । फलकालनिर्णयः । औषधधारणव्यवस्था । पञ्चमादिताराफलकथनम् । नाडीनक्षत्रनिरूपणम् । संक्रान्तिनिरूपणम् । रव्यादिचक्रकथनम् । रेखादिफलकथनम् । अष्टवर्गकथनम् । महाष्टवर्गकथनम् । अथ गर्भाधानादिकथनम् । जातकलग्नादिनिरूपणम् । जारयोगकथनम् । नौकादौ जन्मकथनम् । मातृत्यक्तजातस्य शुभाशुभकथनम् । सत्त्वादिज्ञानकथनम् । तालादिज्ञानकथनम् । जातकवर्णनिरूपणम् । चिह्नव्रणज्ञाननिरूपणम् । शिशुरिष्टिकथनम् । द्रेक्काणरिष्टादिकथनम् ।

मातृरिष्टाद्दिकथनम् । पिण्डायुःकथनम् । दशाकथनम् । अष्टमचन्द्रादिदशाकथनम् । दशारिष्टकथनम् । अन्तर्दशानिरूपणम् । नाचषिकदशाकथनम् । केतुपताकिनिरूपणम् । रव्यादिसप्तचेत्रफलकथनम् । नवांशादिफलकथनम् । तन्वादिभावकथनम् । गुरुसौरयोः परस्परदृष्टिकथनम् । राशिशीलकथनम् । नक्षत्रशीलकथनम् । उच्चफलादिकथनम् । तनुगततुङ्गादिकथनम् । मूलत्रिकोणफलकथनम् । स्वगृहस्थग्रहफलकथनम् । मित्रगृहस्थग्रहफलकथनम् । नीचग्रहफलकथनम् । शत्रुगृहस्थग्रहफलकथनम् । द्विग्रहयोगकथनम् । त्रिग्रहयोगकथनम् । प्रव्रज्यायोगकथनम् । पतितयोगकथनम् । पातकयोगकथनम् । पातकयोगभङ्गकथनम् । शीर्षादिच्छेदयोगकथनम् । त्रिशूलयोगकथनम् । वज्रहतयोगकथनम् । कुष्ठद्दुयोगकथनम् । काणयोगकथनम् । खञ्जयोगकथनम् । पशुहतयोगकथनम् । जलजन्तुहतयोगकथनम् । चौरहतादियोगकथनम् । क्षुद्रादियोगकथनम् । दारिद्र्यादियोगकथनम् । सिंहासनादियोगकथनम् । अलर्कादियोगकथनम् । दोलाच्छत्रहेमच्छत्रयोगकथनम् । वित्तयोगकथनम् । धनज्ञानकथनम् । सुखज्ञानकथनम् । नृपतियोगकथनम् । राजयोगभङ्गकथनम् । स्त्रीणां लग्नादिस्थग्रहफलकथनम् । वैधव्यादियोगकथनम् । सहमरणयोगकथनम् । कुलटायोगकथनम् । वन्ध्यादियोगकथनम् । प्रव्रज्यायोगकथनम् । मृतापत्यादियोगकथनम् । नृत्यगीतादियोगकथनम् । पतिद्वेषयोगकथनम् । शुभाशुभयोगकथनम् । ब्रह्मवादिनीयोगकथनम् । शिल्पादियोगकथनम् । निधनस्थानफलकथनम् । गङ्गामरणादियोगकथनम् । मृत्युज्ञाननिरूपणम् । जलमृत्युयोगादिकथनम् । मृत्युस्थानज्ञाननिरूपणम् । जन्मसमये मरणसमये वा मोक्षगतिनिरूपणम् । देवलोकादिगतिनिरूपणञ्च । इति शम् ।

No. 121. **जातकसारः,** By **गोविन्दानन्दः.** Substance, country-made paper, 17×3½ inches. Folia, 9. Lines, 8 on a page. Extent, 324 çlokas. Character, Bengali. Date, ? Place of deposit, Brāmhaṇamaṇḍalī *viâ* Bārāsāt, Paṇḍita Rāmanārāyaṇa Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः श्रीसूर्य्याय ।

नत्वा सूर्य्यपदद्वन्द्वं गोविन्दानन्दशर्म्मणा ।
क्रियते सद्विदां मुदे ॥
प्राचीनसंज्ञया सर्व्वं प्रकाशीक्रियते मया ।
संज्ञाध्यायमतो वक्ष्ये फलं पश्चात् वितन्वते ॥
देहो द्रव्यपराक्रमौ सुखसुतौ कलत्रं मृतिर्भाग्यं ।
राज्यपदं क्रमेण गदितं लाभव्ययौ लग्नतः ॥ इत्यादि ।

× × × ×

× × × ×

End. इत्थं तातादिकानामपि जनुषि तथा खेचराणां सुतेशं
वाच्यं होरागमज्ञैस्तदनु तनुपयुक् भार्गवो राजपूज्यः ॥
जातस्य लग्नभवनाद्भवमं प्रकल्प्य तातालयं जातकवद्विचिन्त्यं ।
सर्व्वेषु भावेषु विशेषयुक्त्या तेषां सदा दुष्टमदुष्टमार्य्यैः ॥

Colophon. इति सर्व्वभावाध्यायः ॥ श्रीदुर्गा शरणम् ।

विषयः । अत्र प्रथमं प्राचीनसंज्ञादिकथनम् । ततः अयनांशादिनिरूपणम् । सर्व्वभाव-साधारणफलादिनिरूपणम् । लग्नभावफलादिनिरूपणम् । सर्व्वभावनिरूपणञ्च ।

No. 122. जीर्णमञ्जरी. Substance, country-made paper, 16½ × 3 inches. Folia, 5. Lines, 4 on a page. Extent, 72 çlokas. Character, Bengali. Date, ? Place of deposit, Sonārañga, District Dhākā, Bābu Prabhātacandra Sena. Appearance, tolerable. Verse. Generally correct.

Beginning. नमो गणेशाय ।
नारिकेलफलेषु तण्डुलमथ चीरं रसाले हितं
जम्बीरोत्थरसाद् घृते समुचितः सर्पिस्तु मोचाफले ।
गोधूमेषु च कर्कटी हिततमा मांसात्यये काञ्जिकं
नागरङ्गे (?) गुड़भक्षणञ्च कथितं पिण्डीरके कोद्रवाः ॥
पिष्टा द्वे सलिलं पियालफलजे पथ्या हिता माषजे
खण्डं चीरं भवेत्तक्रमुचितं कोष्णाम्बुकोल......... । (?)
मत्स्ये चूतफलन्त्वजीर्णशमनं मध्वम्बुपानात्यये
तैलं पुष्करजे कटुप्रशमनं शेषास्तु बुद्ध्या जयेत् ॥ इत्यादि ॥

End. शीतोदकं नस्यजरोगहारि नारीपयस्याञ्जनरोगनाशि ।
एलोदकं धूमगदे प्रशस्तं धात्रीप्रलेपोऽतिविरेचनेषु ॥
व्यायामस्य मांसं श्रमजेऽनुकूलं प्रभातसुप्तिः सुरतावसाने ।
क्षीरो......सैन्धवसाधितन्तु छागाण्डमुक्तं सुरतातिरेके ॥
श्रवणपूरणजे तिलतैलतः श्रवणपूरणमेव सुखं विदुः ।
करणजेषु गदेषु च कारयेत् करणमात्रकजद्रवजं पुनः ॥

Colophon. इति जीर्णमञ्जरीग्रन्थः समाप्तः ॥

विषयः । केषु केषु द्रव्येषु कानि कानि द्रव्याणि जीर्णतानुकूलानि भवन्तीत्यस्य निरूपणम् ॥

No. 123. ज्ञानतन्त्रम् . Substance, country-made paper, 15 x 4 inches. Folia, 16. Lines, 5 on a page. Extent, 286 çlokas. Character, Bengali. Date, ? Place of deposit, District Dhākā, Thānā Rāṇīnagar, Paṇḍita Kālīdhana Vidyābhūṣaṇa. Appearance, new. Verse. Incorrect.

Beginning. ॐ नमो गणेशाय ।

कैलासशिखरे रम्ये गन्धर्व्वगणसेविते ।
स्थाणोर्वक्षःस्थिता देवी पृच्छति स्म नगात्मजा ॥
गणेश-नन्दि-चन्द्रेश भूतनाथ महेश्वर ।
अनेकतन्त्रमन्त्राणां प्रकाशोद्धरणानि च ॥
भेदश्च कीलकञ्चैव शापाद्युद्धार एव च ।
त्वत्प्रसादान्मया नाथ ज्ञातं तत्त्वं न संशयः ॥
नानातन्त्रेषु देवेश विद्यार्णवमयी स्मृता ।
इदानीं श्रोतुमिच्छामि मन्त्राङ्गमासनिर्णयम् ॥
मन्त्रसङ्केतकं नाम बहुधा मयि सूचितम् ।
अस्मिंस्तु निर्ज्जने देव यदि स्नेहोऽस्ति मां प्रति ।
तद्वदस्व महादेव नात्र कार्य्या विचारणा ॥
नो चेत् सत्यं वदाम्यद्य पुरस्कृत्य तवाग्रतः ।
प्राणत्यागं करिष्यामि सत्यं सत्यं न संशयः ॥

ईश्वर उवाच ।

साधु पृष्टं त्वया भद्रे यन्मन्त्रं मनसि स्थितम् ।
योषिच्चपलभावत्वात् पुरा नोक्तं त्वयि प्रिये ॥
इदानीं स्थिरतां ज्ञात्वा कथयामि वरानने ।
न प्रकाश्यं महादेवि कदाचिदपि पार्व्वति ॥
प्रकाशिते महामन्त्रे सिध्यन्ति सिद्धयस्तव ।
पुनरुक्तं मया देवि न वक्तव्यं सुनिश्चितम् ॥
विना रूपेण होमेन पूजया वा कृपान्विते ।
येन विज्ञानमात्रेण मन्त्रसिद्धिः प्रजायते ॥ इत्यादि ।

End. मन्त्राश्च वाचका ज्ञेया वाच्यत्वं मनुनोदितम् ।
मन्त्रसङ्केतमज्ञात्वा यो जपेत् कालिकां पराम् ॥
शतलक्षप्रजप्तोऽपि मन्त्रसिद्धिर्न जायते ।
मन्त्राः पराङ्मुखा यान्ति आपदश्च दिने दिने ॥
जपपूजादिकं सर्व्वमभिचाराय कल्प्यते ।
अन्ते निरयमाप्नोति सत्यं सत्यं न संशयः ॥

Colophon. इति सर्व्वतन्त्रोत्तमे ज्ञानतन्त्रे कालीमन्त्राङ्गनिर्णयो नाम सप्तमः पटलः ।

विषयः । अत्र प्रथमं शिवाशिवयोः संवादेन तत्त्वज्ञानस्वरूपतत्प्राप्त्युपायादिकथनम् । तत्र एकाक्षरादिमन्त्रकथनम् । मन्त्रोद्धारसाधनकथनम् । महाविद्यास्वरूपादिकथनम् । तत्र अङ्ग-संस्थानादिकथनम् । बालामन्त्रनिरूपणम् । भैरवाङ्गनिर्णयः । भुवनेश्वरीविद्यानिरूपणम् । तन्म-न्त्राङ्गनिरूपणम् । त्रिवर्गसाधनीविद्याकथनम् । त्रिपुराविद्याकथनम् । अन्नपूर्णामन्त्राङ्गनिर्णयः । महात्रिपुरसुन्दरीमन्त्राङ्गनिर्णयः । कालीमन्त्राङ्गनिर्णयश्च ।

No. 124. ज्ञानतन्त्रम् . (१० म परिच्छेदः) Substance, country-made paper, 19 × 5 inches. Folia, 6. Lines, 9 in a page. Extent, 388 çlokas. Character, Bengali. Date, ? Place of deposit, Hālisahar, Khāsvāṭī, Paṇḍita Mahādeva Bhaṭṭācāryya. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमः परमदेवतायै ।
नारद उवाच ।
यत्त्वयोक्तं महादेव विस्तारेण श्रुतं मया ।
इदानीं श्रोतुमिच्छामि संक्षेपात् गुरुलक्षणम् ॥
दीक्षाकालस्नकाले च तथा चैव पुरश्क्रियाम् ।
मालाभिधानं देवेश नित्यस्य कथय प्रभो ॥ इत्यादि ।

End. चतुर्थाश्रमिणो विप्राः पूजा वामरताः सदा ।
गार्हस्थाश्रमिणो विप्राः पूजा दक्षरताः सदा ॥ (?)
ब्राह्मणस्तु सुरां पीत्वा ब्राह्मण्यादेव हीयते ।
तस्मात् गृहस्थो विप्रस्तु दक्षिणाचारपूजनम् ।
कुर्य्यात् तथा विना वेश्यां क्षत्रियं वा न पूजयेत् ॥

Colophon. इति शिवनारदसम्वादे ज्ञानतन्त्रे दशमः परिच्छेदः ।

विषयः । ज्ञानतन्त्रस्य दशमपरिच्छेदेऽस्मिन् प्रथमं गुरुनिरूपणम् । ततो मन्त्रसिद्ध्युपायादिनिरूपणम् । मुक्तिनिरूपणम् । पूजाहोमादिनिरूपणम् । प्रणवभेदनिरूपणम् । शापोद्धारादिनिरूपणञ्च ।

No. 125. **ज्ञानभैरवीतन्त्रम् . (षष्ठः पटलः)** Substance, country-made paper, 12 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 27 çlokas. Character, Bengali. Date, ? Place of deposit, Mayamansiñha, Yaçodal, Paṇḍita Kālicandra Bhaṭṭācāryya. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणेशाय । अथ ज्ञानभैरवीतन्त्रम् ।
शृणु देवि प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम् ।
परं ब्रह्ममयं देवि अद्भुतं वरवर्णिनि ॥ इत्यादि ।

End. ब्रह्मचिन्तामणौ तन्त्रे पूर्व्वमुक्तं विशेषतः ।
अधुना कथितं रम्यं रहस्यं त्रिजटात्मकम् ।
पठनात् सर्व्वपापेभ्यो मुक्तो भवति मानवः ॥

Colophon. इति ज्ञानभैरवीतन्त्रे षष्ठः पटलः ।

विषयः । त्रिजटादेव्या रहस्यादिनिरूपणम् ।

No. 126. **ज्ञानमार्जनीतन्त्रं (योगशास्त्रम्) .** Substance, country-made paper, 10 × 2½ inches. Folia, 12. Lines, 7 on a page. Extent, 168 çlokas. Character, Bengali. Date, ? Place of deposit, District Dhākā, Vikrampur, Teghare, Paṇḍita Içvaracandra Vidyālañkāra. Appearance, fresh. Verse. Incorrect.

Beginning. ॐ नमः परदेवतायै ।
नमामि व्यक्तपुरुषं परं ब्रह्म च सर्व्वदा ।
शब्दस्पर्शरूपरसगन्धाकारविवर्ज्जितम् ॥
साधकानान्तु चित्तानामेतद्वेदन्तु तद्गुणैः ।
सृष्टिपालनसंहारं कुरुते त्रितयात्मकम् ॥
प्रथमं सर्व्वलोकानां सर्व्वराज्यसुखप्रदम् ।
प्राचौ + + + स्थापनाय शिवाकारन्तनामयम् ॥

कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ पार्व्वती देवी ब्रूहि ज्ञानं महेश्वर ॥
श्रीदेव्युवाच ।
कुतः सृष्टिर्भवेद्देव कथं सृष्टिर्विनश्यति ।
ब्रह्मज्ञानं कथं देव सृष्टिसंहारवर्ज्जितम् ॥ इत्यादि ।

End. अनुपम्यं निराधारं शब्दं तस्य तदुच्यते (?) ।
अचलं निर्म्मलञ्चैव शून्यं वापि निरञ्जनम् ॥
वेदान्तसार + + + समासे शिवभाषितम् ।
सिध्यन्ति सर्व्वयोगानां नात्र कार्य्या विचारणा (?) ॥

Colophon. इति योगशास्त्रे उमामहेश्वरसंवादे ज्ञानमार्ज्जनीतन्त्रं समाप्तम् ॥

विषयः । शिवाशिवयोः संवादेन ब्रह्मज्ञानोपायकथनम् । अष्टादशविद्याकथनम् । शाङ्करीविद्यायो गुप्तत्वकथनम् । अध्यात्मविद्यास्वरूपादिकथनम् । निद्रव्याादिसिद्धान्तकथनम् । शारीरतत्त्वकथनम् । शरीरे चन्द्रसूर्य्यादीनां क्रमेण स्थाननिरूपणम् । आहारनिद्रासुषुम्नादि-कारणकथनम् । तत्र तत्र मनसः कर्त्तृत्वकथनम् । शिवशक्तिस्वरूपादिकथनम् । षट्चक्र-निरूपणम् । त्रिगुणत्रिदेवतादितत्त्वकथनम् । ज्ञानदयाशान्तिप्रभृतीनां पितृमातृभगिनीत्वादि-रूपकथनम् । मायामोहस्वरूपादिकथनम् । ब्रह्मज्ञानस्वरूपादिकथनम् । अथ योगलक्षणादि-कथनम् । संयमादीनामावश्यकत्वकथनम् । स्थूलसूक्ष्मब्रह्मलक्षणादिकथनञ्च ॥

No. 127. ज्ञानलक्षणाविचारः. Substance, country-made paper, 18 × 3 inches. Folia, 4. Lines, 8 on a page. Extent, 168 çlokas. Character, Bengali. Date, Sk. 1639. Place of deposit, Brāmhaṇamaṇḍali *viâ* Bārasāt, Paṇḍita Rāmanārāyaṇa Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमः । सप्रकारकज्ञानस्योपनायकत्वमते ज्ञानलक्षणाया घटत्वप्रकारक-प्रत्यक्षं प्रति सप्रकारकघटत्वज्ञानत्वेन न हेतुता । अन्यांशे सप्रकारकात् घटत्वनिर्व्विकल्पकात् घटोपनीतभानापत्तेः । इत्यादि ।

End. शाब्दबोधे च विशेषणतावच्छेदकप्रकारकज्ञानहेतुतया निर्व्विकल्पकस्य सम्मतेऽपि द्वितीयक्षणेऽपि प्रत्यक्षापत्तिर्न सम्भवति विशिष्टबुद्धावारक्षणे तत्का-रणप्रकारस्तु स्वयमेव विचिन्त्यतां विवेचितञ्चेदमधिकमन्यत्र इति कृतं प्रपञ्चेन ॥

Colophon. इति ज्ञानलक्षणाया विचारः सम्पूर्णः ।
अङ्कमन्मथचराच्चिकार्त्तिका-
स्येन्दुसम्मितशकीयवत्सरे ।
× × × ×
× × × × ॥

विषयः । न्यायशास्त्रीयज्ञानलक्षणाया विचारः ।

No. 128. ज्ञानादयरहस्यम् । Substance, country-made paper, 18½ × 3 inches. Folia, 6. Lines, 8 on a page. Extent, 402 çlokas. Character, Bengali. Date, ? Place of deposit, Dhānukā, Post office Pālaŋ, District, Pharidpur, Paṇḍita Kālīkiŋkara Vidyābhūṣaṇa. Appearance, old Prose. Generally correct.

Beginning. ॐ अनुमितिं प्रति साध्यव्याप्यत्वावच्छिन्नहेतुप्रकारतानिरूपितपक्षविशेष्यता-शालिज्ञानत्वरूपविशिष्टपरामर्शत्वेन न हेतुता किन्तु व्याप्यतावच्छेदकप्रका-रकव्याप्तिज्ञानत्वेन व्याप्यतावच्छेदकप्रकारकपक्षधर्म्मताज्ञानत्वेन च हेतुता इयं एवं धूमो वह्निव्याप्यो धूमवान् पर्व्वत इत्याकारकज्ञानान्वयात् तथा-विध.........इत्यनुमितिरुत्पद्यते न केवलं विशिष्टपरामर्शादेव अतएव धूमो वह्निव्याप्यालोकवान् पर्व्वत इत्याकारकज्ञानद्वयादनुमित्यापत्तिः । धूमत्वालोकत्वयोरुभयोरेव व्याप्यतावच्छेदकत्वादिति तु न शङ्कनीयं यतो व्याप्यतावच्छेदकत्वेन धूमत्वादिकं कारणतावच्छेदककोटौ निवेश्य न कार्य्य-कारणभावं कल्पयामः । किन्तु विशिष्टधूमलिङ्गकानुमितिं प्रति धूमत्वाव-च्छिन्नविशेष्यकव्याप्तिप्रकारकज्ञानत्वेन पर्व्वतत्वावच्छिन्नविशेष्यकधूमत्वावच्छिन्न-प्रकारकज्ञानत्वेन चेति नोपदर्शितापत्तिप्रसङ्गः ॥ इत्यादि ।

End. सामग्रीप्रतिबन्धकतायां विशिष्ट...............उत्तेजकत्वापेक्षया तादृश-प्रतिबध्यप्रतिबन्धकभावस्यैव कल्पयितुमुचितत्वादिति चेदस्त्वेतादृशरीत्या उप-दर्शितानुमितिसामग्रीप्रतिबन्धकत्वाधिक्यपरीहारः । तादृशानुमितिसामग्र्याः प्रतिबध्यतावच्छेदकगौरवं दुर्व्वारमेव तथापि मन्मते तादृशसामग्र्याः पर्व्वतविशेष्यकानुमित्यन्यवह्निज्ञानत्वमेव प्रतिबध्यतावच्छेदकं घटप्रत्यक्षादेस्तत्-प्रतिबध्यतावच्छेदकानाक्रान्तत्वेऽपि क्षतिविरहात् । भवन्मते तु तत्प्रत्यक्षादि-साधारणवह्निमत्पर्व्वतवृत्तिवह्निव्याप्यधूमप्रकारतानिरूपितधूमवत् पर्व्वतत्वा-

वच्छिन्नविशेष्यताशाल्यनुमित्यन्यज्ञानत्वादेरेव तथात्वमुपेयं । केवलस्यानुमित्यन्यज्ञानत्वस्य तथात्वे समानविषयकशब्दबोधादौ व्यभिचारप्रसङ्गात् । एवञ्च वह्न्यनुमितिसामग्रीप्रतिबन्धकतायां ....

... ...

एकज्ञानविशिष्टापरज्ञाननिवेशनप्रयुक्तमुपदर्शितगौरवं । मीमांसकमते तादृशस्थलीयतादृशानुमितिसामग्रीनियतोपदर्शितसामग्रीणामनन्तानां प्रतिबध्यतावच्छेदकगौरवमिति मीमांसकमतमेव साधीयः ॥

Colophon. इति ज्ञानाद्वयरहस्यम् ॥

विषयः । एककालीनं ज्ञानद्वयं सम्भवति न वेति विचारः ।

No. 129. ज्ञानार्णवः । Substance, country-made paper, 17 × 5 inches. Folia, 50. Lines, 8 on a page. Extent, 1,764 çlokas. Character, Bengali. Date, ? Place of deposit, Mājpāḍā, District Dhākā, Bābu Rāsavihārī Rāya. Appearance, new. Verse. Correct.

Beginning. ॐ नमः परदेवतायै ।

श्रीदेव्युवाच ।

गणेशनन्दिचन्द्रेशसुरेन्द्रपरिवारित ।
जगद्वन्द्य फलाधीश किं त्वया जप्यते सदा ।
अक्षमालेति किं नाम संशयो मे हृदि स्थितः ॥
शब्दातीतं परं ब्रह्म त्वमेव परमार्थवित् ।
कथयानन्दनिःष्यन्दसान्द्रमानसनिश्चयात् ॥

ईश्वर उवाच ।

कथयामि वरारोहे यन्मया जप्यते सदा ।
ककारादि-क्षकारान्ता मातृकावर्णरूपिणी ॥
चतुर्दशस्वरोपेता बिन्दुत्रयविभूषिता ।
अनुस्वारेण देवेशि बिन्दुनैकेन मण्डिता ॥
विसर्गेण च बिन्दुभ्यां संलग्नाभ्यां विराजिता ।
कलामण्डलमाख्यातं शक्तिरूपं महेश्वरि ॥
ककारादि-क्षकारान्ता वर्णास्तु शिवरूपिणः ।
व्यञ्जनत्वात् सदानन्दे नोच्चारसहिता यतः ॥

उच्चरेत् स्वरसंभिन्नांस्तदा देवि न संशयः ।
पञ्चाशद्वर्णरूपेण शब्दाख्यं ब्रह्म उच्यते ॥
अकारः प्रथमो देवि चकारोऽन्तिम उच्यते ।
अक्षमालेति विख्याता मातृकावर्णरूपिणी ॥
शब्दब्रह्मस्वरूपेयं शब्दातीतन्तु जप्यते ।
शब्दातीतं परं धाम गणनारहितं सदा ।
आत्मस्वरूपं जानीहि हंसस्तु परमेश्वरः ॥ इत्यादि ।

End. नवचक्रे स्थिता या च चक्रेशी नवकाय च ।
रश्मिवृन्दाय देवेशि प्रत्येकं तारपूर्व्वकम् ॥
पवित्रकं समभ्यर्च्य गुरुं सन्तोषयेत् प्रिये ।
स्वर्णालङ्कारवस्त्रैश्च नानाधनसमुच्चयैः ।
तत्प्रसादपवित्रञ्च धारयेत् तदनन्तरम् ॥
तदङ्गहोमं निर्व्वर्त्य पवित्रेण समर्चयेत् ।
कुमारीपूजनं कुर्य्यात् ततः सुवासिनीगणम् ॥
योगिन्यो योगिनश्चैव ब्राह्मणा विविधा गणाः ।
पूज्या हि परमेशानि यदीच्छेत् सिद्धिमात्मनः ॥

Colophon. इति श्रीज्ञानार्णवे नित्यातन्त्रे पवित्रार्पणविधिर्द्वाविंशतितमः पटलः ॥
सम्पूर्णोऽयं ग्रन्थः ।

विषयः । अत्र प्रथमं अक्षमालानिर्णयः । ततः त्रिपुराया मन्त्रभेदादिकथनम् । त्रिपुराबालामन्त्रादिकथनम् । बालान्यासादिकथनम् । त्रिपुरासाधनविधिः । तत्र गायत्रीनिरूपणादिकम् । ऋष्यादिनिरूपणम् । अन्तर्यागविधिः । चक्रोद्धारविधिः । तद्ध्यानकथनम् । मण्डलपूजादिनिरूपणम् । मुद्रालक्षणादिकथनम् । त्रिपुरेश्वरीक्रमविधिः । कुमारीक्रमविधिः । यजनबलिदानादिविधिः । पञ्चसिंहासनविधिः । तत्र प्रथमपञ्चसिंहासनविधिः । द्वितीयपञ्चसिंहासनविधिः । महात्रिपुरसुन्दरीद्वादशविवरणम् । षोडशाक्षरीश्रीविद्याविधिः । तन्न्यासपूजाविधिः । तदन्तर्यजनविधिः । श्रीचक्रादिप्रयोगकथनम् ।पञ्चाशत्-पीठकथनम् । षोढान्यासादिविधिः । अन्तर्यागबहिर्यागविधिः । तत्र समाधिनिरूपणम् । रुद्राक्षमालादिविधिः । तत्र तत्र प्रत्येकं फलश्रुतिकीर्त्तनञ्च । रत्नपूजाविधानम् । त्रिपुराबीजसाधनविधिः । त्रिपुराजपहोमविधानम् । तत्र कुण्डविधिः । ज्ञानहोमविधिः । कुमारीपूजाविधिः । दूतीयजनविधिः । तत्र स्त्रीणां जातिभेदादिकथनम् । दीक्षाविधिः । पवित्रार्पणविधिश्च ।

No. 130. **ज्ञापकावली**, By **हरगोविन्दः**. Substance, country-made paper, $14 \times 2\frac{1}{2}$ inches. Folia, 21. Lines, 8 on a page. Extent, 829 çlokas. Character, Bengali. Date, Sk. 1763. Place of deposit, Telivini *viâ* Gadvetā, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, new. Prose. Generally correct.

Beginning. श्रीरामः ।

श्रीशपादाब्जमाध्वीकं भवासाध्यविभेषजम् ।
अन्विच्छ पातुं मे स्वान्त त्यक्त्वान्यत् पेयमुत्तमम् ॥
नत्वा श्रीगुरुचरणं शरणीकृतहरगोविन्दचरणः ।
ज्ञापकवृन्दं तनुते सुबन्तपादे यथाधिषणम् ॥
लुक् ॥ लुगिति अव्युत्पन्नं कान्तं नाम एतच्च लुकि स्त्रीविहितस्य चेति निर्देशेन बोधितं अन्यथा लुग्ववेः क्विबन्तस्य रूपत्वे लुचीति स्यात् । चिह्नार्थस्येति चिह्नं चिह्नं ज्ञानं तदेवार्थः प्रयोजनं कार्य्यं यस्य स चिह्नार्थः तस्य ज्ञानकारणस्य इत्यर्थः एतेन जसादिप्रत्ययादीनां जकारादे- र्जसादिज्ञानं प्रति कारणत्वात् लुग्विधीयते ॥ इत्यादि ।

End. अनादिष्टस्यैव स्वादेर्ग्रहणं तेनादेशेऽपृत इत्यत्र न स्यात् एवं द्वेरिददित्यत्र सुपोऽनुवृत्तिर्ज्ञापकत्वेन बोध्या ।
गुरूपदिष्टज्ञानाध्वा × × × × ।
उत्तीर्णो हरगोविन्दो निर्म्माय ज्ञापकावलीम् ॥

Colophon. इति सुबन्तज्ञापकावली समाप्ता ॥ शकाब्दाः १७६३ ॥

विषयः । सुबन्तपादस्य संक्षेपेण व्याख्यानम् ॥

No. 131. **ज्ञेयार्थसारः**, By **कृष्णः**. Substance, country-made paper, 19×3 inches. Folia, 159. Lines, 5 on a page. Extent, 5,257 çlokas. Character, Bengali. Date, Sk. 1666. Place of deposit, Pañcasāra, District Dhākā, Paṇḍita Mahendracandra Kāvyatīrtha. Appearance, old. Prose and verse. Generally correct.

Beginning. रामः शरणम् ।

यं मत्वा गिरिशेन्द्रदेवऋषयो वेदोपवेदादिभि
र्मुख्यैर्दिव्यपदैः स्तुवन्ति सभयं मायाखगौनर्त्तकम् ।

विद्याद्याखिलशक्तयोऽष्टविभवा स्तत्यन्त्यखण्डाश्रिता
स्तं कृष्णो विचिनोति तारकमहो ज्ञेयार्थसारं नमन् ॥
यस्याग्रे लज्जमाना निवसति सगुणा स्वेच्छयाऽज्ञा गृहीता
सोऽप्यात्मा यत्र विश्वं समुदयविलयं याति येनानुचिन्तम् ।
यद्ध्यानानन्दभूतिर्गमयति लघुतां ब्रह्मलोकाधिपत्यं
तादृग् दुःखोर्मिमालाकुलभवजलधेस्तारकं यस्य नाम ॥
स्वामिना लिखितं यद्‌यन्नानास्थानेषु निश्चितम् ।
तदेवैकत्र संगृह्य ज्ञेयसारो निरूप्यते ॥
येषां स्त्रीयदृशादृष्टौ नास्त्येव परिवेदना ।
तेषां नातिप्रियो ह्येष निद्रितस्येव मन्त्रवाक् ॥
भयापमानेषु वियोगरोगाद्यनन्तदुःखां विदुषो दशां स्वाम् ।
यस्तस्य नूनं भवितैष मोदश्चन्निदाघतप्तस्य यथा हिमाम्भः ॥
येन क्रमेण यद्वाच्यं तन्निर्घण्टनमुच्यते ।
प्रथमं शास्त्रसाङ्गत्यं ततो दुःखपरम्परा ॥
तद्धानौ सुखलाभे च उपायानां प्रदर्शनम् ।
आश्रमाणां लक्षणानि प्रकाराचारनिर्णयः ॥
तद्ग्रहे भ्रष्टतायां तद्धर्मातिक्रमे तथा ।
प्रायश्चित्तप्रमाणानि सन्न्यासेऽप्यधिकारिता ॥
भक्तिज्ञानापरीपाके भ्रष्टत्वे मरणेऽपि वा ।
दशजन्मोत्तरं सिद्धिः प्रायश्चित्तस्य × × × ॥
अतिक्रमेऽथ पातित्यं तीर्थादिषु फलाफलं ।
तत्र देशादिशुद्धिस्याश्रद्धा नास्तिकता स्मृते ॥
तथा हरिपराङ्मुख्यं फलं × × × केनचित् ।
सर्व्वाङ्गविकलस्यापि फलं पातित्यखण्डनम् ।
भगवद्भक्तिमाहात्म्यात् तच्छास्त्रेणार्थवादता ॥ इत्यादि ।

End. आकाङ्क्षायां स्थितायामेकत्र निर्णीतः शास्त्रार्थो बाधकमन्तरेणान्यत्रापि कल्प्यत इति न्यायाद्व्यवस्था । भक्तानान्तु भान्तः सातत्ये औत्कट्ये वा तद्देहान्ते तत्क्षणे वा कायव्यूहेन वा सुखदुःखौत्कट्येन प्रारब्धाप्रारब्धभोगोत्तरं तदभावे ब्रह्मपुराणोक्तरीत्या मोक्ष इति । अन्यदेवोपासकानामप्येवम् ।

Colophon. श्रीरामः । शकाब्दाः १६६३ ॥

विषय: । अत्र प्रथमं शास्त्राणां सङ्गतिकथनम् । तेषां प्रामाण्यादिकथनम् । अदृष्टार्थ-दृष्टार्थभेदात् तेषां द्वैविध्यादिनिरूपणम् । वेदान्तसांख्यवैशेषिकादिशास्त्राणां समन्वयादि-कथनम् । अथ जीवस्वरूपादिनिरूपणम् । जीवन्मुक्तिविवेचनम् । सर्व्वेषां शास्त्राणां वास्तवैक-मतत्वनिरूपणम् । आस्तिक्यादिस्वरूपकथनम् । श्रद्धादिलक्षणकथनम् । कार्य्यकारणयोः स्वरूपादिकथनम् । वैधहिंसाविवेचनम् । वर्णाश्रमधर्म्मनिरूपणम् । अथ प्रवृत्तिमार्गस्य दुःख-जनकत्वकथनम् । अथ दुःखत्वानिसुखावाप्त्युपायकथनम् । तत्र निवृत्तिमार्गप्रशंसादिकथनम् । आश्रमलक्षणादिकथनम् । आश्रमाणामावश्यकत्वकथनम् । अनाश्रमताजनितपापप्रायश्चित्तकथनम् । सन्न्यासग्रहणान्मुक्तिरिति निरूपणम् । कलौ दीर्घकालं ब्रह्मचर्य्यवानप्रस्थाश्रमयोः प्रतिषेध-कथनम् । सन्न्यासाधिकारितादिकथनम् । भक्तिज्ञानयोर्माहात्म्यादिकथनम् । नित्यकर्म्मा-करणादौ प्रायश्चित्तकथनम् । तदतिक्रमे पातित्यादिनिरूपणम् । तीर्थविधि-तत्तत्फलाफल-कथनम् । भगवद्भक्तिमाहात्म्यादिकथनम् । भागवतधर्म्मप्रतिपादकश्रुत्यादिशास्त्राणां नार्थ-वादत्वशङ्केति निरूपणम् । अपराधक्षालनोपायकथनम् । भक्तस्य दशजन्मोत्तरं कृतार्थता-कथनम् । शैवादीनामपि वैष्णवत्वस्थापनम् । अथ उपास्यदेवतानिरूपणम् । सर्व्वेषां देवानां भगवदंशतादिकथनम् । भगवद्भक्तिस्वरूपादिकथनम् । विस्तरतो भक्तियोगनिरूपणम् । सत्त्वादिगुणधर्म्मकथनम् । प्राकृतिकसृष्ट्यादिनिरूपणम् । सगुणनिर्गुणब्रह्मनिरूपणम् । सत्यादि-लक्षणकथनम् । अणिमादिलक्षणकथनम् । योगसिद्धिलक्षणादिकथनम् । एकानेकजीव-वादकथनादिकम् । लिङ्गदेहादिनिरूपणम् । तीर्थादिमृत्युफलकथनम् । मरणोत्तरगतिनिरू-पणञ्च ॥ इति शम् ।

सत्यमेव जयते

No. 132. **ज्योतिःसागरसारः**, By **विद्यानिधिः**. Substance, country-made paper, 16×2½ inches. Folia, 26. Lines, 8 on a page. Extent, 764 çlokas. Character, Bengali. Date, Sk. 1670. Place of deposit, Bharākor, District Dhākā, Bābu Dvārikānātha Dāsa. (Vaidya.) Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

जगदीशं रविं नत्वा लोकानुग्रहकारकम् ।

ज्योतिःसागरसारोऽयं श्रीविद्यानिधिनोच्यते ॥

रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः ।

एतेषां नामतो वाराः सप्तैते कथिताः क्रमात् ॥

शुक्रेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥
नृपाभिषेको नृपतिप्रयाणं
नृपस्य कार्य्यं नृपदर्शनञ्च ।
यच्चाग्निकार्य्यं भुवि किञ्चिदुक्तं
सर्व्वं + मादित्यदिने प्रशस्तम् ॥
भेदादिघातं नगरे पुरे वा
सेनापतिञ्च + तथैव राज्ञाम् ।
व्यायामशास्त्रं व्यसनानि चौर्य्यं
कुर्य्याद्दिने भूमिसुतस्य सर्व्वम् ॥ इति वाराः । इत्यादि ।

End. राज्याग्निर्जन्मभे शौर्य्यं सुखं दक्षे जयो गणे ।
नेत्रे भूतिः श्रियो हस्ते पादे पीड़ां विनिर्द्दिशेत् ॥

Colophon. इति ज्योतिःसागरसारोऽभूत् समाप्तः ॥
प्रणम्य गौर्य्याश्चरणारविन्दं गुरून् गणेशं जनकञ्च देवान् ।
खसप्तषट्चन्द्रगते शकाब्दे लिलेख पुस्तीं स्वकमध्ययनार्थम् ॥ (?)

विषयः । शुभकर्म्मसु वारनिरूपणम् । वारवेलादिनिरूपणम् । कालवेलानिरूपणम् । अमृतयोगादिनिरूपणम् । पापयोगरिष्टादिनिरूपणम् । नक्षत्रतदधिपादिनिरूपणम् । उत्पातादियोगनिरूपणम् । यमघण्टादियोगकथनम् । राशिनक्षत्रयोगविभागकथनम् । लग्नादिनिरूपणम् । चन्द्रशुद्धिताराशुद्धादिकथनम् । उद्वाहादिसंस्कारेषु रव्यादिशुद्धिकथनम् । पक्षमानादिकर्म्मविवेकः । विवाहयोग्यमासतिथिनक्षत्रादिनिरूपणम् । नववध्वागमनविधिः । द्विरागमनविधिः । प्रथमरजोदर्शने शुभाशुभनिरूपणम् । उपगमनविधिः । जातकनिरूपणम् । नामकरणान्नप्राशनचूड़ोपनयनादिकालनिरूपणम् । अनध्यायकालनिरूपणम् । विद्यारम्भकालनिरूपणम् । नववस्त्रपरिधानकालनिरूपणम् । नवशस्यादिभोगकालकथनम् । आरोग्यस्नानविधिः । नौकागठनादिकालनिरूपणम् । वीजवपनादिकालकथनम् । धान्यच्छेदनकालकथनम् । अम्बुवाचीकालनिरूपणम् । गृहनिर्म्माणयोग्यभूमिनिरूपणम् । गृहस्थाननिरूपणम् । गृहारम्भतत्प्रवेशादिकालकथनम् । नागशयनसमयनिरूपणम् । यात्राकालकथनम् । अयनचक्रादिनिरूपणञ्च । इति शम् ।

No. 133. ज्योतिःसारः, By राघवेन्द्रशर्म्मा. Substance, country-made paper, 17×1 inches. Folia, 44. Lines, 3 on a page. Extent, 783 çlokas. Character, Bengali. Date, ? Place of deposit, Phursāil, District Dhākā, Paṇḍita Jagaccandra Sārbbabhauma. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमः सवित्रे ।
नत्वाश्वनाथमज्ञानायाज्ञानतमोपहम् ।
तन्यते राघवेन्द्रेण ज्योतिःसारो बुधप्रियः ॥
सितेन्दुबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥
रवेर्वर्ज्यं चतुःपञ्च सोमे सप्तद्वयं तथा ।
कुजे षष्ठं द्वयं चैव बुधे पञ्चतृतीयकम् ॥
गुरौ सप्ताष्टकञ्चैव चित्वारि च भार्गवे ।
शनावाद्यञ्च षष्ठञ्च शेषञ्च परिवर्ज्जयेत् ॥ इत्यादि ।

End. शतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत् ।
अन्त्यचयोगसंप्राप्ते विघ्नस्तस्य पदे पदे ॥
अत्र सौरारयोर्दिने सुक्ता देयाश्चे तु काञ्चनमिति प्रत्येकदोषशान्तिदर्शनात् शतान्तकुजयोरित्यत्रापि वाक्यद्वयं प्रतीयते ॥

Colophon. इति राघवेन्द्रशर्म्मकृतो ज्योतिःसारः समाप्तः ॥

विषयः । वारवेलादिनिरूपणम् । कालवेलानिरूपणम् । नन्दादिनिरूपणम् । मासदग्धादिनिरूपणम् । दिनदग्धादिनिरूपणम् । रिष्टादिनिरूपणम् । नक्षत्रराश्यादिकथनम् । कर्म्मविशेषे विहिताविहितनक्षत्रादिनिरूपणम् । करकचादियोगकथनम् । चूडाविवाहयात्रादिदिननिरूपणम् । अष्टवर्गादिनिरूपणम् । जातकनिरूपणम् । अथ चौरकर्म्मदिनकथनम् । विद्यारम्भादिदिनकथनम् । गृहारम्भादिदिनकथनम् । देवतागठनादिदिनकथनम् । पुष्करिण्याद्यारम्भदिनकथनम् । अथ नक्षत्रादिभेदेषु ज्वरादिभोगकालकथनम् । राजदर्शनादिदिनकथनम् । योगिन्युदयादिविवेचनम् । यात्रायां शुभाशुभदर्शनफलकथनम् । दिनचर्य्यादिकथनम् । दर्पणदर्शनादिविधिश्च ॥

No 134. **ज्योतिःसारसंग्रहः,** By **हृदयानन्दविद्यालङ्कारः.** Substance, country-made paper, $14\frac{1}{2} \times 3$ inches. Folia, 40 (without 14–20). Lines, 3 on a page. Extent, 323 çlokas. Character, Bengali. Date, ? Place of deposit, Sāṃsiddhi, *viâ* Çrinagar, District Dhākā, Paṇḍita Kṛṣṇakiçora Nyāyavāgīça. Appearance, tolerable. Verse. Generally Correct.

Beginning. ॐ नमः श्रीसूर्य्याय ।

वन्देऽहं परमानन्दमज्ञानतिमिरापहम् ।
भवसागरपाराय गीतं वेदान्तगैर्गुरुः ॥
विद्यालङ्कारविख्यातहृदयानन्दशर्म्मणा ।
ज्योतिःशास्त्रं समालोक्य क्रियते सारसंग्रहः ॥
पण्डितैर्ज्ञायते सर्व्वं तदर्थं न परिश्रमः ।
संक्षिप्तविषदग्रन्थो बालकै र्दृश्यतां मुदा ॥
अत्र वाच्या विवाहस्तु निषेकनामनी तथा ।
अन्नप्राशनचूड़े च कर्णवेधोपवीतके ॥
गृहस्थानगृहारम्भौ गृहसञ्चार एव च ।
हलयोजनवद्बीजवपनं धान्यकर्त्तनम् ॥
नवान्नं जातको यात्रा विद्यारम्भौ ... ... ।
... ... एता गौरवान्तरे मताः ॥

अथ विवाहः ।

बुधेन्दुशुक्रजीवानां दिनैरेतैर्विवाहिता ।
कन्या सुखमवाप्नोति पुत्रभाग्यधनान्विता ॥ इत्यादि ॥

End. नौकाचालना ।

अश्विसुधानिधि-पूर्व्वमित्रधनाच्युतभेषु लग्ने ।
तारकयोगतिथीन्दुविशुद्धौ नौगमनं शुभदं शुभवारे ॥
इति नौकागमनम् ॥ इति ॥
(परिसमाप्तिसूचकं वाक्यं नास्ति ॥)

विषयः । विवाह-गर्भाधान-नामकरणान्नप्राशन-चूड़ा-कर्णवेधोपवीत-गृहस्थाननिर्णय-गृहारम्भ-गृहसञ्चार-हलयोजना-बीजवपन-धान्यकर्त्तन-नवान्न-जातकविवेक-यात्राविवेक-विद्यारम्भ-नौकागठनचालनादिषु कालादिनिर्णयकथनम् । तत्र प्रथमं विवाहप्रकरणम् । तत्र तिथि-

नक्षत्रवारभेदे विवाहस्य शुभाशुभलक्षणकथनम्। तत्र प्रथमं वारनिर्णयकथनं, । चन्द्रशुद्धिकथनं। रविशुद्धिकथनं। गोचरशुद्धिकथनम्। गोधूलिविवरणदिवाविवाहनिषेध-नाडीनक्षत्रविवरणकथनम्। ततो गर्भाधानप्रकरणम्। तत्र प्रथमं प्रथमतो मासवारभेदे शुभाशुभलक्षणकथनम्। ऋतोश्चतुर्थादिषोडशान्तदिवसानां मध्ये गर्भोत्पन्नस्य जातकस्य शुभाशुभलक्षणनिर्णयविवरणम्। गर्भधारणे तिथिनक्षत्रादीनां भेदेन फलभेदकथनम्। नक्षत्राणां मृदुक्षिप्रध्रुवेति त्रिविधगणभेदे नामकरणस्य फलाफलकथनम्। अथ अन्नप्राशनं। तस्य च षष्ठाष्टमादिमासभेदे फलभेदकथनम्। चूडाकरणस्य शुभवारादिकथनम्। जन्ममासे जन्मनक्षत्रे जन्मदिवसेऽपि चूडाकरणस्यापरिहार्य्यत्वकथनम्। कर्णवेधोपनयन-गृहप्रवेश-हलचालन-बीजवपनानां वारमासतिथिभेदकथनम्। जातकस्य लग्ननिर्णयनं। लग्नस्वराशीनां शुभाशुभनिर्णयकथनञ्च। यात्रायां दिग्भेदे तिथिनिर्णयकथनम्। विद्यारम्भस्य वारतिथिनक्षत्रनिर्णयकथनम्। देवताप्रतिमागठनस्य कालनिर्णयकथनम्। कालशुद्धिकथनम्। मासदग्धानिरूपनम्। नववध्वानयनस्य कालनिर्णयकथनम्। नौकाचालनस्य वारतिथिनक्षत्रादिकथनम्। कालरात्रिकथनञ्च ॥

ग्रन्थकारेणात्र नर्वाशवचन-रत्नमाला-यामित्रवेध-खर्ज्जूरवेध-खना-वराहमुनि-चिन्तामणि-भीमपराक्रम-याज्ञवल्क्य-प्रभृतीनामुद्धृतानि वचनानि ॥

No. 135. शब्दारम्भेदः, By पुरुषोत्तमदेवः. Substance, country-made paper, 14 × 2½ inches. Folia, 10. Lines, 5 on a page. Extent, 150 çlokas. Character, Bengali. Date, 1663. Place of deposit, Serpur, Mayamansimha, Paṇḍita Durgāsundar Kṛtiratna. Appearance, old. Verse. Incorrect.

Beginning. ॐ नमो गणेशाय।

शब्दाम्भोधेर्यतो + + यतो व्याख्या प्रवर्त्तते।
गुरवे शम्भवे तस्मै नित्यं वागात्मने नमः॥
सरस्वत्याः प्रसादेन कविर्बध्नाति यत्पदम्।
प्रसिद्धमप्रसिद्धं वा तत् प्रमाणमिहोच्यते॥
शिवं भद्रं शिवः शम्भुः शिवा गौरी शिवाभया।
शिवः कीरः शिवा क्रोष्टी भवेदामलकी शिवा॥

End. खण्डितत्वात् समाप्तिसूचकं वाक्यं नास्ति।

Colophon. इति पुरुषोत्तमदेवविरचितो णकारभेदः समाप्तः। शकाब्दाः १६६३

विषयः । शिवगौर्य्यादिशब्दस्य नानार्थकथनमुखेन धकारान्तशब्दानां नानार्थनिरूपणम् ।

No. 136. तत्वचिन्तामणिः, By पूर्णानन्दः. Substance, country-made paper, $20 \times 4\frac{1}{2}$ inches. Folia, 115. Lines, 6 on a page. Extent, 3,450 çlokas. Character, Bengali. Date, (?). Place of deposit, Kānṭhāl-pārā, *viâ* Naihāṭī, Bābu Hemacandra Bandyopādhyāya. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. अत्र प्रथमपत्रं नास्ति तेन द्वितीयपत्रस्य प्रारम्भवाक्यं लिखितम् । तमात्मानं वन्दे परमसुखसन्तानमिलयम् ॥
अथ खलु दुरन्तदुःसन्तारघोरतरसंसारसागरान्तर्द्दामशोकसन्तानप्रबलबाड़-वानलज्वालाजालकवलनविकलसकलजनप्राणमन्याहृतार्थं विज्ञानदत्तमनाः परमकारुणिको भगवान् शिवः परदेवताराधनरहस्यप्रतिपादनपरानेकशत कोटिविस्तारतन्त्रसारसुपन्यस्तवान् । तत्र च .... श्रीमत्परिव्राजक-परमहंसश्रीगुरुश्रीब्रह्मानन्दमुखारविन्दनिःस्यन्दमानपरमरहस्यातिरहस्यनिगम-कन्दसन्दोहहेतु-नित्यानन्दश्रीपूर्णानन्दपरमहंसः श्रीतत्वचिन्तामणिं चतुर्द्दश-शताधिकनवनवतिशकाब्दे वितनोति ॥ ननु किं तावत् आत्मवस्तु परं ब्रह्म विश्वायतनमूलाधारचित-नित्यशुद्ध-बुद्धमुक्तस्वरूप-जाग्रत्स्वप्नसुषु-प्त्यादिप्रपञ्चप्रकाशक-गुणत्रयातीत-निराकाराराधितादिमध्यान्तरहितमेव-मात्मवस्तु तदंशा जीवसंज्ञकास्ते अनाद्यविद्योपहताः शरीरमाश्रित्य नाना-विधसुखदुःखभोगं कुर्व्वन्तीति । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति तेन पञ्चदशाधिकशततपत्रस्य समाप्तिवाक्यं लिखितं यथा,—
यासां प्रसादलाभेन कामरूपी भवेन्नरः ।
याभिर्विश्वजयी विश्वधारी विश्वविनोदवान् ॥
षड़ाधारमध्ये तु चक्रं संचिन्त्य पूजयेत् ।
चन्द्रचन्दनकस्तूरीकुङ्कुमाभिमदोद्भवैः ॥
चिन्ताशक्ती भवेद्देवी तेषु सम्यक् विचिन्तयेत् ।
पूर्णोद्याने यजेद्देवी विदग्धैर्दिवानिशम् ।
शिवसंज्ञश्च तत्पुत्त्रो जायते मन्मथोपमः ॥ अतःपरं खण्डितम् ।

विषयः । तत्त्वज्ञाननिरूपणम् । दीक्षा-दीक्षास्थान-दीक्षाङ्गादिनिरूपणम् । मण्डपकरण-नियमनिरूपणम् । दीक्षादिनपूर्व्वकृत्यादिनिरूपणम् । षट्चक्रक्रमनिरूपणम् । कुण्डलक्षणनिरूपणम् । होमविधिनिरूपणम् । त्रिपुरासुन्दरीमन्त्र-पञ्चमीविद्या-कौलिताविद्यादिनिरूपणम् । शुद्धाशुद्धफलमन्त्रादिनिरूपणम् । त्रिपुरार्चनादिनिरूपणम् । द्विविधस्नानप्रकारनिरूपणम् । योनिपीठ-मनःपीठ-यन्त्रपीठ-पाद्यादिषु पूजननियमनिरूपणम् । यन्त्रोद्धारनिरूपणम् । स्तव-कवचादिनिरूपणम् । पुरश्चरणोपायनिरूपणम् । ब्रह्महत्यादिदोषप्रायश्चित्तनिरूपणम् ।

No. 137. तत्त्वप्रकाशः, (प्रथमकल्पपर्य्यन्तः) By ज्ञानानन्दब्रह्मचारी. Substance, country-made paper, 12×6 inches. Folia, 47. Lines, 6 on a page. Extent, 881 çlokas. Character, Bengali. Date, Sk. 1730. Place of deposit, Kṛṣṇapurā, Post Vaidyerväzär, District Dhākā, Çrī Madanamohana Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning. ॐ गुरवे नमः ।

नत्वा तत् कुलनाथमर्द्दकमलं नित्यालये चिन्मये
यद् गत्वा कुलकुण्डलीकुलपथं भित्वा सदा क्रीड़ति ।
ज्ञानानन्दधरामरेण बहुलस्त्वालोक्य तन्त्राणि वै
शाक्तानां हितकाम्यया विरचितस्तत्त्वप्रकाशो मुदा ॥
गुरूणाञ्च कृपां लब्ध्वा साधकः शक्तिसाधनात् ।
शिवत्वं येन मार्गेण लभ्यते स प्रकाशितः ॥
आत्मतत्त्वप्रबोधाय भ्रमनाशाय वै तदा ।
वक्ष्यामि कुलसंगीतां ग्रन्थे प्रथमकल्पके ॥
... ...
... ...
आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः ।
न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥
संप्राप्ते षोड़शे वर्षे दीक्षां कुर्य्यात् प्रयत्नतः ।
रसैर्मन्त्रैर्यथा सिद्धमयः सौवर्णतां व्रजेत् ।
दीक्षाविद्धस्तथा ह्यात्मा शिवत्वं लभते ध्रुवम् ॥
सुन्दरीरत्नावल्याम् । शङ्कराचार्य्यं प्रति देवीवाक्यम् ।

यथा वा गुरुकारुण्याल्लभते बीजमव्ययम् ।
...... दृष्टे समुद्भूते फलभाग् जायते नरः ॥ इत्यादि ॥

End. साम्य इति सम्यक् तत्तत्देवत्वप्राप्तिः साम्यमुक्तिः । तस्मात् क्वचित् षड्विधा मुक्तिश्च कथ्यते । तन्त्रान्तरे । ...... सालोक्यसारूप्यसायुज्य... ...
यदुक्तं कुलतन्त्रेण महादेवेन पार्व्वति ।
आत्मतत्त्वप्रबोधाय तन्मया परिभाषितम् ॥
.... विदुषां बोद्धव्यः ।
भ्रमात्मकानां भ्रमनाशहेतुर्मयोदित + कुलसंगीतायाम् ॥
सिद्धलिङ्गैर्विनान्येषां बोद्धव्यो विदुषां क्वचित् ।
ज्ञानलब्धुमिव ग्रन्थो ज्ञानिनां कुलयोगिनाम् ॥
ज्ञानेन लभते मोक्षं ज्ञानेन कुलसाधनम् ।
नित्यानन्दमयं ज्ञानं ज्ञानानन्दमयो गुरुः ॥
ज्ञानानन्दमयं ब्रह्म ज्ञानानन्दमयं जगत् ।
ज्ञानानन्दमयो ग्रन्थो ज्ञानानन्देन भाषितः ॥
इति श्रीज्ञानानन्दब्रह्मचारिणा विरचिते तत्त्वप्रकाशे कुलसंगीतायां पञ्चमो विरामः । सम्पूर्णः प्रथमः कल्पः ॥

Colophon. यद्वाणी यमुनादिजाह्नवीयुतं तीर्थं त्रिशत्यात्मकं
लौहित्यं खलु तस्य पश्चिमतटे ग्रामे जिनार्द्राख्यके ।
कालीमन्दिरसन्निधौ निजपुरे वङ्गे कुजे वासरे
त्रिंशत्सप्तविधौ शके कृत इह ग्रन्थो रवौ कर्कटे ॥

विषयः । विरचित एव तत्रभवता ज्ञानानन्दब्रह्मचारिणा द्वादशकल्पात्मकस्तत्त्वप्रकाशस्तत्रास्मिंस्तु प्रथमकल्पभागात्मके सन्ति पञ्च विरामास्तत्र प्रथमविरामे शिवत्वप्राप्तिबोधकलक्षणनिरूपणम् । द्वितीये बीजमन्थनपूर्व्वकं सृष्टेरुत्पत्तिकारणनिरूपणम् । शरीरं संमन्थ्य आत्मब्रह्मनिरूपणञ्च । तृतीये आत्मनिरूपणम् । प्रकृतिनिरूपणम् । साकारकल्पनानिरूपणम् । महाविद्यादिशक्तिनिरूपणम् । कुण्डलीमन्थननिरूपणम् । मातृकाबन्धननिरूपणम् । षट्चक्रलक्षणनिरूपणञ्च । चतुर्थे क्षुद्रब्रह्माण्डयोगेन बृहद्ब्रह्माण्डमन्थननिरूपणम् । पञ्चमे अन्तर्यागविधिनिरूपणम् ।

No. 138. **तन्त्रदीपिका,** By **गोपालन्यायपञ्चाननः.** Substance, country-made paper, 18 × 6 inches. Folia, 420. Lines, 12 on a page. Extent, 19,530 çlokas. Character, Bengali. Date, ? Place of deposit, Dhākā, Vikrampur, Mājpārā, Bābu Rāsvihāri Rāya. Appearance, tolerable. Prose and verse. Incorrect.

Beginning. नित्यां प्रणम्य चिद्रूपां नित्यानन्दञ्च निर्गुणम् ।
अखण्डं परमानन्दं गुरुब्रह्ममयं तथा ॥
विलोक्यागमशास्त्राणि विविधान् सङ्ग्रहानपि ।
श्रुतिस्मृत्यविरोधानि ज्ञानस्य कारणानि च ॥
आगमवागीशपौत्रेण हरिनाथस्य सूनुना ॥
श्रीगोपालेन विप्रेन कृतेयं तन्त्रदीपिका ॥
दीक्षादिलक्षणञ्चैव मन्त्रयन्त्रादिनिर्णयम् ।
तन्त्रेऽस्मिन् संप्रवक्ष्यामि विदुषां प्रीतिहेतवे ॥
अथ का दीक्षा । यतो दिव्यप्रबोधोदय-दुरितक्षयौ च स्यातां सा । तथा
सारदातिलके ।
दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्षयम् ।
तस्माद्दीक्षेति सा प्रोक्ता देशिकैस्तन्त्रवेदिभिः ॥
इति सम्प्रदायविदः । तन्न ब्रह्मविज्ञान + + महातीर्थावगाहनादि-
ष्वतिप्रसक्तेः । बहुषद्गुरुपदेशगम्यादृष्टजनिका तान्त्रिकी क्रिया दीक्षे-
त्याहुः तदपि न पुरश्चरणादावतिप्रसङ्गात् । उच्यते । वैधमन्त्रग्रहणं
दीक्षा । वैधत्वञ्च तन्त्रविबोधितत्वम् । तथा सारावली दीक्षाशेखर-दीक्षा-
दर्शेषु तन्त्रान्तरवचनम् ।
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ।
तस्मात् सर्व्वप्रयत्नेन सदा कुर्य्याच्च तान्त्रिकात् ॥ इत्यादि ।

End. कुलार्णवे ।
नोदेति नास्तमायाति न वृद्धिं याति लक्षणम् ।
स्वयं विभक्त्यात्य + + + भासते साधनं विना ॥
यथा ध्यानस्य सामर्थ्यात् कीटोऽपि भ्रमरायते ।
तथा समाधिसामर्थ्याद् ब्रह्मभूतो भवेन्नरः ॥
गौतमीये ।

आत्मनो मरणं नास्ति न वा तस्य च जीवनमित्यादि ।
अविश्वासो न कर्त्तव्यो यथाशास्त्रं समीरितम् ।
विधेयस्तस्य मर्म्मज्ञैर्धीरा बद्धोऽयमञ्जलिः ॥

Colophon. इत्यागमवागीशभट्टाचार्य्यपौत्र-हरिनाथभट्टाचार्य्यात्मज-श्रीगोपालपञ्चानन-विरचिता तन्त्रदीपिका समाप्ता ।

विषय: । अथ दीक्षाशब्दार्थविवेचनम् । सर्व्वेषु आश्रमेषु दीक्षाया आवश्यकत्वकथनम् । गुरुपदार्थनिरूपणमुखेन गुरुलक्षणादिकथनम् । दोषयुक्तगुरुमन्त्रयोस्तु त्याज्यताकथनम् । शिष्य लक्षणकथनम् । निषिद्धशिष्यलक्षणकथनम् । महाविद्याकथनम् । पित्रादिभ्यो मन्त्रग्रहणनिषेध-कथनम् । निर्बीजमन्त्रलक्षणादिकथनम् । स्वप्नलब्धमन्त्रे विशेषत्वकथनम् । नक्षत्रचक्रादिविवे-चनम् । वैरिमन्त्रत्यागप्रकारकथनम् । नक्षत्रचक्रकथनम् । राशिकथनम् । अकथहचक्रकथनम् । भौतिकचक्रकथनम् । वर्गचक्रकथनम् । ऋणिधनिचक्रकथनम् । सर्पचक्रकथनम् । अथ दीक्षा-कालनियमादिकथनम् । कालदोषप्रतिप्रसवकथनम् । उपदेशविधिकथनम् । शूद्रादौ प्रण-वादिनिषेधकथनम् । दक्षिणानियमादिकथनम् । पञ्चायतनीदीक्षाविधिकथनम् । प्रसङ्गात् त्रिविधस्वच्छ्रपक्रमकथनम् । नित्यपूजाविधिकथनम् । प्रातःकृत्यविधिकथनम् । अथ सांख्यस्तव-कथनम् । सन्ध्याविधिकथनम् । संक्षेपतः सन्ध्याविधिकथनम् । स्नानविधिकथनम् । गायत्री-कथनम् । यागमण्डपविधिकथनम् । पञ्चशुद्धिविधिकथनम् । सामान्यार्घ्यविधिकथनम् । श्रीविद्या-द्वारपालादिपूजाविधिकथनम् । आसननिरूपणम् । भूतशुद्धिविधिकथनम् । मातृकान्यास-विधिकथनम् । प्राणायामविधिकथनम् । ऋष्यादिन्यासकथनम् । पीठन्यासविधिकथनम् । करा-ङ्गन्यासविधिकथनम् । अङ्गन्यासे अङ्गुलिनियमकथनम् । अङ्गन्यासादेरावश्यकत्वकथनम् । व्यापक न्यासकथनम् । मानसपूजाविधिकथनम् । वाह्यपूजाक्रमकथनम् । अर्घ्यस्थापनविधिकथनम् । अर्घ्यपात्रनियमकथनम् । प्रोक्षणीपात्रादिनियमकथनम् । पीठपूजाविधिकथनम् । गुरुपूजा-विधिकथनम् । तद्ध्यानादिकथनञ्च । गुरुपूजाया नित्यत्वकथनम् । श्रीविद्यायां विशेषगुरुक्रम-कथनम् । पूजाधारनियमकथनम् । शालग्रामे आवाहनविसर्ज्जननिषेधकथनम् । अनुकल्पे यन्त्रविशेषकथनम् । आवाहनादिमुद्राविधिकथनम् । प्राणप्रतिष्ठाविधिकथनम् । षोड़शोप-चारादिविधिकथनम् । पाद्यादिदानक्रमकथनम् । गन्धदानमुद्राकथनम् । विहिताविहितमुद्रा-कथनम् । दशाङ्गादिधूपकथनम् । नैवेद्यद्रव्यनियमकथनम् । नैवेद्यादिद्रव्याणां निर्म्माल्यकाल-नियमकथनम् । आवरणपूजाविधिकथनम् । नीराजनाविधिकथनम् । तर्पणविधिकथनम् नित्यपूजाङ्गवलिविधिकथनम् । नित्यपूजायां जपसंख्यानियमकथनम् । रुद्राक्षमालाविधान-कथनम् । मालासंस्कारविधिकथनम् । त्रिविधजपलक्षणादिकथनम् । नित्यहोमविधिकथनम् । अष्टाङ्गप्रणामविधिकथनम् । पञ्चाङ्गप्रणामविधिकथनम् । षड़ङ्गप्रणामविधिकथनम् । देवता-

विशेषे प्रदक्षिणादिनियमकथनम् । त्रिकोणादिनमस्कारफलकथनम् । पूजानन्तरं शङ्खपूजा-विधिकथनम् । सर्व्वदेवानां संक्षेपतः पूजाविधिकथनम् । सूतकिनां पूजानिष्पादन-विधिकथनम् । नैमित्तिकपूजाविधानकथनम् । नैमित्तिकपूजाभङ्गे प्रायश्चित्तकथनम् । परमयोगिनां मुख्यपूजाविधिकथनम् । परादिपूजासङ्केतकथनम् । परापूजालक्षणकथनम् । तत्र सन्ध्याकथनम् । तर्पणविधिकथनम् । अर्घ्यविधिकथनम् । न्यासविधिकथनम् । षडङ्गादि-विधिकथनम् । ध्यानविधिकथनम् । आन्तरपूजाविधिकथनम् । जपविधिकथनम् । होमविधि-कथनम् । कुण्डस्थाननिरूपणम् । मण्डपप्रमाणकथनम् । शङ्क्वादिप्रमाणकथनम् । पताकाविधि-कथनम् । ध्वजविधिकथनम् । तोरणविधिकथनम् । वेदिनिर्म्माणविधिकथनम् । दीक्षाद्यङ्गराग-कथनम् । बलिमण्डलविधिकथनम् । अङ्कुरार्पणविधिकथनम् । योनिकुण्डादिविधिकथनम् । काम्यहोमार्थं कुण्डविशेषकथनम् । नागशीर्षविवेचनम् । कुण्डमानाज्ञाने दोषकथनम् । शैव-कुण्डपक्षे योनिविशेषकथनम् । कुण्डसंस्कारादिहोमकथनम् । आज्यस्थालीविधिकथनम् । दीक्षाङ्गहोमविधिकथनम् । वह्नेः शोभनवर्णनियमकथनम् । स्रुक्स्रुवादिलक्षणकथनम् । कर-मालानियमकथनम् । तत्र मणिनिरूपणम् । कामनाभेदे मालाविशेषनियमकथनम् । अथ पुर-श्चरणविधिकथनम् । तत्र स्थानादिनियमकथनम् । भक्ष्याभक्ष्यनियमकथनम् । शय्यादिनियम-कथनम् । भूतलिपिविधिकथनम् । अथ ग्रहणकालीन-पुरश्चरणविधिकथनम् । मन्त्राणां दश-संस्कारविधिकथनम् । पुरश्चरणप्रयोगकथनम् । अथ कलावतीदीक्षाविधिकथनम् । तत्र नव-रत्नादिकथनम् । सर्व्वतोभद्रमण्डलविधिकथनम् । पद्माब्जमण्डलविधिकथनम् । त्रिखोट्टिनी-मुद्राविधिकथनम् । मन्त्रसङ्केतकथनम् । अथ गणेशमन्त्रकथनम् । तस्य पूजाप्रयोगकथनम् । अथ हेरम्बगणेशमन्त्रकथनम् । तत्र पूजाविधिकथनम् । अथ हरिद्रागणेशमन्त्रकथनम् । उच्छिष्टगणेशमन्त्रकथनम् । अथ सूर्य्यमन्त्रकथनम् । तत्र पूजाविधिकथनम् । अथ मार्त्तण्डमन्त्र-कथनम् । तत्र पूजाविधिकथनम् । अथ शिवमन्त्रकथनम् । तत्र पञ्चाक्षराष्टाक्षरादि-मन्त्रकथनम् । मृत्युञ्जयमन्त्रकथनम् । दक्षिणामूर्त्तिमन्त्रकथनम् । नीलकण्ठमन्त्रकथनम् । अर्द्धनारीश्वरमन्त्रकथनम् । चण्डेश्वरमन्त्रकथनम् । तुम्बुरुमन्त्रकथनम् । चण्डोग्रशूलपाणि-मन्त्रकथनम् । अथ विष्णुमन्त्रकथनम् । तस्य पूजादिविधिकथनम् । वासुदेवमन्त्र-तत्-पूजाविधिकथनम् । लक्ष्मीवासुदेवमन्त्र-तत्पूजाविधिकथनम् । दधिवामनमन्त्र-तत्पूजा-विधिकथनम् । हयग्रीवमन्त्र-तत्पूजाविधिकथनम् । नृसिंहमन्त्र-तत्पूजाविधिकथनम् । हरिहरात्मकमन्त्र-तत्पूजाविधिकथनम् । वराहमन्त्र-तत्पूजाविधिकथनम् । उक्तेषु मन्त्रेषु प्रत्येकं काम्यविधिकथनम् । अथ श्रीकृष्णमन्त्र-तत्पूजाविधिकथनम् । बालगोपालमन्त्रकथनम् । कृष्णमन्त्रविषये काम्यनैमित्तिकयोर्विधिकथनम् । वैष्णवानां द्वादशशुद्धिविवेचनम् । श्रीराम-मन्त्र-तत्पूजाविधिकथनम् । लक्ष्मणमन्त्रकथनम् । अथ दुर्गामन्त्रपूजाविधिकथनम् । महिषमर्द्दिनीमन्त्र-तत्पूजाविधिकथनम् । जयदुर्गामन्त्र-तत्पूजाविधिकथनम् । शूलिनीमन्त्र-

तत्पूजाविधिकथनम् । वनदुर्गामन्त्र-तत्पूजाविधानकथनम् । कात्यायनीमन्त्र तत्पूजनविधिकथनम् । अथ दशमहाविद्यामन्त्रविधिकथनम् । तत्र कालीमन्त्र तत्पूजादिविधिकथनम् । विद्याकालीमन्त्र-तत्पूजनविधिकथनम् । श्मशानकालीमन्त्र-तत्पूजाविधिकथनम् । गुह्यकालीमन्त्र तत्पूजाविधिकथनम् । एकजटाकालीमन्त्र-तत्पूजाविधिकथनम् । भद्रकालीमन्त्र-तत्पूजाविधिकथनम् । महाकालीमन्त्र तत्पूजाविधिकथनम् । श्यामादिविषये काम्यविधिकथनम् । अथ तारामन्त्र-तत्पूजादिविधिकथनम् । अथ बालकसंस्कारविधिकथनम् । परमयोगिरहस्यपुरश्चरणविधिकथनम् । परमयोगिवीरसाधनविधिकथनम् । अथ शवसाधनविधिकथनम् । अथ श्रीविद्यामन्त्र-तत्पूजादिविधिकथनम् । महाषोड़शीविद्यामन्त्र-तत्पूजादिविधिकथनम् । स्वप्नावती मधुमती-मन्त्रादिविधिकथनम् । पञ्चमीविद्याविधिकथनम् । श्रीचक्रदर्शनादिफलकथनम् । श्रीविद्यायाः काम्यादिविधिकथनम् । अथ भुवनेश्वरीविद्यामन्त्र-तत्पूजादिविधिकथनम् । अथ भैरवीविद्यामन्त्र-तत्पूजादिविधिकथनम् । तत्र सम्पत्प्रदाभैरवीमन्त्रविधिकथनम् । कौलेशभैरवीमन्त्रादिविधिकथनम् । अघोरभैरवीमन्त्रादिविधिकथनम् । चैतन्यभैरवीमन्त्रादिकथनम् । कामेश्वरीभैरवीमन्त्रादिकथनम् । षट्कूटाभैरवीमन्त्रादिकथनम् । नित्याभैरवीमन्त्रादिकथनम् । रुद्रभैरवीमन्त्रादिकथनम् । भुवनेश्वरीमन्त्रादिकथनम् । तत्र तत्र काम्यविधिकथनञ्च । अथ प्रचण्डचण्डिकामन्त्रादिविधिकथनम् । छिन्नमस्तामन्त्रादिविधिकथनम् । तत्र मन्त्रवासनामन्त्रार्थकथनञ्च । अथ धूमावतीमन्त्रादिकथनम् । अथ बगलामुखीमन्त्रादिविधिकथनम् । अथ मातङ्गीमन्त्रादिविधिकथनम् । अथ लक्ष्मीविद्यामन्त्रादिविधिकथनम् । महालक्ष्मीमन्त्रादिविधिकथनञ्च । अथ बालाविद्यामन्त्रादिविधिकथनम् । अथ अन्नपूर्णामन्त्रादिविधिकथनम् । अथ प्रकीर्णकमन्त्रादिविधिकथनम् । तत्र सरस्वतीविद्याविधिकथनम् । पारिजातसरस्वतीमन्त्रादिविधिकथनम् । परज्योतिर्मन्त्रविधिकथनम् । अजपाराधनविधिकथनम् । त्वरिताविद्याविधिकथनम् । त्रिपुटाविद्याविधिकथनम् । अश्वारोहणमन्त्रकथनम् । पद्मावतीमन्त्रकथनम् । नित्यामन्त्रकथनम् । आपदुद्धारवटुकमन्त्रकथनम् । क्षेत्रपालमन्त्रकथनम् । इन्द्रमन्त्रकथनम् । चन्द्रमन्त्रकथनम् । गायत्रीमन्त्रकथनम् । धनदामन्त्रकथनम् । विशालाक्षीमन्त्रकथनम् । गौरीमन्त्रकथनम् । ब्रह्मश्रीमन्त्रकथनम् । हनूमत्कल्पकथनम् । आर्द्रपटीमन्त्रकथनम् । श्मशानभैरवीमन्त्रकथनम् । ज्वालामालिनीमन्त्रकथनम् । निगड़विमोक्षणमन्त्रकथनम् । त्र्यम्बकमन्त्रकथनम् । मृत्युञ्जयविद्याकथनम् । अथ आकर्षणविधिकथनम् । विद्वेषणविधिकथनम् । उच्चाटनविधिकथनम् । सुखप्रसवमन्त्रकथनम् । अदर्शनप्रकारकथनम् । योगिनीसाधनविधिकथनम् । उच्छिष्टचाण्डालिनीमन्त्रकथनम् । कर्णपिशाचीमन्त्रकथनम् । मञ्जुघोषमन्त्रकथनम् । तारिणीमन्त्रकथनम् । अथ सारस्वतकल्पकथनम् । कात्यायनीकल्पकथनम् । अथ षट्कर्मविधिकथनम् । अथ जपादौ मालानियमकथनम् । तत्र अङ्गुलिनियमकथनञ्च । अथ सेतुनिरूपणम् । मन्त्र-

सिद्ध्युपायकथनम् । मन्त्रसिद्धिलक्षणकथनम् । मन्त्राणां शापोद्धारादिविधिकथनम् । चतुःषष्ट्युपचारनियमकथनम् । तन्मन्त्रादिकथनम् । रुद्राक्षमाहात्म्यकथनम् । मुद्राप्रकारादिकथनम् । शान्त्युदकस्नानविधिकथनम् । निग्रहाद्युपायकथनम् । वेतालादिसिद्धिकथनम् । अथ छागलादिबलिनिरूपणम् । वीरभावकथनम् । पशुभावकथनम् । परमयोगिनां कुलाचारकथनम् । महाचीनचक्रकथनम् । समयाचारविधिकथनम् । तत्र कुलवारादिनिरूपणम् । शिवाबलिविधिकथनम् । कुलवृक्षक्रमकथनम् । अवधूतव्यतिरिक्तानां गृहस्थादीनां पराङ्गनानिषेधकथनम् । कलौ दूतीयागादिनिषेधकथनम् । वीराणां पुरश्चरणविधिकथनम् । कुमारीनिरूपणादिकम् । योगप्रक्रियाकथनम् । तत्र आसनादिनिरूपणम् । योगविशेषेण मोक्षप्राप्तिकथनञ्च । इति शम् ।

No. 139. तन्त्रप्रदीपः, By जगन्नाथः. Substance, country-made paper, 17×7 inches. Folia, 75. Lines, 13 on a page. Extent, 4,509 çlokas. Character, Bengali. Date, Sk. 1735. Place of deposit, Kāṭihāli, Mayamansimha, Paṇḍita Visvanātha Tarkabhūṣaṇa. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो दुर्गायै ।

तत्र प्रथमं दीक्षां विना जपस्य दुष्टत्वात् सा निरूप्यते ।
प्रणम्य त्रिपुरां देवीं संसारार्णवतारिणीं ।
तन्त्रप्रदीपं तनुते जगन्नाथो द्विजोत्तमः ॥
दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य संक्षयम् ।
तस्मात् दीक्षेति संप्रोक्ता मुनिभिस्तन्त्रवेदिभिः ॥
मननं विश्वविज्ञानं त्राणं संसारबन्धनात् ।
यतः करोति संसिद्धिं मन्त्र इत्युच्यते बुधैः ॥ इत्यादि ।

End. गगने पवने प्राप्ते ध्वनिरुत्पद्यते महान् ।
घण्टादीनां प्रवाद्यानां सिद्धिस्तस्य न दूरतः ॥
प्राणायामेन युक्तेन सर्व्वरोगक्षयो भवेत् ।
मूर्द्ध्नि ध्यात्वा गुरुं भक्त्या तन्त्राणां सारमेव च ।
विलोक्य श्रीजगन्नाथश्चकार तन्त्रदीपकम् ॥
जयानोः काञ्चियानेन (?) जगन्नाथेन धीमता ।
नाम्ना तन्त्रप्रदीपोऽयमकारि शास्त्रगाज्ञया ॥

Colophon. इति श्रीजगन्नाथचक्रवर्त्तिविरचिते तन्त्रप्रदीपे नवमः परिच्छेदः। ...... शकाब्दाः १७१५।

विषयः। मन्त्रदीक्षाशब्दयोर्व्युत्पत्तिमुखेन दीक्षादेः फलनिरूपणम्। गुरुलक्षण—शिष्यलक्षणादिनिरूपणम्। दीक्षाकालादिनिरूपणम्। दीक्षाप्रयोगादिनिरूपणम्। पुरश्चरण—पञ्चाङ्गपुरश्चरणादिनिरूपणम्। रामविष्णुसूर्य्यादीनां मन्त्रादिनिरूपणम्। तेषां स्तवकवचादिनिरूपणम्। यन्त्रसंस्कारनिरूपणम्। नित्यहोमादिविधिकथनम्। कुण्डादिनिरूपणम्।

No. 140. तन्त्ररत्नं वा कुलरहस्यं, By आनन्दानन्दनाथः. Substance, country-made paper, 12×3 inches. Folia, 34. Lines, 8 on a page. Extent, 850 çlokas. Character, Bengali. Date, ? Place of deposit, Dhākā, Vikrampur, Mājpārā, Bābu Rāsavihārī Rāya. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो महादेवाय।

नमामि देवीं कुलवर्णगर्म्यां कुलाङ्गनासेवितपादपद्माम्।
कुलामृतादानविधानदक्षामालोलघूर्णायितनेत्रपद्माम्॥
कुलागमज्ञं कुलतत्त्वचित्तं विचारशीलं परिवर्ज्जनज्ञम्।
श्रीचक्रपूजादिविधानदक्षं नमामि भक्त्या गुरुमीशरूपम्॥
आनन्दानन्दनाथेन सहजानन्दसूनुना।
इदं कुलरहस्याख्यं तन्त्ररत्नं विधीयते॥
बहूनि तन्त्राणि विलोक्य यत्नतः
श्रीचक्रपूजाविधिरेव लिख्यते।
एवं समासाद्य भवाब्धिनावं
प्रयान्ति पारं किल कौलिकेन्द्राः॥
अथ कुलोपनिषत्। अथातो धर्म्मजिज्ञासा। इत्यादि।

End. तथा स्वच्छन्दमाहेश्वरेऽपि।

अङ्गुष्ठानामिकायोगाद्वामहस्तेन तर्पयेत्।
अङ्गुष्ठतर्ज्जनीयोगाद्दक्षेण पुष्पपातनम्॥
अङ्गुष्ठो भैरवो देवो अनामा चण्डिकापरा।
अनयोर्योगतो द्रव्यं केवलं परमामृतम्॥
आत्ममात्रं द्वितीयञ्च हृदयमध्ये विनिक्षिपेत्॥

Colophon. इत्यन्तं समाप्तम् ।

नत्वा भवानीचरणारविन्दं भक्त्या हृदिस्थं सुखदं नराणाम् ।

रवेर्दिने कर्कटगे च भानौ लिलेख रत्नं द्विजरामदेवः ॥

विषयः । कौलिकोपनिषत्सारकथनम् । कौलिकस्वरूपादिकथनम् । आत्मरहस्यकथनम् । कौलप्रतिष्ठाकथनम् । तत्र शक्तिप्राधान्यकथनम् । कौलिकेश्वरलक्षणादिकथनम् । कौलिकेन्द्र-लक्षणादिकथनम् । पञ्चमकारविधिः । शक्तिभेदनिरूपणम् । गुरुशिष्ययोर्लक्षणादिकथनम् । कौलदीक्षाविधिः । चक्रपूजाविधिः । शक्तीनां लक्षणादिकथनम् । आचार्य्यलक्षणादिकथनम् । द्रव्योत्पत्तिविधिः । देशभेदे द्रव्यविशेषविधानकथनम् । मांसविवेचनम् । बलिदानविधिः । विजयाग्रहणविधिः । कुलस्त्रीकृत्यनिरूपणम् । पात्रपरिमाणादिकथनम् । कलसादिनियम-कथनम् । आनन्दभैरवीपूजाविधिः । मुद्रादिशोधनविधिः । ग्रामादिविद्यायाः कुम्भस्थापनादि-विधिः । तत्त्वशुद्धिविधिः । तर्पणादिविधिश्च । इति ॥

No. 141. **तर्कप्रदीपः,** By **रामहरिः.** Substance, country-made paper, 18 × 3½ inches. Folia, 9. Lines, 5 on a page. Extent, 188 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭī, Paṇḍita Haraprasād Çāstrī. Appearance old. Verse. Generally correct.

Beginning. ॐ नमः परदेवतायै ॥

यस्याः पादनखेन्दुरङ्कुनतमः संहारयत्यञ्जसा-

ध्वान्तं तद्गतचेतसां विषयिणां तद्वर्द्धयत्यन्तरम् ।

तस्याः पादसरोरुहं परिणमंस्तर्कप्रदीपाह्वयं

ग्रन्थं रामहरिर्द्विजो वितनुते श्रीमान् सतां सम्मुदे ॥

गौतमानां मते तत्र पदार्थाः षोड़शैव हि ।

सप्रमाणः प्रमेयोऽथ संशयः सप्रयोजन ॥ इत्यादि ।

End. संसर्गाभाव एवात्र त्रिविधः परिकीर्त्तितः ।

प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥

यस्य नाशः समुत्पन्ने प्रतियोगिनि जायते ।

प्रागभावः स विज्ञेयो ध्वंसो ध्वंसविवर्जितः ।

नित्याभावस्तु विज्ञेयोऽत्यन्ताभाव एव सः ॥

अत्यन्ताभाव एवासौ त्रितयप्रतियोगिकः ।

× × × × × ॥

Colophon. इति तर्कप्रदीपे पदार्थनिर्णयो नाम पञ्चमज्योतिः ॥ ॐ ॥

विषयः । न्यायसम्मतानां षोडशपदार्थानामेकैकशो निरूपणम् ।

No. 142. तर्कभाषाभावार्थदीपिका, By गौरीकान्तभट्टाचार्य्य. Substance, country-made paper, $17\frac{1}{2} \times 5$ inches. Folia, 16. Lines, 12 on a page. Extent, 876 çlokas. Character, Bengali. Date, ? Place of deposit, Roṣadi *viâ* Veltali, District, Dhākā, Paṇḍita Rāsamohana Sārbba-bhauma. Appearance, new. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

ॐ तत्त्वदेभिः प्रतिपादिताय
नित्याखिलेच्छाज्ञतिधीयुताय ।
लीलाघनश्यामकलेवराय
नमोऽस्तु तस्मै जगदीश्वराय ॥
उज्वला तर्कभाषायामियं भावार्थदीपिका ।
भट्टाचार्य्येण धीरेण गौरीकान्तेन तन्यते ॥
मातर्भारति हे शिरोमणिवचोव्याख्यानसत्कौशलैः
साहङ्कारतयैव केशवकृतिव्याख्यासु किं लज्जसे ।
कर्पूरप्रचुरोल्लसत् खदिरयुक् ... ...
... ... का नाम क्षतिः ॥

इह खलु प्रेक्षावन्तो ग्रन्थाभिधेयप्रयोजनमनुसन्धानं प्रतीत्यैव तदध्ययनादौ प्रवर्त्तन्ते । तदुक्तसिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन इत्यतः प्रारिप्सितग्रन्थे प्रेक्षावत्प्रवृत्तये प्रयोजनाभिधेयसम्बन्धान् दर्शयन् शिष्यावधानाय तर्कभाषाप्रकाशनं प्रतिजानीते । बालोऽपीति । बाल इव बालः प्रकृतशास्त्रपरिभाषानभिज्ञ इत्यर्थः । अग्निर्माणवक इतिवत् गौणप्रयोगः अलसः दुरूहभाष्यग्रन्थादिबोधानुकूलभावार्थबङ्कतरव्याख्या ... ... सामर्थ्यविकलः एवम्भूतोऽपि सन् यो जनोऽल्पेन श्रुतेनाध्ययनेन न्यायः प्रतिज्ञाहेतूदाहरणोपनयनिगमनात् पञ्चावयवसमुदायः तत्सम्बन्धीति न्यायः नीयन्ते निर्णीयन्ते अर्था अनेनेति व्युत्पत्त्या शास्त्रे तर्कविद्यायामिति यावत् । इत्यादि ।

End. निमित्तत्वमिति तान्त्रिकव्यवहारात् असमवायिकारणभेदघटितत्वात् निमित्त-कारणस्येति यावत् सत्यं किन्तु सामान्यसमवायिकारणलक्षणमिदं अतएव कुलालानुरूप ... संयोगादेरपि लक्ष्यत्वमेव तेषामपि घटकुलालसंयोगादि-रूपसंयोगजसंयोगासमवायिकारणत्वात् । एवमवयवागमादेरपि अवयवासम-वायिकारणत्वात् । परन्तु ज्ञानादष्टादेरात्मविशिष्टगुणस्य किञ्चित् कार्य्यम् । इत्यादि ।

Colophon. खण्डितशेषत्वात् परिसमाप्तिसूचकं वाक्यं नास्ति ॥

विषय: । केशवमिश्रकृततर्कभाषाया व्याख्यानम् । दूषितस्थानेन ग्रन्थकारेण तत्रभवान् शिरोमणिः केशवमिश्रस्य ॥

No. 143. तर्कसंग्रहचन्द्रिका. Substance, country-made paper, 18×2 inches. Folia, 54. Lines, 8 on a page. Extent, 2,592 çlokas. Character, Bengali. Date, ? Place of deposit, Visnupur *viâ* Vāŋkūrā, Çrī Rūprām Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. (खण्डितत्वात् प्रारम्भवाक्यं नास्ति तेन तृतीयपत्रस्य प्रारम्भवाक्यं लिखितम्) विशेषणं द्विविधं भिन्नमभिन्नञ्चेति भिन्नं यथा घटस्य घटत्वं अभिन्नं यथा घटस्य घट एव । घटस्य घटत्वं यथा ज्ञायमानं तस्य व्यावर्त्तकं तथा घटो-ऽपि घटत्वेन ज्ञायमानः । इत्यादि ।

End. वेदवाक्यजा बुद्धिः सर्व्वापि सर्व्ववाक्यजापि प्रमा यथा कर्त्तुर्वेदकर्त्तुर्महेश्वर-स्याप्तत्वात् तद्युक्तिजन्यत्वादित्यर्थः । लौकिकं वाक्यं यदनाप्तोक्तं तदप्रमाणं तज्जनितबुद्धिरप्यप्रमा । बुद्धिप्रकरणमुपसंहरति निरूपितेति ... ... ॥

Colophon. इति तर्कसंग्रहचन्द्रिकायां प्रमाणप्रकरणं समाप्तम् ॥ अतःपरं खण्डितम् ।

विषय: । आप्तवाक्यार्थानां निरूपणादिमुखेन पदार्थोद्देशादिनिरूपणम् । द्रव्यलक्षणादि-निरूपणम् । गुणलक्षणादिनिरूपणम् । अनुमानादिनिरूपणम् । उपमानादिनिरूपणम् । शब्दादिनिरूपणम् । प्रमाणादिनिरूपणञ्च ॥

No. 144. ताजिकसारः, By केशवभट्टः. Substance, country-made paper, 17 × 1 inches. Folia, 54. Lines, 4 on a page. Extent, 1,013 çlokas. Character, Bengali. Date, ? Place of deposit, Dhākā, Vikrampur, Bayārāgādi, Paṇḍita Rāmasundara Vidyāratna. Appearance, old. Prose and verse. Incorrect.

Beginning. ॐ नमो गणपतये ।

श्रीरामस्य पदारविन्दयुगलं नत्वाथ वागीश्वरं
हेरम्बं तपनादिकं ग्रहगुरुं रुद्रं यशोदासुतम् ।
वक्ष्ये ताजिकसारमल्पसुगमं रम्यं सुबोधप्रदं
नानाताजिकतो विलोक्य रचितं दैवज्ञहर्षप्रदम् ॥
यत्पूर्व्वार्ज्जितमात्मदेहजनितं दैवं शुभं वाशुभं
तत्सर्व्वं हि विपाकमेति नियते वर्षादिके निश्चितम् ।
सर्व्वैः सम्मतमत्र जन्मनि परं जन्तोः स्फुटं सूरिभि-
स्तस्मात् तत्परिचिन्त्य वर्षचरितं वक्ष्ये फलं मूर्त्तिमत् ॥
यातो वर्षगणो हि जन्मसमयात् स्थाप्यश्चतुर्द्धा क्रमात्
पञ्चाङ्गाग्निभिरिन्द्रियेन्दुभिरिनारामैः खरामैर्हतः ।
जन्मार्कगणनाङ्किका + न युतः स्वादिष्टवर्षादिको
यातोऽ+दिचयः स यो + निदिने यद्ग्रन्थतः साधितः ॥ (?)
इत्यादि ।

End. लग्नेशं शपतीमियस्तनुनरेट स्वाम्य × पोषीतयोः
सौख्यं सेन्दुदृगिन्दुदृग् युतिरिहोप्यस्यौ च दृष्टौ तथा ।
देहस्वामिषु सौख्यदौ च विपरीतौ भावदुष्टप्रदा
+ + + + गुणैः प्रकल्प्य + +तौ मासेऽत्र वेद्यं फलम् ॥ (?)

Colophon. इति केशवभट्टविरचितताजिकोक्तवर्षफलपद्धतिः समाप्ता ॥

विषयः । जातकनिरूपणम् ॥

No. 145. ताजिकयात्रापद्धतिः. Substance, country-made paper, 17 × $3\frac{1}{2}$ inches. Folia, 3. Lines, 6 on a page. Extent, 45 çlokas. Character, Bengali. Date, ? Place of deposit, Kālikaccha, District, Tripurā. Paṇḍita Rājacandra Sārbbabhauma. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
पार्व्वती परमा धन्या सदा शङ्करवल्लभा ।
उवाच नीलकण्ठं तं भक्त्या गद्गदया गिरा ॥
शृणु देव जगन्नाथ विशेषश्चैव शङ्कर ।
प्रमाणं ज्योतिषे ग्रन्थे यात्रायां बहुकष्टकम् ॥ इत्यादि ।

End. पठित्वा च इमं स्तोत्रं गृहीत्वा रक्तचन्दनम् ।
प्रदेशिन्या जग ... ... क्षिपेदुत्तरपश्चिमे ॥

Colophon. इति तान्त्रिकयात्रापद्धतिः समाप्ता ॥

विषयः । येषु येषु दिवसेषु नास्ति यात्राविधिस्तेषु तेषु दिवसेषु केन केन तन्त्रोक्तविधिना यात्रा शुभा भवेदिति निरूपणम् ।

No. 146. तारातन्त्रम् . Substance, country-made paper, 14 × 2½ inches. Folia, 8. Lines, 5 on a page. Extent, 180 çlokas. Character, Bengali. Date, ? Place of deposit, Kānṭhālpārā *viâ* Naihāṭī, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो भगवत्यै ।
कैलासशिखरे रम्ये देवदेवं महेश्वरम् ।
पप्रच्छ भैरवी देवी शयनीये सुखोषिता ॥
पुरा यौ कथितौ बुद्धवशिष्ठौ कुलभैरवौ ।
केन मन्त्रेण देवेश सिद्धौ तौ वद मे प्रभो ॥
इति पृष्टः स देवेशो भैरवीं वाक्यमब्रवीत् ॥
श्रीभैरव उवाच ।
स एव परमो देवो बुद्धरूपी जनार्द्दनः ।
उग्रतारामहामन्त्रं पञ्चार्णं परिजप्य च ॥
सृष्ट्यादि-कर्म्मकर्त्ता च अजरामरतां ययौ ।
वशिष्ठोऽप्येनमाराध्य नक्षत्रलोकमागतः ॥ इत्यादि ।

End. तारातन्त्रं चीनतन्त्रं कालीतन्त्रं गुरूदितम् ।
सर्व्वथा गोपनायैव शक्तिं वक्त्रस्थलेऽर्पयेत् ॥

देयं शिष्याय शान्ताय साधकाय महात्मने ।
विश्वासिने स्वतन्त्राय गुरुतन्त्राय सुव्रते ॥
अन्यत् यत् ... ... तत्त्वं गुरुवह्नतः ।
विदवदेदवादेऽपि श्रोतव्यं नात्र संशयः ॥

Colophon. इति भैरवभैरवीसम्वादे तारातन्त्रं समाप्तम् ॥

विषयः । बुद्धदेवाचरितप्रातःकृत्यादिनिरूपणम् । विविधपूजासु मानसिकशान्तिकपूजाविधिनिरूपणम् । कुलाचारादिनिरूपणम् । पुरश्चरणनिरूपणञ्च ।

No. 147. तारापूजापद्धतिः. (ताराभक्तिसुधार्णवीया) Substance, palm-leaves, 20×2 inches. Folia, 36. Lines, 3 on a page. Extent, 492 çlokas. Character, Bengali. Date, Sk. 1631. Place of deposit, Mayamansiṃha, Çerpūr, Bābu Haracandra Caudhuri. Appearance, old. Prose. Incorrect.

Beginning. श्रीगुरवे नमः ॥ अथ तारापूजा । × × × ज्ञाताज्ञातस्वपापं स्मरन् विचारसुचार्य्य ।
देवि त्वं प्राकृतं कर्म्म पापाक्रान्तमभूत्मम ।
तन्निःसारय चित्तान्मे पापं फट् फट् स्वाहा ॥ इत्यादि ।

End. निर्म्माल्यं शिरसि धृत्वा मूलेन च पादोदकं भुक्त्वा भक्तेभ्यो नैवेद्यादिकं दत्वा स्वयमपि सुहृद्बान्धवैः सार्द्धं भुक्त्वा स्वात्मानं देवीरूपं ध्यात्वा यथासुखं किञ्चित्कालं विचरेत् ॥

Colophon. इति ताराभक्तिसुधार्णवे पूजापद्धतिः समाप्ता ॥ शकाब्दाः । १६३१ ।

विषयः । तारादेव्याः पूजाविधिः प्रयोगश्च ।

No. 148. तारारहस्यम्, By ब्रह्मानन्दः. Substance, country-made paper, 12×4 inches. Folia, 80. Lines, 8 on a page. Extent, 1,440 çlokas. Character, Bengali. Date, Sk. 1735. Place of deposit, Mayamansiṃha, Nahāṭā, Paṇḍita Kāçiçvara Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमस्तारिण्यै ।
तारां सारतरां त्रिलोकजननीं सर्व्वार्थसिद्धिप्रदां
सर्व्वाद्यां शुभदां सदाशिवमयीं देवैः सदा वन्दिताम् ।

नत्वा राजीवरोजे (?) सकलगुणमयीं तद्रहस्यं तनोति
ब्रह्मानन्दस्तनुभवसुतः साधकानां हिताय ॥ इत्यादि ।

End. पञ्चरश्मिमयं मन्त्रं क्रमदीक्षापदं ततः ।
मदीयब्रह्मरक्षार्थं कुलाचारार्थमेव च ।
साङ्गत्यं मद्वचो बुद्ध्वा गोपयित्वा तु साधयेत् ॥
यत्रास्ते कमला कृताञ्जलिपरा वीणाधरा शारदा
तारावाक्यमनुस्मरन् प्रियतमश्रीमावचः कारणम् ।
+ + + +
+ + + + ॥

Colophon. इति श्रीब्रह्मानन्द-परमहंस-परिव्राजकावधूतविरचितं तारारहस्यं समाप्तम् ।
शाक १७२५ ॥

विषयः । प्रातःकृत्य-सन्ध्याकृत्यमन्त्रोद्धारादीनां निरूपणम् । शिवलिङ्गपूजादिनिरूपणम् । पूजाहोमादिनिरूपणम् । तत्त्वादिरहस्यनिरूपणम् । पुरश्चरणादिनिरूपणम् । एकजटास्तोत्र-कवचादिकथनञ्च ।

No. 149. तारिण्यष्टकम्, By रामजय. Substance, country-made paper, 17 × $2\frac{1}{2}$ inches. Folia, 1. Lines, 6 on a page. Extent, $19\frac{1}{2}$ çlokas. Character, Bengali. Date, ? Place of deposit, Dhākā, Paṇḍita Candrakānta Nyāyālaṇkāra. Appearance, old. Verse. Correct.

Beginning. ॐ नमस्तारिण्यै ।
चण्डमुण्डमुण्डरक्तपानतोषकारिणी
मा कुरुष्व नाम मातराशु दैत्यनाशिनी ।
मध्यमस्त्वभीतिदानमत्र ते च किं फलं
किङ्करे च तारिणीति मा कुरुष्व निष्फलम् ॥ १ ॥
घोरवैरिनाशचेष्टया च सर्व्वरक्षिणी
धर्म्मवर्त्मदर्शनेन सर्व्वपापनाशिनी ।
आहवे च भैरवीति नाम ते च भीरुकं
किङ्करे च तारिणीति मा कुरुष्व निष्फलम् ॥ २ ॥ इत्यादि ।

End. त्वद्गतस्य रोगशोकभीतिनाशकारिणी
तत्कथं न मे भवानि दुर्गतौघनाशिनी ।

त्वद्दयामयीति नाम मे कथस्व निर्दयं
किङ्करे च तारिणीति मा कुरुष्व निष्फलम् ॥ ८ ॥
तारिण्यष्टकमेतदिह यो भक्त्या पठेत् प्रत्यहं
स श्रीरामजयेन रचितं विप्रेण दुःखापहम् ।
संसारे स पुनर्न पतितो लोको भवेत् सागरे
तस्याभीष्टसमस्तमिह वै मोक्षश्च पारत्रिकम् ॥ ९ ॥

विषयः । स्तोत्रव्याजेन तारिण्या माहात्म्यादिकीर्त्तनम् ।

No. 150. तिथितत्त्वटीका, By काशीनाथतर्कालङ्कारः. Substance, country-made paper, $17\frac{1}{2} \times 4$ inches. Folia, 33. Lines, 8 on a page. Extent, 1,155 çlokas. Character, Bengali. Date, ? Place of deposit, Pharidpur, Nadiyā. Paṇḍita Çaçibhuṣaṇa Smritiratna Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो रघुनन्दनाय ।

काशीनाथं प्रणम्याथ श्रीकाशीनाथधीमता ।
क्रियते तिथितत्त्वीयकूटार्थस्य निरूपणम् ॥

प्रणम्येति । प्रकर्षेण नत्वेत्यर्थः । नमस्कारस्य स्वापकर्षबोधकव्यापारः । धात्वर्थतावच्छेदकफलञ्च स्वापकर्ष एव । रामस्य तद्वत्ताभावात् धात्वर्थतावच्छेदकफलशालित्वं न स्यात् । इत्यादि ।

End. पर्णनरदाहस्तु तत्तिथौ कार्य्यः एवं पर्णनरदाहप्रयुक्तत्रिरात्राशौचं व्यवहृत्य तदशौचान्ते वृषोत्सर्गादिकं आद्यश्राद्धञ्च कर्त्तव्यम् । एवं पर्णनरदाहं विना न तत्रायं स्मृत इत्यवधारणात् सपिण्डानां त्रिरात्राशौचं शुश्रूमरणानन्तरं सम्वत्सराभ्यन्तरेऽपि सपिण्डानां तद्विधानात् । पर्णनरदाहे त्रिरात्राशौचन्तु सपिण्डमात्राणां इति शूलपाणिप्रभृतीनां मतं । हारलताटीकाकृदच्युतचक्रवर्त्तिमतन्तु दाहकस्यैव त्रिरात्राशौचं नान्येषामिति । अत्र द्वादशाब्दोत्तरं गमनतिथौ पर्णनरदाहे प्रतिमासे गमनसजातीयतिथौ प्रातिमासिकं कर्त्तव्यमिति व्यवहारः पतितवत् कृष्णैकादश्यां अमावस्यायाम्वा कार्य्यमित्यनेन यत्र .... तत्र द्वादशाब्दोत्तरतिथौ गमनतिथिं विनापि पर्णनरदाहः कार्य्यः । यत्र गमनतिथिरपि विस्मृता तत्राषाढाद्यन्यतममासीय कृष्णैकादशीममावस्याम्वा आदाय द्वादशाब्दगणनया तदुत्तरं कृष्णैकादशीममावस्याम्वा स्वतिथिं मत्वा श्राद्धादिकं कार्य्यमिति ।

सामान्यकाण्डगहनं सहसा प्रविष्टं
नाद्यैर्युतं सरभसिंहविदङ्गमानाम् ।
वाक्पाटवं निजमवेक्ष्य बहुप्रयत्नै-
र्निबन्धमेव बुधा प्रयासः ॥ (?)
सामान्यकाण्डं तिथितत्त्वखण्डं
ब्रह्माण्डमध्ये + + + + मूर्खैः ।
+ + + + + छतिनां प्रचण्डं
शाखाप्रकाण्डं स्मृतिशास्त्रखण्डम् ॥

Colophon. कर्कटाप्तरवेर्माने खचन्द्रे गुरुवासरे ।
वदनादिमचन्द्रेण लिखिता पुस्तिका मया ॥
टीकेयं तिथितत्त्वस्य सामान्यकाण्डकस्य + ।
+ + + ॥

विषयः । रघुनन्दनभट्टाचार्य्यकृततिथितत्त्वस्य व्याख्यानम् ॥ (सामान्यकाण्डपर्य्यन्तम्)

No. 151. तिथिनिर्णयः, By **रमापतिशर्म्मा.** Substance, country-made paper, $12\frac{1}{2} \times 2\frac{1}{4}$ inches. Folia, 93. Lines, 5 on a page. Extent, 1,424 çlokas. Character, Bengali. Date, Sk. 1633. Place of deposit, Dhākā Hāḍiyā, *viâ* Vaidyervāzār, Çrīyukta Rāmanārāyaṇa Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
नत्वा कृष्णपदद्वन्द्वं श्रीरमापतिशर्म्मणा ।
क्रियते निर्णयस्तिथेर्बालानां सुखबुद्धये ॥
तत्र प्रायशः सङ्कल्पानामेव कर्म्मणामारम्भकत्वात् आदौ स एव निरूप्यते । कायवाङ्मनोभी रचितं कर्म्म फलाय समर्थमिति श्रुत्या तयाणामङ्गत्वमुक्तम् । तत्र केन रूपेण कस्याङ्गत्वमित्यत्राह मनसा सङ्कल्पयति वाचा अभिलपति कर्म्मणा चोपपादयतीति । सङ्कल्पयतीति अमुककामेन मया इदं कर्त्तव्यमिति निश्चिनोति । वाचा वाक्येनाभिलपति मनसा निश्चितमर्थं तद्बोधकपदैरभिधत्ते । कर्म्मणा कायव्यापारेण उपपादयति यथाविधि समापयतीत्यर्थः । सङ्कल्पयतीत्यादिषु विध्यर्थे लट् । ननु अमुककर्म्माहं करिष्ये इति

सङ्कल्पे कर्म्मपदेन साङ्गप्रधानमेव कर्म्मोच्यते । तथाच किञ्चिदपि अङ्गं सङ्कल्पात् प्रागनाचरणीयं करिष्ये इति प्रतिज्ञाबाधापत्तेः । अथ कर्त्तव्याधिवासरूपदेवतावाहनादौ का गतिः न च तदाङ्गत्वमिति वाच्यं तस्य प्रधानोपकारकत्वाभावे स्वातन्त्र्येण फलवत्त्वाभावेन तत्करणस्य वैयर्थ्यापातात् उच्यते तदाङ्गपदेन प्रधानप्रयोगान्तर्गतमङ्गमुच्यते । स्नानसन्ध्याशिखाबन्धनादे र्न प्रधानान्तर्गतत्वं × × विशिष्टशिखाबन्धनस्याग्रुविनाशित्वेनादृष्टद्वारा अङ्गत्वम् । पूर्व्वदिनकर्त्तव्यदेवतावाहनादिवारणाय प्रधानेत्यादि। प्रधानान्तर्गतत्वञ्च प्रधानकालकर्त्तव्यत्वेन वेदबोधितत्वम् । प्रधानकालश्च सङ्कल्पावधिकर्म्मसमाप्तिपर्य्यन्तो ग्राह्यः । न च शिखाबन्धनस्यादृष्टजनकत्वे तद्पूर्व्वेणैव प्रधानपूर्व्वसिद्धौ कर्म्मकाले मुक्तशिखस्यापि कर्म्म साङ्गं भवत्विति वाच्यं तदानीं शिखामोचनेन पूर्व्वापूर्व्वनाशात् । इत्यादि ।

End. ॐ अद्याक्षयतृतीयायां गङ्गातीरे सर्व्वदानसर्व्वयज्ञसर्व्वतीर्थे सर्व्वतपोजन्यफलसहस्रगुणफलप्राप्ति सूर्य्यकोटिप्रतीकाशदिव्यस्त्रीकोटिसंयुतदिव्यरत्न...... विचित्रबहुविमान ... ... काश्यपकालस्यापि--स्वपितृगणसहित--स्वक्रीडनदानव्यग्रामभूप ... ... बहुभोगोपभोगपूर्व्वकयोगिकुलजन्माणिमादिगुणयुक्त ... ... परमब्रह्मलयकाम इमं ग्रामं विष्णुदैवतमित्यादि ... ...
... ... तथाच ब्राह्मे ।

सर्व्वदानानि नियमा यमाश्चैव तपांसि च ।
यज्ञो दानं तथा जप्यं श्राद्धन्तु सुरपूजनम् ।
गङ्गायान्तु कृतं पापं कोटिकोटिगुणं भवेत् ॥

Colophon. इति श्रीरमापतिसिद्धान्तविरचितं दानाधिकार × × समाप्तम् ॥

रामविश्वतुचन्द्रमिते च शाके
नत्वा भवानीचरणारविन्दम् ।
आषाढ़मासस्य सितानवम्या-
मलेखि यत्ना ...... शर्म्मा ॥

श्रीकृष्णाय नमः ।

भग्नपृष्ठकटीग्रीव ... ... रधोमुखः ।
यत्नेन लिखिता चेयं पुत्रवत् परिपालयेत् ॥
श्रीमद्गुरवे नमः ॥ श्रीकृष्णाय नमः ॥ ॐ सरस्वत्यै नमः ॥

विषयः। सङ्कल्पनिरूपणम्। मलमासनिरूपणम्। वैदिककर्म्मसु मासोल्लेखविधानम्। उपवासविधिः। सन्ध्याविधिः। निषेधपर्य्युदासविवेचनम्। विकल्पविवेचनम्। युग्मादिविवेचनम्। सायाह्नादिकालनिर्णयः। आपराह्णिकश्राद्धकालकथनम्। निमित्तोल्लेखे विधिनिरूपणम्। जन्मतिथिव्यवस्थानिर्णयः। शूद्रस्यानुपनीतस्य च पौराणिकमन्त्रपाठनिषेधकथनम्। प्रतिपदादितिथिनिरूपणम्। तत्र कुष्माण्डादिभक्षणनिषेधकथनञ्च। अथ द्वितीयानिरूपणम्। तत्र रथद्वितीयाया भ्रातृद्वितीयायाश्च निर्णयः। अथ तृतीयानिरूपणम्। अथ चतुर्थीनिरूपणम्। तत्र नष्टचन्द्रनिरूपणम्। अथ पञ्चमीनिरूपणम्। तत्र नागपञ्चमी-श्रीपञ्चमीनिर्णयः। अथ षष्ठीनिरूपणम्। तत्र अरण्यषष्ठी-स्कन्दषष्ठीनिरूपणम्। एवं सप्तम्यादितिथीनां तत्तत्तिथिविशेषव्रतानाञ्च निर्णयः। अथ यजमानस्याशौचे पुरोहितेनैव तत्कार्य्यमिति व्यवस्थादिनिरूपणम्। आबोधनात् दक्षिणान्तपर्य्यन्तं दुर्गोत्सवे तत्तत्तिथिकर्त्तव्यादिनिर्णयः। अथ मत्स्यादित्यागफलकथनम्। हरिशयनव्यवस्थाकथनम्। अघोरचतुर्द्दश्यादिव्रतनिर्णयः। कालिकापूजा-शिवरात्रिव्यवस्थाकथनम्। कोजागरकृत्यकथनम्। दोलयात्राव्यवस्थाकथनम्। रविसंक्रमण-रात्रिसंक्रमण-सन्ध्यासंक्रमणानां निर्णयः। संक्रमणे निषिद्धविहितोभयरूपकर्म्मणां निर्णयः। कार्त्तिककृत्यनिरूपणम्। कार्त्तिकमाघादिमासे प्रातःस्नानविधिः। ग्रहणे पार्व्वणविधिकश्राद्धविधिकथनम्। अमावस्याकृत्यनिरूपणम्। आश्वयुककृष्णपक्षश्राद्ध-तिलतर्पण-उल्कादान-लक्ष्मीपूजादिकथनम्। अर्द्धोदययोगनिरूपणम्। मन्वन्तरानिरूपणम्। भूम्यादिदानाधिकार-कथनञ्चेति॥

No. 152. तिथिविवेकः, By शूलपाणिः. Substance, country-made paper, 12 × 3 inches. Folia, 8. Lines, 6 on a page. Extent, 168 çlokas. Character, Bengali. Date, Sk. 1723. Place of deposit, Bhāṭpāḍā, Paṇḍita Rāmendra Nyāyavāgīça. Appearance, old. Prose. Correct.

Beginning. ॐ परमदेवतायै नमः।

वचनद्वैधसंजातसंशयच्छिदुरः सताम्।
तनोतु मुदमत्युच्चैर्द्विखण्डतिथिनिर्णयः॥

प्रतिपदादितिथिविशेषविहितानां स्नानदानादिकर्म्मणामखण्डतिथौ निःसंशयमनुष्ठानम्। यदा तु बृद्धिह्रासादिना दिनद्वयेऽपि तत्तत्तिथिप्राप्तिस्तदा कुत्र क्रियते इति संशये कथं निर्णयः तत्र संवत्सरप्रदीपः।

सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः।
तथा कर्म्माणि कुर्व्वीत ह्रासबृद्धी न कारणम्॥ इत्यादि।

End. अस्तं गते चन्द्रे यथा वायुपुराणम् ।
द्विवारात्रौ व्रतं यत्र एकमेव तिथौ यथा ।
तस्यामुभयगामिन्यामाचरेत् व्रतं व्रती ॥
तेन प्रतिपद्युक्तापि द्वितीया कर्म्मार्थं द्विवारात्रौ च लभ्यते तदा न युग्मा-
दरः कार्य्यः । द्वितीया तृतीया युग्मदिने द्वितीयाकालस्याभावादित्यर्थः ॥

Colophon. इति साङ्ख्यान महामहोपाध्याय-श्रीशूलपाणिविरचित-तिथिविवेकः
समाप्तः ॥ शकाब्दाः । १७९३ ॥

विषयः । तिथिविशेषे कार्य्यविशेषाणां निरूपणम् । तिथिद्वयप्राप्तकर्म्मनिकराणां कर्त्तव्य-
कालादिनिरूपणञ्च ।

No. 153. तीर्थतत्त्वं, By रघुनन्दनभट्टाचार्य्यः. Substance, country-made paper, 18 x 4 inches. Folia, 18. Lines, 6 on a page. Extent, 432 çlokas. Character, Bengali. Date, ? Place of deposit, Vāḍari, Mayamansiṃha, Paṇḍita Rāmakamala Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमः कालिकायै ।
प्रणम्य सच्चिदानन्दं रामं कामदमीश्वरम् ।
स्मृतितत्त्वे तीर्थतत्त्वं वक्ति श्रीरघुनन्दनः ॥
अथ यात्राविधिः । प्रथमं तीर्थयात्रा । पूर्व्वदिने संयतो भूत्वा यात्रादिने
तीर्थयात्रानिमित्तकं घृतसर्पिःसमन्वितं वृद्धिश्राद्धं विधाय पार्व्वणश्राद्धं कृत्वा
गृहाद्यात्रा कर्त्तव्या ॥ इत्यादि ।

End. ऋणमोचनं तीर्थं + + + + + यमुनाया उत्तरकूले ऋणमोचननाम्ने
पितृणमोचनपूर्व्वकाभिमतलप्राप्तिः फलम् । यत्र यत्र यद्यद्फलमुद्दिष्टं तत्र
तत्तत्फलकामः कर्म्म कुर्य्यात् । ततः स्वदेशगमने सति यत्कर्त्तव्यं तत्प्रागेव
लिखितमिति ॥

Colophon. इति वन्द्यघटीय-हरिहरभट्टाचार्य्यात्मज-श्रीरघुनन्दनभट्टाचार्य्यविरचितं तीर्थ-
प्रयोगतत्त्वं समाप्तम् ॥

विषयः । तीर्थयात्रादिनिरूपणमुखेन गयावाराणस्यादितीर्थकर्त्तव्यकर्म्मनिचयप्रयोगादि-
निरूपणम् ॥

No. 154. तुलापुरुषदानपद्धतिः, By नारायणभट्टः. Substance, country-made paper, 10 × 6 inches. Folia, 35. Lines, 10 on a page. Extent, 1,102 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares, Paṇḍita Bindhhyēçvarīprasāda Dube. Appearance, very old. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।

विश्वेश्वराख्यौ रघुनाथतातौ
प्रणम्य रामेश्वरभट्टसूनुः ।
नारायणाख्यस्तनुते विचार्य्य
तुलामहादानविधिप्रयोगः ॥ इत्यादि ।

End. ततः पूतेनानेन तुलापुरुषदानेन परमेश्वरः प्रीयतामितीश्वर + + + + मन्त्राभिषो रटचोला तान् सानुनयं विसृज्य + + + भुञ्जीतेति ।

Colophon. इति श्रीमद्विद्वन्मुकुटमाणिक्य-श्रीरामेश्वरभट्टसुत-नारायणभट्टकृता तुलापुरुषदानपद्धतिः समाप्ता ॥

विषयः । तुलापुरुषदाने विधिव्यवस्थादिकथनं तत्प्रयोगश्च ।

No. 155. त्रिकूटारहस्यम् । Substance, country-made paper, 18 × 5 inches. Folia, 65. Lines, 9 on a page. Extent, 2,100 çlokas. Character, Bengali. Date, ? Place of deposit, Mājpāḍā, Vikramapura, District Dhākā, Bābu Rāsavihārī Rāya. Appearance, fresh. Prose and verse. Incorrect.

Beginning. श्रीभैरव्यै नमः ।

अथ त्रिकूटारहस्यम् । तत्र सूर्य्यग्रहणे पूजापद्धतिर्लिख्यते । सूर्य्योदये विधिवत्साधकः स्नात्वा धरण्यां यन्त्रं सिन्दूरेण रक्तचन्दनेन वा विलिख्य स यथा ।

त्रिकोणं बिन्दुसंयुक्तमष्टकोणं महेश्वरि ।
वृत्तमष्टदलं देवि भूपुरेणोपशोभितम् ॥

इति विलिख्य आसनशुद्धिमातृकान्यासं विधाय ऋष्यादिन्यासं कुर्य्यात् । अस्य सूर्य्यग्रहणपूजामन्त्रस्य सदाशिवऋषिः पंक्तिश्छन्दः श्रीभैरवी देवता वाग्भवबीजं तार्त्तीयशक्तिं कामराजकीलकं धर्म्मार्थकाममोक्षार्थे पूजायां विनियोगः । इत्यादि ।

End. सर्व्वधर्म्मेषु यद्धर्म्मं सर्व्वशास्त्रेषु यत्फलम् ।
सर्व्ववेदेषु प्रोक्तेषु यत्फलं परिकीर्त्तितम् ॥
तत्पुण्यं कोटिगुणितं सकृज्जप्त्वा लभेन्नरः ।
श्रुत्वा भवेच्च बलवान् पुत्रवान् सर्व्वसम्पदः ॥
देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम् ।
स यास्यति न सन्देहः स्तवराजप्रकीर्त्तनात् ॥

Colophon. इति त्रिकूटारहस्ये महात्रिपुरसुन्दरीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

विषयः। (आदर्शोऽयमाधुनिक इति विज्ञेयम् ।) अत्र प्रथमं सूर्य्यग्रहणकालीनपूजापद्धतिः । एवं चन्द्रोपरागे पूजाविधिः । भूमिकम्पादौ पूजाविधिः । अथ चैत्रमासादौ नवरात्रपूजाविधिः । आश्विने नवरात्रपूजाविधिः । कन्यासंक्रान्तौ पूजाविधिः । अथ स्नानादिविधिः । दीपदानविधिः । शक्तिपूजाविधिः । अथ श्रीविद्याया मन्त्रोद्धारादिकथनम् । तद्ध्यानादिकथनम् । त्रिकूटानिरूपणम् । तत्र पुरश्चरणविधिः । कुलाचारविधिः । वामाचारविधिः । कामेश्वरमन्त्रोद्धारादिकथनम् । तस्य त्रिकूटोद्धारविधिः । त्रिकूटाया नित्यपूजाविधिः । त्रिकूटागायत्रीकथनम् । अथ समयपूजानिरूपणम् । अथ पञ्चदशेश्वरीविद्याकथनम् । अथ वज्रपञ्जरकवचकथनम् । चिन्तामणिकवचकथनम् । जगन्मङ्गलकवचकथनम् । जगदीशकवचकथनम् । कामिककवचकथनम् । अक्षरनामकवचकथनम् । विभ्रमनामकवचकथनम् । त्रैलोक्यभूषणनामकवचकथनम् । विरूपाक्षकवचकथनम् । सर्व्वार्थसाधकनामकवचकथनम् । सर्व्वसिद्धिप्रदनामकवचकथनम् । वैरिनाशनकवचकथनम् । विजयकवचकथनम् । विषापहकवचकथनम् । शक्तिसाधनकवचकथनम् । त्रिकूटातन्त्रस्य खरटे संस्थापनफलकथनम् । अथ महाशक्तिन्यासकथनम् । कामराजमन्त्रकथनम् । श्रीविद्यापूजापद्धतिः । तत्र जपहोमादिविधिः । अथ काम्यहोमद्रव्यादिकथनम् । अथ श्रीचक्रमाहात्म्यादिकथनम् । पञ्चमीस्तवराजकथनम् । मकरन्दस्तवराजकथनम् । श्रीचक्रसौभाग्यकवचकथनम् । त्रिपुरसुन्दरीसहस्रनामकथनञ्च ।

No. 156. त्रिपुरान्तकशिवपूजा । Substance, country-made paper, 12 × 4 inches. Folia, 2. Lines, 7 on a page. Extent, 47 çlokas. Character, Bengali. Date, ? Place of deposit, Káṭiháli, District Mayamansiṃha, Paṇḍita Jagaccandra Smṛtipañcānana. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो गणेशाय । पार्व्वत्युवाच ।
वद ईशान सर्व्वज्ञ सर्व्वतत्त्वविदांवर ।
महारोगे महादुःखे महादारिद्र्यसङ्कटे ॥

नानाव्याधिगते वापि नानापीड़ादिशङ्कटे ।
राज्यनाशे राजभये कारागारगते पुनः ॥
राज्ञः गृहे च देवेश तथाच ग्रहपीड़िते ।
केनोपायेन तं नाथ मुच्यते वद शङ्कर ॥

End. सर्व्वाणि सितां कमले लभते नात्र संशयः । (?)
सत्यं सत्यं महेशानि मम वाक्यं मृषा नच ॥

Colophon. इति लिङ्गार्च्चनतन्त्रे त्रिपुरात्मकशिवपूजा समाप्ता ।

विषयः । त्रिपुरात्मकशिवपूजाविधिस्तत्प्रयोगश्च ।

No. 157. त्रिपुरासारसमुच्चयः. By भट्टनागः. Substance, country-made paper, $14 \times 2\frac{1}{2}$ inches. Folia, 24. Lines, 6 on a page. Extent, 198 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṅṭhālpāḍā, Post office Naiháṭi, Paṇḍita Rámatáraṇa Thákura. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गौरिन्यै ।
प्रज्ञः प्राचीनबर्हिःप्रमुखसुरवरालीककोटीरकोटि-
स्निग्धस्थेन्द्रनीलामलमपि मधुप ... ... ।
श्रीपादाम्भोजयुग्मं नखमुखविलसद्रश्मिकिञ्जल्कपुञ्जम्
सिञ्जन्मञ्जीरहंसीमुखरितमनिशं मङ्गलं वो भवान्याः ॥
भक्त्या गुरोर्भवपयोनिधिपारसेतून्
श्रीपादपद्मसङ्करेणुकणान् प्रणम्य ।
लम्बोदरञ्च कथयामि गुरूपदिष्ट-
माराधनक्रममहं कुलनायिकायाः ॥

End. ऊर्व्वीभूतशिरोवक्षजानुवरयोर्मुक्तांश्च भीमाक्षतीन्
भीतौशेन निशाकरार्द्धसहितेनाभ्यर्च्चयेत् साधकः ।
प्रियङ्गुश्यामाङ्गं परिकलितपाणिं मणिमयो-
ल्लसच्चूड़ापीड़ं द्विरदवरसाधिष्ठिततनुम् ॥ ० ॥

Colophon. इति भट्टनागविरचिते त्रिपुरासारसमुच्चयेऽष्टमः पटलः ॥

विषयः। अत्र प्रथमं त्रिपुरोत्पत्तिनिरूपणम्। ततो न्यासादिनिरूपणम्। नाड्यादि-निरूपणम्। नाड्यादिस्थितिनिरूपणम्। त्रैपुरयन्त्रादिनिरूपणञ्चेति।

No. 158. दक्षिणाकालिकास्तवः। Substance, country-made paper, 13 × 1 inches. Folia, 2. Lines, 2 on a page. Extent, 12 çlokas. Character, Bengali. Date, ? Place of deposit, Vidyākūṭa, District Tripurā. Bābu Kedāranātha Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. अथ श्यामास्तवः।

महामेघप्रभां घोरां बालार्कलोचनत्रयाम्।

नृमुण्डमालिनीं वन्दे देवीं दक्षिणकालिकाम्॥ इत्यादि।

End. मुनीन्द्रैः पूजितामाद्यां सर्व्वदेवैर्नमस्कृताम्।

सर्व्वाशापूरणीं वन्दे देवीं दक्षिणकालिकाम्॥

इति स्तोत्रं पठेत् यो हि सर्व्ववाञ्छाफलप्रदाम्।

तस्य गेहे रमेशश्रीः सर्व्वत्र विजयी भवेत्॥

Colophon. इत्येकवीरकल्पे दक्षिणकालिकास्तवः समाप्तः।

No. 159. दक्षिणाकालिकास्वरूपाख्यस्तोत्रराजपश्वाचारटीका। Substance country-made paper, 11 × $3\frac{1}{2}$ inches. Folia, 18. Lines, 9 on a page. Extent, 500 çlokas. Character, Bengali. Date, Sk. 1781. Place of deposit Bhāṭpāḍā 24-Parganas, Paṇḍita Rāmendra Nyāyavāgíça. Appearance fresh. Prose. Correct.

Beginning. ॐ नमः परदेवतायै॥

कालीं कालहरां परात्परतरां विश्वम्भरां श्रीधरां

पूर्णानन्दपरां पराभयकरां ब्रह्माण्डभाण्डोदराम्।

कालीमाथहृदम्बुजासनकरां स्वर्गापवर्गप्रदां

चन्द्रार्काग्निविनिन्द्यदीपनधरां सर्व्वाश्रयामाश्रये॥

प्रणम्य जगदीशानं कृष्णनाथं शिवं गुरुम्।

टीकेयं सुखबोधाय सद्भक्तेन तन्यते॥

अथ श्रीमद्दक्षिणकालिकायाः परमकारुणिक-श्रीमन्महाकालविरचित-कर्पूर-मित्यादिस्वरूपाख्यस्तोत्रस्य वामाचारविहित नानाव्याख्यासत्त्वेऽपि दिव्यवीर मयो भावः कलौ नास्ति कदाचन। इत्यादि।

End. एवं स केलिकलया खेलया प्रतिजनुः प्रतिजन्मनि भक्तो भवति । स च चिरं चिरकालं जीवन्मुक्तो भवति । एतत् श्लोकद्वयलब्धं यत् यत् फलं तत्तु साधकस्तोत्रोत्तरनिष्ठामेदेनोत्तरोत्तरं बोद्धव्यमिति तात्पर्य्यार्थः ॥

Colophon. इति श्रीमन्महाकालविरचित-श्रीमद्दक्षिणकालिकास्वरूपाख्यस्तोत्रराजपश्चाचारविहितटीका समाप्ता ॥ ० ॥ शकाब्दाः । १७८१ ।

विषयः । कर्पूरादिस्तोत्रनाम्ना प्रसिद्धस्य कालिकास्वरूपाख्यस्तोत्रस्य पश्चाचारविहिता व्याख्या ॥

No. 160. दत्तकतत्त्वनिर्णयः. By हरिनाथमिश्रः. Substance, country-made paper, 14 × 3 inches. Folia, 15. Lines, 5 on a page. Extent, 234 çlokas. Character, Bengali. Date, ? Place of deposit, Varasikurā, District Mayamansimha, Paṇḍita Jayanātha Tarkālaṇkāra. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

अशिवस्य शिवस्य शिवस्य पदं
पदमस्तसमस्तनशस्तपदम् ।
प्रणिपत्य विगत्य विशेषपद-
त्वनपत्यमपत्यविशेषविधिम् ॥
यत्तु श्रीहरिनाथशर्म्मणा इह ग्रन्थे प्रहृष्टैः सता-
मामोदाय विचाय मत्सरमिदं श्रीध्यन्निधीरायत । (?)
ग्रन्थं दत्तकतत्त्वनिर्णयमिमं शुद्धिः सुलभ्या तथा
गाङ्गेयस्य धनञ्जयेन विदिता शुद्धिर्यथा मानवैः ॥
न कार्य्यं मात्सर्य्यं परमकृतिनो ग्रन्थविषये
कृपापारावारा भवत भवतः प्रार्थय इदम् ।
न दूष्यं वै दूष्यं निजमपि च यत् कुत्सितवचः
... ... मम भवतु मोदाय भवताम् ॥

तत्र मरीचिः ।

अनपत्यस्य लोकेऽस्मिन् गतिः काच न विद्यते ।
तस्मात् तेन प्रकर्त्तव्यः पुत्रः प्रतिनिधिः सदा ॥
एवञ्च कन्याया अपि अपत्यत्वात् तत्सत्त्वेऽपत्यसामान्याभावरूपानपत्यता विरहात् । इत्यादि ।

End. स पितृभ्यः पिता दद्यात् सुतसंस्कारकर्म्मसु ।
पिण्डाम्भोदकनात् तेषां तस्याभावेऽपि तत्क्रमात् ॥ (?)
पिता कुर्य्यात् तदन्यो वा तस्याभावेऽपि तत्क्रमात् ॥
इति वचनाभ्यां मृतपितृकौरसपुत्रस्येव संस्कार्य्यक्रमेण सपिण्डादिभिः कर्त्तव्या इति ।
विरुद्धं गुरुवाक्यस्य यदत्र भाषितं मया ।
तत् चन्तव्यं बुधैरेव दत्तकत्त्वबुभुत्सया ॥

Colophon. इति हरिनाथमिश्रविरचितो दत्तकतत्त्वनिर्णयः समाप्तः ।

विषयः । दत्तकविध्यादिनिरूपणमुखेन तद्ग्रहणविध्यादिनिरूपणम् ।

No. 161. दत्तकदीधितिः. By अनन्तभट्टः. Substance, country-made paper, 19 × 4 inches. Folia, 11. Lines, 7 on a page. Extent, 351 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāti, Paṇḍita Haraprasāda Çāstrī. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
श्रुतिस्मृतिपुराणादिमीमांसान्यायविस्तरम् ।
विचार्य्यानन्तभट्टेन क्रियते दत्तदीधितिः ॥
तत्रादौ दत्तकग्राह्याग्राह्यत्वविवेचनम् । इत्यादि ।

End. ततश्च प्रतिग्रहीत्रा उपनयनान्तसंस्कृतस्यौरससमानांशभागित्वं दत्तकस्य तत्कर्तृकसकलतदन्तसंस्काररहितस्य तु विवाहमात्रधनलाभो नान्यधनलाभः । सत्यौरसे कतिपयसंस्कारलाभे चतुर्थांशलाभ इति व्यवस्था । इति दायादनिर्णयः । दत्तकपुत्राणामपि स्वीकार उक्तविधिना कार्य्यः । वक्ष्यामि पुत्रसंग्रहमित्यादिगतपुत्रपदस्य पुमान् पुत्र इत्यादिविवक्षाभावात् इतिहासपुराणेषु कन्यादत्तकोक्तेश्च पत्न्यभावे सा रिक्थं लभते दुहितृत्वादिति शिवम् ।
सतां सन्तोषसिद्ध्यर्थमिति दत्तकदीधितिः ।
अकार्य्यनन्तभट्टेन तेन तस्य मुदेऽस्तु सा ॥

Colophon. इति महामहोपाध्याय श्रीमदनन्तभट्टविरचिता दत्तकदीधितिः सम्पूर्णा ।
* श्रीरस्तु मयि लेखके ॥

विषयः। अथ प्रथमं दत्तकग्राह्याग्राह्यत्वादिविचारः। ततो दत्तकग्रहणप्रयोगहोमादिनिर्णयः। दत्तकानां विवाहाद्युपयोगिगोत्रादिनिर्णयः दत्तकस्यापिण्ड्यविवेचनम्। धनविभागनिर्णयश्च॥

No. 162. दत्तकोज्ज्वलः. By वर्द्धमानः. Substance, country-made paper, 20 × 3 inches. Folia, 7. Lines, 5 on a page. Extent, 408 çlokas. Character, Bengali. Date, ? Place of deposit Naihāṭi, Paṇḍita Haraprasāda Çāstri. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय॥

निधाय हृदये कालीचरणं सर्व्वसिद्धिदम्।
विप्रश्रीवर्द्धमानेन क्रियते दत्तकोज्ज्वलः॥
मन्वादिवाक्यमास्थाय परस्परविरोधिनाम्।
विदुषां संशयच्छित्त्यै सिद्धान्तोऽत्र प्रकाश्यते॥

इह यद्यपि प्रथमपुत्रोत्पादनेनैव पितॄणामनृणत्वं मन्वादिभिरभिहितं तथापि तत्पुत्रमरणे प्रपौत्रपर्य्यन्तरहितस्याजातपुत्रस्य च पिण्डोदकक्रियाद्यर्थं पुनः पुत्रकरणमावश्यकं यदाह मनुः। इत्यादि।

End. दत्तकस्य उपरितनपुरुषत्रयसन्ततिजनने मरणे वा त्रिरात्राशौचमिति। दत्तकस्य जनककुले सम्बन्धाभावतया अशौचं नाप्नोति। सगोत्रदत्तकस्य पत्नीत्वकुले सम्पूर्णाशौचमिति कश्चित्, दत्तकपुत्रस्य औरसतया सम्पूर्णाशौचं पार्व्वणाधिकारित्वञ्च इति। दत्तकस्य पुनरुत्पन्नप्रथमौरसेन सार्द्धं अंशत्रयस्यैकांशभागित्वमिति। दत्तकस्य पुनरुत्पन्नप्रथमौरसेन सार्द्धं समांशित्वमित्यपि कश्चित्।

Colophon. इति महामहोपाध्याय-श्रीवर्द्धमानकृत दत्तकोज्ज्वलः समाप्तः॥ श्रीगुरवे नमः।

विषयः। दत्तकग्रहणविध्यादयः संक्षेपेण प्रकाशिताः। मतमतभेदाश्च प्रदर्शिताः। औरसपुत्रेण सार्द्धं दत्तकस्य धनविभागश्च सम्यक् विचार्य्य विवेचितः।

No. 163. दानकौमुदी, (क्रियाकौमुदीग्रन्थीया). By गोविन्दानन्दकविकङ्कणाचार्य्यः. Substance, country-made paper, 13 × 2½ inches. Folia, 119. Lines, 5 on a page. Extent, 2,231 çlokas. Character, Bengali. Date, Sk. 1533. Place of deposit, District Vāñkuḍā, Viṣṇupura, Rāmavallabha Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning. (अस्य प्रथमपत्रत्रयं नास्ति तेन चतुर्थपत्रप्रारम्भवाक्यं लिखितम् ।)
छन्दोगस्तु कइदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविशत् कामेन त्वां प्रतिगृह्णामि कामैतत्ते इति पठित्वा अमुकद्रव्यं अमुकदैवतमिति वदेत् । इदमत्र विचार्य्यते । मनसा सङ्कल्पयति वाचाभिलपति कर्म्मणा चोपपादयतीति श्रुतिवचनादमुक-कामनया मयेदमनुष्ठातव्यमिति सङ्कल्पितस्य कर्म्मणो वाचाभिलापे कर्त्तव्ये एकयुगवहद्वाविन्यायेन फलस्याभिलापो दुर्निवारः । तथाच गौतमः ।
अम्मार्जानुकरं कृत्वा सकुशं सतिलोदकम् ।
फलं समभिसन्धाय प्रदद्यात् श्रद्धयान्वितः ॥ इत्यादि ।

End. ॐ पूर्णादर्व्वीत्यन्तं ॐ सप्तते इत्यन्तं ॐ पुनस्त्वे इत्यन्तं स्वाहान्तेन मूलमन्त्रेण च पूर्णाहुतिं समाप्य ब्रह्मदक्षिणां दत्वाग्निं विसर्जयेत् । ॐ समुद्रं गच्छ स्वाहेतिमन्त्रेणाग्निं विसृजेत् । ॐ दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः पृथिवीं भस्मना पृण स्वाहा इति वह्निं शीतलयेत् । इत्यग्निसंस्कारविधिः ॥
अग्नेर्नामान्युक्तानि कपिलपञ्चरात्रे ।
लौकिके पावको ह्यग्निः प्रथमः परिकीर्त्तितः ।
अग्निस्तु मारुतो नाम गर्भाधानेऽभिधीयते ॥
पुंसवने चन्द्रनामा शुङ्गात् (?) कर्म्मणि शोभनः ।
सीमन्ते मङ्गलो नाम प्रगल्भो जातकर्म्मणि ॥
नाम्नि वै पार्थिवो नाम प्राशने च शुचिस्तथा ।
सत्यनामाथ चूडायां व्रतादेशे समुद्भवः ॥
गोदाने सूर्य्यनामेति केशान्ते ह्यग्निरुच्यते ।
वैश्वानरो विसर्गे तु विवाहे योजकः स्मृतः ॥
चतुर्थ्यान्तु शिखी नाम धृतिरग्निस्तथापरे ।
आवसथ्ये भवो ज्ञेयो वैश्वदेवे च पावकः ॥
पूर्णाहुत्यां मृडो नाम शान्तिके वरदस्तथा ।
पौष्टिके बलदश्चैव क्रोधोऽग्निरभिचारिके ॥
प्रायश्चित्ते विधुश्चैव पाकयज्ञे हुताशनः ।
देवानां हव्यवाहस्तु पितृणां कव्यवाहनः ॥
वश्यार्थे कामदो नाम वनदाहे तु दूतकः ।
कोष्ठे तु जठरोऽग्निस्तु क्रव्याद्मृतके तथा ॥

समुद्रे वाड़वो ह्यग्निः क्षये सम्वर्त्तको भवेत् ।
लक्षहोमे च वह्निः स्यात् कोटिहोमे हुताशनः ॥
मत्स्यसूक्तप्रतिष्ठायां लोहितश्च प्रकीर्त्तितः ।
... ... वास्तुयागे प्रजापतिः ॥
जलाशयप्रतिष्ठायां वरुणः समुदाहृतः ।
एतानि होमे नामानि ज्ञातव्यानि हविर्भुजः ॥
आहूय चैव होतव्यं यो यत्र विहितोऽनलः ॥
गणपतिभट्टतनुजो गोविन्दानन्दपण्डितः श्रीमान् ।
समहृत सन्तोषार्थं सत्त्ववतां दानकौमुदीमेताम् ॥
सर्व्वान्तर्यामिने तस्मै गोविन्दाय नमो नमः ।
यत्रानुरागं भाग्यन्ति यत्कृपाभिर्विपश्चितः ॥ * ॥

Colophon. इति गोविन्दानन्दकविकङ्कणाचार्य्यविरचितायां क्रियाकौमुद्यां दानकौमुदी नाम द्वितीयो धामः समाप्तः ॥ श्रीकृष्णाय नमः ॥ शक १५३२ सन्नाब्द ९१९ ॥ * ॥

विषयः । विवाहादिप्रयोगादिनिरूपणम् । दानवाक्यविचारमुखेन दानविध्यादिनिरूपणम् । विचारमुखेन आद्यमासादिपदोल्लेखसार्थक्यादिकथनम् । रजतकाञ्चनधेनुदानादिविधिप्रयोगादिनिरूपणम् । कूपजलाशयादिप्रतिष्ठादिप्रमाणप्रयोगनिरूपणम् । होमादिनिरूपणञ्च ।

No. 164. दानकेलिकौमुदी । Substance, country-made paper, 13 x 4 inches. Folia, 33. Lines, 9 on a page. Extent, 847 çlokas. Character, Bengali. Date, ? Place of deposit, District Vāñkuḍā, Kuncekol, Bābu Yogīndranātha Simha Deva. Appearance, old. Verse and prose. Incorrect.

Beginning. नमो गोपीजनवल्लभाय ।
अन्तः स्मेरतयोज्ज्वला जलकणव्याकीर्णपक्ष्माङ्कुरा
किञ्चित् पाटलिताञ्चला रसिकतोत्सिक्ता पुरोदुञ्चती ।
रुद्धायाः पथि माधवेन मधुरव्याभुग्नतारोत्तरा
राधायाः किलकिञ्चितस्तवकिनी दृष्टिः श्रियं वः क्रियात् ॥
अपि च ।
विधुरपि कलयन् सदाभिवृद्धिं
गुरुरपि गौरवचर्य्यया विहीनः ।

मुकुरपचितवक्रिमापि युद्धो
जयति मुरद्विषि राधिकानुरागः ॥
नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । समन्तादवलोक्य हन्त कथं
मदीयनान्दीचन्द्रिकासन्दीपितभावबन्धुरा नन्दीश्वरगिरेरुपत्यकायां घूर्णते
सतां मण्डली । इत्यादि ।

End. राधाकुण्डतटीकुटीरवसतिस्त्यक्तान्यकर्म्मा जनः
सेवामेव समस्तमत्र युवयोर्यः कर्त्तुमुत्कण्ठते ।
वृन्दारण्यसमृद्धिदो द्रुतपदक्रीड़ाकटाक्षद्युते
स्वर्णाभस्फुररस्य माधवफणी तूर्णं विधेयस्त्वया ॥
कृष्णः सहर्षमभ्युपगमन् । भगवति तथास्तु तदेहि प्रातिस्विकाभीष्टकृतो
यः प्रयास इति निष्क्रान्ताः सर्व्वे ॥

Colophon. इति दानकेलिकौमुदी नाम भाणिका समाप्ता ॥
कथिता सुमनःसुखदा यस्य निदेशेन भाणिकात्र ।
गेयं तस्य मम प्रियसुहृदः कण्ठतटीं समलङ्कुरुताम् ॥
गते मन्वशते (?) शाके चन्द्रस्वरसमन्विते ।
नन्दीश्वरे निवसता भाणिकेयं विनिर्म्मिता ॥

विषयः । राधाकृष्णयोर्वृन्दावनकुञ्जविहारादिवर्णनात्मकं दृश्यकाव्यमिदम् ॥

No. 165. दानसागरः. By **वल्लालसेनः.** Substance, country-made paper, 18 x 5 inches. Folia, 242. Lines, 9 on a page. Extent, 11,434 çlokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Viçvakoṣa office, Bābu Nagendranātha Vasu. Appearance, tolerable. Prose and verse. Incorrect.

Beginning. ॐ नमो गणेशाय ॥
ये साक्षाद्वनीतलाम्बरभुजो वर्णाश्रमज्यायसां
येषां पाणिषु निःक्षिपन्ति कृतिनः पाथेयमामुष्मिकम् ।
यद्वक्त्रोपनताः पुनन्ति जगतीं पुण्याश्रिवेदीगिर
स्तेभ्यो निर्भरभक्तिसम्भ्रमनमन्मौलि द्विजेभ्यो नमः ॥
छन्दोभिस्सैकरम्भेण श्रुतिनियमगुरुब्रह्मचारित्रचर्य्या-
मर्य्यादागोत्रशैलः कलिचकितसदाचारसञ्चारसीमा ।

सद्वृत्त-स्वच्छवन्मादैवपुरुषगुणाच्छिन्नसन्तानधारा-
वर्षैर्मुक्तामरश्रीनिवास सद्मालभूषणं सेनवंशः ॥ (?)
तत्रालङ्कृत-सपैथः (?) स्थिरघनच्छायाभिरामः सतां
स्वच्छन्दप्रणयोपभोगसुलभः कल्पद्रुमो जङ्गमः ।
हेमन्तः परिपन्थिपङ्कजसरः सर्गस्य नैसर्गिकै
रुद्गीतः स्वगुणैरुदात्तमहिमा हेमन्तसेनोऽजनि ॥
तदनुजविजयसेनः प्रादुरासीद्वरेन्द्रो
दिशि विदिशि भजन्ते यस्य वीरध्वजत्वम् ।
शिखरविनिहिताज्ञा वैजयन्तीं वहन्तः
प्रणतिपरिगृहीताः प्रांशवो राजवंशाः ॥
सर्व्वाशाः परिपूरयन्नुपचितश्रीदानवारां घनै-
रासारैरभिषिक्तनिर्म्मलयशः शालेयभूमण्डलः ।
दैन्योत्तापहृतामकालजलदः सर्व्वोत्तरः क्ष्माभृतां
श्रीवल्लालनृपस्ततोऽजनि गुणाविर्भावगौड़ेश्वरः ॥
वेदार्थस्मृतिसंग्रहादिपुरुषः श्लाघ्यो वरेन्द्रीतले
निस्तन्द्रोज्ज्वलवीचिनाशनयनः सारपूतं ब्रह्मणि । (?)
षट्कर्म्मा भवदार्य्यशीलनिलयः प्रख्यातसत्यव्रतो
वृत्रारेरिव गीष्पतिर्नरपतेरस्यानिरुद्धो गुरुः ॥
व्याख्यातसकलपुराणस्मृतिसारः श्रद्धया गुरोरस्मात् ।
कलिकल्मषो वदानं (?) दाननिबन्धविधाकामोऽपि ॥
दुरधिगमधर्म्मनिर्णयविषयाध्यवसायसंशयस्तिमितः ।
नरपतिरयमारेभे ब्राह्मणचरणारविन्दपरिचर्य्याम् ॥ इत्यादि ।

End. अत्र धान्याद्यपेक्षितं द्रव्यं विष्णवे देयम् । तथाच विष्णवे दानान्निवृत्तौ विष्णुधर्म्मोत्तरे ।
यत्किञ्चिद्देव देवाय दद्याद्भक्तिसमन्वितः ।
तदेवाक्षयमाप्नोति स्वर्गलोकञ्च गच्छति ॥

Colophon. इति महाराजाधिराज निःशङ्कशङ्कर श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे वासुदेवसम्प्रदानकदानावर्त्तः ॥
धर्म्मस्याभ्युदयाय नास्तिकपदोच्छेदाय जातः कलौ
श्रीकान्तोऽपि सरस्वतीपरिवृतः प्रत्यक्षनारायणः ।

पादाम्भोजनिषण्णविश्ववसुधासाम्राज्यलक्ष्मीयुतः
श्रीवल्लालनरेश्वरो विजयते सद्वृत्तचिन्तामणिः ॥
दाराणामरिरेत्य सम्भ्रमपरित्यक्तान्नपानाशनै-
र्वक्त्रोदीरितकाकुकातरगिरां प्राणेशभिक्षाञ्जलौ ।
येनाच्छिद्य यशांसि दुर्जयजरद्दंशार्जितावेक्षणा-
दोर्लीलादलितो रणे करुणया त्यक्तः स गौडेश्वरः ॥
विद्वद्भिः शम्भुकामैः कलिकलुषमलच्छेदिनो दानधर्मा-
नन्योन्यामर्षदोषप्रणिहितमतिभिस्तैर्नियुक्ता द्विजाग्र्यैः ।
अस्माच्चीर्णेनमेषां मतमनतिरस्यमस्यङ्निबन्धं
सद्वल्लालसेनामलकुलकुमुदामोदचन्द्रो नरेन्द्रः ॥
तस्यैष कर्म्म नियताखिलजीवलोक-
तापत्रयोपशमनः पुरुषोत्तमस्य ।
(?) सुम्भेनापगतां कलिपङ्कनोदी
श्रीदानसागरमयः पयसां प्रवाहः ॥
यद्यद्विचिन्तमैहिकं सुकृतिनां श्रेयो यदामुष्मिकं
सर्व्वं तत्तदिहाश्रमेण सुलभं निर्णीय निःसंशयः ।
श्रीवल्लालनरेन्द्रवर्णित मन्वलगं सर्व्वार्थद- (?)
मेतं संप्रति दानसागरमविश्रद्धैकभाजो जनाः ॥

Colophon. इति परममाहेश्वरनिःशङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचितः श्रीदानसागरः समाप्तः ॥ ० ॥

विषयः । अत्र प्रथमं ब्राह्मणप्रशंसा । दानप्रशंसा । पात्रप्रशंसा । ततो दानपात्रापात्रनिरूपणम् । सात्त्विकराजसादिदानफलम् । दानकालादिनिरूपणम् । अथ तीर्थनिरूपणमुखेन तत्प्रशंसादिकथनम् । देयस्वरूपनिरूपणम् । दानापवादः । दानविधिः । नक्षपरिभाषा । होमपरिभाषा । द्रव्यगणपरिभाषा । मानपरिभाषा । तुलापुरुषादिनिरूपणम् । हिरण्यगर्भमहादानादिनिरूपणम् । ब्रह्माण्डमहादानम् । गोसहस्रदाननिरूपणम् । कामधेनुमहादानम् । हिरण्याश्वमहादानम् । अश्वरथदानम् । हेमहस्तिरथमहादानम् । पञ्चलाङ्गलमहादानम् । धरादानम् । विश्वचक्रमहादानम् । महाकल्पलतामहादाननिरूपणम् । रत्नधेनुमहादानम् । महाभूतघटदानम् । प्रथमावर्त्ते एते विषयाः सन्ति । अथ द्वितीयावर्त्तप्रारम्भः । अत्र च दशप्रकारमेरुदाननिरूपणम् । तृतीयावर्त्ते अलङ्कृतगवीदानादिनिरूपणम् । चतुर्थावर्त्ते अलङ्कृतबद्धगवीदाननिरूपणम् । पञ्चमावर्त्ते अलङ्कृतवृषदानादिनिरूपणम् । षष्ठे गवाह्निकदाननि-

पणम्। सप्तमावर्त्ते भूमिदाननिरूपणम्। अष्टमे आसनदानम्। नवमे वारिदानप्रशंसा। दशमे तैजसदानादि। एकादशे जलपात्रदानम्। द्वादशे अन्नदानादि। त्रयोदशे भक्ष्य-दानम्। चतुर्द्दशे लवणदानम्। पञ्चदशावर्त्ते घृतदानम्। षोड़शसप्तदशयोः दधिक्षीर-दानादि। अष्टादशोनविंशयोः मन्त्रदानादिनिरूपणम्। विंशैकविंशयोः मधुवनस्पतिदान-निरूपणम्। द्वाविंशे अभ्यङ्गदानम्। २३ शे गन्धदानम्। २४ शे धूपदानम्। २५ शे अनु-लेपनादिदाननिरूपणम्। २६ शे पुष्पदानम्। २७ शे वस्त्रदानम्। २८ शे यज्ञोपवीतदानम्। २९ शे सुवर्णदानम्। ३० शे रौप्यदानम्। ३१ शे दीपदानम्। ३२ शे पुराणदानम्। ३३ शे कल्पदानम्। ३४ शे प्रेष्यदानम्। ३५ शे शस्यदानादयः। ३६ शे तिलदानम्। ३७ शे इक्षुदानादि। ३८ शे सम्भारदानम्। ३९ शे कृष्णाजिनदानम्। ४० शे छत्रदानम्। ४१ शे पादुकादानम्। ४२ शे यानदाननिरूपणम्। ४३ शे त्रिचत्वारिंशदावर्त्ते गजदानादि-निरूपणम्। ४४ शे महिषदाननिरूपनम्। ४५ शे आरोग्यदानम्। ४६ शे अभयदानम्। ४७ शे मासोपलक्षितनियतदानम्। ४८ शे अनियततिथिदानम्। ४९ शे नक्षत्रादिदाननिरूपणम्। ५० शे मासव्याप्तिदानम्। ५१ शे संक्रान्तिदानादिनिरूपणम्। ५२ शे वत्सरे दाननिरूपणम्। ५३ शे प्रकीर्णदानादिनिरूपणम्। ५४ शे सामान्यदैवतसम्प्रदानकदानादि। ५५ शे सूर्य्यसम्प्रदानक-दानादि। ५६ शे महेश्वरसम्प्रदानकदानादि। ५७ शे वासुदेवसम्प्रदानकदानादिनिरूपणमिति।

No. 166. दायकारिका. By मोहनचन्द्रवाचस्पतिः. Substance, country-made paper, 20 x 4 inches. Folia, 3. Lines, 7 on a page. Extent, 19 çlokas. Character, Bengali. Date, ? Place of deposit, District Dhākā, Vikramapura, Ichhāpurāgrāma, Paṇḍita Vrajanātha Vidyāratna. Appearance, tolerable. Verse. Correct.

Beginning.

नत्वा गुरून् समासेन दायभागस्य सारतः।
द्विजमोहनचन्द्रेण कारिका लिख्यते मया॥
अथ स्त्रीधनाधिकारक्रमनिर्णयः।
कन्याधनेऽधिकारः स्यात् सोदरभ्रातुरग्रतः।
तदभावे मातुरेव पितुः स्यात् तदनन्तरम्॥
वरदत्तातिरिक्ते तु वाग्दत्ताकन्यकाधने।
एवं क्रमेणाधिकारो ज्ञातव्यः पण्डितैः सदा॥ इत्यादि।

End.

वानप्रस्थो नवैदेकतीर्थसेवी च नापरः।
प्राप्नुयाच्च यतिधनं सच्छिष्यो नापरः क्वचित्॥

स नैष्ठिकब्रह्मचारी धनमाचार्य्ये आप्नुयात् ।
उपकुर्व्वन् ब्रह्मचारिधनं पित्रादि वा नयेत् ॥

Colophon. इति श्रीमोहनचन्द्रविद्यावाचस्पतिविरचिता दायभागकारिका समाप्ता ।

विषयः । संक्षेपतो दायाधिकारक्रमकथनम् ।

No. 167. दायभागसिद्धान्तकुमुदचन्द्रिका. By श्रीमदच्युतचक्रवर्त्ती. Substance, country-made paper, 16 × 4 inches. Folia, 35. Lines, 10 on a page. Extent, 875 çlokas. Character, Bengali. Date, Sk. 1693. Place of deposit, Viṣṇupura, District Vāŭkuḍā, Paṇḍita Mahendranātha Bhaṭṭācāryya. Purchased by Government of India, Calcutta. Appearance, old. Prose. Generally correct.

Beginning. ॐ कृष्णाय नमः । अपरे ब्रह्मणाश्रुतमिति मनुनैव ब्रह्मावतारत्वमुक्तमिति तद्वाचकं मनुपदमतः प्रसङ्गान् मङ्गलमाचरन्नर्थमाविष्करोति मन्वादीनि । स्वशब्दनिर्द्देशेन मनोरादिपदनिर्द्दिष्टेतरविधात्वभ्यो गौरवभावेदयदर्थादितरस्मृतिविरोधात् तत् स्मृते ... ... मभिधितं अविमृश्य यथार्थतात्पर्य्याभिसन्धाय विवादः अपुत्रधनं प्रथमं पितुरेव भ्रातुरेव पत्न्या एवेत्यादि परस्परविरुद्धवाद इत्यर्थः । बुधानां विवादो विरुद्धार्थवाक्यं संशयः तेषां प्रबोधाय यथार्थतात्पर्य्यनिश्चयार्थं संशयनिरासार्थं वा एवं दुरूहविषयाकर्णने सुमतयोऽवहिताः केवलमधिकुर्व्वन्तीति उक्तं सुधिय इति अर्थः स्वर्गनरकाभावसाधनत्यागस्तेयनिवृत्तिमूलसंशयविषमस्वत्वतदभावान्यतरनिर्णयो ज्ञेयः । उद्देशानन्तरं लक्षणेन दायभागशब्दार्थं निर्णेतुं प्रतिजानीते अथेति । विभागोऽर्थस्येति विभागः स्वत्वनिर्णयानुकूलो व्यापारः अर्थस्यानवच्छिन्नधनस्य यथावच्छेदं तदवच्छिन्नधनरूपं यद्वा अर्थस्येति सप्तम्यर्थे षष्ठी आर्षत्वात् तेन यस्मिन्नर्थे इति सामानाधिकरण्येनान्वयः । इत्यादि ॥

End. यथा चोक्तम् ।
अनुमानाद्वरः साक्षी साक्षिभ्यो लिखनं गुरु ।
अविरुद्धा त्रिपुरुषी भक्तिस्तेभ्यो गरीयसीति ॥
पाकधर्माः वैश्वदेवधर्म्मादयः । आगमो धनागमनोपायः क्रमादिर्व्ययो द्रव्यविनियोगः प्रातिभाव्यं लग्नकालम् । ... ... न्यायस्येति न्यायो व्यापारज्ञानव्याप्यज्ञानयोः कार्य्यकारणभावः नाचार्य्येति

श्रीधराचार्य्यैर्यदुक्तं तदेव शास्त्रार्थो नान्यो ... । यथा, ये दायभागप्रकरणे प्रकृतज्ञान ...... तेषां रञ्जनमनुरागोऽत्र ग्रन्थे नास्माभिः कर्त्तुं शक्य इत्यर्थः । तर्हि किमर्थं प्रयास इत्यत आह किन्त्विति प्रमाणाधीनज्ञानानां प्रमाणदर्शिनां मुनीनां सम्वादमात्रकृतये वाक्यविरोधपरिहाराय कृतिनः पण्डितस्य मम यत्न इत्यर्थः । ... ...

इति बहुविधेति सुबोधम् ॥

Colophon. इति श्रीमदच्युतचक्रवर्त्तिविरचिता दायभागसिद्धान्तकुमुदचन्द्रिका समाप्ता ॥ शकाब्दा १६९३ । श्रीहरिः शरणम् ।

विषयः । जीमूतवाहनकृतदायभागस्य व्याख्यानम् ।

No. 168. दायभागार्थदीपिका. By रघुरामशिरोमणिः. Substance, country-made paper, 12 × 5 inches. Folia, 8. Lines, 8 on a page. Extent, 232 çlokas. Character, Bengali. Date, ? Place of deposit, Hālisahar, Valdeghātā, Bābu Giriça Candra Gaŋgopādhyāya. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

विद्याभूषणविख्यातः श्रीमान् रघुमणिः सुधीः ।
सर्व्वदेशेषु विख्यातः सर्व्वशास्त्रविशारदः ॥
विप्रश्रीरघुरामेण तच्छात्रेणातियत्नतः ।
क्रियते दायभागार्थदीपिका दृष्टिदीपिका ॥
जीमूतवाहनकृते दायभागेऽब्धिदुस्तरे ।
अर्थमालोच्य बहुधा संक्षेपेण प्रकाशिता ॥
सर्व्वव्यवस्थापद्याली प्रणालीपरिपूजिता ।
विदुषामपि चान्येषां सुखबोधाय कल्पिता ॥
गुरुणा तेन कृतिना सन्तुष्टेन विवेचिता ।
लुईष श्रीनिमिति कीर्त्तितः साहेब सुधीः
विद्याख्यस्तु विचक्षणो व्यवहृतौ दाने च शीले वरः ।
तेनादिष्टतया मया विरचिता स्वार्थे परार्थे परा
योऽयम्वन्द्य सुफुल्लसागरकुले रामेश्वरस्यान्वयः ॥

माध्वचर्यं बहुविधं निपुणं विभाव्य
या भाविता कृतिरियं सुधिया भवद्भिः
किञ्चित् कृपाञ्चितमनोऽत्र निधेयमेव
श्रीमत् सुखं मम तदा सफलप्रयासः ॥
पित्रादीनां स्वत्वनाशे यद्धनं स्यात् सुतादिगम् ।
पुत्रत्वादिकसम्बन्धात् तत् दायः परिकीर्त्तितः ॥

End. विभागज्ञानं विभागधर्म्मनिर्णयौ लिखितेन च साक्षिणा व्यवहारेणापि तथा क्रयविक्रयादिना युक्त्या विभक्तता ज्ञेया । पृथगायव्ययादिभिः ।
तत्र साक्षी सपिण्डोऽतः सम्बन्धी तत् परः परः ।
देशजातिकुलश्रेणी-धर्म्मान् वीक्ष्य महीपतिः ।
तेन तेनैव धर्म्मेण तत्र तत्र विनिर्णयेत् ॥

Colophon. इति श्रीरघुमणिविद्याभूषणभट्टाचार्य्याधीतशास्त्र श्रीरघुरामशिरोमणिभट्टाचार्य्यकृता दायभागार्थदीपिका पद्यावली समाप्ता ।

विषयः । संक्षेपेण दायभागार्थनिरूपणम् ।

No. 169. दीपिकावली. By हरिकृष्णः. Substance, country-made paper 14 × 2 inches. Folia, 49. Lines, 5 on a page. Extent, 796 çlokas. Character, Bengali. Date, ? Place of deposit, Candrakīrtigrāma, Post office Vaidyervāzār, District Ḍhākā, Paṇḍita Bhavānikānta Nyāyaratna. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
कर्णपूरीकृताखण्डनमेरुनवपल्लवम् ।
नन्दीश्वरमहं वन्दे पार्व्वतीप्राणनायकम् ॥
को विद्यामो ... ... ऽज्ञानां ज्ञानदायिनी ।
हरिकृष्णेण धीरेण क्रियते दीपिकावलिः ॥
सर्व्वकर्म्मण्युपादेया विशुद्धिश्चन्द्रतारयोः ।
तच्छुत्वा चैव सर्व्वेषां ग्रहाणां फलदातृता ॥
अस्यार्थः । सर्व्वकर्म्मणि विवाहादौ चन्द्रतारयोः शुद्धिरुपादेया ग्राह्या तत् शुत्वा सर्व्वेषां ग्रहाणां फलदातृता फलदातृत्वम् ॥ यतः सर्व्वे ग्रहास्तदशुद्धौ शुद्धा अपि न शुभफलदा इत्यर्थः ।

चन्द्रताराशुद्धिप्रशंसा ।

सप्तमोपचयाश्चस्थश्चन्द्रः सर्व्वत्र शोभनः ।
शुक्लपक्षे द्वितीयस्तु पञ्चमो नवमस्तथा ॥

अस्यार्थः । सर्व्वत्र शुक्लपक्षे कृष्णपक्षे च शोभनः शुक्लपक्षे पुनः द्वितीय-पञ्चमनवमस्थोऽपि शुभः ॥ आद्यस्य इति । अत्र जन्मनक्षत्रगतादपि नाडीनक्षत्रदोषो नास्ति । तथाच वराहः ।

जन्मनक्षत्रगतश्चन्द्रः प्रशस्तः सर्व्वकर्मसु ।
... ... ॥

चन्द्रशुद्धिः ।

सितशनिकुजजीवार्कास्त इन्दुर्नराणां
व्यय ...... नवमस्थो ... ... ।
सुसुतनिधनगश्चेन्मृत्युपुत्रार्थगोऽपि
प्रचुरशुभफलं स्याद्वामवेधेन शुद्धिः ॥ इत्यादि ।

End. अथ वर्षाज्ञानम् ।

पञ्चम्यादिषु पञ्चसु कुम्भार्के भवति यदि रोहिणीयोगः ।
अधमतमाधमाधम ... ... मध्यमसां पातः ॥

अस्यार्थः । कुम्भार्के फाल्गुने यदि शुक्लपक्षस्य कृष्णपक्षस्य वा पञ्चम्यादिषु यदि रोहिणीयोगो भवति एतदुक्तं भवति पञ्चम्या रोहिणीयोगे अधमतमा वर्षा ज्ञेया षष्ठ्या योगे अधमा सप्तम्या योगे मध्यमा एवं यथासंख्येनान्वयः ॥

Colophon. इति श्रीहरिकृष्णकृतिना कृता दीपिकावलिः समाप्ताः ॥ शुभमस्तु शकाब्दाः । १६३१ ॥

विषयः। अत्र प्रथमं चन्द्रताराविशुद्धिनिरूपणम् । चन्द्रताराशुद्धिप्रशंसा । अथ जन्मादिसंज्ञानिर्णयः । राशिविभागनिर्णयः । लग्ननिर्णयः । राशिभोगनिर्णयः । दिगधिपति-निर्णयः । नक्षत्रनामनिर्णयः । योगनिर्णयः । योगानां वर्जनीयभागकथनम् । नन्दादिसंज्ञा-निर्णयः । शुभाशुभयत्वफलनिर्णयः । वारवेलानिर्णयः । उत्पातयोगनिर्णयः । अमृतयोग-निर्णयः । नक्षत्रामृतयोगनिर्णयः । अमृतयोगनिर्णयः । अमृतयोगप्रशंसा । उग्रादिसप्तगण-निर्णयः । कालशुद्धिनिर्णयः । वर्जनकालनिर्णयः । अभिचारवादनिर्णयः । विवाहादियामित्र-वेधसंचिप्तनिर्णयः । वारनिर्णयः । वैवाहिकतिथिनिषेधनिर्णयः । गोधूलिनिन्दा । गणफल-निर्णयः । नाडीनक्षत्रयोगे मरणनिर्णयः । षड्ष्टकदोषनिर्णयः । नववध्वागमननिर्णयः

पुनर्विवाहनिर्णयः । निषेकनिर्णयः । पञ्चामृतनिर्णयः । नवान्ननिर्णयः । विद्यारम्भनिर्णयः । उपनयननिर्णयः । स्वप्रवास-वीजवपन-गृहारम्भ-गृहप्रवेशनिर्णयः । अन्नादिविचारनिर्णयः । गण्डस्थाननिर्णयः । यात्राविधिनिर्णयः । योगिनीफलनिर्णयः । नक्षत्रशूलनिर्णयः । काल-निर्णयः । विषुवादिसंक्रान्तिनिर्णयः । धान्यमूल्यज्ञाननिर्णयः । वर्षाज्ञाननिर्णयादिसूचककवचन-समूहसंपन्नः तेषां व्याख्यानञ्च ॥

No. 170. दुर्गापूजापद्धतिः । (वलिनारायणीया) Substance, country-made paper, 14 × 3 inches. Folia, 57. Lines, 8 on a page. Extent, 1,995 çlokas. Character, Bengali. Date, Sk. 1774. Place of deposit, Vakaḍi, Teliveni, District Medinīpura, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ॥ अथ वलिनारायणीयदुर्गापूजापद्धतिः ॥ तत्र शुक्ल-षष्ठ्यां सायं समये निवर्त्तितनित्यक्रियः निष्कण्टक-वज्राद्यनुपहत-सफल-विल्ववृक्षसमीपं गत्वा तन्मूलस्थानं गोमयेनोपलिप्य प्राङ्मुख उदङ्मुखो वा उपविश्य ॥ ॐ कर्त्तव्येऽस्मिन् वार्षिकशरत्कालीनायाः श्रीजयदुर्गा-भट्टारिकायाः शुभवोधनामन्त्रणकर्म्मणि ॐ पुण्याहमित्यादि पुण्याहवाचनं कृत्वा स्वस्ति प्रवाच्य यथा अयं चणः शुभचणोऽस्तु तत्र तारावारयन्त्रनचत्रा-णाममृतेन योगोऽस्तु ... ... सङ्कल्पं कुर्य्यात् । यथा ॐ अद्या-श्विने मासि शुक्ले पचे षष्ठ्यां तिथौ अस्मिन् विशिष्टभारतभूप्रदेशे गणपति-दुर्गाभट्टारिकायाश्चरणसरोजसन्निधौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा अशेष-शत्रुचयोत्तरोत्तरराज्यलक्ष्मीवृद्धिपुत्रपौत्रधनधान्याद्यवच्छिन्नसम्पत्त्यपेक्षितसिद्धि विपच्छान्तिकामः श्वःकर्त्तव्यश्रीदुर्गाभट्टारिकागृहप्रवेशनपूर्व्वकभगवत्पुरा-णान्तर्गत ब्रह्मविहितशरत्कालीनसप्तम्यष्टमीनवमीपूजानिमित्तं गणपत्यादि-देवतापूजापूर्व्वकं वृन्दारकवृन्दवन्दितचरणारविन्दायाः वार्षिकशरत्काली-नायाः श्रीजयदुर्गाभट्टारिकायाः शुभवोधनामन्त्रणकर्म्माहं करिष्ये ॥ इत्यादि ।

End. ततो गृहमागत्य अच्छिद्रावधारणं कृत्वा कथानश्चित्येति शान्तिं कृत्वाशीर्व्वादं दत्वा ब्राह्मणेभ्यः सुहृद्भ्यश्च भोजनवस्त्रताम्बूलानि प्रदाय । देवी जयदुर्गा प्रचण्डा कालरात्री प्रीयतामित्युक्ता ते ब्राह्मणादयः प्रीयतामिति प्रति-वचनं दद्युः ॥

Colophon. इति बल्लिनारायणीये दुर्गापूजा समाप्ता ॥ ० ॥ शकाब्दाः । १७७४ ॥

विषयः । जयदुर्गाभट्टारिकायाः पूजाविधिः प्रयोगादिश्च ।

No. 171. दुर्गार्चातत्त्वम्. By रघुनन्दनभट्टाचार्य्यः. Substance, country-made paper, 14×3 inches. Folia, 30. Lines, 6 on a page. Extent, 652 çlokas. Character, Bengali. Date, ? Place of deposit, Serpur, District Mayamansiṃha, Paṇḍita Harasundara Tarkaratna. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमो गणेशाय ॥

प्रणम्य जगदीशानीं दुर्गां तत्प्रीतये बुधः ।
शरदर्चाविधिं तस्याः वक्ति श्रीरघुनन्दनः ॥
व्यवस्थायाः प्रपञ्चस्तु विज्ञेयस्तिथितत्त्वतः ।
पूजाविशेष सम्यक्त्वं ज्ञातव्यं कोविदैरिह ॥
अथ दुर्गार्चातत्त्वम् ।
शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ इत्यादि ।

End. अशुभं स्वप्नं दृष्ट्वा देवब्राह्मणपूजनम् ।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधिजलैः ॥

Colophon. इति वन्द्यघटीय-श्रीहरिहरभट्टाचार्य्यात्मज श्रीरघुनन्दनभट्टाचार्य्यविरचितं दुर्गार्चातत्त्वं समाप्तम् ॥ * ॥

विषयः । शरत्कालीनदुर्गापूजाव्यवस्था तत्र प्रमाणादिश्च ।

No. 172. दुष्टजलाशयप्रतिष्ठाविधिः । Substance, country-made paper, 13×3 inches. Folia, 3. Lines, 6 on a page. Extent, 54 çlokas. Character, Bengali. Date, ? Place of deposit, Yaçodal, District Mayamansiṁha, Kālācāṅd Bhaṭṭācāryya. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमः शिवाय । अथ दुष्टजलाशयप्रतिष्ठाविधिः लिख्यते ।
वापीकूपतडागेषु विपन्ने पशुमानुषे ।
तस्य शुद्धिं प्रवक्ष्यामि सपूर्व्वोक्ति यथाविधि ॥

End. ततः पूर्णां दशे (?) ब्राह्मणं विसृज्य दक्षिणां कृत्वा शान्त्युदकं दत्वाच्छिद्राव-धारणं कुर्य्यात् ।

Colophon. इति वशिष्ठपञ्चरात्रोक्तदुष्टजलाशयप्रतिष्ठाविधिः समाप्तः ॥ ० ॥

विषयः । वापीकूपतड़ागादिषु पशुमानुषादिशवसंस्पर्शे सति तस्य पुनः संशोधनविधिः तत्प्रयोगश्च ।

No. 173. देवविवाहपद्धतिः । Substance, country-made paper, 12 × 2½ inches. Folia, 5. Lines, 6 on a page. Extent, 92 çlokas. Character, Bengali. Date, Sk. 1690. Place of deposit, Serpur, Mādhavapura, District Mayamansiṃha, Paṇḍita Gaṃgādhara Tarkasiddhānta. Appearance, old. Prose. Correct.

Beginning. श्रीकृष्णाय नमः । अथ देवविवाहपद्धतिर्लिख्यते ।
उदीच्यां संस्थिते सूर्य्ये माघे वा मधुमासके ।
विवाहं कारयेद्देव्या गृहस्थेन विपश्चिता ॥
सुयोगे सुदिने वाथ तृतीयायां विशेषतः ।
वैशाखस्य सुरश्रेष्ठ विवाहं कारयेत् गुरुः ॥ इत्यादि ।

End. ततो दक्षिणां दत्वाच्छिद्रावधारणं कुर्य्यात् । ततः खट्टं देवं नीत्वा खट्टायां स्थापयित्वा षोड़शोपचारैस्तस्मिन् मिथुनं सम्पूज्य नानाविध-महोत्सवं कुर्य्यात् ।
एवं विधानतः कृत्वा कन्यादानफलं लभेत् ॥

Colophon. इति देवविवाहपद्धतिः समाप्ता । शुभमस्तु शकाब्दाः । १६९० ॥

विषयः । विष्णुप्रतिकृतिविवाहनिरूपणमुखेन तत्फलनिरूपणम् ।

No. 174. देवीगीता । Substance, country-made paper, 15 × 3 inches. Folia, 5. Lines, 6 on a page. Extent, 94 çlokas. Character, Bengali. Date, ? Place of deposit, Yaçodal, District Mayamansiṃha, Kālicandra Bhaṭṭācāryya. Appearance, old. Verse. Correct.

Beginning. ॐ नमः शिवायै ।
न पीनं नापीनं न हि परिमितं नापरिमितम् ।
न रक्तं नारक्तं न हि धवलितं नाधवलितम् ॥

निराकारं नित्यं त्रिगुणरहितं दैवमजडम्
तमात्मानं वन्दे परमसुखसच्चानन्दनिलयम् ॥
कूर्म्म उवाच ।
एवं सर्व्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवम् ।
योगिनस्तत् प्रपश्यन्ति महादेव्याः परं पदम् ॥ इत्यादि ।

End. तेषां नित्याभियुक्तानां मया तत्त्वं समर्चितम् ।
नाशयामि ततः क्लेशं ज्ञानदीपेन चाचिरात् ॥

Colophon. इति कूर्म्मपुराणे दशमाध्याये देवीगीता समाप्ता ।

विषयः । आत्मज्ञानादिनिरूपणमुखेन देवीमाहात्म्यनिरूपणम् ।

No. 175. देवीमाहात्म्यकौमुदी. By रामकृष्णः. Substance, country-made paper, 16 × 3 inches. Folia, 23. Lines, 8 on a page. Extent, 793 çlokas. Character, Bengali. Date, Sk. 1687. Place of deposit, Sātbheyepāḍāgrāma, Post Office Vaidyervāzār, District Ḍhākā, Paṇḍita Nilakamala Smṛtibhūṣaṇa. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो दुर्गायै ।
भगवन्तं नमस्कृत्य देवीं भगवतीमपि ।
तन्यते रामकृष्णेण देवीमाहात्म्यकौमुदी ॥
अथ तमेव विदित्वेति श्रुतेरात्मज्ञानस्य मोक्षसाधनत्वं सिद्धं तत्त्वज्ञाने च महामायाऽकर्त्तृत्वादौ कर्त्तव्यादिज्ञानद्वारा ... ... अतस्तत्प्रीतिं विना तत्त्वज्ञानं न सम्भवति । प्रीतिश्च नाराधनं विना आराधना च प्रभावज्ञानं विना । तत्प्रभावः सुरथाय राज्ञे मेधोमुनिना उक्तस्तयोः सम्वादो मार्कण्डेयेन उक्त इति भगवान् श्रीकृष्णद्वैपायनस्तदुक्तं मार्कण्डेयवाक्यमवतारयति मार्कण्डेय उवाचेति । एवं कथा मार्कण्डेयेन पुरा क्रौष्टिकमुनिं प्रति पुराणं कथितं ... ... सावर्णिरित्यादि । सूर्य्यस्य पत्नीद्वयं संज्ञा सवर्णा च तत्र सवर्णाया अपत्यं सावर्णिर्वादित्वादिञ्। पितृनामज्ञानार्थमाह सूर्य्यतनय इति । अष्टानां पूरणोऽष्टमः तथाहि स्वायम्भुवः स्वारोचिषः ... ... चाक्षुषः वैवस्वतः सावर्णि ... ... दक्षसावर्णिर्ब्रह्मसावर्णिर्धर्मसावर्णश्चतुर्द्दशमनवः तत्राष्टमः सावर्णिः । ननु अष्टमपदं व्यर्थं तस्य वस्तुत एवाष्टमत्वादिति चेन्नहि

अन्यथा व्याख्येयं अष्टभिरणिमादिभिर्मानी ... ... अस्येति अष्टमः । श्लोकेष्वेवं योजना योऽष्टमो मनुः सावर्णिः पुराणे कथ्यते तदुत्पत्तिं मम सत्तः विस्तीर्य्य गदतः निशामय शृणु उत्पद्यतेऽनेनेति उत्पत्तिर्महामायानुभावस्तं शृणु ॥ इत्यादि ॥

End. प्राज्ञः स वैश्यः ज्ञानं कीदृशं ममेत्यहमिति सङ्गः बोधः तस्य विच्युतिकारकं अयं भावः धनादौ ममेति बुद्धिः देहे अहमिति बुद्धिश्च संसारहेतुः तच्युतिकारकं तत्त्वज्ञानमेवेति । अहोभिरित्यनेन ... ... सम्पन्नं चित्तमेव तेन त्रिभिः । भवस्येति भुवि ... ... जन्म तदर्थं अतः अन्यथा देवीदर्शनात् कथं पुनर्जन्म ... ... इत्यस्य वैयर्थ्यादपिच तेन जन्मविना न मन्वन्तराधिकारः तेन तस्य जन्मार्थमेव मरणम् । सावर्णिरिति ... ... सावर्णिकः ... ... सम्बोधनं संसारनिवृत्तिं दृष्ट्वापि तुष्टत्वात् ... ... तव ज्ञानं भविष्यतीत्यादौ कालो नोक्तस्तेन तत्क्षणादित्यभिप्रायः । इत्युक्तं अभिलषितं तयोस्ताभ्यां अन्तर्हिता अदृश्या बभूव । महामायानुभावेन यथा मन्वन्तराधिप इत्यनेन यदुक्तं तत् स्मारयति एवं देव्या इति सूर्य्याज्जन्म समासाद्य प्राप्य सावर्णिर्नाम मनुर्भविता भविष्यति इति देवीमाहात्म्यं समाप्तम् ॥

Colophon. वेदव्यासेन करुणासागरेण विनिर्म्मिता ।
पतितानां जीवनाय चण्डी विजयते चिरम् ॥
व्याख्याता रामकृष्णेण चण्डिकेयं यथामति ।
सर्व्वज्ञानां हि तात्पर्य्यं कोऽज्ञो विज्ञातुमीश्वरः ॥
इति महामहोपाध्याय उदीच्य-श्रीरामकृष्णभट्टाचार्य्यविरचिता चण्डिकाटिप्पनी समाप्ता ॥ समाप्तेयं पुस्तिका शकाब्दाः । १६८० ॥

विषयः । मार्कण्डेयपुराणान्तर्गतस्य सप्तशतीनामकस्य देवीमाहात्म्यस्य व्याख्यानम् ॥

No. 176. देवीमाहात्म्यचन्द्रिका. By शिवाचार्य्यः. Substance, country-made paper, $12 \times 2\frac{1}{2}$ inches. Folia, 52. Lines, 7 on a page. Extent, 1,456 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā, Post Office, Naihāti, Rāmatāraṇa Thākura. Appearance, old. Prose. Correct.

Beginning. ॐ नमः शिवाय ।

प्रणम्य परमां देवीं कुमतिध्वंसकारिणीम् ।
शिवाचार्य्यो वितनुते देवीमाहात्म्यचन्द्रिकाम् ॥
यच्चतुर्भुजमिश्रेण च्छविदासादिनाच यत् ।
लिखितं तत्समालोक्य रच्यते तत्समासतः॥
प्राक्किल जैमिनिर्म्महाभारतकथां श्रोतुमिच्छन् मार्कण्डेयमहर्षिमुपगम्य पृष्ट-
वान् नायमस्माकं कथालक्षण इति । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यस्य व्याख्यानम् ।

No. 177. देवीमाहात्म्यटीका, सिद्धान्तमञ्जरीनाम्नी. By कृष्णानन्दः.
Substance, country-made paper, 11 × 2½ inches. Folia, 8. Lines, 10 on a page. Extent, 250 çlokas. Character, Bengali. Date, Sk. 1752. Place of deposit, District Vãkuḍā, Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीश्रीरामः । ॐ चण्डिकायै नमः ।

भवानीचरणाम्भोजं प्रणिपत्य प्रणीयते ।
सिद्धान्तमञ्जरी चण्ड्याः कृष्णानन्देन धीमता ॥
चण्डिकायाः पूर्व्वपक्षं कृत्वा नत्वा शिवापतिम् ।
राद्धान्तः क्रियते तस्य मुग्धोपकृतये मया ॥
षट्सम्वादः ॥ आदौ पक्षिमुनिगणसम्वादस्तत्र मार्कण्डेयक्रौष्टुकिसम्वाद-
स्तत्र मेधःसुरथसम्वादः ॥ निशामय तदुत्पत्तिमिति ॥ इत्यादि ॥

End. ननु आङ् शब्दे अल्लोपो भवति कथमेतत् क्वचिदपवादविषयेऽप्युत्सर्गो विधि-
र्निविशत इति आङि अकारलोपप्राप्तेऽपि वृद्धिः ॥ उपेद्धीति क्वचित् ॥
यद्वा अकारादिति रश्चि पश्चाल्लोपः । अ इति सुरथसम्बोधनम् । तथाच
कृष्णे सम्बोधनेऽप्यपि शोभायामः प्रकीर्त्तितः ।
नत्वा देवीपदद्वन्द्वं कृष्णानन्देन भिक्षुणा ॥
संक्षिप्य रचिता ह्येषा देवीमाहात्म्यटीप्पनी ॥ * ॥

Colophon. इति कृष्णानन्दविरचिता सिद्धान्तमञ्जरी समाप्ता ॥ शुभमस्तु शक १७५२ ।

विषयः । मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यस्य संक्षेपेण व्याख्यानम् ।

No. 178. देवीमाहात्म्यटीका. By गोपालः. Substance, country-made paper, 13 x 2½ inches. Folia, 12. Lines, 8 on a page. Extent, 288 çlokas. Character, Bengali. Date, ? Place of deposit, Visnupura, District Vākuḍā, S'rī Rūparāma Bhaṭṭācāryya. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमः परदेवतायै ॥

यस्याः कोटि जगन्ति सन्ति कतिधा नो सन्ति वाद्त्वं

चिद्यन ब्रह्ममहेन्द्रशङ्करमुखाः कोकनद्य भासते । (?)

यत्पादाब्जरजःकणारुणशिवाकन्दभक्ष्म यत्यक्षसा

तां वन्दे जगदीश्वरीं भगवतीं सच्चिन्मयीमम्बिकाम् ॥

श्रुतिं स्मृतिं चापि पुराणजातं

विलोक्य तन्त्राणि शिवोदितानि ।

गोपालनामा विबुधो विधत्ते

टीकामिमां सप्तशतीस्तवस्य ॥

यद्यस्ति टीका प्रचुरा कवीनां

निवेशितास्तत्र च सत्प्रमेयाः ।

तथापि टीका मम दर्शनीया

बुधैरयं मुद्धिं कृतोऽञ्जलिर्मे ॥

सन्ति चेत् बहवो दोषा गुणलेशोऽपि कुत्रचित् ।

अनुगृह्णन्तु गृह्णन्तु सन्तो गुणकणं मम ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यव्याख्यानम् ।

No. 179. देवीमाहात्म्यविवरणम्. By गोपालमिश्रः. Substance, country-made paper, 12 x 3½ inches. Folia, 88. Lines, 7 on a page. Extent, 2,233 çlokas. Character, Bengali. Date, Sk. 1618. Place of deposit, Hālisahar, Caudhurīpāḍā, Vecārāma Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

सुविचार्य्य बहूनर्थान् श्रीकृष्णाध्यानकाङ्क्षिणा ।
श्रीमद्गोपालमिश्रेण चण्डीव्याख्या वितन्यते ॥
पुरा किल भगवद्बादरायणशिष्येण महाभारतविषयकथाकाङ्क्षिणा जैमिनिना मार्कण्डेयमुनिः पृष्टः ॥ इत्यादि ।

End. एवं अनेन प्रकारेण क्षत्रियर्षभः क्षत्रियश्रेष्ठः । यथा स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः सिंहशार्दूलनागाद्या इत्यमरः । देव्याः सकाशात् वरं लब्ध्वा सूर्य्यात् जन्म समासाद्य सावर्णिर्मनुर्भविता इत्यन्वयः । एतत् द्विपाठः कर्त्तव्यः इति ॥

Colophon. इति श्रीगोपालमिश्रकृतायां चण्डीटीकायां देवीमाहात्म्यविवरणं समाप्तम् ॥

विषयः । मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यस्य व्याख्यानम् ।

No. 180. देवीमाहात्म्यवृत्तिः. By गोविन्दरामसिद्धान्तवागीशः. Substance, country-made paper, 16 × 4 inches. Folia, 62. Lines, 7 on a page. Extent, 1,736 çlokas. Character, Bengali. Date, ? Place of deposit, Nadiyāgrāma, Post Office Lonsing, District Pharidpur, Paṇḍita Çaçibhūṣaṇa Smṛtiratna. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमश्चण्डिकायै ।

यत्पादपद्ममनिशं परिचिन्त्य भक्त्या
योगीन्द्रवृन्दपरिवन्द्यपदो हरोऽभूत् ।
तत् देवमानुषसुरारिगणैः प्रपूज्यं
भक्त्याप्यनन्यगतिकः सततं नमामि ॥
यस्याः प्रसादात् बलभृत्प्रधानाः
सुराश्च भाजोऽप्यभवन् दिगीशाः ।
तस्याः स्तुतेर्वृत्तिरियं प्रकाश्यते
गोविन्दरामेण विपश्चितां मुदे ॥
यद्यप्यत्र बहुभिरेव निबन्धकृद्भिर्विविधं व्याख्यातं तथाप्यस्य रहस्यविशेषविज्ञानायैतद्विद्वद्भिरालोकनीयम् ॥ पुरा किल भगवद्बादरायणान्तेवासी जैमिनिर्भारतीयकथानन्तरं सावर्ण्युत्पत्तिं भगवन्तं मार्कण्डेयं पृष्टवान् कार्य्यान्तरव्यासक्तेन तेन कथां कथयितुं मम नायं समयः किन्तु विन्ध्यपर्व्वत-

वासिनः सर्व्वशास्त्रार्थतत्त्वज्ञा मच्छिष्याश्चत्वारः पक्षिणः सन्ति तान् पृच्छेत्युपदिष्टोऽसौ गत्वा तान् पृष्टवान् ते च साक्षाद्मात्मभाग्यं वर्णयन्तो मेधःसुरथसम्वादात्मिकां भागुरये मार्कण्डेयेन कथितामितिहासकथामुपवर्णयितुमारभमाणा ऊचुर्मार्कण्डेय उवाचेति । मृकण्डोरपत्यं मार्कण्डेयः … … … … … … पूर्व्वस्वरस्य वृद्धिः । … … … … इत्युकारलोपः । यद्यपि जैमिनिमुनिस्थाने पक्षिणामेव वचनकर्तृत्वं अतः पक्षिण ऊचुरित्येव वक्तुं युज्यते तथापि मार्कण्डेयेनोपदिष्टाः कथाः पक्षिभिरुच्यन्ते इति मार्कण्डेय उवाचेति । सावर्णिरिति । योऽष्टमो मनुः कथ्यते स सावर्णिस्तदुत्पत्तिं मम स्थाने निशामय शृणु मम किम्भूतस्य विस्तराद्गदतः प्रपञ्चात् कथयतः सावर्णिरिति … … दित्यादन् । अष्टमो मनुः किम्भूतः सूर्य्यतनयः सूर्य्यतनय इति पदेन समुद्रकन्यायाः सवर्णाया अपत्यव्याप्तिः । सावर्णिरिति पदेन सूर्य्यपत्न्याश्छायाया अपत्यव्याप्तिरिति । ननु निशामयेत्यत्र शमोऽदर्शन इत्यनुशासनात् कथं नमानुबन्धानां ह्रस्वः सत्यं संज्ञापूर्व्वकत्वात् ह्रस्व इति केचित् । वस्तुतस्तु दर्शरपि ज्ञानवचनादित्यनुशासनात् ज्ञानातिरिक्तबोधन … … … … … … एवास्य सानुबन्धत्वं यथा उपशमयति रोगानिति प्रकृते तु श्रवणं ज्ञानं शमोऽर्थः ॥ इत्यादि ॥

End. मार्कण्डेय उवाच । इत्नीति । देवी इति एवं प्रकारेण तयोर्यथाभिलषितं वाञ्छितं वरं दत्वा भक्त्या ताभ्यामभिष्टुता सती सद्यस्तत्क्षणं अन्तर्हिता अदृश्या बभूव । एवमिति । एवं प्रकारेण देव्या देवीसकाशाद् वरं लब्ध्वा क्षत्रियश्रेष्ठः सुरथः सूर्य्यात् जन्म समासाद्य संप्राप्य सावर्णिर्मनुर्भविता । श्लोकमेतत् वारद्वयं केचित् पठन्ति तद्दिष्टाप्रमाणं वचनाभावात् । प्राचीनव्यवहाराभावाच्च ॥

Colophon. वेदाग्निरेतोनयनानि (?) पृथ्वीगते शकाब्दे गिरिजापदाब्जम् ।
सञ्चिन्त्य चण्डीस्तुतिवृत्तिमेतां
गोविन्दरामो विततान विप्रः ॥
मयोक्तमिह यत्किञ्चित् विरुद्धसम्मतं भवेत् ।
तत् क्षन्तव्यं विपश्चिद्भिः क्षमासारा हि साधवः ॥
इति श्रीगोविन्दरामसिद्धान्तवागीशभट्टाचार्य्यकृतायां देवीमाहात्म्यवृत्तौ देवीमाहात्म्यं समाप्तम् ॥

विषय: । मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यस्य व्याख्यानम् ॥

No. 181. **देवीमाहात्म्यवृत्तिः.** By **नरसिंहचक्रवर्त्ती.** Substance, country-made paper, 14 × 1 inches. Folia, 112. Lines, 3 on a page. Extent, 1,407 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Ichāpurāgrāma, Paṇḍita Hariprasāda Tarkālaṃkāra. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय । ॐ नमश्चण्डिकायै ।
देव्याः पादयुगं मनोज्ञमतुलं ब्रह्मादिभिः सेवितं
भीरोर्भीतिहरं भयं सुररिपोर्मुक्तिप्रदं योगिनाम् ।
नत्वा कोषमशेषशब्दगहनं ज्ञात्वा च तत्त्वं मुने-
स्तस्याः श्रीनरसिंह एष तनुते माहात्म्यतत्त्वं कृतम् ॥
पुरा किल भगवद्बादरायणशिष्येण भारतकथाकाङ्क्षिणा जैमिनिना मार्कण्डेयमुनिः पृष्टो नायं कथासमय इत्युपेक्षमाणो विन्ध्याचलनिवासिनश्चतुरः पक्षिणः पृच्छसीति समादिदेश । तदनन्तरं जैमिनिना पृष्टास्ते मार्कण्डेयभागुरिसंवादात्मकमितिहासमनुवर्णयन्तस्तत्कथामारभमाणास्ते ऊचुर्मार्कण्डेय उवाचेति । इत्यादि ।

End. ताभ्यामित्युभयत्रान्वयः । नाभ्यां दत्त्वा ताभ्यामभिष्टुतेति एवं वरं देव्याः सकाशात् लब्ध्वा क्षत्रियर्षभः क्षत्रियश्रेष्ठः सुरथः सूर्य्याज्जन्म समासाद्य सम्प्राप्य सावर्णिर्मनुर्भविता ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्यं समाप्तम् । माहात्म्यमिति महात्मनोभावः माहात्म्यं यण् । एवं सर्व्वत्रैव बोध्यम् ॥

Colophon. इति श्रीनरसिंहचक्रवर्त्तिकृता देवीमाहात्म्यटीका समाप्ता ॥

विषय: । मार्कण्डेयपुराणीयदेवीमाहात्म्यस्य व्याख्यानम् ॥

No. 182. **देवीमाहात्म्यमञ्जरी.** By **नरसिंहचक्रवर्त्ती.** Substance, country-made paper, 12 × 2½ inches. Folia, 58. Lines, 7 on a page. Extent, 1,573 çlokas. Character, Bengali. Date, Sk. 1595. Place of deposit, Áriyādaha 24-Parganas, Paṇḍita Haripada Bhaṭṭācāryya. Appearance, old. Prose. Correct.

Beginning. अत्र प्रथमपत्रं नास्ति तेन द्वितीयपत्रप्रारम्भवाक्यं लिखितम् ॥ सूर्य्यतनयः तदुत्पत्तिं निशामय शृणु जानीहि चेत्यर्थः। समानः वर्णो यस्याः स सवर्णा अस्या अपत्यं सावर्णिः इत्यादि।

End. एवं अभिलषितं वरं देव्याः सकाशाल्लब्ध्वा चत्रियर्षभः सुरथः सूर्य्याज्जन्म समासाद्य संप्राप्य सावर्णिर्मनुर्भविता।

Colophon. इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्यं समाप्तम्।
कृता श्रीनरसिंहेन द्विजेन चक्रवर्त्तिना।
सतां चित्तविनोदाय देवीमाहात्म्यमञ्जरी ॥ ० ॥
बाणाङ्केषुविधौ शाके मासे च श्रावणाह्वये।
पूर्णीकृता पुस्तिकैषा राजेन्द्रेण द्विजन्मना ॥

विषयः। मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यटीका।

No. 183. देवीमाहात्म्यवृत्तिः, (तत्त्वावबोधिनी). By विद्याविनोदाचार्य्यः. Substance, country-made paper, 14 × 4½ inches. Folia, 50. Lines, 10 on a page. Extent, 1,750 çlokas. Character, Bengali. Date, ? Place of deposit, Hālisahar Valdeghāṭā Bābu Giriça Candra Gaṅgopādhyāya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमश्चण्डिकायै।
नत्वा जगज्जया (?) गूढं भान्तमेकमनेकवत्।
विद्याविनोदाचार्य्यश्च चण्डीटीकां करोत्यमूम् ॥ इत्यादि।

End. विवस्वतो जन्म उत्पत्तिं समासाद्य सावर्णिर्मनुर्भविता सावर्णिरभूत् मनुर्भविष्यति इत्यर्थः। अद्यतने लट् अतएव स बभूव महाभाग इति प्रथममपि सङ्गतम्।

Colophon. इति विद्याविनोदाचार्य्यकृतायां चण्डीटीकायां तत्त्वावबोधिन्यां देवीमाहात्म्यं समाप्तम् ॥ ० ॥

विषयः। मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यस्य व्याख्या।

No. 184. देवीमाहात्म्यटीका, (तात्पर्य्यकौमुदीनाम्नी). By रघुनाथचक्रवर्त्ती. Substance, country-made paper, $14\frac{1}{2} \times 2\frac{1}{2}$ inches. Folia, 61. Lines, 8 on a page. Extent, 2,653 çlokas. Character, Bengali. Date, Sk. 1617. Place of deposit, Sātbheyepāḍāgrāma, Post Office Vaidyerbāzār, Parganā Sonargā, Paṇḍita Tārākānta Vācaspati. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय। ॐ नमः सरस्वत्यै।

मङ्गल्ये सर्व्वकर्म्मादौ ... ... प्रणम्यते।

माहात्म्यादृशं सिद्धौ चेरम्भमवलम्भते॥

आनन्दैकनिकेतनं सुकृतीनां ... ...

ब्रह्मेन्द्रादिनमस्कृतं ... ... ।

न सद्भावबोधानां ... ...

तद्वन्दे जगदम्बिकापदयुगं रक्ताम्बुजाभप्रभम्॥

सत्कुलद्विजराजेन सम्मनोहारिवर्त्मना।

श्रीमता रघुनाथेन कौमु ... ... ॥

... ... न तत्त्वप्रदायिनी।

तात्पर्य्यकौमुदी धीरा यथावदवधीयताम्॥ ०॥

इह तु देवीमाहात्म्यव्याख्यावसरे प्रथमं तत्पाठविशेषो लिख्यते। ॐ नारायण ... ... कस्य नारायणादिनामषट्कनिरूपितदेवता नमस्कृत्य।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।

देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

तत्र नारायणप्रलयकालीन सागरजल ... ... नरः कृतरामादिशरीरपरिग्रहोऽवतारविशेषः। नरोत्तमः पुरुषोत्तमः श्रीकृष्ण इति यावत्। कृष्णस्तु भगवान् स्वयमिति भागवतश्रवणात्। देवी भगवती आद्या शक्तिः। यदनुग्रहात् स ... ... र्व्वेषु शक्त्यधिकं भवति। सरस्वती सर्व्ववाङ्मयाधिकृतदेवता वाग्देवतेति यावत्। व्यासः पुराणेतिहासादीनि शास्त्राणि वेदायनि वा (?) व्यासो बादरायणः कवीन्द्र इति व्याख्यायते। एतान् प्रणम्य जयं उदीरयेत् पठेदित्यर्थः। तत इत्यस्य वाक्यालङ्कारप्रयोजनमात्रमर्थः। आनन्तर्य्यस्य यवन्तपदेनोपलब्धेः। जयमिति कृष्णद्वैपायनप्रणीतपुराण-भारत भागवतादि। एतस्य देवीमाहात्म्यग्रन्थस्य सिद्धमन्त्रस्वरूपत्वात्। ... ... तदादौ तदन्ते च प्रणवं दत्वा पठेत् इति शास्त्रार्थः।

तत्पाठकश्च नाहमसङ्कल्पसमाप्तिततत्पुस्तकमध्यर्थ्यासने स्थापयित्वा पठे- दित्यासां विस्तरः । इत्यादि ।

End. एवमिति एवंप्रकारेण सुरथः देव्या वरं लब्ध्वा क्षत्रियर्षभः क्षत्रियश्रेष्ठः सूर्य्याज्जन्म समासाद्य ...... पुनराहत्तिः समाप्तिं द्योतयति । तथा चाया- दिति चातुर्भुजी ॥ ० ॥

Colophon. इति श्रीरघुनाथचक्रवर्त्तिकृतायां तात्पर्य्यकौमुद्यां देवीमाहात्म्यटीकायां देवीमाहात्म्यव्याख्यानं समाप्तम् ॥

विषयः । मार्कण्डेयपुराणान्तर्गत देवीमाहात्म्यस्य व्याख्यानम् ।

No. 185. देवीमाहात्म्यवृत्तिः, (विद्वन्मनोरमा). By गौरीवरः. Substance, country-made paper, 13 × $3\frac{1}{2}$ inches. Folia, 55. Lines, 10 on a page. Extent, 2,681 çlokas. Character, Bengali. Date, Sk. 1515. Place of deposit, Kāṭhālpāḍā *viâ* Naihāti, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमश्चण्डिकायै ।

पान्तु वां चण्डिकाचण्डकोदण्डखण्डनिस्वनाः ।
दुरितौघतमस्काण्डे खण्डनैकान्तपण्डिताः ॥
संक्षिप्तसारविदुषा श्रीगौरीवरशर्म्मणा ।
क्रियते सप्तशतिकाटीका विद्वन्मनोरमा ॥

... द्वैपायनाभिधानमहर्षिवेदव्यासप्रोक्तजयाख्यमार्कण्डेयपुराणान्तर्गतसाव- र्णिकमन्वन्तरीय सावर्णिः सूर्य्यतनय इत्यादि सावर्णिर्भविता मनुरित्यन्तस्य देवीमाहात्म्यप्रकाशकस्य ग्रन्थसन्दर्भस्य यथाशक्ति व्याख्यानमाचक्षे ॥

End. एवमनेन प्रकारेण क्षत्रियर्षभः क्षत्रियश्रेष्ठः तथाच स्युरुत्तरपदे व्याघ्र- पुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचरा इत्यमरः । सुरथः देव्याः सकाशात् वरं लब्ध्वा सूर्य्याज्जन्म समासाद्य सावर्णिर्मनु- र्भविता इति ॥ ० ॥

Colophon. इति श्रीगौरीवरकृतायां विद्वन्मनोरमायां सप्तशतिकाटीकायां देवीमाहात्म्यं समाप्तम् ॥ ० ० ॥ ० ० ॥

बाणेन्दुपञ्चेन्दुमिते शकाब्दे प्रणम्य गौरीचरणारविन्दम् ।
... ... ॥

विषयः । मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यस्य व्याख्यानम् ।

No. 186. देवीमाहात्म्यटीका, (सप्तशतीविवेकः). By रामचन्द्रवाचस्पतिः. Substance, country-made paper, 11 x 4 inches. Folia, 120. Lines, 7 on a page. Extent, 2,250 çlokas. Character, Bengali. Date, (?) Place of deposit, Bhātpāḍā, 24-Parganas, Paṇḍita Rāmendra Nyāyavāgīça. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

यामाहुराद्यां प्रकृतिं मुनीन्द्रा
यामेव धात्रीं प्रतिपालनेन ।
अन्ते तु चान्तीं स्वरूपधात्रीं
अव्याज्जगत् पर्व्वतनन्दिनी सा ॥
प्रणम्य चण्डीचरणारविन्दं
श्रीरामचन्द्रो दुतमयजन्मा ।
सुबोधिनीं सज्जनतोषिणीञ्च
चकार चण्डीमहिमैकसाराम् ॥
... ... सप्तशतीविवेका
तनोति सन्तोषकरीं कवीनाम् ।
पुरा किल भगवन्नारायणशिष्येण भारतविषयकीर्त्तिना जैमिनिना पृष्टो मार्कण्डेयो मुनिः । इत्यादि ॥

End. देवी इति वरं तयोरभिलषितं दत्त्वा ताभ्यां वैश्यसुरथाभ्यां अभिष्टुता सती सद्यस्तत्क्षणात् अन्तर्हिता बभूव । अन्तर्दधौ । एवमिति एवं देव्याः सकाशात् वरं लब्ध्वा क्षत्रियर्षभः क्षत्रियश्रेष्ठः सुरथः सूर्य्याज्जन्म समासाद्य प्राप्य सावर्णिर्मनुर्भविता ॥

Colophon. इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्यं समाप्तम् ॥ इति रामचन्द्रवाचस्पतिकृता चण्डीटीका समाप्ता ॥ ० ॥

विषयः । मार्कण्डेयपुराणान्तर्गत-देवीमाहात्म्यस्य व्याख्यानम् ।

No. 187. दोलयात्राप्रमाणतत्त्वम्. By रघुनन्दनभट्टाचार्य्यः. Substance, country-made paper, 14×2½ inches. Folia, 4. Lines, 8 on a page. Extent, 132 çlokas. Character, Bengali. Date, ? Place of deposit, Serpur, District Mayamanasimha, Paṇḍita Harasundara Tarkaratna. Appearance, tolerable. Verse. Correct.

Beginning. श्रीहरिः। फाल्गुणपौर्णमास्यां दोलयात्रामाह तीर्थचिन्तामणौ ब्रह्मपुराणम्।
फाल्गुण्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत्।
नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम्॥ इत्यादि।

End. पञ्चम् द्वितीयं हरति गोहत्याद्युपपातकम्।
छिन्नन्त्यशेषपापानि तृतीये च न संशयः॥
इमां यात्रां कारयित्वा चक्रवर्त्ती भवेन्नरः।
ब्राह्मणस्य चतुर्व्वेदे ज्ञानञ्च जायते ध्रुवम्॥ * ॥

Colophon. इति श्रीरघुनन्दनभट्टाचार्य्यविरचितं दोलयात्राप्रमाणतत्त्वं सम्पूर्णम्॥

विषयः। श्रीकृष्णस्य दोलयात्राप्रकरणादिनिरूपणम्।

No. 188. दोलयात्रामृतम्. By नारायणतर्काचार्य्यः. Substance, country-made paper, 18×3½ inches. Folia, 3. Lines, 8 on a page Extent, 123 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā Vikramapura Vajrayoginīgrāma Paṇḍita Kālikānta Çiromaṇi. Appearance fresh. Prose and verse. Correct.

Beginning. ॐ नमो गणेशाय।
नत्वा गोविन्दपादाब्जं दृष्ट्वा च स्मृतिसङ्ग्रहान्।
नारायणो वितनुते दोलयात्रामृतं सुधीः॥
स्कन्दपुराणे।
फाल्गुने मासि राजेन्द्र चर्षमर्त्तणि शान्तिमे। (?)
गोविन्दं दोलयेद् यो वै स वैकुण्ठपुरं व्रजेत्॥
कृत्तिकायां ध्वजोत्थानं ज्येष्ठायां स्नपनं तथा।
दोल उत्तरफल्गुण्यां यात्रामेतां सुदुर्लभाम्॥
ब्रह्मवैवर्त्ते।
अधिवासः स्नपान्ते च फाल्गुण्यर्च्चे स्वपोत्तम।
गोविन्दं दोलयेद् यो वै स वैकुण्ठपुरं व्रजेत्॥ इत्यादि।

End.

चौलिकां कारयेद् यस्तु पौर्णमास्यां नरोत्तम ।
सप्तसा कुलमादाय विष्णोर्लोके महीयते ॥
दशाचरविधानेन पूजयेच्च जनार्दनम् ।
होमं कृत्वा विधानेन ततो यात्रां समापयेत् ॥

Colophon. इति नारायणतर्काचार्य्यविरचितं दोलयात्रातत्त्वं समाप्तम् ।

विषयः । फाल्गुनपौर्णमास्यां भगवतो दोलयात्राविधिविवेचनम् ॥

No. 189. द्रव्यगुणसङ्ग्रहटीका. By शिवदासः. Substance, country-made paper, 16 x 3 inches. Folia, 77. Lines, 7 on a page. Extent, 2,194 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā Bhagavān Candra Dāsa Kavirāja, Appearance, old. Prose and verse. Incorrect.

Beginning.

ॐ नमो गणेशाय ।
दशाननादितिमिरपरिभूतमिदं जगत् ।
प्रससाद् यतस्तस्मै कस्मैचिन्महसे नमः ॥
कणादसांख्यायुर्व्वेदतन्त्राणां पारदृश्वनः ।
तातस्यानन्तसेनस्य वन्दे चरणपङ्कजम् ॥
महदादिनिकायोऽयं यस्याः प्रादुरभूत् किल ।
सतीं गुणमयीं भक्त्या भैरवीं जननीं भजे ॥
रचितश्चक्रदत्तेन यो द्रव्यगुणसङ्ग्रहः ।
श्रीमता शिवदासेन तस्य व्याख्या विधीयते ॥
नोक्ताश्चक्रेण ये द्रव्यगुणा विस्तरभीरुणा ।
तेऽपि प्रसङ्गतो लेख्याः शिष्यव्युत्पत्तये मया ॥ इत्यादि ।

End.

इदानीमस्य सङ्ग्रहग्रन्थस्योपादेयतां दर्शयितुमाह ।
तन्त्राणां सारमाकृष्य द्रव्याणां गुणसङ्ग्रहः ।
भिषजामुपकाराय रचितश्चक्रपाणिना ॥
आसीत् सभायां शिखरेश्वरस्य
लब्धप्रतिष्ठः किल लाउसेनः ।
वाणीविलासं कविसार्व्वभौमं
विजित्य यः प्राप यशो दुरापम् ॥

काकुत्स्थसेनस्तु ततस्ततोऽभूत्
तस्यापि लक्ष्मीधरसेननामा ।
तस्माच्च भूतस्तद्पत्यमूर्ज-
स्तस्याप्यनन्तस्तनयोऽथ जज्ञे ॥
योऽन्तरङ्गपदवीं दुरवापां
छत्रमप्यतुलकीर्त्तिरवाप ।
गौड़भूमिपतितोऽपि कथाञ्च- (?)
त्तत्सुतस्य कृतिनः कृतिरेषा ॥

Colophon. समाप्तोऽयं ग्रन्थः ॥

विषयः । चक्रपाणिदत्तकृतद्रव्यगुणसङ्ग्रहाभिधानवैद्यकग्रन्थस्य व्याख्यानम् । तदनुक्तांश-पूरणञ्च ।

No. 190. द्वात्रिंशत्सिंहासनकथा. By वररुचिः. Substance, country-made paper, 17 × 3 inches. Folia, 46. Lines, 8 on a page. Extent, 1,472 çlokas. Character, Bengali. Date, Sk. 1719. Place of deposit, Naihāti, District 24-Parganās, Paṇḍita Haraprasāda Çāstrī. Appearance, tolerable. Prose. Incorrect.

Beginning. (अस्य प्रथमपत्रं नास्ति तेन द्वितीयपत्रस्य प्रारम्भवाक्यं लिखितम् ।) ततश्च भूखननादिभिरनेकप्रकारैः कनकरत्नमयद्वात्रिंशत्पुत्तलिकाभिरुपेतं चन्द्रकान्तमणिमयं चतुर्हस्तोच्छ्रयं तेजसा जाज्वल्यमानं सिंहासनं प्रादुरभूत् । इत्यादि ।

End. त्रिलोकी जेतव्या जड़तनुरमात्यः शशधरो
वसन्तः पर्य्यायोद्यतबाहुरुन्नतकुचा दूरे ।
रणत्कङ्कणामन्दमौखलगी घना सुवदना श्यामा मनोहारिणी । (?)
ईषत्कुञ्चितमध्यभागललिता सुव्यक्तलोमावली ॥
गुणामेव ... ... समो दूरम् ॥ ० ॥

Colophon. इति वररुचिकृत द्वात्रिंशत्कथनं सम्पूर्णम् । शाके १७१९ लिखितमेतत् ।

विषयः । द्वात्रिंशत्पुत्तलिकाभिर्विक्रमादित्यस्य गुणवर्णनम् ।

No. 191. द्वादशयात्राप्रयोगः. By विद्यानिवासः. Substance, country-made paper, 16 × 2½ inches. Folia, 22. Lines, 5 on a page. Extent, 469 çlokas. Character, Bengali. Date, ? Place of deposit, Vāḍari, Mayamanasiṁha, Paṇḍita Çivacandra Nyāyabhūṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. श्रीदुर्गायै नमः ।

ब्रह्मास्वादसहोदरनिर्भररसमाधुरीभाजि ।
विद्यानिवासस्तनुते यात्राकर्म्माणि सदृशो भर्त्तुः ॥
कोऽत्र विधिनिषेधौ नौलमणिर्यथा तथा सेव्यः ।
तदपि विधेरनुगत्या सत्यास्कन्दं निराकुर्म्मः ॥

इह खलु भगवद्दर्शनादुपस्थितप्रेमाकलितस्येन्द्रद्युम्ननरपतेर्भक्तियोग एवो-द्देश्यत इति ब्रह्मविज्ञापितेन प्रतिमारूपिणा भगवता वरप्रदानेन यात्रा प्रवर्त्तिता । इत्यादि ।

End. तस्मिन् काले तु ये भक्त्या कृष्णं पश्यन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
विष्णोः स्वरूपमास्थाय विष्णुलोके वसन्ति ते ।

ततः काञ्चनादिदक्षिणां दद्यात् एवमेव महासमारोहा चतुर्द्दशीपर्य्यन्तं श्रीजगन्नाथं पूजयेत् ।

Colophon. इति विद्यानिवासोक्तद्वादशयात्राप्रयोगः समाप्तः ॥ * ॥

विषयः । श्रीमज्जगन्नाथदेवस्य द्वादशयात्राप्रयोगादिनिरूपणम् ।

No. 192. धर्म्मदीपिका. By चन्द्रशेखरः. Substance, country-made paper, 18 × 5 inches. Folia, 33. Lines, 8 on a page. Extent, 1,056 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganas, Paṇḍita Haraprasāda Çāstri. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

नत्वा शिवपदद्वन्द्वं तातनत्वातसेवितम् ।
तत्प्रभाववर्द्धिताख्याभिः क्रियते धर्म्मदीपिका ॥
विद्याभूषणविख्यातः षड्दर्शनमते सुधीः ।
तत्सुतस्तादृशो धीमान् ततोऽधीती च तत्सुतः ॥

श्रीचन्द्रशेखरो नाम्ना ख्यातो वाचस्पतिः सुतौ ।
सुतीनाञ्च प्रकाशार्थं तनोतीमां प्रदीपिकाम् ॥
तत्र मीमांसातर्क एव वेदतन्मूलकशास्त्रार्थप्रकाशकः । तथाच भट्टमीमांसा-संज्ञकस्तर्कः सर्व्ववेदसमुद्भवः । सर्व्वेषां वेदानां समुद्भवः प्रकाशो यस्मादिति विग्रहः । इत्यादि ।

End. अशक्यार्थे विध्यसम्भवात् अस्यार्थः अशक्यार्थे असम्भवार्थे विध्यसम्भवात् विधेरेव प्रवृत्तेः अतो विधेर्यथासम्भवं विधेयं व्यवस्थापयति । तथाचोक्तम् ।
इवादिषु श्ववादीनां व्याक्रोषस्य च शक्तुषु ।
अर्थापत्तिवशात् तस्माद्व्यवस्थैवेत्यवस्थितिः ॥

Colophon. प्रथमपादस्य शेषः ॥ * ॥ श्रीश्रीगुरवे नमः । ॐ हरये नमः ॥ श्रीरामः ॥

विषयः । अत्र प्रथमं विधिनियमपरिसंख्यादीनां यथासम्भवं मीमांसा । ततोऽधिकरणनिरुक्तिः । ग्रहाधिकरणनिरूपणम् । खादिरन्यायनिरूपणम् । विकल्पनिरूपणम् । कपालाधिकरणनिरूपणम् । प्रतिनिध्यधिकरणनिरूपणम् । तदादितद्न्तन्यायनिरूपणम् । सर्व्वशक्त्यधिकरणनिरूपणम् । योगसिद्ध्यधिकरणनिरूपणम् । तन्त्रप्रसङ्गन्यायौ । सुतशस्त्राधिकरणञ्च ।

No. 193. धर्म्मविवेकः. By हलायुधः. Substance, country-made paper, 8 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 36 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Thānā Kerāṇigañja, Sāktāgrāma, Paṇḍita Trilocana Tarkālaṃkāra. Appearance, fresh. Verse. Correct.

Beginning. श्रद्धावीजो वेदविप्राम्बुसिक्तः
शाखाविद्यास्तास्वतन्त्रो दशापि ।
पुण्यान्यर्थौ द्वे फले स्थूलसूक्ष्मे
मोक्षः कामो धर्म्मवृक्षोऽयमीड्यः ॥
यातः क्ष्मामखिलां प्रदाय हरये पातालमूलं बलिः
शक्तुप्रस्थविसर्ज्जनात् स च मुनिः स्वर्गं समारोपितः ।
आवाल्यादसतीं सतीं सुरपुरीं कुन्तीं समारोपयत्
सा सीता पतिदेवतागमदधो धर्म्मस्य सूक्ष्मा गतिः ॥ इत्यादि ।

End. अल्पमिति सूरयः सर्व्वे धर्म्मो रक्षति धार्म्मिकम् ।
एतज्ज्ञात्वयमद्यैव किमत्र च भविष्यति ॥
जयोऽस्तु पाण्डुपुत्राणां येषां पक्षे जनार्द्दनः ।
यतः कृष्णस्ततो धर्म्मो यतो धर्म्मस्ततो जयः ॥

Colophon. इति महाकविचक्रायुधविरचितं धर्म्मविवेकाख्यकाव्यं समाप्तम् ॥

विषयः । कतिपयप्रश्नपूरणश्लोककथनम् ।

No. 194. धर्म्मेतिहासः. Substance, country-made paper, 16 × 3 inches. Folia, 115. Lines, 6 on a page. Extent, 2,932 çlokas. Character, Bengali. Date, ? Place of deposit, Mayamanasimha, Serapura, Pandita Candrakānta Tarkālaṅkāra. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
एकदा ब्राह्मणः कश्चित् पुत्रदारादिपोषणे ।
वयो गतमभिज्ञाय चिन्तामाप दुरत्ययाम् ॥
धर्म्मो हि परमो बन्धुः परलोकसुखावहः ।
स्रुतः कदाचित् साधुभ्यामिति गाथा सनातनी ॥
स मया न श्रुतो धर्म्मो न कृतो नानुचिन्तितः ।
अधुना स्वल्पमेवायुरवशिष्टं हि मे मतम् ॥
इति चिन्ताकुलो विप्रो धर्म्मशुश्रूषणे रतः ।
रचितः पुत्रमित्राभ्यां ...... सदैव सः ॥
सूतं गत्वा महात्मानं विनयानतकन्धरः ।
कृताञ्जलिपुटः सम्यक् प्रोवाच स्वमनोगतम् ॥ इत्यादि ।

End. यस्मात्र पङ्कवत्ते वै वृथा भवसमुद्भवाः ।
केवलं गर्भदुःखाय ये गङ्गां न गता नराः ॥
गङ्गामाहात्म्यमेतद्धि यः पठेत् विष्णुसन्निधौ ।
सभायां वापि विप्रेन्द्राः शृणुयाद्वापि भक्तितः ॥
गङ्गास्नानफलं प्राप्य सुखभोगैकसन्निधिः ।
चिरायुः पुत्रपौत्रैश्च ततो दिवमथाव्रजेत् ॥

द्विजा ऊचुः ।

धर्म्मेतिहासस्य कथा विचित्रा

मया श्रुतास्मन्मुखपङ्कजाद् गुरो ।

तामाशिषं सम्प्रत्यनचरं देवं

यथा स्मरामो हि यथाच कुर्व्वहे ॥

उपनयतु मङ्गलं वः सकलजगन्मङ्गलालयः श्रीमान् ।

दिनकरविबोधितनवनलिननिभेचणो विष्णुः ॥ ॐ ॥

Colophon. इति श्रीपद्मपुराणोद्धृते धर्म्मेतिहासे सप्तविंशतितमोऽध्यायः ॥ ॐ ॥ समाप्तश्चायं ग्रन्थः ॥

विषयः । पितृपूजा पतिसेवा सर्व्वजनेषु समता ।

मित्राद्रोहो विष्णुभक्तिश्च एते पञ्च महामखाः ॥

इत्यादिनिरूपणमुखेन एतदनुष्ठानफलनिरूपणम् । पतिव्रताद्युपाख्यानप्रदर्शनेन च माण्डव्योपाख्यानम् । तड़ागखननादिफलनिरूपणम् । वृक्षादिरोपणपुण्यनिरूपणम् । अश्वत्थादिवृक्षच्छेदनदोषकथनम् । गोप्रचारदानपुण्यनिरूपणम् । विष्णुप्रासादादिदानफलकथनम् । रुद्राक्षमाहात्म्यकथनम् । रुद्राक्षरूपविवेचनम् । रुद्राक्षधारणमन्त्रनिरूपणम् । धात्रीफलमाहात्म्यादिकथनम् । तुलसीमाहात्म्यकथनम् । गङ्गास्तोत्रमाहात्म्यादिनिरूपणञ्च ।

No. 195. धातुघोषा वा धातुसाधनम्. By रामकान्तः. Substance, country-made paper, 12 × $2\frac{1}{2}$ inches. Folia, 48. Lines, 8 on a page. Extent, 1,392 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Thānā Keräniganja, Sāktāgrāma, Paṇḍita Trilocana Tarkālaṇkāra. Appearance, fresh. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।

नत्वा गुरुपदद्वन्द्वं रामकान्तेन यत्नतः ।

बालानामवबोधाय क्रियते धातुसाधनम् ॥

अथ धातवः । यद्यपि बहवो धातवस्तथापि ग्रन्थगौरवभयात् झटिति सर्व्वधातुसाधनानुसन्धानयोजनकत्वाच्च वृद्धसम्मता दशैवात्र निबध्यन्ते ॥ यदुक्तं वृद्धैः ।

भू-स्था-गम-दृशोऽस्ति दा-हृ-ज्ञा-ग्रह-चिन्तयः ।

दशैते पुरतो ज्ञेया शीघ्रज्ञानाय धातवः ॥ इति ।

तत्रादौ भूधातुरुच्यते । भूसत्तायामिति सत्तार्थे वर्त्तमानस्य भूशब्दस्य क्रियाभावो धातुरिति धातुसंज्ञायां पश्चात् त्यादिप्रत्ययः । एवमेव सर्व्वत्रानुसन्धेयं । सम्प्रत्यर्थे वर्त्तमाना भवति भवतः भवन्ति । भवसि भवथः भवथ । भवामि भवावः भवामः ॥ इत्यादि ।

End. यङ् लुग्वा सर्व्वस्माद्धातोरिति रत्नमालाव्याकरणसूत्रञ्च । तथा लुगधिकारे यङो बहुलमिति चान्द्रः । तथा सर्व्ववर्म्मणापि चर्करीतञ्चाद्यत्तये + + यितान्तादित्यत्रान्तग्रहणमुपात्तं । तेन बोभवीतीत्यादिसिद्धम् ॥

Colophon. इति धातुघोषा समाप्ता ।

विषयः । भू-स्था-गम दृशाब्धि दा हृ-ज्ञा-ग्रह-चिन्तिरुपदशधातूनामाख्यातकृदन्तयोः सर्व्वत्र रूपकथनम् । तत्र तत्र धात्वर्थादिविवेचनञ्च ।

No. 196. धातुमाला. By जुमरनन्दी. Substance, country-made paper, 14 × 3 inches. Folia, 13. Lines, 6 on a page. Extent, 273 çlokas. Character, Bengali. Date, Sana, 1293, Sāla. Place of deposit, Parganā Vagdi, Teliveni, District Medinipura, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ॥

धातौ शम्भुमुखोद्भूते भ्रान्त्या वैकल्यमागते ।
क्रियते तस्य शुद्ध्यर्थं यत्नो जुमरनन्दिना ॥
भ्वाद्यदादि जुहोत्यादि दिवादिः स्वादिरेव च ।
तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः ॥
भू सत्तायां । अथ तवर्गान्ताः । चिती संज्ञाने अत सातत्यगमने च्युतिर् आसेचने । इत्यादि ।

End. घट् खिट् घुट् घुषि हिंसायां शठ श्वठ गतिसंस्कारयोः शुठ आलस्ये शुठि-शोषणे रुठ् लुठ् उपघाते जुड् प्रेरणे नड् भ्रंशे घड् उपसेवायां तड् आघाते परस्मैपदिनः ॥ चुरादयः समाप्ता ॥

Colophon. समाप्ता चेयं धातुमाला सन १२९३ साल ॥

विषयः । भ्वाद्यादिदशगणीयधातूनामर्थकथनं तेषामनुबन्धादिकथनञ्च ।

No. 197. **धातुमाला.** By **महेशः.** Substance, country-made paper, 12 x 2 inches. Folia, 14. Lines, 5 on a page. Extent, 184 çlokas. Character, Bengali. Date, ? Place of deposit, Vākuḍā Viṣṇupura, Paṇḍita Candranārāyaṇa Bhattācāryya. Appearance, tolerable. Prose. Incorrect.

Beginning. ॐ नमः शिवाय ।

राधाकृष्णं नमस्कृत्य महेशदेवशर्मणा ।

लिख्यते धातुमाला च श्रीदुर्गायाः प्रसादतः ॥

अथ भ्वादिगणि-लट्प्रकरण धातवः संक्षेपेण लिख्यते । भू सत्तायां भूधातुः परस्मैपदी । भवति भवतः भवन्ति ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । अर्थनिरूपणमुखेन धातूनां रूपनिरूपणम् ।

No. 198. **धातुमाला.** By **यष्ठीदासविशारदः.** Substance, country-made paper, 12 x 3 inches. Folia, 24. Lines, 7 on a page. Extent, 504 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Serapura, Paṇḍita Durgāsundara Kṛtiratna. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

अज्ञानध्वान्तसंहन्त्रीं भारतीमिन्दुसन्निभाम् ।

गुरुञ्च ज्ञानदं भक्त्या प्रणमामि पुनः पुनः ॥

मनोरमादिमालोक्य धातुटीकां गुणाधिकाम् ।

करोमि धातुभिर्मालां शिशूनां कण्ठभूषणम् ॥

भुवाद्यदादिकाराद्यो दिवादिः स्वादिकस्ततः ।

तुदादिस्तद्गुणः प्रोक्तो रुधादिस्तदनन्तरम् ॥

तनादिकतनादिश्च क्रियादिः चुरादिकः ।

एते दश गणा ज्ञेया अत्र कातन्त्रसम्मताः ॥ इत्यादि ।

End. चन्त्यर्था धातवो ये स्युरुराद्या अपि ये स्मृताः ।

परस्मै वचने तेषां प्रयोगः परिकीर्त्तितः ॥

एतत् संक्षेपतः प्रोक्तं ग्रन्थविस्तारभीतितः ।
अन्येऽनेकगणस्था ये विज्ञेयास्ते प्रयोगतः ॥
मध्यमायाः समीपस्थो जाह्नवीकूलसन्निधौ ।
गोपालपुरजोऽकार्षीत् धातुमालां विशारदः ॥

Colophon. इति वैदिककुलसम्भवगोपालदासविरचिता धातुमाला समाप्ता ॥ * ॥

विषयः । भुवाद्यदादिप्रभृतिधातुनिकराणां विशदार्थनिरूपणम् ।

No. 199. धातुलक्षणम् . By दनोकाचार्य्यः . Substance, country-made paper, 13×3 inches. Folia, 33. Lines, 5 on a page. Extent, 1,100 çlokas. Character, Bengali. Date, ? Place of deposit, District Tripurā, Vidyākūṭa, Paṇḍita Jagadbandhu Bhaṭṭācāryya, Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
शिवं प्रणम्य बोधाय बालानां स्मृतये सताम् ।
आचार्य्य-श्रीदनोकेन क्रियते धातुलक्षणम् ॥
भू-स्था गम-दृशौ ... ... हृ-ज्ञा-पच-चिन्मयः । इत्यादि ।

End. खण्डितशेषत्वात् समाप्तिसूचकं वाक्यं नास्ति ।

विषयः । भुवादिदशगणीयधातूनामर्थकथनम् ।

No. 200. धातुसंग्रहः . Substance, country-made paper, 18×3½ inches. Folia, 11. Lines, 9 on a page. Extent, 396 çlokas. Character, Bengali. Date, ? Place of deposit, Parganā Vagḍi, Teliveni, District Medinipura, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमः शिवाय ॥
केन च बालजनानां निर्म्मलबोधाय चाशुतोषाय ।
संपच्च इह धातूनां विधीयते प्रयोगलक्ष्माणाम् ॥
भू सत्तायां पा पाने घ्रा गन्धोपादाने ध्मा शब्दाग्निसंयोगयोः ष्ठा गति-
निवृत्तौ ॥ इत्यादि ।

End. भाज पृथक्करणे सभाज प्रीतिसेवनयोः परस्मैपदिनः घूर्ण भ्रमे विश्वासे स्फुट परिहसने आत्मनेपदिनः इति सुधादि ।

Colophon. इति चुरादिगणीयाः ॥ समाप्तश्चायं संग्रहीतः प्रयुक्तधातुगणः ॥

विषयः । धातूनामर्थकथनं तेषामनुबन्धादिनिरूपणेनात्मनेपदादिविवेचनञ्च ।

No. 201. नाड़ीप्रकाशः. (कणादसंहितायाम्) Substance, country-made paper, 16×3 inches. Folia, 8. Lines, 6 on a page. Extent, 144 çlokas. Character, Bengali. Date, ? Place of deposit, Mayamanasiṁha, Serapura, Bābu Haracandra Caudhurī. Appearance, tolerable. Verse. Generally correct.

Beginning. नमः शङ्कराय ।

पद्मेभ्यः पञ्चसंख्यागतेभ्यो
वेदा जाता ऋग्यजुःसामभेदाः ।
अथर्व्ववेदश्चायुर्व्वेदश्च तस्मि-
न्नास्तां शम्भो श्रीकणादस्य भक्तिः ॥
आस्ते वेदः पञ्चमो वैद्यकाख्यो
वैद्या कश्चित् तस्य नास्ते महेशात् ।
तस्माज्ज्ञातार्थेन तस्मात्परात्
तस्माज्ज्ञात्वा वक्तुमर्हामि शास्त्रम् ॥
प्रथमे नाड़िकाज्ञानं द्वितीये रोगनिश्चयः ।
तृतीये च कषायः स्यात् चतुर्थे पारदादिकम् ॥
पञ्चमे तु महाविद्या रसजारणमारणम् ।
यस्य प्रभावाद्रोगाश्च नश्यन्ति सह मूलतः ॥ इत्यादि ।

End. भग्ननाशो (?) न जीवेच्च वातशोथी न जीवति ।
वक्राकृतिश्छिन्ननेत्रो न जीवेद्विकलेन्द्रियः ॥
इत्युक्तं नाड़िकाज्ञानं निदानं कथ्यतेऽधुना ॥ ... । * ॥

Colophon. इति कणादसंहितायां नड़ीप्रकाशः समाप्तः ॥ श्रीदुर्गाचरणं भक्तिरास्तम् ॥

विषयः । नाड़ीज्ञानमुखेन रोगादिनिरूपणम् ।

No. 202. निकुञ्जरहस्यम्. Substance, country-made paper, $12\frac{1}{2} \times 5$ inches. Folia, 3. Lines, 11 on a page. Extent, 78 çlokas. Character, Bengali. Date, ? Place of deposit, Tripurā, Mahārāja's Library. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीराधाकृष्णाभ्यां नमः ।
द्रुतकनकसुगौरस्निग्धमेघौघनीला
... ... रखिलवृन्दारण्यमुद्राघयन्तौ ।
मृदुलनवदुकूले नीलपीते दधानौ
स्मर निभृतनिकुञ्जे राधिकाकृष्णचन्द्रौ ॥ इत्यादि ।

End. परमरसरहस्यानन्द ... ... वृन्दा-
विपिन-नवनिकुञ्जे दिव्यदिव्यैर्विलासैः ।
निरवधि रममाणौ राधिकाकृष्णचन्द्रौ
भज सकलमुपेक्ष्य ... ... ॥
स्तवमिममतिरम्यं राधिकाकृष्णचन्द्र-
प्रमदरसविलासैरद्भुतं भावयुक्तम् ।
पठति य इह ... ... मग्नचित्तो
विजनमनु स राधालीषु सख्यं लभेत ॥

Colophon. इति श्रीनिकुञ्जरहस्यस्तोत्रं सम्पूर्णम् ॥

विषयः । निकुञ्जे रममाणयोः श्रीकृष्णराधिकयोः स्तुतिः ॥

No. 203. निगमतत्त्वसारः. Substance, foolscap paper, 8×3 inches. Folia, 12. Lines, 10 on a page. Extent, 297 çlokas. Character, Nāgara. Date, ? Place of deposit, Ḍhākā, Ramanā's Kālimaṭha. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
कैलासशिखरे रम्ये नानारत्नविभूषिते ।
आनन्दभैरवो देवः पप्रच्छानन्दभैरवीम् ॥
श्रीआनन्दभैरव उवाच ।
निगमागमशास्त्राणि मया त्वयि प्रकाशितम् ।
तेषां मध्ये सारभूतं वद कान्ते कुलेश्वरि ॥

पुरा श्रीत्वन्मुखाम्भोजात् श्रुतं बहुविधं मया ।
श्रीरुद्रयामलाख्यञ्च तथाचोत्तरतन्त्रकम् ॥
शक्तियामलमाख्यातं तथान्यद्विस्तरं प्रिये ।
योगसारं तत्त्वसारं तथा गुह्यं वदस्व मे ॥ इत्यादि ।

End. आनन्दभैरव उवाच ।
एतदद्भुतमाहात्म्यं त्वन्मुखात् संश्रुतं मया ।
अद्य प्रभृति देवेशि तव दासो भवाम्यहम् ॥

Colophon. इति निगमतत्त्वसारे एकादशः पटलः ॥ समाप्तोऽयं ग्रन्थः ।

विषयः । शिवया सह शिवसंवादेन योगसारतत्त्वसारयोर्निरूपणम् । तत्र पञ्चतत्त्व-माहात्म्यादिकथनम् । पञ्चतत्त्वादिशुद्धिविधिः । होमविधिः । मन्त्रादिसाधनविधिः । शौचादि-शोधनविधिः । कवचविधिः । चण्डीपाठक्रमः । मद्यमांसादिशोधनविधिः । सम्विदाकल्प-कथनम् । अशक्तानां पञ्चतत्त्वविधिविशेषकथनञ्च ।

No. 204. निगमलता. Substance, country-made paper, 19 × 5 inches. Folia, 34. Lines, 6 on a page. Extent, 637 çlokas. Character, Bengali. Date, ? Place of deposit, District Dhākā, Vikramapura, Mājha-pāḍā, Bābu Rāsavihārī Rāya. Appearance, new. Verse. Incorrect

Beginning. ॐ नमः परदेवतायै ।
कैलासपर्व्वते रम्ये यामावन्ते च शर्व्वरी (?) ।
स्पृष्ट्वा तु चरणौ देव्या भगवान् शङ्करोऽब्रवीत् ॥
श्रीशङ्कर उवाच ।
मातर्दुर्गे महामाये कृपां कुरु दयामयि ।
हृदि शूलं समुद्धृत्य चाहि मां पद्मलोचने ॥
श्रूयतां सुभगे देवि यच्छूलं वर्त्तते हृदि ।
तन्मया कथितं भद्रे त्वया ज्ञात्वा न मुह्यति ॥
तव वक्त्रे श्रुतं पूर्व्वं भगरूपा त्वमेव हि ।
वाक्येनालापनं नैव कथं कुर्य्याद्भगेश्वरी ॥
इदं चैकं द्वितीयञ्च वरदानं कथञ्चन ।
तृतीयं परमेशानि जीवहीने गतिर्न च ॥

जीवन्मुक्तिे यदा शम्भोर्गमनं केन वा कृतम् ।
इति चिन्तापरो भूत्वा मातुलोऽभूत्र संशयः ॥

श्रीपार्व्वत्युवाच ।

नाहं वदामि खलु पामरेषु रतिं त्यजामि पशुवादिनेषु । (?)
वाचं त्यजामि कुलकर्म्मघातिने सङ्गं त्यजामि किल चम्पकेषु ॥

श्रीशङ्कर उवाच ।

देवि विश्वेश्वरि त्वं हि सृष्टिस्थित्यन्तकारिके ।
कथं मां पशुरूपेण स्थापितासि रतिप्रिये ॥

श्रीपार्व्वत्युवाच ।

पुरा क्षीरवधुसङ्गाद्वीराचारं भवान् कृतः ।
तथापि पशुभावत्वं न मुञ्चति कथञ्चन ॥ इत्यादि ।

End. निगमं मत्कुलं नाथ लताख्यं निश्चितं प्रभो ।
इति ज्ञात्वा सावधिता न प्रकाश्यं कदाचन ॥
यः पाति पुस्तिकामेतां गृहे रक्षति नित्यशः ।
तस्य स्थाने स्थाहं वद्धा सर्व्वदा तत्पुरे यथा ॥
पटलं वा तदर्द्धं वा तदर्द्धं वा महेश्वर ।
जानाति स गुरुः साक्षात्मत्तृसमस्तत्समोऽपि वा ॥

Colophon. इति निगमलतायां पार्व्वतीश्वरसंवादे चतुर्व्विंशतिः पटलः । सम्पूर्णोऽयं ग्रन्थः ॥

विषयः । शङ्करं प्रति शङ्कर्य्या उक्तिरूपोऽयं प्रबन्धः । तत्र पञ्चमकारेषु प्राधान्यतः पञ्चमकारस्यैव प्रपञ्चशः प्रयोगादिविधिः । लतासाधनविधिः । दिव्यवीरादीनां लक्षणादिकथनम् । पञ्चमकारसाधनेनैव मोक्षप्राप्तिकथनम् । भैरवीचक्रे प्रवर्त्तमाने वर्णभेदराहित्यादिकथनम् । पञ्चमकारशोधनादिविधिः । पुनः पुनः पानविधिः । योनिपूजाविधिः । तत्र ध्यानादिकथनञ्च । अथ कालिकापूजाविधिः । तारापूजाविधानम् । उग्रताराविधानकथनम् । अभिषेकविधिकथनञ्च ।

No. 205. नित्यानन्दाष्टकम् . By श्रीकृष्णदासगोस्वामी. Substance, country-made paper, 10 × 4½ inches. Folia, 3. Lines, 4 on a page. Extent, 24 çlokas. Character, Bengali. Date, ? Place of deposit, Agartalā, Vṛddhanagara, Tripurā, Paṇḍita Mīneçvara Sārbbabhauma. Appearance, new. Verse. Generally correct.

Beginning. श्रीनित्यानन्दाय नमः ।

शरच्चन्द्रभ्रान्तिं स्फुरदमलकान्तिं गजपतिं
हरिप्रेमोन्मत्तं धृतपरमसत्त्वं स्मितमुखम् ।
सदाघूर्णन्नेत्रं करकलितवेत्रं कलिभिदं
भजे नित्यानन्दं भजनतरुकन्दं निरवधि ॥ इत्यादि ।

End. ... ...
... ... ॥
परं नित्यानन्दाष्टकमिदमपूर्व्वं पठति य-
स्तदंघ्रिद्वन्द्वाब्जं स्फुरति नितरां तस्य हृदये ॥

Colophon. इति श्रीनित्यानन्दाष्टकं श्रीवृन्दावनदासगोस्वामिविरचितं सम्पूर्णम् ॥

विषयः । अष्टभिः श्लोकैर्नित्यानन्दस्य स्तवकथनम् ।

No. 206. निरुत्तरतन्त्रम् . Substance, country-made paper, 18 × 5 inches. Folia, 26. Lines, 8 on a page. Extent, 750 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Mājhapāḍā, Bābu Rāsavihāri Rāya. Appearance, new. Verse. Correct.

Beginning. ॐ नमो जगन्मोहिन्यै ।

श्रीदेव्युवाच ।

सिद्धविद्या पुरा प्रोक्ता मन्त्रयन्त्रादिकानि च ।
नानाभावप्रभेदेन संशयो जायते प्रभो ॥
भावभेदेन कथय लोकनिस्तारकारक ।
सर्व्वेषां शरणं तन्त्रं सिद्धान्तविद्यसम्मतम् ॥
आसामाराधना केन भावेन परिजायते ।
आसां वः प्रकृतिः कापि तव वा कीदृशी क्रिया ॥
तत् प्रकाशय सम्यङ्मे येन यामि निरुत्तरम् ।

श्रीशिव उवाच ।

सर्व्वासां सिद्धविद्यानां प्रकृतिर्दक्षिणा प्रिये ।
दिव्यो वीरो वरारोहे चिन्तयेद्दक्षिणां शुभाम् ॥
दिव्यो वीरश्च देवेशि कालीकुलं विचिन्तयेत् ।
श्रीकुलञ्च त्रिभिर्भावैश्चिन्तयेत् सुरसुन्दरि ॥

काली तारा भद्रकाली भुवना महिषमर्द्दिनी ।
त्रिपुटा त्वरिता दुर्गा विद्या प्रत्यङ्गिरा प्रिये ॥
कालीकुलं समाख्यातं श्रीकुलञ्च ततः परम् ।
सुन्दरी भैरवी बाला बगला कमला तथा ॥
धूमावती च मातङ्गी विद्या स्वप्नावती प्रिये ।
मधुमती महाविद्या श्रीकुलं परिभाषितम् ॥
लतायां पूजयेत् कालीं नीले नीलसरस्वतीम् । इत्यादि ॥

End. काली तारा तथा छिन्ना मातङ्गी भुवनेश्वरी ।
अन्नपूर्णा तथा दुर्गा महिषासुरमर्द्दिनी ॥
त्वरिता त्रिपुरा भद्रे भैरवी बगला तथा ।
त्रिपुटा च तथा नित्या कमला च सरस्वती ॥
जयदुर्गा तथा भद्रे तारा त्रिपुरसुन्दरी ।
अष्टादश महाविद्यास्तन्त्रादौ कथिताः प्रिये ॥
नात्र कालविशुद्धिः स्यात् समयासमयादिकम् ।
न वारतिथिनक्षत्रं न योगः करणन्तथा ॥

Colophon. इति निरुत्तरतन्त्रे देवीश्वरसंवादे पञ्चमः पटलः ॥

विषय: । शिवाशिवयोः संवादेन भावभेदनिरूपणम् । कालीकुलकथनम् । श्रीकुल-कथनम् । पञ्चाम्नायनिरूपणम् । कालीपूजायां गुरुमन्त्रादिनिरूपणम् । कलानिरूपणम् । दक्षिणकालिकामन्त्रतद्ध्यानपूजादिविधिः । महाकालध्यानकथनम् । कुल्लुकादिनिरूपणम् । कालीस्तवकथनम् । कालीकवचकथनम् । अजपानिरूपणम् । अथ पुरश्चरणविधिः । दिव्य-वीरपशुभावभेदात् पुरश्चरणप्रकारभेदकीर्त्तनम् । प्राणायामविधिः । निर्गुणसगुणभावचिन्तन-विधिः । रात्रौ पूजाविधिः । महानिशादिनिरूपणम् । अथ वीराभिषेकविधिः । तत्र अभिषेक-मन्त्रादिकथनम् । सिद्धमन्त्रलक्षणम् । शक्तिसाधनं विना निर्व्वाणाभावकथनम् । मात्रादि-पञ्चकन्याव्याख्यानम् । शक्तिचक्रादिलक्षणकथनम् । पञ्चचक्रविधिः । कुसुमानुकल्पादिकथनम् । चक्रे वर्ज्जनीयकथनम् । गोप्यकर्म्मकथनम् । राजचक्रे देवचक्रे च विशेषकथनम् । योगिनां साधनादिविधिः । साधिकालक्षणादिकथनम् । कुलाचारादिसाधनकथनम् । विद्याविशेषे शक्तिविशेषविधानम् । अथ वेश्यालक्षणादिकथनम् । पञ्चद्रव्यनिरूपणम् । तेषां शुद्धिकथनम् । नवकन्यानिरूपणम् । तर्पणे मुद्रादिविधिः । पञ्चीकरणविधिः । अष्टादशमहाविद्याकीर्त्तनञ्च ।

No. 207. निर्णयसिन्धुः. By कमलाकरभट्टः. Substance, country-made paper, 15×7 inches. Folia, 270. Lines, 13 on a page. Extent, 104,364 çlokas. Character, Bengali. Date, Sk. 1772. Place of deposit, Kāṭihāli, District, Mayamanasiṁha, Paṇḍita Navakiçora Tarkacūḍāmaṇi. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । श्रीरामाय नमः । श्रीकृष्णाय नमो नमः ।
कारुण्यैकनिकेतनं रामं सीतालताशोभितम् ।
विश्वामित्रान्ववायव्रततीसमालम्बनशाखिनं वन्दे ॥
लक्ष्मीसहायं कल्पद्रुतलावर्जितगोकुलम् ।
वर्हापीड़ं घनश्यामं महः किञ्चिदुपास्महे ॥
देवार्थधर्म्मरक्षार्थे मायामानुषरूपिणम् ।
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥
यत्पादसंस्थितिः सर्व्वमङ्गलप्रतिभूर्मता ।
तान् भट्टरामकृष्णाख्यान् श्रीतातचरणान्नुमः ॥
सर्व्वकल्याणसन्देहनिदानं यत्पदद्वयम् ।
द्युनदीसोदरीमम्बामम्बाख्यां नौमि सादरम् ॥
विन्दुमाधवपादाब्जरोलम्बीकृतविग्रहम् ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥
हेमाद्रिमाधवमते प्रविचार्य्य सम्य-
गालोक्य तत्त्वमथ तीर्थकृतं परेषाम् ।
श्रीरामकृष्णतनयः कमलाकराख्यः
काले यथामति विनिर्णयमातनोति ॥
सन्ति यद्यपि विद्वांसस्तन्निबन्धाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥
तत्र संक्षेपतः कालः षोड़षाङ्गोऽयनम्हतुर्मासः पक्षो दिवस इति । तत्राब्दो माधवमते पञ्चधा सावनः सौरश्चान्द्रो नाक्षत्रो बार्हस्पत्य इति । इत्यादि ।

End. प्रेतक्रियैकोद्दिष्टनिषेधेऽपि सिद्धे पुनस्तद्ग्रहणमाब्दिकपरं तेन तत् पार्व्वण-मेव । त्रिदण्डिनो द्वादशनारायणबलिः तद्विधिरन्यश्च विशेषः प्रागुक्त इत्यलं बहुना ॥
एवं निरूपितमिदं गहनन्तु धर्म्म-
तत्त्वं विचार्य्य वचनैस्तुलयैः सुसम्यक् ।

महोषदृश्मिपथाय विवेचनीयं
विद्वद्भिरित्यवरतं प्रणतोऽस्मि तेभ्यः ॥ * ॥

Colophon. समाप्तोऽयं निर्णयसिन्धुरिति शक १७७१ ।

विषय: । प्रयागस्नानादिविधिः । कम्बलभूषण्यादिदानविधिः । संक्रान्तिविचारः । सप्तमीव्रतस्नानदानादिविधिः । महामाघीयोगादिकथनम् । होलिकापौर्णमास्यादिकृत्यनिरूपणम् । रजोदर्शनतिथिराश्यादिफलनिरूपणम् । दण्डसिंहासनादिपूजानिरूपणम् । शमीवृक्षादिपूजानिरूपणम् । कोजागरलक्ष्मीपूजनादिनिरूपणम् । कार्त्तिकप्रातःस्नानाकाशप्रदीपोत्सर्गादिविधिः । चातुर्मास्यव्रतसमाप्तिबोधनादिविधिः । धनुःसंक्रमणपुण्यकालादिनिरूपणम् । अर्द्धोदययोगादिनिरूपणम्। माघस्नानविधिर्माघे मूलकभक्षणादिनिषेधः । विष्णुपवित्रारोपणादिविधिः । हयग्रीवोत्पत्त्यादिनिरूपणम् । शक्रध्वजारोपणादिविधिः । वामनपूजादिविधिः । महालयापार्व्वणादिश्राद्धविधिः । कपिलषष्ठीकृत्यादिविधिः । गजच्छायादिकथनम् । देवीपूजाचण्डीपाठादिविधिः । वैशाखशुक्लचतुर्दश्यां नृसिंहव्रतादिनिरूपणम् । सेतुबन्धरामेश्वरपूजादिनिरूपणम् । कोकिलव्रतादिनिरूपणम् । मासविचारादिनिरूपणम् । व्रतारम्भकालादिनिरूपणम् । ग्रहणादिनिरूपणम् । लौहित्यस्नानादिविधिः । अभिषेकविधिः । गर्भाधानादिसंस्काराभावदोषकथनम् । सीमन्तोन्नयादिसंस्कारकर्म्मनिरूपणम् । विवाहादिविधिः । देवप्रतिष्ठादिविधिः । सदसच्छूद्राणां व्यवस्था । लिङ्गयुक्तशालग्रामद्वयपूजनादिनिषेधः । होमादिनिरूपणम् । श्राद्धादिनिरूपणम् । क्रयविक्रयादिनिरूपणम् ।

सत्यमेव जयते

No. 208. निर्व्वाणतन्त्रम् . Substance, country-made paper, 12 × 2½ inches. Folia, 18. Lines, 8 on a page. Extent, 432 çlokas. Character, Bengali. Date, ? Place of deposit, Hālisahara Khāsvāṭī, Mahādeva Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः परमदेवतायै ।
कैलासपर्व्वते रम्ये नानारत्नोपशोभिते ।
विपरीतरतासक्ता चण्डी पप्रच्छ शङ्करम् ॥
श्रीचण्डिकोवाच ।
निराकारं निर्गुणञ्च स्तुतिनिन्दाविवर्जितम् ।
सुनित्यं सर्व्वकर्त्तारं वर्णातीतं सुनिश्चलम् ॥
संज्ञादिरहितं शान्तं किमाकारं प्रतिष्ठितम् ।
तस्मादुत्पत्तिर्देवेश किमाकारेण जायते ॥ इत्यादि ।

End. यदि भक्तियुतो मर्त्त्यो मनसा चिन्तयन् सदा ।
ते नरा नहि गच्छन्ति कदाचिन्मम मन्दिरे ॥
इति ते कथितं तत्त्वं वैष्णवस्य सुरेश्वरि ।
यज्ज्ञानादमरत्वञ्च लभ्यते नात्र संशयः ॥

Colophon. इति श्रीनिर्व्वाणतन्त्रे विष्णोः स्तोत्रकथनं नाम द्वादशः पटलः ॥

विषयः । ब्रह्मनिरूपणम् । ब्रह्माण्डोत्पत्तिनिरूपणम् । नराणां जन्मस्थलादिनिरूपणम् । गायत्रीनिरूपणम् । गायत्रीमाहात्म्यनिरूपणम् । षड़ङ्गन्यासमन्त्रादिनिरूपणम् । वृत्तद्वयाण्ड-लक्षणनिरूपणम् । योगाचरणनिरूपणम् । सत्यादिलोकनिरूपणम् । विष्णुस्तवकथनञ्च ।

No. 209. नीतिसारः, (गारुड़ीयः). Substance, country-made paper, 12×3 inches. Folia, 13. Lines, 7 on a page. Extent, 366 çlokas. Character, Bengali. Date, Sk. 1736. Place of deposit, Brāmhaṇamaṇḍalī *viâ* Bārāsāt, Paṇḍita Rāmanārāyaṇa Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ नीतिसारः ।
उत्तमैः सह साङ्गत्यं पण्डितैः सह सङ्कथाम् ।
अलुब्धैः सह मित्रत्वं कुर्व्वाणो नावसीदति ॥
परवादं परस्वञ्च परिहासं परस्त्रिया ।
परवेश्मनिवासञ्च न कुर्व्वीत कदाचन ॥ इत्यादि ।

End. गृहे चाभ्यन्तरे द्रव्यं लग्नञ्चैव तु दृश्यते ।
अशेषं चरणीयञ्च विद्या न ह्रियते परैः ॥ • ॥

Colophon. इति गारुड़ीयनीतिसारः समाप्तः ॥ • ॥

विषयः । नीतिविषयोपदेशकाः कतिपयश्लोकाः ।

No. 210. नीलकण्ठस्तवराजः. Substance, country-made paper, 16×3 inches. Folia, 6. Lines, 6 on a page. Extent, 108 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭihāli, District Mayamanasiṁha, Paṇḍita Jagaccandra Smṛtipañcānana. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।
विशुद्धरत्नांशुविभूषिताङ्गी
शिलातले हेममये सुरम्ये ।
सुखोपविष्टं मदनाङ्गनाशनं
जगाद वाक्यं गिरिराजपुत्री ॥ इत्यादि ।

End. श्रुत्वैतत् परमं गुह्यं येऽपि स्युः पापयोनयः ।
स्त्रियः शूद्राश्च येऽपीह रुद्रलोकं व्रजन्ति वै ॥

Colophon. इति स्कन्दपुराणे अमृतमथने पार्व्वतीशिवसम्वादे श्रीनीलकण्ठस्तवराजः समाप्तः ॥ * ॥

विषयः । कालकूटधारणनिरूपणमुखेन नीलकण्ठस्तवनिरूपणम् ।

No. 211. नीलाचलीयतीर्थप्रयोगः. Substance, country-made paper, 16 × 3½ inches. Folia, 10. Lines, 5 on a page. Extent, 119 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, kāṭihāli, Paṇḍita Parāṇacandra Tarkālaṇkāra. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमः कामाख्यायै । अथ योगिनीतन्त्रोक्तनीलाचलीयतीर्थप्रयोगः ।
गयाशीर्षे गयाकूपे तथा नीलाचले गया ।
त्रिगयापिण्डदानेन पुनः श्राद्धं न चाचरेत् ॥
आमणेर्मणिपर्य्यन्तं आचिवाङ्गन्धमादनम् ।
देवा मरणमिच्छन्ति किं पुनर्मानवादयः ॥ इत्यादि ।

End. शुक्रादीनाञ्च यज्ज्ञानं यमादिपरिशोधितम् ।
तदेव द्रवरूपेण कामाख्यायोनिमण्डले ॥
नरयोनिः केन प्रकारेण भवति एकमेव सत्यञ्च चञ्चलं स्यात् सत्यम् ।
एकोऽपि नवधा भूत्वा न्यपतद् योनिमण्डलम् ॥ इति योगिनीतन्त्रीयवचनात् ।

Colophon. समाप्तोऽयं ग्रन्थः ॥ * ॥

विषयः । क्षेत्रप्रमाणनिरूपणमुखेन कामाख्यायां कर्त्तव्यकर्म्मनिचयनिरूपणम् ।

No. 212. नैषधचरितटीका, (अन्वयबोधिका). By प्रेमेन्द्रन्यायरत्नः. Sustance, country-made paper, 16 × 3 inches. Folia, 47. Lines, 9 on a page. Extent, 150 çlokas. Character, Bengali. Date, ? Place of deposit, Tāmluk Kelomāl, Bābu Sāradāprasanna Ghoṣa. Appearance, new. Prose. Generally correct.

Beginning. ॐ नमः परदेवतायै ।

याकाङ्क्षितामलपदा नियतं जनानां
शब्दार्थसञ्चयसमुन्नयने च योग्या ।
व्यक्तीकरोति निखिलं हृदि भावजातं
वाग्देवतामभिमतामहमाश्रये ताम् ॥
अन्यासु भावबहुलासु सदर्थिकासु
टीकासु चेदिह भवेत् विफलः प्रयत्नः ।
सद्भिस्तथापि सदुद्बोधविबोधनार्थं
जातोद्यमोऽहमिह मत् प्रति नावधुतौ ॥

अस्य ग्रन्थस्य महाकाव्यतया वर्णनीयप्रसिद्धनायकत्वेन सहृदयानां झटिति साभिनिवेशशुश्रूषाप्रकीर्णतया च प्रथमं सन्नायकनामरूपं वस्तु निर्दिशति । निपीयेति । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । नैषधचरिताख्यस्य महाकाव्यस्य व्याख्यानम् ।

No. 213. न्यायादर्शः वा न्यायसारावलिः. By जगदीशतर्कालङ्कारः. Substance, country-made paper, 14 × 4 inches. Folia, 23. Lines, 16 on a page. Extent, 1,725 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Ichāpurāgrāma, Paṇḍita Rajanīkānta Tarkaratna. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।

कर्पूरकुन्दकुसुमकैलासोदरसोदरम् ।
विघ्नविध्वंसकं धाम नमामो नैव दैवतम् ॥
अन्यैरनुष्ठितविविधवादैः कलुषीकृतः कविभिः ।
न्यायादर्शं इदानीं श्रीजगदीशप्रकाशितः स्फुरतु ॥

यन्मादृशेन समुपदिष्टमदृष्टमन्यैः
श्रीसार्व्वभौमगुरुणा करुणामयेन ।
सिद्धान्तवादरत × स्तु × × × दत्त्वा
विद्यार्थिनां गुरुकृते प्रकृतं वदामः ॥

अथ निखिलवस्तुषु विदितेषु लौकिकेषु च कर्म्मसु तत्तत्फलस्य कारणत्वं निर्णीय प्रवर्त्तन्ते । न तु तदनाकलय्यन्तः । तत्र किन्नाम कारणत्वम् । न च तावत् तत्तत्फलाव्यवहितपूर्व्वत्वमतिप्रसङ्गात् क्वचिदप्रसङ्गाच्च । नापि तदभावप्रयोजकीभूताभावप्रतियोगित्वम् । प्रयोजकत्वं हि न व्यापकत्वं घटारम्भकसंयोगादिकं प्रति घटादेर्जनकत्वापत्तेः । नापि स्वरूपसम्बन्धविशेषः । प्रमाणाभावात् । इत्यादि ।

End. किन्तु स्वप्रयोज्यविलक्षणसंयोगस्तथेति न स्वर्गादिघटकस्योत्पत्तौ व्यभिचारस्तत्रापि लौहाख्यरूपस्यापि निरवच्छदण्डस्य तादृशप्रत्यासत्त्या सत्त्वादित्यपि वदन्तीति कृतं पल्लवितेन ॥

Colophon. इति महामहोपाध्याय–जगदीशतर्कालङ्कारविरचिता न्यायसारावलिः सम्पूर्णा ॥

विषयः । अत्र प्रथमं कारणत्वस्वरूपविवेचनम् । तत्र एकदेशिमतादिन्यासपूर्व्वकं तत्तन्मतखण्डनम् । समवाय्यसमवायिनिमित्तभेदात् कारणत्वस्य त्रैविध्यनिरूपणम् । तत्र चित्ररूपत्वादिस्वरूपकथनपूर्व्वकं मीमांसकमतखण्डनम् । जन्यमहत्त्वेषु क्वचिद्बहुत्वसंख्यामात्रं क्वचिन्महत्त्वमात्रं क्वचिद्बहुत्वसंख्यामहत्त्वोभयं क्वचिन्महत्त्वप्रचयोभयं क्वचिच्च बहुत्वसंख्यामहत्त्वप्रचयत्रितयमेव कारणं कार्य्यप्रत्यासत्त्या कारणमिति निरूपणम् । अथ दीर्घत्वाख्ये च परिमाणे महत्त्वमात्रं दीर्घत्वमात्रं बहुत्वदीर्घत्वोभयं बहुत्वदीर्घत्वप्रचयत्रितयञ्च यथायोगमसमवायिकारणमिति निरूपणम् । एवं संयोगादिषु कारणत्वविवेचनञ्च ।

No. 214. पञ्चपञ्चीटीका. Substance, country-made paper, 18 × 4½ inches. Folia, 7. Lines, 9 on a page. Extent, 323 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā, Post Office Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākur. Appearance, old. Verse. Incorrect.

Beginning. श्रीशिवः ।

बालो गन्धस्तथा पृथ्वी निवृत्तीच्छा च सारणम् ।
डाकिनीसहितो ब्रह्मा मूलाधारस्तथा स्वरे ॥

कसारोपो (?) यसोर्विष्णुप्रतिष्ठाज्ञानमेव च ।
शोषणं राकिणीशक्तिः स्वाधिष्ठानमिकारतः ॥ इत्यादि ।

End. अन्त्यजस्तस्करः सिंहे कन्यायाञ्च वराङ्गना ।
पुत्रो भ्राता सखा वापि तुलायां तस्करो भवेत् ॥
वृश्चिके सेवकश्चौरश्चापे भ्राता स्त्रियोऽथवा ।
मृगे वेश्याजनश्चौरः कुम्भे चौरश्च मूषिकः ।
मीने धरातले स्थाने नाम चैषां न विद्यते ॥

Colophon. इति पञ्चपक्षीटीका समाप्ता ॥

विषयः । पञ्चपक्षीनामकस्य ज्योतिषग्रन्थस्य व्याख्या ।

No. 215. पञ्जीनिबन्धः. By हेमकरः. Substance, country-made paper, 18 × 1½ inches. Folia, 95. Lines, 4 on a page. Extent, 1,425 çlokas. Character, Bengali. Date, Sk. 1669. Place of deposit, Serapura, District Mayamanasiṁha, Mahāmahopādhyāya Candrakānta Tarkālaṅkāra. Appearance, new. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
श्रीसर्व्वाङ्गजगन्नाथं प्रणम्यादिमनादिकम् ।
गुरूपदिष्टमाम्नायाल्लिख्यते स्मृतिहेतवे ॥
देवमित्यादि । प्रणम्येति प्रादीनां नामत्वमिति समासः । तथा हि नाम-प्रकरणं लिङ्गप्रकरण उच्यते । इत्यादि ।

End. यदि शोध्येऽर्थेऽधमर्णविषये त्नृणमिति निपातः तदोत्तमर्णं इति न सिध्यति । इत्याह अधमर्ण इत्यादि । श्लवन्तोरपीति तेषां मते श्लेन श्लवन्तो-पलक्षणम् । अवर्णा ॥ अवर्णं लोटो वृद्धिरिति सन्निपातलक्षणो विधि-रनिमित्तं तद्विघातस्य वर्णग्रहणे निमित्तत्वादिति च नाश्रितं भवतीति ॥०॥

Colophon. इति श्रीमद्धेमकरविरचिते पञ्जीनिबन्धे कृत्पादः षष्ठः समाप्तः ॥ * ॥
९ ६ १६
नर तर्क रूपे शाके लिखिता पुस्तिका शुभा ।
शकाब्दा १६६९ ॥

विषयः । कातन्त्रपञ्जीव्याख्या ।

No. 216. पत्रकौमुदी. By वररुचिः. Substance, country-made paper, 19 × 4 inches. Folia, 5. Lines, 9 on a page. Extent, 245 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Haraprasāda Çāstrī. Appearance, tolerable. Prose. Incorrect.

Beginning. ॐ दुर्गायै नमः ।

श्रीमत्कृष्णपदारविन्दयुगलं ब्रह्मेश्वराद्यामर-
श्रेणीनम्रकिरीटकोटिवलभीपुष्पार्च्चितं सन्ततम् ।
वाणीञ्च प्रणमामि विश्वजननीं प्रत्यूहविध्वंसिनीं
भक्तानुग्रहविग्रहात् भगवतीं नित्यं वचोहृदये ॥
विक्रमादित्यभूपस्य कीर्त्तिसिन्धोर्निदेशतः ।
श्रीमान् वररुचिर्धीमान् तनोति पत्रकौमुदीम् ॥
राज्ञां मन्त्रिप्रवीराणां पण्डितानां तथैव च ।
गुरूणां स्वामिभार्य्याणां तथैव पितृपुत्रयोः ॥
सन्यासिभृत्यशत्रूणां तथैवान्यविवेकिनाम् ।
एतेषामपि सर्व्वेषां पत्रचिह्नादिकं ब्रुवे ॥ इत्यादि ।

End. अथ विवेकिनां प्रशस्तिः । स्वस्तिश्रीभगवत्पदपङ्कजपूजनोचितपुण्यपुञ्जपवित्री-
कृतान्तःकरणदिग्दलविसरमालाकलायशोऽनुबन्धिनिरवधिवसुमिश्राननाधरी-
कृतसुरपुरभूमीरुहेषु ॥ स्वस्तिश्रीमत्परमेश्वरपदपाथोरुहास्वादचतुरचित्त-
चञ्चरीकभूवृन्दारकवृन्दावनिजनितसितयशःपङ्कपटलालङ्कृतदिगङ्गनागणस्तन-
तटपवनप्रतापोर्व्वखर्व्वीकृतप्रत्यर्थिसार्थगर्व्वाङ्गपारावारेषु ॥ * ॥

Colophon. इति वररुचिविरचिता पत्रकौमुदी समाप्ता ॥

विषयः । पत्ररञ्जनम् । पत्रप्रमाणम् । लेखकलक्षणम् । पत्ररचनक्रमः । लिखनप्रकारः । पत्रानयनक्रमः । पठनक्रमः । पत्रचिह्नानि । राजपत्रस्य कोषच्छेदप्रकारः । पण्डित-मन्त्रि-स्वामिप्रभृतीनां पत्रलिखनक्रमः । राजप्रशस्तिः । मन्त्रिप्रशस्तिः । गुरु-भार्य्या-पुत्रप्रभृतीनाञ्च प्रशस्तिः ।

No. 217. पदार्थसंग्रहः. By विजयीन्द्रभिक्षुः. Substance, country-made paper, 12 × 4 inches. Folia, 16. Lines, 9 on a page. Extent, 522 çlokas. Character, Nāgara. Date, ? Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Rāmānuja Bhaṭṭācāryya. Appearance, tolerable. Prose. Incorrect.

Beginning. श्रीराघवेन्द्रगुरुराजाय ते नमः । ॐ श्रीमज्जयतीर्थगुरुभ्यो नमः । श्रीविज-यीन्द्रगुरुभ्यो नमः ।

ॐ लक्ष्मीपतिं संप्रणम्य सर्व्वज्ञादिगुरूनपि ।
पदार्थानां संग्रहोऽयं क्रियते शास्त्रतोऽञ्जसा ॥
द्रव्यगुणकर्म्मसामान्यविशेषविशिष्टांशिशक्तिसादृश्याभावभेदाद्दश पदार्थाः ।
इत्यादि ।

End. परमा चात्र सकलभोगयुक्ता मुक्तास्त्र्यादिभिः ईयमानलक्ष्मीके विमलाख्ये पर्य्यङ्के शयने तत्र प्रिये कर्म्मणाम्प्रति बहुधा विभूतिर्वर्द्धमानं करोति महा-लक्ष्मीः इत्येष मङ्गलम् ॥

Colophon. इति विजयीन्द्रभिक्षुविरचितः पदार्थसंग्रहः समाप्तः ॥ * ॥

विषयः । पदार्थादिनिरूपणम् । द्रव्यादिनिरूपणम् । गुणादिनिरूपणम् । सृष्टिप्रकरण-निरूपणम् । प्रलयनिरूपणम् । ज्ञानप्रकरणादिनिरूपणञ्च ।

No. 218. पद्यावलिः. Substance, country-made paper, $13 \times 3\frac{1}{2}$ inches. Folia, 27. Lines, 10 on a page. Extent, 709 çlokas. Character, Bengali. Date, Sk. 1750. Place of deposit, Viṣṇupura, Kṛiṣṇagañja, District Vā̃kuḍā, Çaçibhūṣaṇa Gosvāmī. Appearance, new. Verse. Generally correct.

सत्यमेव जयते

Beginning. श्रीश्रीराधाकृष्णाभ्यां नमः ।

पद्यावली विरचिता रसिकैर्मुकुन्द-
सम्बन्धवन्धुरपदा प्रमदोर्म्मिसिन्धुः ।
रम्या समस्तजनतां दमनी क्रमेण
संगृह्यते ललितकदम्बककौतुकाय ॥
प्रारम्भे मङ्गलाचरणमाह ।
नमो नलिननेत्राय वेणुवाद्यविनोदिने ।
राधाधरसुधापानशालिने वनमालिने ॥
कस्यचित् ॥
भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये ।

लावण्यैकमधानिधीरसिकतां राधाद्दशोस्त्वती
युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः ॥ इत्यादि ।

End. योगेश्वरस्य ॥
जयदेवबिल्वमङ्गलमुखैः कृता येऽत्र सन्ति सन्दर्भाः ।
तेषां पद्यानि विना समाहृतानीतराण्यत्र ॥
श्रीमन्मदनगोपालचरणद्वन्द्वसन्निधौ ।
पद्यावली विरचिता केनचित् द्विजबन्धुना ॥

Colophon. समाप्तेयं पद्यावली ॥ * ॥ शकाब्दाः १७५० ॥

विषयः । भक्तजननिकरकृतनानाविधकृष्णस्तवविषयकश्लोकसंग्रहः ॥

No. 219. परमात्मसन्दर्भः. Substance, country-made paper, 12 × 4 inches. Folia, 39. Lines, 11 on a page. Extent, 1,199 çlokas. Character, Bengali. Date, ? Place of deposit, District Vãkuḍā Kũcekol, Bābu Yogīndranātha Siṁhadeva. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीकृष्णचैतन्यचन्द्रो जयति ।
तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम् ।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥
अथ परमात्मा विविच्यते तत्र तं जीवनिरूपणपूर्व्वकं निरूपयति द्वाभ्याम् ।
क्षेत्रज्ञ आत्मा मनसो विभूती
जीवस्य माया रचितस्य नित्याः ।
आविर्हिताः क्वापि तिरोहितास्च-
शुद्धो विचष्टे ह्यविशुद्धकर्त्तुः ॥ (?) इत्यादि ।

End. यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः ।
एको नानायते तद्वत् भगवान् शास्त्रवर्त्मभिः ॥
इत्युदाहरणीयं । अनेनैव गतिसामान्यञ्च सिध्यतीति ॥ श्रीशुकः । प्रत्यक्-
स्थापितं यदन्तीत्यादिपद्यम् ॥ * ॥

Colophon. इति कलियुगपावनभजनविभजनप्रयोजनावतार-श्रीश्रीभगवत्कृष्णचैतन्य-
देवचरणानुचरविश्ववैष्णवराजसभाजन-श्रीरूपसनातनानुशासनभारतीगर्भे
श्रीभगवत्सन्दर्भो नाम तृतीयः सन्दर्भः ॥
ऊर्ज्जे मास्यसिते पक्षे नवम्याञ्च तिथौ मुदा ।
शाके इन्द्वाष्टशून्येन्दौ दिने सोमपरिप्लुते ।
पूर्णिता लिपिमालेयं कण्ठहारेण केनचित् ॥

विषयः । वैष्णवग्रन्थोऽयं । अत्र च जीवपरमात्मादिविचारमुखेन जीवपरमात्मादि-
निरूपणम् ।

No. 220. परिभाषाविवरणम् . Substance, country-made paper, 15 × 2½ inches. Folia, 22. Lines, 6 on a page. Extent, 495 çlokas. Character, Bengali. Date, Sk. 1626. Place of deposit, Vāḍari, District Mayamanasiṁha, Paṇḍita Çivacandra Nyāyabhūṣaṇa. Appearance, old. Prose. Correct.

Beginning. ॐनमो गणेशाय ।
प्रणम्य सदसद्द्वारं ध्वान्तविध्वंसभास्करम् ।
वाङ्नाथं परिभाषार्थं वक्ष्ये बालाविबुद्धये ॥
सूत्रेष्वेव हि तत् सर्व्वं यद्वृत्तौ यच्च वार्त्तिके ।
सूत्रं योनिरिवार्थानां सर्व्वं सूत्रे प्रतिष्ठितम् ॥ इत्यादि ।

End. न्याय्यश्चैतत् शब्दार्थानवच्छेदे विशेषश्रुतिहेतूनां प्रकरणबलाभावे विशेषार्थ-
बलात् लक्ष्यानुसार एव उचितः । तदुक्तं न ह्यनिष्ठार्थानां शास्त्रे
प्रवृत्तिरिति ॥

Colophon. इति दौर्गसिंह्यां परिभाषायां तदर्थविवरणं समाप्तम् ॥ शकाब्दाः १६२६ ।

विषयः । दौर्गसिंहपरिभाषाया व्याख्यानम् ।

No. 221. परिभाषावृत्तिः. By **दुर्गसिंहः.** Substance, country-made paper, 13½×3 inches. Folia, 17. Lines, 6 on a page. Extent, 777 çlokas. Character, Bengali. Date, ? Place of deposit, Kṛṣṇapurā, Post office Vaidyervāzār, District Ḍhākā, Paṇḍita Tārakacandra Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य सद्सद्द्वारं ध्वान्तविध्वंसभास्करम् ।

वाङ्नाथं परिभाषार्थं वक्ष्ये बालविबुद्धये ॥

इह हि ।

सूत्रेष्वेव हि तत्सर्व्वं यद्वृत्तौ यच्च वार्त्तिके ।

सूत्रं योनिरिहार्थानां सर्व्वं सूत्रे प्रतिष्ठितम् ॥

येन केनचिद्व्याख्यातुकामेनावश्यमेवाभ्युपगन्तव्यम् । तथाचान्वर्थः अर्थान् सूचयति सूते सूत्रयति इति वा सूत्रम् । तत्र सूत्रकारयोः सर्व्ववर्म्म-कात्यायनयोः सूत्राणां चतुःशत्यां पञ्चदशाधिकायां परिभाषा नोक्ता अथ च वृत्तिटीकयोः प्रयुक्ता कार्य्येषु दृश्यते तासां कुतः संसिद्धिरुच्यते । इत्यादि ।

End. ज्ञापकञ्च रूढ़ाणां बहुत्वेऽस्त्रियामपत्यप्रत्ययस्येत्यत्रास्त्रियामिति वचनम् । अन्यथाऽदन्तावल्लोपेऽस्त्रियामिति निर्देशोऽनर्थक एव स्यादिति ॥

Colophon. इति दुर्गसिंहोक्ता परिभाषावृत्तिः समाप्ता ।

विषयः । लौकिकशास्त्रीयभेदेन परिभाषाद्वैविध्यकथनम् । पुनः शास्त्रीयपरिभाषाया द्वैविध्यकथनम् । परिभाषाशब्दस्य व्युत्पत्तिकथनम् । नानाविधपरिभाषाया नानविधालौकिक-प्रयोजनकथनम् । नानाविधपरिभाषाया नानाविधानां शास्त्रीयप्रयोजनानां विशेषेण विवेचनम् । कातन्त्रसूत्राणज्ञापकान्युद्धृत्य स्वकीयोक्तिसमर्थनञ्च ॥

No. 222. **परिभाषावृत्तिः.** By **रामचन्द्रविद्याभूषणः.** Substance, country-made paper, 17 × 3 inches. Folia, 10. Lines, 7 on a page. Extent, 350 çlokas. Character, Bengali. Date, Sk. 1631. Place of deposit, Brāhmaṇamaṇḍali *viâ* Bārāsāt, Paṇḍita Rāmanārāyaṇa Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीरामः शरणम् ।

मधुमथनसमीगत्यादरादामचन्द्रो

विविधबुधविधानैर्लब्धशुद्धप्रबोधः ।

प्रणयति परिभाषावृत्तिमुद्बोधहेतुं

भवति सुमतिरन्तेवासिनां जानतां याम् ॥

येन केनचिद्व्याख्यातुकामेनावश्यमेवाभ्युपगन्तव्यम् । अर्थान् सूचयति सूते सूचयति वा सूत्रं तत्र याः परिभाषा नोक्ता अथच वृत्तिटीकयोस्तत्र तत्र प्रयुक्ताः कार्य्ये च दृश्यन्ते तासां संसिद्धिर्युक्तितः कथ्यते ता लौकिक्यः शास्त्रीयाश्च तत्र लौकिक्यो लोकत एव रूढ़ाः । यास्तु शास्त्रीयास्ता द्विविधा लिङ्गवत्यो विध्यङ्गशेषभूताश्च । इत्यादि ।

End. तेन नापदं शास्त्रे प्रयुञ्जीतेति स्थितेर्गतिश्चिन्तनीयेति न्यायाभ्यामादेशादीन् सिद्धवन्निर्द्देशेन विधाय अतएव असीत्यादिकमाचार्य्येणोक्तम् । एवञ्च परस्मैपदमिच्छन्ति क्वचिदेवात्मनेपदे इति सूत्या परस्मैपदे ङप्रत्ययविधाने शास-लिद्युदित्यत्र द्युतङित्यस्य पाठात् अद्युतदित्युदाहृत्य तेनैव पमित्युक्तम् । विधिवलादातोऽप्येत्वमित्यादिकञ्चेति दिक् । अन्यदप्यूह्यम् । एवमन्ये न्याया अनुसर्त्तव्या विस्तारभयान्न लिखिताः ॥ ० ॥

Colophon. इति श्रीरामचन्द्रविद्याभूषणविरचिता परिभाषावृत्तिः सम्पूर्णा ॥ ० ॥
शकाब्दाः १६१० ।
आकाशेन्दुरसावनीविगणिते शाकाब्दसंख्याङ्कके
न्यायोदाहरणादिकं प्रकुरुते श्रीरामचन्द्रः कियत् ।
शकाब्दाः १६६१ । २७ चैत्र श्रीरामवल्लभशर्म्मणा लिखितम् ॥

विषयः । मुग्धबोधस्य परिभाषेयम् । अत्र च युक्तितः सूत्रानुक्तपरिभाषावृत्त्यादीनां निरूपणम् ।

No. 223. परिभाषावृत्तिटीका. By रामनाथसिद्धान्तः. Substance, country-made paper, 18×3½ inches. Folia, 25. Lines, 8 on a page. Extent, 839 çlokas. Character, Bengali. Date, Sk. 1667. Place of deposit, Āḍiyādaha, District 24-Parganās, Paṇḍita Haripada Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ॥
प्रणम्य शारदापादपद्ममानन्दसाधनम् ।
परिभाषावृत्तिटीकां यथाज्ञानं समासतः ॥
श्रीरामनाथसिद्धान्तो बालानां सुखहेतवे ।
तनुते तनुवाग्वित्तो गुरुपादोपदेशतः ॥

तत्रादौ तावन्निर्विघ्नेन प्रारिप्सितसिद्धिकामः स्वेष्टदेवताप्रणतिरूपमङ्गलं प्रणीय शास्त्रप्रयोजनमुपदिशन्नाह ग्रन्थकारः । हरिमित्यादि । भोर-ग्राम-वासि-मैथिल-महामहोपाध्याय-श्रीदत्तात्मजसूनुना ... ... तदात्मज-दामोदरदत्त-तत्पुत्रेण श्रीपद्मनाभदत्तेन परिभाषावृत्तिर्विशेषेण भाष्यते व्यक्तमुच्यते क्रियते इत्यर्थः । इत्यादि ।

End. यथा ह्रस्वदीर्घग्रहणकशास्त्रे इतिकार्य्यातिदेशो यथा बहुलं समासवत् एवं पुंवदादि । उक्तञ्च भाष्ये निरूप्य शास्त्राः षड्वातिदेश इति । इदानीं स्वकृत-ग्रन्थसंख्यामाह उक्त इत्यादि । व्याकरणमिदमादर्श इति उपमानावधारणे समासः । व्याकरणनाम । नाम्ना सुपद्मः सुखेन पद्यते गम्यतेऽस्माविति । तस्य पञ्जिका पजि व्यक्तीकरणे चुरादिः टीकेत्यर्थः । तदनन्तरं बालानां बोधार्थं प्रयोगदीपिका उक्ता ।

उणादिवृत्ती रचिता मया च धातुचन्द्रिका ।

तत्रैव यङ्लुको वृत्तिर्न च ग्रन्थान्तरं परम् ॥

परिभाषावृत्तौ रचिता साहित्यं नाम्ना गोपालचरितं ग्रन्थरत्नम् ।

आनन्दलहर्य्याष्टीका रचिता माघे ग्रन्थविशेषे ।

टीका रचिता छन्दे रत्नह्न छन्दसि सूतौ आचारचन्द्रिका निर्म्मिता ।

कोषे भूरिप्रयोगाख्यो ग्रन्थस्तातस्य यत्नतः ।

आदेशान्मया एते द्वादशसंख्याता ग्रन्था रचिता इत्यर्थः । ततो विद्वत्परी-हारमाह हे धीराः पण्डिताः श्रीपद्मनाभेन कृतिनाथमञ्जलिर्युष्माकं संरच्यते किमर्थमित्याह एते पुस्तका वो युष्माभिः संस्कार्य्याः संशोध्या एवं प्रति-पाल्याश्च पुत्रवदात्मपुत्रा इवेति भावः ॥ ० ॥

Colophon. इति श्रीरामनाथसिद्धान्तरचिता परिभाषावृत्तिटीका समाप्ता ।

शकाब्दाः । १६६१ ॥

विषयः । पद्मनाभरचित-सुपद्मव्याकरणस्य परिभाषावृत्तेर्व्याख्यानम् ।

No. 224. परिशिष्टप्रबोधः. By **गोपीनाथतर्काचार्य्यः.** Substance, country-made paper, 16×3 inches. Folia, 246. Lines, 7 on a page. Extent, 6,235 çlokas. Character, Bengali. Date, Sk. 1721. Place of deposit, Dhākā, Paṇḍita Candrakānta Nyāyālaṃkāra. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

यो जातो धरणीधरेन्द्रतनयानाथाङ्घ्रिपाथोरुहा-
सक्तात्मानघमानसात् पशुपतेराचार्य्यसिंहात् सतः ।
कीर्त्तिश्रीजितशीतरश्मिकुमुदश्रेणीश्रियः श्रीमतो
दानानीतवराविराविततधराद्दीनालिदैन्यारितः ॥
सोऽयं सूरिसभासभाजितमतिः कामाभवामाकृतिः
सत्योल्लोकवशीकृतेश्वरमतिः श्रीयोजनासन्ततिः ।
गोपीनाथ इमञ्चकार मधुरव्याहारवागीश्वर-
स्तर्काचार्य्यवरः सदर्थचतुरः सश्रीकविद्याधरः ॥

इह खलु सकलविद्वज्जनगणकुञ्जरसम्मतिपरिप्राप्तनिखिलविघ्नहन्तोत्सारण-कारणप्रारब्धकर्म्मोपकारकहरिनमस्कारपुरःसरं ग्रन्थमारभमाणस्तन्निबन्धनं शिष्यान् शिक्षयिष्यन् हरिनमस्कारं करोति संसारेति । अस्यार्थः । हरिं नत्वा कातन्त्रपरिशिष्टं ब्रूमः । कीदृशं संसारतिमिरमिहिरं । स्वादृष्टोप-निबद्धशरीरपरिग्रहः संसारः । स्वपदमिहास्मदाद्यदृष्टप्रयुक्तेश्वरकृष्णादि-शरीरव्यावर्त्तकम् । इत्यादि ।

End. द्रव्यलजातिसु शब्दस्य न द्रव्यमिति क्वचिन्निरूढप्रयोगः शुक्लकृष्णशब्दयो-र्मधुसर्पिरादिगणपाठासिद्धिरिति ॥

Colophon. इति श्रीगोपीनाथतर्काचार्य्यविरचिते परिशिष्टप्रबोधे समासव्याख्यानं समाप्तम् ॥ शुभमस्तु शकाब्दाः । १७२१ ।

विषयः । श्रीपतिदत्तविरचित-कातन्त्रपरिशिष्टस्य व्याख्यानम् ॥

No. 225. पवनदूतम्. By धोयीकविराजः. Substance, country-made paper, 14 × 3 inches. Folia, 12. Lines, 6 on a page. Extent, 283 çlokas. Character, Bengali. Date, Sk. 1752. Place of deposit, Visnupura, District Vākuḍā, Paṇḍita Raghurāma Tarkaratna. Appearance, fresh. Verse. Correct.

Beginning. श्रीरामाय नमः ।

अस्ति श्रीमत्यखिलवसुधासुन्दरे चन्दनाद्रौ
गन्धर्व्वाणां कनकनगरी नाम रम्यो निवासः ।
हैमैर्लीलाभवनशिखरैरम्बरं व्यालिखद्भि-
र्धीतुः (?) शाखानगरगणनां यः सुराणां पुरस्य ॥

तस्मिन्नेका कुवलयवती नाम गन्धर्व्वकन्या
मन्ये जैत्रं मृदु कुसुमतोऽप्यायुधं या स्मरस्य ।
दृष्ट्वा देवं भुवनविजये लब्धसंचोनिपार्श्वं (?)
बाला सद्यः कुसुमधनुषः संविधेयीबभूव ॥ इत्यादि ।

End. सन्देशोऽयं मनसि निहितः कच्चिदायुष्मता मे
किंवा भूयस्त्वयि विरचिते बहुभिस्तासुप्रकारैः । (?)
पारार्थैकप्रवलमनसस्त्वद्विधा वाम्यमिश्रा-
नापन्नानां न खलु बहुशः काकुवादान् सहन्ते ॥
दन्तिव्यूहं कनककलितिकां चामरं हैमदण्डं
यो गौड़ेन्द्रादलभत कविक्ष्माभृतां चक्रवर्त्ती ।
श्रीधोयीकः सकलरसिकप्रीतिहेतोर्मनस्वी
काव्यं सारस्वतमिव ... ... मन्त्रमेतज्जगाद ॥
गोष्ठीबन्धः सकलकविभिर्वाचि वैदर्भरीति-
र्यासौ गङ्गापरिसरभुवि स्निग्धभाग्या विभूतिः ।
सत्सु स्नेहः सदसि कविताचार्य्यकं भूभुजां मे
भक्तिर्लक्ष्मीपतिचरणयोरस्तु जन्मान्तरेऽपि ॥
यावच्छम्भुर्वहति गिरिजासंविभक्तं शरीरं
यावज्जैत्रं कलयति धनुः कौतुकं पुष्पकेतुः ।
यावद्राधारमणतरुणीकेलिसाक्षी कदम्ब-
स्तावज्जीयात् कविनरपतेरेष वाचां विलासः ॥
कीर्तिर्लब्धा सदसि विदुषां शीतलचौणिपाला (?)
वाक्सन्दर्भाः कतिचिदमृतस्यन्दिनो निर्मिताश्च ।
तीरे सम्प्रत्यमरसरितः क्वापि शैवोपकण्ठे
ब्रह्माभ्यासे प्रयतमनसा नेतुमीहे दिनानि ॥ *

Colophon. इति श्रीधोयीकविराजविरचितं पवनदूताख्यं काव्यं समाप्तम् ॥ * ॥ श्रीराधा-
कृष्णाभ्यां नमः । लिखितोयं श्रीरामगतिहतिना ॥ शकाब्दाः १७५९ ।

विषयः । काचित् कुवलयवती नाम गन्धर्व्वकन्या कान्तविरहसन्तप्ता सती पवनं दूतत्वेन प्रेषितवतीत्यमुमेव विषयमवलम्ब्य विरचितमिदं खण्डकाव्यम् ।

No. 226. पुत्रीकरणमीमांसा. By नन्दपण्डितः. Substance, country-made paper, 14×6 inches. Folia, 9. Lines, 10 on a page. Extent, 338 çlokas. Character, Bengali. Date, ? Place of deposit, Hālisahara, Valdeghāṭā, Bābu Giriçacandra Gaṇgopādhyāya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

अभिनन्द्य जगद्वन्द्यपदद्वन्द्वं विनायकम् ।
पुत्रीकरणमीमांसां कुरुते नन्दपण्डितः ॥
केन कीदृक् कदा कस्मै कस्मात् कः क्रियतां सुतः ।
विविच्य नोक्तं यत् पूर्व्वैस्तदशेषमिहोच्यते ।
यथाहात्रिः ।
अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।
पिण्डोदकक्रियाहेतोर्यस्मात् तस्मात् प्रयत्नतः ॥ इति ।
अपुत्रोऽजातपुत्रो मृतपुत्रो वा । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । दत्तकग्रहणविध्यादिनिरूपणम् ।

No. 227. पुरुषोत्तमक्षेत्रतत्त्वम्. By रघुनन्दनभट्टाचार्य्यः. Substance, country-made paper, 17×3½ inches. Folia, 10. Lines, 6 on a page. Extent, 210 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Serapura, Paṇḍita Durgāsundara Kṛtiratna. Appearance, tolerable. Prose and Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

सच्चिदानन्दगोविन्दं नत्वा श्रीरघुनन्दनः ।
स्मृतितत्त्वे विधिं वक्ति क्षेत्रे श्रीपुरुषोत्तमे ॥
अथ पुरुषोत्तमदर्शनविधानादिः । तत्र ब्रह्मपुराणम् ।
पृथिव्यां भारतं वर्षं कर्म्मभूमिरुदाहृता ।
न खल्वन्यत्र मर्त्यानां भूमौ कर्म्म विधीयते ॥
...... यत्रास्ते दक्षिणोदधिसंस्थितः ।
ओड्रदेश इति ख्यातः स्वर्गमोक्षप्रदायकः ॥ इत्यादि ।

End. ततः सूर्य्यालयं गच्छेत् पुष्पमादाय वाग्यतः ।
प्रविश्य पूजयेद्भानुं पूर्व्वोक्तं त्रिः प्रदक्षिणम् ।
दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥

Colophon. इति वन्द्यघटीय-श्रीहरिहरभट्टाचार्य्यात्मज-श्रीरघुनन्दनभट्टाचार्य्यविरचितं श्रीपुरुषोत्तमक्षेत्रतत्त्वं समाप्तम् ।

विषयः । पुरुषोत्तमक्षेत्रकर्त्तव्यकार्य्यादिनिरूपणमुखेन दर्शनादिफलनिरूपणम् ।

No. 228. पृषोदरादिवृत्तिः. By पद्मनाभः. Substance, country-made paper, 18×3 inches. Folia, 4. Lines, 8 on a page. Extent, 192 çlokas. Character, Bengali. Date, Sk. 1715. Place of deposit, Brāmhaṇa-maṇḍalī *viâ* Bārāsat, Paṇḍita Rāmanārāyaṇa Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य बालगोपालं पिबन्तं नवनीतकम् ।
वक्ष्ये पृषोदरादीनि पद्मनाभो यथाविधि ॥
तथाहि प्रकृतिप्रत्ययविभागेन साधुशब्दा व्युत्पन्नाः केचिद्रूढाः केचित् यौगिकाः केचिन्मिश्राः । प्रकृतिप्रत्ययविभागार्थो योगार्थः । तदुपहारित्वेन व्युत्पन्ना यौगिकाः । उभयार्थवाचकत्वेन व्युत्पन्नाव्युत्पन्ना मिश्राः । तथाचोक्तं रूढियौगिकमिश्राख्यास्त्रिधा शब्दाः प्रयोजिताः । इत्यादि ।

End. निपातिता यथा गव्यूतिः क्रोशयुगे इत्यादि । गणपाठे सिद्धरूपा यथा कल्कादिषु चेत्यादि । साध्यरूपा यथा शकादिरन्धादौ इत्यादि । विस्तरेणालमित्ययं संक्षेपः । तथाच वर्द्धमानः ।
तत्त्वं शब्दसमुद्रस्य कृत्स्नं जानाति शङ्करः ।
तदर्द्धं गौष्पतिर्वेत्ति तदर्द्धं पाणिनिर्मुनिः ॥
तदर्द्धं भाष्यकारोऽपि तत् किं जानन्ति मानवाः ।
धीराः श्रीपद्मनाभेन रच्यते व्ययमञ्जलिः ॥
संस्कार्य्याः प्रतिपाल्या वा पुत्रवन्मम पुस्तकाः ।
चञ्चलाप्यचला लक्ष्मीर्वाणी यत्र गृहे गृहे ॥
तं विदूर्य्यं (?) सदा वन्दे विक्रमो यत्र भूपतिः ।
कालिदासादयस्तत्र संख्यावन्तः सहस्रशः ॥

तेषामेको वररुचिः सर्व्वशास्त्रविशारदः ।
तत्सुतो न्यासदत्तश्च फणिभाष्यार्थतत्त्ववित् ॥
तत्सुतो दुर्घटो ज्ञेयः पाणिनीयार्थतत्त्ववित् ।
जयादित्यस्तत्सुतश्च मीमांसाशास्त्रपारगः ॥
श्रीपतिस्तत्सुतश्चैव सांख्यशास्त्रविशारदः ।
गणेश्वरस्तत्सुतश्च काव्यालङ्कारकारकः ॥
तत्सुतः पद्मनाभोऽहं मयैवैतन्निगद्यते ।
यद्यपि न्यूनता स्यान्मे इह क्षुद्रधियो हठात् ॥
सद्भिः क्षमिष्यते लोके क्षमासारा हि पण्डिताः ।
अयुक्तं यदिह प्रोक्तं सन्तः संशोधयन्तु तत् ॥
आशयाभिज्ञता तेषामित्यस्माकं निवेदनम् ।
शाके शैलनवादित्ये चैत्रे मासि रवेः स्थितौ ॥
द्विजेन पद्मनाभेन भाषासूत्रमिदं कृतम् ।

Colophon. इति श्रीपद्मनाभदत्तकृतौ सुपद्मे व्याकरणे उणादिवृत्तौ पृषोदरादिवृत्ति-
विच्छेदः ॥ समाप्तश्चायं ग्रन्थः ॥ शकाब्दाः १७१५ ।

विषयः । सुपद्मव्याकरणीयपृषोदरादिपादोऽयम् । अत्र च रूढ़ियौगिकादिनिरूपणमुखेन पृषोदरादिनिरूपणम् ।

No. 229. **प्रत्यक्षचिन्तामणिदीधितिव्याख्या.** By **गदाधरभट्टाचार्य्यः.** Substance, country-made paper, 19 × 3 inches. Folia, 39. Lines, 7 on a page. Extent, 1,292 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Ichāpurā, Paṇḍita Vrajanātha Vidyāratna. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
नत्वा नन्दतनूजसुन्दरपदं व्याख्यां गुरोरादरा-
दुर्व्वीमण्डलमण्डनायितलसत्कीर्त्तेर्विदित्वाखिलां ।
संक्षिप्तोक्त्यतिदक्षदीधितिकृतः प्रत्यक्षचिन्तामणे-
र्व्याख्यां व्याकुरुते गदाधरबुधो मोदाय विद्यावतां ॥
गुरुकीर्त्तनरूपमङ्गलं कुर्व्वाण एव स्वीयग्रन्थे प्रेक्षावत्प्रवृत्त्यर्थं तदुत्कर्षं दर्शयति गिरमिति । हृदये मनसि । निधानं सम्बन्धसम्पादनं । ममसि गुरुगिरः

सम्बन्धस्य स्वार्थज्ञानजननीये तत्सहकारित्वं । सहकारित्वञ्च परम्परया फलोपयोगित्वं । तथाच गुरुवाक्याधीनशाब्दबोधजन्यसंस्कारसध्रीचा मनसा निबद्धव्यमितरापरिशीलितमर्थं निश्चित्येति फलितार्थः । सिद्धान्तविषय एवार्थो निबन्धनीय इति सूचयति विधायेति । सिद्धान्तः सूत्रकृता महर्षिणा तदुपजीविपूर्व्वपूर्व्वनिबन्धकारपरम्परया चाभ्युपगतोऽर्थनिकरः, स एव सरः, तदवगाहनस्य कुतर्कश्रतावतारोचितचेतःसन्तापसन्तानोप-शान्तिसाधनत्वात् । इत्यादि ।

End. ज्ञानमतीन्द्रियमित्याद्यनुमितिरन्यथाख्यातिमनङ्गीकुर्व्वाणेन गुरुणानङ्गीकारात् तत्राप्रमाण्य मतत्रयसिद्धभिन्नाया भट्टमते अधिकरणप्रकाराया जनक-प्रामाण्याग्रहणात् तन्मते बाध इत्यादिकमस्वरसबीजम् ।

Colophon. इति प्रथमविप्रतिपत्तिः ॥

विषयः । तत्त्वचिन्तामण्यन्तर्गतप्रत्यक्षखण्डीयप्रामाण्यवाददीधितेः प्रथमविप्रतिपत्त्यन्तं व्याख्यानम् ॥

No. 230. प्रत्यक्षदीधितिप्रसारणी. By कृष्णदाससार्व्वभौमः. Substance, country-made paper, $12 \times 2\frac{1}{2}$ inches. Folia, 85 (without 1–71). Lines, 7 on a page. Extent, 489 çlokas. Character, Bengali. Date, Sk. 1576. Place of deposit, Bhāṭpāḍā, 24-Parganās, Paṇḍita Pañcānana Tarkaratna. Appearance, old. Prose. Correct.

Beginning. (अस्य प्रारम्भवाक्यं नास्ति तेन द्विसप्ततितमपत्रप्रारम्भवाक्यं लिखितं ।) रज-तत्वप्रकारिका या इच्छाविषयता तद्वत्वादित्यर्थः । इत्यादि ।

End. आत्मसंसर्गाग्रहसचिवानाचार्य्यज्ञानात्ययेऽपि फलप्रसङ्गः । नचाचार्य्यत्वं नैकं इति वाच्यं फलविशेषजनकतावच्छेदक इति विशेषस्य मानसत्वाभ्युपगमात् एवमनाचार्य्यादावपीति ॥

Colophon. इति महामहोपाध्याय-श्रीकृष्णदाससार्व्वभौमभट्टाचार्य्यविनिर्म्मिता प्रत्यक्ष-दीधितिप्रसारणी सम्पूर्णा ॥ ० ॥ शकाब्दाः १५७६ ।

विषयः । तत्त्वचिन्तामण्यन्तर्गत-प्रत्यक्षखण्डस्य रघुनाथशिरोमणिकृतायाः दीधितेः व्याख्या ।

No. 231. प्रबोधचन्द्रोदयटीका. By महेश्वरन्यायालङ्कारः. Substance, country-made paper, 12 × 2½ inches. Folia, 58. Lines, 6 on a page. Extent, 1,044 çlokas. Character, Bengali. Date, Sk. 1690. Place of deposit, District Mayamanasiṁha, Serapura, Mādhavapura, Paṇḍita Gaṇgādhara Tarkasiddhānta. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
मातुरदुःखलवन्धे बहुनिर्बन्धे सचेतसः ।
त्रिभुवनभारसहिष्णोर्बालकविष्णोः स्मितं जयति ।
प्रबोधचन्द्रोदयनाम नाटकं ज्ञानाग्निसंशुद्धविशिष्टनाटकं ।
× × × आचार्य्य-महेश्वरः कृती टीकां प्रयत्नेन करोति निर्म्मलां ।
सूत्रधारः पठेन्नान्दीं मध्यमस्वरसंयुतामिति नाटकनियमात् । इत्यादि ।

End. नानत्वमित्यादि गीताश्लोकः तानहं द्विषतः क्रूरान् मां द्विषतः आसुरीष्वेव योनिषु अजस्रं नित्यं क्षिपामीत्यर्थः ॥ * ॥

Colophon. इति महेश्वरन्यायालङ्कारभट्टाचार्य्यकृतायां प्रबोधचन्द्रटीकायां षष्ठाङ्कविवरणं समाप्तमिति ॥ शकाब्दाः १६९० ।

विषयः । प्रबोधचन्द्रोदयनामकस्य नाटकस्य वेदान्तमतानुयायिनी टीका ।

No. 232. प्रमेयरत्नावली. Substance, country-made paper, 17 × 3 inches. Folia, 18. Lines, 3 on a page. Extent, 189 çlokas. Character, Bengali. Date, Sk. 1748. Place of deposit, Vākuḍā Viṣṇupura, Paṇḍita Candranārāyaṇa Bhaṭṭācāryya. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीरामो जयति ।
जयति श्रीगोविन्दो गोपीनां समदनगोपालः ।
वक्ष्यामि यस्य कृपया प्रमेयरत्नावलीं सूक्ष्मां ॥
भक्त्याभासेनापि तोषं दधाने धर्म्माध्यक्षे विश्वनिस्तारिनाम्नि ।
नित्यानन्दाद्वैतचैतन्यरूपे तत्त्वे तस्मिन्नित्यमास्तां रतिर्नः ॥
आनन्दतीर्थनामा सुखमयधामा यतिर्जीयात् ।
संसारार्णवतरणीं यमिह जनाः कीर्त्तयन्ति बुधाः ॥
भवति विचिन्त्या विदुषां निरवकारा (?) गुरुपरम्परा नित्यं ।
एकान्तित्वं सिद्ध्यति ययोदयति येन हरितोषः ॥

यदुक्तं पद्मपुराणे ।

सम्प्रदायविहीना ये मन्त्रास्ते विफला मताः ।
अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः ॥
श्रीब्रह्मरुद्रसनका वैष्णवाः क्षितिपावनाः ।
चत्वारस्ते कलौ भाव्या ह्युत्कले पुरुषोत्तमादिति ॥
रामानुजं श्रीः स्वीचक्रे मध्वाचार्य्यं चतुर्मुखः ।
श्रीविष्णुस्वामिनं रुद्रो निम्बादित्यं चतुस्सनः (?) ॥

स्वगुरुपरम्परा यथा,—

श्रीकृष्णब्रह्मदेवर्षिबादरायणसंज्ञकान् ।
श्रीमध्व-श्रीपद्मनाभ-श्रीमन्नृहरि-माधवान् ॥
अक्षोभ्य-जयतीर्थ-श्रीज्ञानसिन्धु-दयानिधीन् ।
श्रीविद्यानिधि-राजेन्द्र-जयधर्म्मान् क्रमात् वयम् ॥
पुरुषोत्तमब्रह्मण्यव्यासतीर्थांश्च संस्तुमः ।
ततो लक्ष्मीपतिं श्रीमन्माधवेन्द्रञ्च भक्तितः ॥
तच्छिष्यान् श्रीश्वराद्वैतनित्यानन्दजगद्गुरून् ।
देवमीश्वरशिष्यं श्रीचैतन्यञ्च भजामहे ॥
श्रीकृष्णप्रेमदानेन येन निस्तारितं जगत् ।

अथ प्रमेयाण्युद्दिश्यन्त ।

श्रीमध्वः प्राह विष्णुं परममखिलाम्नायवेद्यञ्च विश्वं
सत्यं भेदञ्च जीवान् हरिचरणजुषस्तारतम्यञ्च तेषाम् ।
मोक्षं विष्ण्वङ्घ्रिलाभं तदमलभजनं तस्य हेतुं प्रमाणं
प्रत्यक्षादित्रयञ्चेत्युपदिशति हरिः कृष्णचैतन्यचन्द्रः ॥ इत्यादि ।

End. एवमुक्तं प्राचा ।

श्रीमन्मध्वमते हरिः परमतः सत्यं जगत् तत्त्वतो
भेदो जीवगणा हरेरनुरचवानीछौ भावं गताः (?) ।
मुक्तिर्निज (?) सुखानुभूतिरमला भक्तिश्च तत्साधनं ।
अक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥
आनन्दतीर्थै रचितानि यस्यां प्रमेयरत्नानि नवैव सन्ति ।
प्रमेयरत्नावलिरादरेण प्रधीभिरेषा हृदये निधेया ॥
नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः ।
निरवद्यो निर्वृतिमान् गजपतिरनुकम्पया यस्य ॥

Colophon. इति प्रमेयरत्नावली पूर्णिमगात् ॥ * ॥ श्रीरामः शरणं । शकाब्दाः १७४८ ।

विषयः । वैष्णवग्रन्थोऽयं । अत्र च प्रथमप्रमेये भगवन्माहात्म्यादिनिरूपणम् । २ ये प्रपञ्च-सत्यत्वादिनिरूपणम् । ३ ये विश्वसत्यत्वादिनिरूपणम् । ४ र्थे भेदसत्यत्वादिनिरूपणम् । ५ मे जीवानां हरिदासत्वादिनिरूपणम् । ६ ष्ठे जीवतारतम्यनिरूपणम् । ७ मे कृष्णोपासनाया-मुक्तिहेतुत्वनिरूपणम् । ८ मे एकान्तभक्तेर्मोक्षसाधनत्वादिनिरूपणम् । ९ मे प्रत्यक्षानुमान-शाब्दानां प्रमाणत्वेननिरूपणञ्चेति ।

No. 233. प्रश्नचूड़ामणिः. By वराहमिश्रः. Substance, country-made paper, $12 \times 2\frac{1}{2}$ inches. Folia, 6. Lines, 5 on a page. Extent, 86 çlokas. Character, Bengali. Date, Sk. 1686. Place of deposit, Mayamanasimha, Serapura, Paṇḍita Candrakānta Tarkālaŋkāra. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ प्रश्नचूड़ामणिर्लिख्यते ।
पादमादौ पदं मध्ये अन्ते यस्य पदं भवेत् ।
एतेनापि शुभं कार्य्यं सर्व्वसिद्धिप्रदं यशः ॥ इत्यादि ।

End. आदावन्ते चतुर्द्दष्ट्वा मध्ये यस्य चतुष्टयम् ।
सम्पत्तिस्तस्य विद्या च मनः सम्पूर्णमेव च ॥

Colophon. इति श्रीवराहमिश्रकृतः प्रश्नः समाप्तः । शकाब्दाः १६८६ ।

सत्यमेव जयते

विषयः । प्रश्नगणनोपायनिरूपणम् ॥

No. 234. प्रश्नदीपः. (लौहित्यवरसेनविरचितप्रश्नदीपप्रकाशिन्याख्यटीका-सहितः). Substance, country-made paper, $19 \times 3\frac{1}{2}$ inches. Folia, 16. Lines, 6 on a page. Extent, 458 çlokas. Character, Bengali. Date, ? Place of deposit, Purāpāḍā, Post Office Sonārā̃, District Ḍhākā, Paṇḍita Jagadbandhu Tarkavāgiça. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय । ॐ नमः श्रीसूर्य्याय ।
सन्ति चेद्बहुशास्त्राणि प्रश्नज्ञानविधावपि ।
तथापि सारमेकत्र कर्त्तुमत्र ममोद्यमः ॥
आधानाग्निधनं यावद्युक्तं मे ज्ञातदीपके ।
तथाप्यदृष्टदृष्टार्थं प्रश्नदीप इहोच्यते ॥

इदमत्यन्तगूढ़ार्थं बहुप्रश्नं समासतः ।
मामकं पुस्तकं लोके सतां प्रीतिं करिष्यति ॥

इष्टकालो यथा ।

भागं वारिधिवारिराशिशशिषु (१४४) प्राङ्मर्कराद्ये बुधाः
षट्के बाणकृपीटयोनिविधुषु (१२५) स्यात् कर्कटाद्ये रवौ ।
पादैः सप्तभिरन्वितैः प्रथमकं हित्वादिनाद्ये दले
हित्वैकां घटिकां परे च सततं दत्त्वेष्टकालं वदेत् ॥ इत्यादि ।

टीकायाः प्रारम्भवाक्यम् । माघादिषण्मासेषु चतुश्चत्वारिंशदधिकशताङ्केषु श्रावणादिषण्मासेषु पञ्चविंशदधिकशताङ्केषु भागं हरणं पण्डिताः प्राज्ञः कैः प्रथमकं पादं हित्वा पादैः सप्तभिरन्वितैः । एतदुक्तं भवति छायापादे एकं त्यक्त्वा सप्तान्वितं कृत्वा पूर्व्वाङ्के हृते यो लब्धः स दण्डः । शेषं षष्ट्या संगुणितेनैव हारेण हृते पलं ज्ञेयम् । पूर्व्वार्द्धपरार्द्धयोर्भेदमाह । दिनाद्ये एकां घटिकां हित्वा इष्टकालं परदले एकां घटिकां दत्त्वा इष्टकालं वदेदिति । इत्यादि ।

End. रोगजन्मतो मृत्युज्ञानं यथा ।

शिवशतभिषधातायाम्यसर्पत्रिपूर्व्वा
रविरविजकुजाह्वे भूतषष्ठीनवम्याम् ।
इह हि मरणयोगो यो ज्वरेणाभिभूतः
पशुपतिसमवीर्य्यः सोऽपि मृत्युं प्रयाति ॥
आर्द्राश्लेषा-स्वाती ज्येष्ठासु च यस्य रोगजन्म स्यात् ।
धन्वन्तरिणापि चिकित्सितस्य तस्यासवो न स्युः ॥
यद्यत्र चन्द्रमास्तस्य गोचरे चाशुभप्रदः ।
तदा तस्य भवेन्मृत्युः सुधासंसिक्तदेहिनः ॥

Colophon. इति प्रश्नदीपे रोगज्ञानं नामैकादशोऽध्यायः ॥ (खण्डितशेषोऽयं ग्रन्थः) ।

टीकायाः शेषवाक्यम् । रविवारे चतुर्द्दश्यां शनिवारे षष्ठ्यां कुजवारे नवम्यां यदि आर्द्राश्लेषा-शतभिषा-रोहिणी-भरणी पूर्व्वात्रयमश्लेषानक्षत्राणि भवन्ति तदावश्यं रोगी म्रियते । अस्मिन् योगे सा चेद् यदि चन्द्रस्य गोचरशुद्धिर्न स्यात् तदा मरणम् ।

Colophon. इति लौहित्यवरसेनविरचितायां प्रश्नदीपप्रकाशिन्यां रोगज्ञानमेकादशोऽध्यायः ॥

विषयः । अत्र प्रथमं छायापादभेदकथनम् । अथाधानं तत्रादौ पृच्छाकथनम् । रोधवास-पृच्छाकथनम् । अथापत्यजननपृच्छा । तत्र गर्भमासपृच्छाकथनम् । गर्भक्षेमपृच्छाकथनम् । सुत-सुताजननपृच्छाकथनम् । यमजापत्यकथनम् । जारजयोगकथनम् । अथ प्रसवदिवारात्रिपृच्छा, तत्र प्रसवस्थानकथनम् । अथ तन्वादिभावे वस्तुनिरूपणमात्र । तत्र तन्वादेर्वृद्ध्यपचयज्ञान-प्रकारकथनम् । मतान्तरेण भावोक्तकार्य्यसिद्ध्यसिद्धिकथनम् । लग्नाधिपादेर्विनष्टफलकथनम् । विनष्टादिग्रहकथनम् । अथ भावफलादिनिर्णयः । तत्र लाभालाभज्ञाननिरूपणम् । निधि-लाभपृच्छाकथनम् । वेतनलाभपृच्छाकथनम् । राज्यपदप्राप्तिपृच्छाकथनम् । अथ राजयोग-चतुष्टयनिरूपणम् । विभवलाभपृच्छाकथनम् । धनलाभपृच्छाकथनम् । कुमारीलाभपृच्छाकथ-नम् । अथ विषकन्याज्ञानम् । वरलाभपृच्छाकथनम् । विवाहलाभपृच्छाकथनम् । अथ धृतादि-स्त्रीज्ञानम् । जायापरिज्ञानम् । शुभाशुभज्ञानम् । अथ कार्य्यसिद्ध्यसिद्धिपृच्छाकथनम् । तत्र सर्व्वकार्य्यशुभाशुभपृच्छाकथनम् । अथ दिननिर्णयः । तत्र विवाहशुभाशुभपृच्छाकथनम् । दिनशुभाशुभज्ञाननिरूपणम् । अथ सेव्यसेवकयोः शुभाशुभज्ञानकथनम् । गमनागमनज्ञान कथनम् । गमनस्थितिज्ञानकथनम् । यात्राप्रश्नात् जयज्ञानकथनम् । यात्रायां शुभाशुभज्ञान-कथनम् । यातुर्निवृत्तिदिनज्ञानकथनम् । प्रोषितागमनतच्छुभाशुभज्ञानकथनम् । प्रोषिता-गमनदिनज्ञानकथनम् । जयपराजयज्ञानकथनम् । जयपराजयचक्रनिरूपणम् । अथ हृत-नष्टमुष्टिगतादिज्ञाननिरूपणम् । अस्याः प्राक्स्थितिकालज्ञाननिरूपणम् । चौरज्ञाननिरूपणम् । वयोज्ञाननिरूपणम् । जातिज्ञाननिरूपणम् । स्त्री-पुं-नपुंसकभेदज्ञाननिरूपणम् । हृतनष्ट-लाभालाभज्ञाननिरूपणम् । क्रयविक्रयसम्बन्धज्ञाननिरूपणम् । मनोवृत्ति-स्त्री-पुरुषज्ञाननिरू-पणम् । अथ वृष्टिज्ञाननिरूपणम् । अथ नष्टकोष्ठोद्धारनिरूपणम् । अनन्तरं रोगज्ञाननिरू-पणञ्चेति ॥

No. 235. प्रश्नप्रकाशिनी . By लौहित्यवरसेनः . Substance, country-made paper, 12 × $2\frac{1}{2}$ inches. Folia, 65. Lines, 5 on a page. Extent, 1,117 çlokas. Character, Bengali. Date, Sk. 1,664. Place of deposit, Mayamanasiṁha, Serapura, Mahāmahopādhyāya, Candrakānta Tarkālaŋkāra. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ श्रीसूर्य्याय नमः ।

शिवमशिवहन्तारं सिद्धिदं सम्यसाध्यै

सुरगणनतसेव्यं देवदेवं प्रणम्य ।

सुकृतसकलसारप्रश्नदीपस्य टीकां
स्वजननिजकुलार्थं कर्त्तुमेव प्रयत्नः ॥
सन्ति चेद्बहुशास्त्राणि प्रश्नज्ञानविधावपि ।
तथापि सारमेकत्र कर्त्तुमेव ममोद्यमः ॥
आधानान्निधनं यावत् यथोक्तं ज्ञातदीपके ।
तथादृष्टस्य दृष्टार्थं प्रश्नदीप इहोच्यते ॥
मम ज्ञातदीपके साधनान्निधनपर्य्यन्तं यथाकथितं तेनैव प्रकारेण इह प्रश्नदीपके अदृष्टस्य पुराकृतकर्म्मणो दर्शनार्थं कथ्यते इति । इष्टकालज्ञानमाह ।
भागं वारिधिवारिराशिशशिषु प्राक्स्वर्गाद्यैर्बुधाः ।
षट्के बाणकपीटयोनिविधुषु स्यात् कर्कटाद्यैः पुनः ॥ इत्यादि ।

End. अत्र योगे तस्य रोगिणो गोचरे चन्द्रमा अशुभप्रदः स्यात् । गोचरशुद्धो न भवति तदाश्वतसितादेरस्यापि नरस्य मृत्युः स्यात् ॥

Colophon. इति श्रीलौहित्यवरसेनविरचितायां प्रश्नप्रकाशिन्यां रोगज्ञानं नाम द्वादशोऽध्यायः ॥ * ॥ शकाब्दाः १६६४ ।

विषयः। प्रश्नदीपनामकस्य ज्योतिषग्रन्थस्य टीकेयं । अत्र च आधानादिनिरूपणम् । भावविचारादिनिरूपणम् । लाभालाभादिनिरूपणम् । राजयोगचतुष्टयादिनिरूपणम् । गमनागमननिरूपणम् । प्रवादीनामागमनादिनिरूपणम् । सन्धिविग्रहजयपराजयदुर्गचिन्तादिज्ञाननिरूपणम् । कृतनष्टमुष्टिगतधातुमूलजीवानां ज्ञानादिनिरूपणम् । अथ विमिश्रकाध्यायः । अनन्तरं नष्टजातकरोगादिनिरूपणञ्चेति ।

No. 236. प्रस्तावसारः. By लौहित्यवरसेनः. Substance, country-made paper, 12×4 inches. Folia, 21. Lines, 7 on a page. Extent, 367 çlokas. Character, Bengali. Date, ? Place of deposit, Naihâṭi, District 24-Parganâs, Paṇḍita Haraprasâda Çâstrî. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
अनडुहि जितगौड़ेन्द्रवेगे
कृतनिविडासनमुज्झितागपीड़े ।
स्मरशमनतड़ित्कड़ारदृष्टिं
अड़मुडुराडुपशोभितचूड़मौड़े ॥

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयं ।
.... भक्तिरात्मदमने संसर्गमुक्तिः खला-
द्देते येषु वसन्ति निर्म्मलगुणास्तेभ्यो नरेभ्यो नमः ॥
सुभाषितानि रत्नानि यो न गृह्णाति यत्नतः ।
स वै प्रस्तावयज्ञेषु दक्षिणां कां प्रदास्यति ॥
श्रुत्वेदं पितरं प्राह श्रीमच्छ्रीकान्तसेनकः ।
लिखिल्लेकच तत्सर्व्वं प्रस्तावोचितभाषणम् ॥
तदा तन्तात् समाकर्ण्य चित्तबुद्धिप्रदः सदा ।
नाम्ना प्रस्तावसारोऽयं तत्पिचालेखि यत्नतः ॥ इत्यादि ।

End. (खण्डितत्वात् शेषो नास्ति तेन एकविंशतिपत्रस्य समाप्तिवाक्यं लिखितम् ।)

शङ्कप्रसङ्गो यथा ।
ध्वनिरपि मधुरः शुचित्वमुच्चै-
र्जनिरपि शङ्ख नदौ तवाभूत् ।
अधिगतमखिलं तवैव सर्व्वं
कुटिलतरं भवदन्तरं न विद्मः ॥

विषयः । पुत्र भार्य्या-राज-मन्त्रि-खल-मूर्खादिप्रसङ्गमुखेन मनोरञ्जकश्लोकानां सङ्ग्रहः ।

सत्यमेव जयते

No. 237. प्रायश्चित्तकदम्बसारसंग्रहः. By काशीनाथतर्कालङ्कारः. Substance, country-made paper, $17\frac{1}{2} \times 4$ inches. Folia, 11. Lines, 9 on a page. Extent, 427 çlokas. Character, Bengali. Date, Sk. 1737. Place of deposit, Nadiyāgrāma, Post Office, Lonsing, District, Pharidapura, Paṇḍita Çaçibhūṣaṇa Smṛtiratna. Appearance, tolerable. Prose and Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य शिरसा शम्भुं श्रीकाशीनाथशर्म्मणा ।
प्रायश्चित्तकदम्बानां क्रियते सारसंग्रहः ॥

वृद्धत्कुष्ठरोगसंसूचितातिपातकशेषपापक्षयकामेन पराकव्रतद्वयाद्यशक्तौ यत्किञ्चिद्दक्षिणैकविंशत्कार्षापणीदानरूपं प्रायश्चित्तं करणीयमिति विद्वांमतम् । अर्शोरोगे पराकव्रतद्वयमेव । एतद्रोगोत्पत्त्यनन्तरं प्रायश्चित्ताभावे

तदुत्पन्नानां पुरुषाणामेतद्व्रतस्य तृतीयभागप्रायश्चित्तम् । अकृतप्रायश्चित्त-कुष्ठादिरोगयुक्तोत्पन्ना दुहितरस्तु अशुचिशुक्रोत्पन्नकर्त्तव्यं तृतीयभागप्रायश्चित्ततृतीयभागं कुर्य्युरिति । तत्र प्रमाणम् ।

अशुचिशुक्रोत्पन्नानां तेषाञ्च शुद्धिमिच्छताम् ।
पतितानां तृतीयांशः स्त्रीणामंशात् तृतीयकः ॥

इति बौधायनवचनम् । तेन पतितोत्पन्नानां शुद्धिमिच्छतां पतितानां प्रायश्चित्तस्य तृतीयभागस्तत्प्रायश्चित्तं ज्ञेयम् । स्त्रीच पतितोत्पन्ना तृतीयभागस्य तृतीयभागं कुर्य्यादिति प्रायश्चित्तविवेकलिखनञ्च । अकृतप्रायश्चित्तार्शोरोगयुक्तोत्पन्नेन पुत्रेण तत्पापक्षयाय पराकव्रतद्वय ...... भागाद्यशक्तौ यत्किञ्चिद्दक्षिणकं दशकार्षापणोदानरूपं प्रायश्चित्तं कर्त्तव्यम् ॥ इत्यादि ॥

End. अनुलोमजातानां वर्णसङ्कराणामपि ज्ञानतो बधे तप्तकृच्छ्रद्वयं तदशक्तौ अष्टौ धेनवः तदशक्तौ सार्द्धद्वाविंशतिकार्षापणो चान्द्रायणञ्च यथाशक्ति दक्षिणा । प्रतिलोमजातानां कैवर्त्तादीनां ज्ञानतो बधे चान्द्रायणं तदशक्तौ अष्टौ धेनवः तदशक्तौ सार्द्धद्वाविंशतिकार्षापणो चान्द्रायणञ्च । ज्ञानतो ब्राह्मणीबधे षड्वार्षिकव्रतम् । तदशक्तौ नवतिधेनवो देयाः तदशक्तौ सप्तत्यधिकद्विशतकार्षापणो चान्द्रायणञ्च दक्षिणा च पञ्चाशद्गावः तदशक्तौ पञ्चाशत् कार्षापणो । उत्कृष्टायास्तु शूद्रायास्तादृशक्षत्रियवैश्याम्बष्ठानाञ्च कामतो बधे वार्षिकं व्रतं तदशक्तौ पञ्चदश धेनवो देयाः तदशक्तौ पञ्चचत्वारिंशत् कार्षापणो चान्द्रायणञ्च । मध्यमायाः कामतो नवमासिकव्रतं तदशक्तौ सपादैकादश धेनवः तदशक्तौ द्वादशाधिकत्रयस्त्रिंशत्कार्षापणो चान्द्रायणञ्च । अधमायास्तु तप्तकृच्छ्रद्वयं तदशक्तौ सार्द्धद्वाविंशतिकार्षापणो चान्द्रायणञ्च यथाशक्ति दक्षिणा । एषा व्यवस्था मदनपारिजातसम्मता ॥ नव्यद्वैतनिर्णयकृच्चन्द्रशेखरवाचस्पतिसम्मता तु चान्द्रायणद्वयं तदशक्तौ पञ्चचत्वारिंशत् कार्षापणो यथाशक्ति दक्षिणा च ॥

Colophon. इति श्रीकाशीनाथतर्कालङ्कारकृतः प्रायश्चित्तकदम्बसारसंग्रहः समाप्तः ॥
दुर्गा । ॐ सरस्वत्यै नमः ।
श्रीवदनचन्द्रद्विजेन लिखिता पुस्तिरेषा ।
विप्रामोदकरीनाम्नी प्रायश्चित्तकदम्बिका ॥
मार्गशीर्षस्य मासस्य दिवसे दशपञ्चके ।
रविवारे चापराह्णे संपूर्णा लिखनाच्चियम् ॥ शक १७ । ३७ । १५ ॥

विषयः। सर्व्वप्रकारपातकानां प्रायश्चित्तव्यवस्था। तत्र प्रथमं कुष्ठ-शूल-यक्ष्म-श्वास-वृषत्-श्वासाश्चिनाशार्शोदुष्टव्रणप्रभृतिरोगयुक्तानां प्रायश्चित्तव्यवस्था। पूर्व्वोक्तरोगयुक्तानामौरसानाञ्च प्रायश्चित्तव्यवस्था। उपपातकानुपातकमहापातकातिपातक प्रकीर्णपाप-रोगसङ्कर-ज्ञानाज्ञानकृतब्रह्महत्यादिपापप्रायश्चित्तव्यवस्था। ब्राह्मण-क्षत्रिय-वैश्य शूद्रस्वामिकगोवधस्य ब्राह्मण-क्षत्रिय-वैश्य-शूद्रभेदेन प्रायश्चित्तव्यवस्था। विप्रादिस्वामिकपालनापालनकृतगोवधप्रायश्चित्तव्यवस्था। संगृहीतानि चात्र नारायणवन्द्योपाध्याय-शूलपाणि-स्मार्त्तभट्टाचार्य्य-भवदेवभट्टानां मतानि॥

No. 238. प्रायश्चित्ततत्त्वटीका. By काशीनाथतर्कालङ्कारः. Substance, country-made paper, $17\frac{1}{2} \times 4$ inches. Folia, 19. Lines, 12 on a page. Extent, 1,368 çlokas. Character, Bengali. Date, ? Place of deposit, Nadiyāgrāma, Post Office, Lousing, District, Pharidapura, Paṇḍita Çaçibhūṣaṇa Smṛtiratna. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. प्रणम्य पार्व्वतीशानौ श्रीकाशीनाथशर्म्मणा।
प्रायश्चित्तस्य तत्त्वानां बोधिनी क्रियते प्रियम्॥
प्रणम्येति। ब्रह्मस्वरूपं ब्रह्मविष्णुशिवनमस्कारात्मकं मङ्गलमाचरन् श्रीरघुनन्दन उद्दिशति प्रायश्चित्तस्य तत्त्वानीति। ननु ग्रन्थस्य नामकथनमुद्देशः तस्य नामत्वाभावात् कथमुद्देश्यत्वमिति चेन्न हिरण्यपूर्व्वं कशिपुं प्रचक्षते इतिवत् खण्डवाक्यस्य नामत्वात्। ननु तत्त्वानीत्यस्य ग्रन्थपरत्वं कुत इति चेत् प्रायश्चित्तस्य तत्त्वानीति पदे लक्षणया व्यञ्जनया वा प्रायश्चित्ततत्त्वमिति नाम बोद्धव्यं प्रायश्चित्तबोधकवचनानां तत्त्वनिरूपणपरत्वात् प्रायश्चित्ततत्त्वमिति ग्रन्थस्य नाम इति ग्रन्थकृतोऽभिप्रायः। प्रायश्चित्तस्य तत्त्वानि प्रायश्चित्तबोधकवचनानां तत्त्वानि यथार्थ्यान् प्रमाविषयीभूतानीति यावत् अन्येषां ग्रन्थकृतां वचनार्थभ्रमोऽस्ति अस्मत्कृतग्रन्थे कोऽपि भ्रमो नास्ति इति तात्पर्य्यम्। एवं लाक्षणिकार्थकशब्दो नाम मतान्तरे पृथिव्यादीनां गोनामवत्। सामान्य ...... प्रतिज्ञामात्र प्रायश्चित्तस्य लक्षणात्र इत्यादि। प्रायश्चित्तस्य लक्षणं अत्र ग्रन्थे वक्तव्यमिति शेषः। तथा तन्त्रप्रसङ्गकौ वक्तव्यौ तथा शब्दस्यार्थः कर्त्तृसंस्कारकाङ्गानां स्नानाचमनादीनां प्रतिकर्म्म निवर्त्तनं न प्रत्येककर्म्मणि करणम्। गोग्रासभक्षणात् शुद्धिरिति गोग्रासभक्षणं गवि स्थितं प्रायश्चित्तकर्त्तरि तु शुद्धिः॥ इत्यादि॥

End. गङ्गायां ज्ञानतो मृत्वा इति मरणात् पूर्व्वं गङ्गात्वे ज्ञाते मुक्तिः तदज्ञाने ब्रह्मलोकगमनमिति एतद्विषय एव गङ्गायां त्यजतः प्राणान् इत्यादि ...

...... युगादौ च इति मन्वादाविति श्रवणात् निमित्तत्वेन मन्वादौ इत्येव उल्लेख्यं मन्वन्तरादयस्त्वेता इत्यस्याक्षयकारिका इति वचनात् दाने मन्वादौ इत्येव उल्लेख्यम् । तान्त्रिके कर्म्मणि मन्वन्तरायामिति श्रवणात् मन्वन्तराया-मित्येव उल्लेख्यमिति केचित् । वस्तुतस्तु मता मन्वन्तरादयः स्युरित्यनेन मन्वन्तरादिसंज्ञाया एव विधेयत्वात् मन्वन्तरादौ इति सर्व्वत्र उल्लेख्यम् ।

ब्रह्मपुराणे ।

कलौ तु सर्व्वतीर्थानि स्वं स्वं वीर्य्यं स्वभावतः ।
गङ्गायां प्रतिमुञ्चन्ति सा तु देवी न कुत्रचित् ॥

भविष्ये ।

कृते तु सर्व्वतीर्थानि त्रेतायां पुष्करं ...... ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गा विशिष्यते ॥

चर्म्मोदकं चरणाङ्गाभिपर्य्यन्तमिति तु मौक्तिकं .... परं ब्रह्मेति तज्ज्ञानं जनयेदित्यर्थः । परं स्वरूपं शिवरूपमिति यावत् । प्रसङ्गेनेति प्रकर्षेण गतः सङ्गः कामो यस्य तेन मुमुक्षुणा इत्यर्थः इति केचित् । वस्तुतस्तु प्रसङ्गेन उद्देश्यान्तरप्रसङ्गेन कृताद् गङ्गास्नानान्मुक्तिः फलं जायते । अन्यत् तीर्थं कृतं पापमित्यादिवचनं गङ्गाजलकृतपापव्यतिरिक्तविषयम् । मादृशं कश्मलं दृष्ट्वा गङ्गा ...... वाणीति क्रियायोगसारग्रन्थलिखनानु-सारात् । सप्तस्वन्तु दिनक्षये इति दिनक्षयश्च ।

एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा ।
तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम् ॥ इति वचनोक्तः ।
द्वौ तिथ्यन्तावेकवारे यत्र स स्याद्दिनक्षय इति ॥

Colophon. इति श्रीकाशीनाथतर्कालङ्कारविरचित-प्रायश्चित्ततत्त्वीयगङ्गामाहात्म्यविधि-टीका समाप्ता ॥

विषयः । रघुनन्दनभट्टाचार्य्यकृतस्य प्रायश्चित्ततत्त्वस्य व्याख्यानम् ।

No. 239. **प्रायश्चित्ततत्त्वटीका.** By **राधामोहनगोस्वामी.** Substance, country-made paper, 17 x 3 inches. Folia, 106. Lines, 7 on a page. Extent, 2,782 çlokas. Character, Bengali. Date, Sk. 1751. Place of deposit, District Vãkuḍā, Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, tolerable. Prose. Incorrect.

Beginning. श्रीश्रीरामः ॥

तडिद्गौरी नीलाम्बुदरुचिररूपस्तदरले
लसद्दंष्ट्रीनादाम्बतनिकरवर्षी प्रियसखि ।
नवीनोऽयं किं मे रचयति हृदीतेङ्गितकथां
मदुत्पन्दा राधा जयति वकशत्रोर्हृदि गता ॥
सुधु प्रायश्चित्ततत्त्वव्याख्या मोहनशर्म्मणा ।
क्रियतेऽद्वैतवंश्येन गोविन्दगतिकाम्यया ॥

प्रारिप्सितग्रन्थसमाप्तिहेतुतया मङ्गलमाचरन् शिष्यशिक्षार्थं तदुपनिबध्नन् तद-वधानाय प्रतिज्ञाञ्चाचरति प्रणम्येत्यादि । अथ मङ्गलस्य समाप्तिहेतुत्वे किं मानमिति चेत् शिष्टाचारानुमितवेद एव प्रमाणं तथाहि मङ्गलं वेद-बोधितग्रन्थसमाप्तिहेतुकं ग्रन्थादौ शिष्टैरनुष्ठीयमानत्वात् इति वेदानुमानं वेदश्च ग्रन्थसमाप्तिकामो मङ्गलमाचरेदित्यादिरूपः । मङ्गलञ्च ईश्वर-प्रणामादि ।

End. तेनोपवास इति एवञ्च ।

एकरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ।

इति प्रागुक्तकाश्यपवचनसमार्थतेति । असवर्णरजस्वलास्पर्शे दोषाधिक्यस्य काश्यपवचने उक्तत्वात् । अतः परमित्यस्य तत्परत्वासम्भवादाह उच्छिष्ट-शूद्रादिस्पर्शे इति एतत्परत्वे हेतुमाह शङ्ख इति ग्रहस्य चरेदिति एतच्च प्रथमद्वितीयदिन इति यावत् अथ स्नानोत्तरस्पर्शे दोषाभावस्य उक्तत्वादाह स्नानात् पूर्व्वमिति चाण्डाल्यादिरजस्वलास्पर्शे तथाविधब्राह्मण्याः षड्रात्र त्रैगुण्यं शूलपाणिभिः शूद्राचाण्डाल्यादेः त्रिगुणाधमत्वस्य कथनादिति ॥ * ॥

Colophon. इति श्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचिता प्रायश्चित्ततत्त्वव्याख्या स-माप्ता ॥ * ॥ शकाब्दाः १७५१ ।

विषयः । रघुनन्दनभट्टाचार्य्यकृतस्य प्रायश्चित्ततत्त्वस्य व्याख्यानम् ।

No. 240. प्रायश्चित्तप्रकरणम् **.** By भवदेवभट्टः **.** Substance, country-made paper, 19 × $5\frac{1}{2}$ inches. Folia, 47. Lines, 9 on a page. Extent, 1,985 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha Kāṭihāli, Paṇḍita Navakiçora Tarkacūḍāmaṇi. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

अनादिभवसम्भूतपापप्रशमकारणम् ।
स्मरणं वासुदेवस्य यस्य तस्मै नमो नमः ॥
मन्वादिस्मृतिमालोक्य सुविविच्य यथाक्रमम् ।
क्रियते भवदेवेन प्रायश्चित्तनिरूपणम् ॥

प्रायश्चित्ते निरूपणीये गुरुत्वात् महापातकप्रायश्चित्तनिरूपणपुरःसरमेव इतरप्रायश्चित्तनिरूपणे कर्त्तव्ये मन्वादिवचनक्रमानुरोधेन प्रथमं ब्रह्मवधप्रायश्चित्तमेव निरूप्यते । इत्यादि ।

End. तथाच इहद्विष्णुः । अष्टौ ग्रासान् प्रतिदिवसं मासमश्नीयात् यतिचान्द्रायणो नाम । अत्र मासेकेन चत्वारिंशदधिकशतद्वयपिण्डाहारेणोपवासाभावेन च लोमशाल्पत्वात् । अत्रापि पञ्च धेनवः । इति कृच्छ्रप्रकरणं समाप्तम् ॥

Colophon. इति श्रीबालवड़भीय भुजङ्गापरनाम्नो भट्टश्रीभवदेवस्य कृतौ प्रायश्चित्तप्रकरणं समाप्तम् ॥ * ॥

विषयः । महापातकोपपातकादिनिरूपणमुखेन तत्तत्पापप्रायश्चित्तादिनिरूपणम् । चान्द्रायणादिव्रतनिरूपणञ्च ।

No 241. प्रायश्चित्तव्यवस्थासंग्रहः. By मोहनचन्द्रविद्यावाचस्पतिः. Substance, country-made paper, 18×4 inches. Folia, 8. Lines, 8 on a page. Extent, 288 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Ichāpurā, Paṇḍita Vrajanātha Vidyāratna. Appearance, tolerable. Prose. Correct.

Beginning. नत्वा गुरून् समासेन प्रायश्चित्तस्य सारतः ।
द्विजमोहनचन्द्रेण व्यवस्था लिख्यते मया ॥

तत्र प्रायश्चित्तस्य लक्षणं पापक्षयसाधकत्वे सति विधिबोधितपापक्षयेतरासाधकत्वम् । तेन पापक्षयस्वर्गोभयसाधकयागादौ नातिव्याप्तिः । न वा तस्य पापक्षयेतरसध्वंसादिसाधकत्वेऽप्यसम्भवः । पापक्षयेतरे विधिबोधितत्वविशेषणात् । स्वध्वंसादेस्तु विधिबोधितत्वाभावात् । प्रायश्चित्तस्य नित्यत्वं नैमित्तिकत्वं काम्यत्वञ्च बोध्यम् । इत्यादि ।

End. प्राजापत्यव्रते त्वेकधेनुदानाच्छुद्धिः । यतिचान्द्रायणव्रते पादोनधेनुचतुष्टय-दानात् पराकव्रते पञ्चधेनुदानात् । अन्यत् प्रायश्चित्तादिकं प्रायश्चित्ततत्त्वा-द्यवगन्तव्यम् ॥

Colophon. इति प्रायश्चित्तव्यवस्थासङ्क्षेपः समाप्तः ।

विषयः । प्रायश्चित्तस्वरूपकथनपूर्व्वकं संक्षेपतः प्रायश्चित्तव्यवस्थादिकथनम् ।

No. 242. प्रायश्चित्तसंग्रहः. By कृष्णदेवस्मार्त्तवागीशः. Substance, country-made paper, 13 × 3 inches. Folia, 74. Lines, 7 on a page. Extent, 1,554 çlokas. Character, Bengali. Date, Sk. 1760. Place of Deposit, District Vāṅkuḍā, Viṣṇupura, Paṇḍita Rāmānuja Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ॥ अथ प्रायश्चित्तं । तत्र प्रायश्चित्तलक्षणं पापक्षयमात्र-कामनाजन्यकृतिविषयपापक्षयसाधनं कर्म्म प्रायश्चित्तम् । पापक्षयस्वर्गोभय-कामनाजन्यकृतिविषयसद्दसरणाश्वमेधादिवारणाय मात्रपदम् । अज्ञानकृत-चैत्यवन्दनादिवारणार्थमन्त्यं दलं । तत्र पापक्षयजनकता नास्ति प्रमाणा-भावात् । यदा चान्द्रायणाश्वमेधादि स्वाहपकृतिविषयस्तदा प्रायश्चित्तं यदा तु स्वर्गादिफलकामनाजनकतापि तदा तेषां न प्रायश्चित्तत्वं । शरीरगत-प्रायत्वाभावे प्रायश्चित्तस्य न कारणत्वम् । इत्यादि ।

End. अत्र प्रायश्चित्ताश्रवणात् प्राजापत्येन चैकेन सर्व्वपापक्षयो भवेदिति धेनुदान-मिति । देवलः ।

वैश्याः शूद्रास्च ये मोहादुपवासं प्रकुर्व्वते ।
त्रिरात्रं पञ्चरात्रं वा तयोः पुष्टिर्न्न विद्यते ॥

पुष्टिः फलं तेन काम्यस्यैव निषेधः प्रायश्चित्तात्मकं कर्त्तव्यमेव ॥ भारते ।

नैव निर्वापयेद्दीपं देवार्थमुपकल्पितम् ।
दीपहर्त्ता भवेदन्धः काणो निर्वाणको भवेत् ॥

कौर्म्मे ।

गृध्रो जन्मसहस्राणि शतजन्मानि शूकरः ।
श्वापदः सप्तजन्मानि अमायां मिथि भोजनात् ॥

सकृज्जलस्य पानाच्च सकृत् ताम्बूलभक्षणात् ।
उपवासफलं हन्याद्दिवास्वापाच्च मैथुनात् ॥
नैवेति च पाठो वर्षकौमुद्याम् ।
आसनं वसनं शय्या जायापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि न परेषां कदाचन ॥

Colophon. इति श्रीयुतकृष्णदेवसार्व्वभौमभट्टाचार्य्यकृतः प्रायश्चित्तसंग्रहः समाप्तः ॥
श्रीशिवो जयति ॥ शकाब्दाः १७६० ॥

विषयः । प्रायश्चित्तादिनिरूपणम् । तन्त्रतानिरूपणम् । प्रसङ्गादिनिरूपणम् । प्रायश्चित्तोपदेशादिनिरूपणम् । प्रायश्चित्तानुग्रहादिनिरूपणम् । धेनुमूल्यादिव्यवस्था । गोवधादिप्रायश्चित्तनिरूपणम् । गोमांसभक्षणगोविक्रयादिप्रायश्चित्तम् । गङ्गास्नानस्य प्रायश्चित्तत्वनिरूपणम् । शूद्रादिवधप्रायश्चित्तादिनिरूपणम् । अभक्ष्यभक्षणादिप्रायश्चित्तम् । अशौचान्नादिभक्षणप्रायश्चित्तञ्च ।

No. 243. प्रायश्चित्तसारः. By यादवेन्द्रविद्याभूषणः. Substance, country-made paper, 18×2 inches. Folia, 54. Lines, 6 on a page. Extent, 1,782 çlokas. Character, Bengali. Date, Sk. 1613. Place of deposit, District Vãkuḍā. Viṣṇupura, Paṇḍita Candranārāyaṇa Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

सत्यमेव जयते

Beginning. श्रीकृष्णो जयति ॥
भूयः प्रणम्य रघुनाथपदारविन्दं
मन्वादितन्त्रनिवहानभिवीक्ष्य यत्नैः ।
उद्धृत्य सारमखिलं निखिलस्मृतीनां
श्रीयादवेन विदधे स्मृतिसार एषः ॥
तत्रादौ प्रायश्चित्तनिरुक्तं । तत्र मान्याः । पापक्षयमात्रसाधनं कर्म्म प्रायश्चित्तमिति । तच्चिन्त्यं चान्द्रायणादीनां पापक्षयातिरिक्तस्वध्वंसादीनां जनकत्वाद …… किञ्च प्रायश्चित्तादावात्मगतपापक्षयस्य शरीरगतप्रायत्वस्य निष्पत्तेश्च । इत्यादि ।

End. रजस्वलाया उच्छिष्ट-शूद्री-श्व-शूकरादिस्पर्शे प्रथमद्वितीययोर्दिनयोर्द्वरात्रोपवासः । तृतीये त्वहोरात्रं चतुर्थे नक्तं विना भोजने त्वहोरात्रोपोषितः ।

ध्रुतैः पञ्चगव्येन शुद्ध्यति । पर्व्वणि मांस-तैल-स्त्रीसम्भोगे चुरकर्मणि चाहो-रात्रमभोजनम् । अभ्यासे तु प्राजापत्यं चान्द्रायणं वा श्राद्धदिने स्त्रीगमने त्वहोरात्रमभोजनम् । दिवामैथुने दिनमेकं व्रती भवेदिति ॥ ० ॥

Colophon. इति श्रीयादवविद्याभूषणविरचितः प्रायश्चित्तसारः सम्पूर्णः ।

शकाब्दाः १६१२ ॥

विषयः । अत्र प्रथमं प्रायश्चित्तनिरुक्तम् । ततः प्रायश्चित्तपूर्व्वाङ्गकृत्यादिनिरूपणम् । गोवध-प्रायश्चित्तादिनिरूपणम् । क्षत्रियादिवधप्रायश्चित्तनिरूपणम् । धेनुसङ्कलनम् । चाण्डालादिस्पृष्टा-न्नादिभक्षणप्रायश्चित्तम् । अन्त्यजस्त्रीगमनादिप्रायश्चित्तम् । शूद्रान्नादिभक्षणप्रायश्चित्तम् । लशु-नादिभक्षणप्रायश्चित्तम् । यज्ञोपवीतरहितान्नभोजनादिप्रायश्चित्तम् । ब्राह्मणाद्युच्छिष्टभोजनप्राय-श्चित्तम् । महापातकादिनिरूपणम् । ब्रह्मवधविचारः । ब्रह्महत्यासुरापानयोः प्रायश्चित्तम् । स्वर्णहरणप्रायश्चित्तम् । गुर्व्वङ्गनागमनप्रायश्चित्तम् । पतितसंसर्गप्रायश्चित्तञ्चेति ।

No. 244. फेत्कारिणीतन्त्रम्. Substance, country-made paper, 13 × 3 inches. Folia, 31. Lines, 7 on a page. Extent, 949 çlokas. Character, Bengali. Date, ? Place of deposit, Kā̃ṭhālpāḍā, Post Office Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Verse. Correct.

Beginning. ॐ नमो दुर्गायै ॥

मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुम् ।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरम् ॥
पार्व्वत्युवाच ।
भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रागमादिषु ।
धर्म्मार्थकाममोक्षाणां हेतुरूपा महेश्वरी ॥
या ख्याता प्रकृती चाद्या देवी दक्षिणकालिका ।
शक्तिरूपा च सर्व्वेषां ब्रह्मादीनां सुरेश्वरी ॥
दक्षिणा वा कथं देव शैवरूढ़ा कथं भवेत् । इत्यादि ।

End. अनया सदृशी विद्या त्रैलोक्ये चातिदुर्लभा ।
भोगमोक्षप्रदा साक्षात् पुरुषार्थप्रदायिका ॥
अनया सदृशी विद्या न विद्यार्णवगोचरे ।
नास्ति नास्ति पुनर्नास्ति सत्यं सत्यं वदाम्यहम् ॥ ० ॥

Colophon. इति फेत्कारीये दशमः परिच्छेदः ॥ ० ॥

विषयः । दक्षिणकालिकाया दक्षिणत्वशवरूढ़त्वादिनिरूपणम् । मन्त्रभेदादिनिरूपणम् । उग्रतारात्रिपुरादिकारणनिरूपणम् । दशमहाविद्याकारणनिरूपणम् । कालिकाया महाविद्यात्वनिरूपणम् । पूजाविध्यादिनिरूपणम् । भुवनेश्वर्य्यादिविद्यानिरूपणम् । गुरुक्रमनिरूपणम् । प्रचण्डचण्डिकाबीजपूजादिनिरूपणम् । षोड़शाक्षरादिनिरूपणञ्चेति ।

No. 245. बालग्रहप्रशमनविधानम् . Substance, country-made paper. Folia, 8. Lines, 8 on a page. Character, Nāgara. Date, Sam. 1943. Place of deposit, Govardhana-Sarāi Benares, Paṇḍita Vindhyeçvarīprasāda Dube. Appearance, fresh. Prose and verse. Incorrect.

Beginning. श्रीगणेशाय नमः ॥ विधानमालायाम् । अथ प्रसङ्गेन लघुजातकोक्तानि बालरक्षोपयोगीनि द्वन्द्वशान्तिविधानानि । तान्येव स्कन्दपुराणे स्कन्द-सूर्य्य-संवादे । सूर्य्य उवाच ।

आहवश्चैव निद्रा च रुदितं हास्यमेव च ।
स्वाभाविकन्त्विदं देव कर्म्म चैषां षड़ानन ॥ इत्यादि ।

End. सूर्य्य उवाच ।

येन पापेन चाज्ञानां मनुजानां गदो भवेत् ।
तत्सर्व्वं पूर्व्वमेव त्वं उक्तवानसि षन्मुख ॥

Colophon. इति श्रीस्कन्दे सूर्य्यारुणसं द्वादशदिनमासाब्दभामिनीजनितपीड़ोपशमनविधानम् । श्रीकृष्ण चौवे श्रीश्री सम्वत् १९४३ माः फाल्गुण ११ वार रविव । कालीप्रसादमहल्ला गोवर्द्धनके सरै ।

विषयः । बालग्रहाणां शान्तिविधानादिकम् ।

No. 246. बालभैरवीसहस्रनामस्तोत्रम् . Substance, country-made paper, 14×3 inches. Folia, 5. Lines, 9 on a page. Extent, 242 çlokas. Character, Bengali. Date, Sk. 1215. Place of deposit, Kāṭhālpāḍā, Post Office Naihaṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Verse. Generally correct.

Beginning. अथ त्रिपुरबालभैरवीसहस्रनामस्तोत्रम् । ॐ नमो भैरव्यै । पार्व्वत्युवाच ।
देवदेव महादेव परब्रह्मस्वरूपक ।
सर्व्वदेवस्तुत नाथ सर्व्वदेवप्रपूजक ॥
जटाजूटधर देव गिरिजार्द्धाङ्गभूषण ।
भाले शशिकलाखण्ड निष्कलङ्कावलोकित ॥
भूतनाथ महादेव प्रसन्न भयभञ्जन ।
त्वं गतिः सर्व्वदेवानां त्वमेव शरणं प्रभो ॥
त्राहि मां देव दुष्प्रेक्ष्य संसारार्णवशङ्कटात् ।
भैरवी बालयाख्या (?) च सूचितं न प्रकाशितम् ॥
तस्या नामसहस्रन्तु कथयस्व वरानन ॥ इत्यादि ।

End. परदारगते वापि शठेऽकृत्ये च पापिनि ।
तस्य तस्य महेशानि न दातव्यं सुनिश्चितम् ॥
उक्तानुक्तञ्च यत् किञ्चित् स्थावराणि चराणि च ।
तव नित्यस्थिता देवि बालया परमेश्वरी ॥

Colophon. इति रुद्रयामले हरगौरीसंवादे बालायाः सहस्रनामस्तोत्रं समाप्तम् ॥
शरेन्दुपक्षेन्दुमिते शकाब्दे व्यलेखि स्तोत्रं परदेवतायाः ॥

विषयः । बालभैरवीस्तोत्रकथनम् ।

No. 247. बिल्वेश्वरः. By बिल्वेश्वरः. Substance, country-made paper, 14×2½ inches. Folia, 78. Lines, 6 on a page. Extent, 1,723 çlokas. Character, Bengali. Date, ? Place of deposit, Mayamanasiṁha, Serapura, Paṇḍita Durgāsundara Kṛtiratna. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ॥ द्विर्व्वौ ॥ अधिकारसूत्रमिदं वक्ष्यमाणार्थसंक्षेपाय कार्य्यकार्य्यिनिमित्तानां यदुदीरणं सोऽधिकारः ॥ इत्यादि ।

End. सम्प्र ॥ दीर्घस्यावनुगच्छते तद्विय मन्त्यमिति ज्ञापकाद्वात्र इस उश इति मन्त्यस्यैव निमित्तमुत्पत्तिरित्यनेन समवायग्रहणं सम्बन्धः प्रतिपादितः अधिकारसूत्रैस्तथा दर्शनाद्वात्र न परस्पराथा इति ॥ * ॥

Colophon. इति श्रीबिल्वेश्वरतर्काचार्य्यकृतमष्टमप्रकरणं समाप्तं ।

विषयः । कातन्त्रीयाख्यातप्रकरणस्य व्याख्या ।

No. 248. वृहद्गौतमीयतन्त्रम्. Substance, country-made paper, 14×5 inches. Folia, 25. Lines, 13 on a page. Extent, 1,503 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍā, Visṇupura, Kādākuli, Paṇḍita Rāmaprasanna Bhaṭṭācāryya. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ कृष्णाय नमः ।

पुण्डरीकपुरे पूर्व्वं सरलद्रुमकानने ।
सुमेरोश्चत्वरे शृङ्गे रत्नभूमिसुखावहे ॥
विचित्रचित्रसुभगे सुवर्णबालुकान्विते ।
समानोदितचन्द्रार्क्के श्रुद्युतौ (?) मणिमण्डपे ॥
कल्पवृक्षवनान्तस्थे पक्षिमालाविघुष्टिते ।
सुखासने समासीनाः शौनकाद्या महर्षयः ॥
शौनकः पर्व्वतो गार्गिर्मरीचिर्दधिचिस्तथा ।
शातातपः सुनीतिश्च इत्याद्या मुनिसत्तमाः ॥
स्मरन्तः कृष्णगाथाश्च बोधयन्तः परस्परम् ।
जपन्तोऽष्टादशार्णाख्यं दशार्णाद्यान् परस्परम् ॥
कदाचित् पर्य्यटन्नेको नारदो ब्रह्मणः सुतः ।
यदृच्छया तत्र यातो वीणां ब्रह्ममयीं ध्वनन् ॥
मन्त्रमायार्णकाः (?) सर्व्वे नत्वा दत्वा वरासनम् ।
उपविष्टं मुनिवरं पाद्यार्घ्याचमनीयकैः ॥
भूयोभूयोऽपि मुनये शृण्वतां वाचमन्वयुः ।
मुने त्वं ब्रह्मणः श्रेष्ठसुतो ब्रह्मा इवापरः ॥
वयं तवोपदेशेन चरामः कृष्णवर्त्मसु ।
संसारसागरे घोरे विषयग्राहसंकुले ॥
पुत्रदारधनावर्त्ते स्नेहपङ्कलपङ्किले ।
जायन्ते च म्रियन्ते च तेषां मुक्तिर्न विद्यते ॥
तरन्ति त्वत्प्रसादेन केन ते जीवजातयः ॥

श्रीनारद उवाच ॥

अपायं ते वक्ष्याम्यत्र सावधानमनाः शृणु ।
यदुपास्य महात्मानो मुनयः सिद्धिमागताः ॥
एवं मया पुरा पृष्टो ब्रह्मा लोकपितामहः ।
तथा वः कथयिष्यामि यथा प्रोक्तं स्वयम्भुवा ॥ इत्यादि ।

End.

गकारं मूर्द्धि विन्यस्य लकारं हृदये न्यसेत् ।
यकारं नाभिदेशे च एङ्कारं गुह्यदेशके ॥
नादविन्दू पादयोश्च मन्त्रन्यास इतीरितः ।
एवं विन्यस्य कृष्णस्य ध्यायेदात्मानमात्मनि ॥
कदम्बमूले क्रीडन्तं वृन्दावननिवासिनम् ।
पद्मोपरि स्थितं देवं वेणुं गायन्तमच्युतम् ॥
पीताम्बरधरं देवं वनमालाविभूषितम् ।
गोपीभिर्गोपवृन्दैश्च सेवितं कृष्णमर्चयेत् ॥
चत्वारिंशत्सहस्रन्तु चतुर्लक्षसमन्वितम् ।
पुरश्चरणमित्युक्तं मन्त्रस्यास्य विशेषतः ॥
आद्येन तद्दशांशेन होमयेन्मन्त्रवित्तमः ।
त्रिकालपूजां कुर्व्वीत दशाक्षरमनोर्यथा ॥
पिण्डगोपालमन्त्रस्य समानोऽन्यो मनुर्न हि ।
गुरूपदेशमन्त्रेण योजयेत् कृष्ण एव सः ॥ * ॥

Colophon. इति श्रीगोविन्दवृन्दावने बृहद्गौतमीयतन्त्रे षट्त्रिंशः पटलः ॥ * ॥

विषयः । प्रथमपटले वैष्णवप्रशंसादिकथनम् । २ ये अवतारकारणादिनिरूपणम् । ३ ये प्रणवशब्दव्युत्पत्तिनिरूपणमुखेन कृष्णमन्त्रप्रशंसादिः । ४ र्थे वीजादिस्मरणप्रकरणम् । ५ मे दशार्णज्ञानफलादिः । ६ ष्ठे चिन्तनस्थानादिनिरूपणम् । ७ मे वृन्दावनध्यानादिः । ८ मे आचमनासनादिनिरूपणम् । ९ मे भूतशुद्ध्यादिनिरूपणम् । १० मैकादशयोः मातृकान्यासादिनिरूपणम् । १२ शे सृष्टिन्यासादिनिरूपणम् । १३ शे गुरुमाहात्म्यादिकथनम् । १४ शे दीक्षानिरूपणादिः । १५ शे पूजोपकरणादिनिरूपणम् । १६ शे सर्व्वतोभद्रफलादिकथनम् । १७ शे दीक्षाङ्गक्रमनिरूपणम् । १८ शे शान्तिकुम्भस्थापनादिविधिः । १९ शे योनिमुद्राफलादिकथनम् । २० शे कृष्णपूजादिः । २१ श द्वाविंशयोः गृहस्थादीनां दीक्षाविधिः । २३ शे कृष्णमन्त्रजपादिविधिः । २४ शे स्थण्डिलादिनिरूपणमुखेन होमनिरूपणम् । २५ शे समिधादिनिरूपणम् । २६ शे यजनविध्यादिः । २७ शे ऋष्यादिन्यासः । २८ श

२९ शयोः प्राणाग्निश्रीजादिनिरूपणम् । ३० शे मोक्षमदीपनादिनिरूपणम् । ३१ शे मन्त्रराजबीजादिनिरूपणम् । ३२ श ३३ शयोः मन्त्रसिद्धिलक्षणादिः । ३४ शे मुद्रादिनिरूपणम् । ३५ शे एकाक्षरमन्त्रादिनिरूपणम् । ३६ शे मन्त्रपिण्डादिः ॥

No. 249. **वृहद्योनितन्त्रम्.** Substance, country-made paper, 10 × 2½ inches. Folia, 18. Lines, 8 on a page. Extent, 360 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Mājhapāḍā, Bābu Rāsavihārī Rāya. Appearance, tolerable. Verse. Incorrect.

Beginning. ॐ नमः परमदेवतायै ।

कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
भवानी रहसि प्रीत्या पप्रच्छ जगदीश्वरम् ॥
श्रीपार्व्वत्युवाच ।
नमस्ते देवदेवेश परमेश पुरातन ।
पार्व्वतीप्राणनाथेश लोकानां हितकारक ॥
त्वत्प्रसादात् प्राणनाथ तन्त्राणि विविधानि च ।
इदानीं श्रोतुमिच्छामि बृहद्योनिं महेश्वर ॥
तन्त्रं योनेर्म्महत्त्वञ्च पूजाक्रममनुत्तमम् ।
तन्त्रञ्च देवतां योनेर्मुद्राश्चैव प्रकाशय ॥
यदि गुह्यतरं नाथ तथापि कथय प्रभो ।
ईश्वर उवाच ।
किमिदं भाषसे सुभ्रु स्त्रीस्वभावान्महेश्वरि ।
मम प्राणाधिकं देवि त्रिषु लोकेषु दुर्लभम् ॥
यथा त्वद्योनि दुष्प्रेक्ष्यं मन्त्रैरपि सुरेश्वरि ।
तथैव जायते शङ्का कथितुं वरवर्णिनि ॥ इत्यादि

End. ज्ञानहीनोऽपि दाता च भजन्ति प्रीतिमुत्तमाम् ।
पशुपुत्रस्त्रियो बन्धुं लभन्ते च पुनः पुनः ॥
कर्म्मकाण्डरता विप्राः कर्म्मकारणमुच्यते ।
चतुर्व्वर्गप्रियो नित्यं युगकल्पमनेकधा ।
देहमध्ये स्थितं देव पिण्डब्रह्माण्डव्यापितम् ॥

Colophon. इति बृहद्योनितन्त्रे दशमः पटलः ॥

विषयः। अत्र प्रथमं बृहद्योनितन्त्रमाहात्म्यादिकथनच्छलेन शिवाशिवयोर्निधुवनमन्दिरगमनकथनम्। तत्र जगत्कारणभूतायाः प्रकृतेर्योनिरूपत्वकथनम्। तस्याः सर्व्वदेवमयत्वकथनम्, सर्व्वतीर्थादिमयत्वकथनञ्च। अथ तस्यां शक्तीनामवस्थितिकथनम्। तस्याः पूजने लक्षपीठपूजाफलप्राप्तिकथनम्। तस्याः पूजाकालादिनिरूपणम्। तन्नामकीर्त्तनफलकथनम्। महादेवस्य लिङ्गरूपत्वादिकथनम्। आश्विनशुक्लनवम्यां तन्नामाङ्कितगीतकरणे फलश्रुतिकथनम्। पार्व्वत्याः कृष्णरूपेणावतारकथापूर्व्वं व्रजाङ्गनाभिः सह विहारकथनम्। अथ पञ्चतत्त्वेन योनिपूजाविधिः। योनिमुद्रादिविधिः। षट्चक्रेषु तस्याश्चिन्तनादिविधिः। योनिकवचकथनम्। योनिमन्त्रादिकथनम्। कुलज्ञानात् मोक्षप्राप्तिकथनञ्च ॥

No. 250. बृहद्रुद्रयामलम्. (जन्मखण्डः) Substance, country-made paper, 14×3 inches. Folia, 48. Lines, 5 on a page. Extent, 840 çlokas. Character, Bengali. Date, Sk. 1741. Place of deposit, District Vā̃kuḍā, Visṇupura, Paṇḍita Rāmavallabha Bhaṭṭācāryya. Appearance, fresh. Verse. Incorrect.

Beginning. ॐ नमो भगवते पञ्चवक्त्राय।

श्रीनारद उवाच।

कृष्ण कृष्ण महावाहो प्रपन्नजनवल्लभ।
श्रोतव्यमेकमेवास्ति हृदि मे कथय प्रभो ॥
श्रुताः सर्व्वावतारास्ते कल्क्यन्ता मीनकादयः।
अन्ये चैवावतारास्ते श्रुता मे दीनपावन ॥
पूर्व्वं तेऽकरवं प्रश्नं सत्ये तु युगशीर्षणि।
त्वं मे कथितवान् देव तुभ्यं पश्चात् वदामि वै ॥
अद्य मेऽवसरो भूतस्वातः प्रश्नं करोमि ते।
कथित्वा परमानन्दं जनयस्व जनार्द्दन ॥
त्वं ब्रह्म परमं साक्षात् त्वं हि लोकपितामहः।
अनुरक्ताय भक्ताय कृपया वक्तुमर्हसि ॥
नाम्ना पञ्चाननो देवः कलौ कस्मात् भविष्यति।
तत् कथ्यतां जगन्नाथ यदि स्नेहोऽस्ति मां प्रति ॥

श्रीभगवान् उवाच।

मुने शृणु महद्वाक्यं कथयामि तवानघ।
यत् श्रुत्वा सप्तसहस्राणि ह्यपि वन्ध्या प्रसूयते ॥

कलौ लोका दुराचारा भविष्यन्ति हतौजसः ।
जन्मवन्ध्या न सुपुत्रा नार्य्यश्च हतमङ्गलाः ॥
मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिङ्कराः ।
द्विजातयो हताचाराः क्षत्रिया भ्रष्टमानसाः ॥
तद्वद्वैश्याश्च शूद्राश्च नानोपद्रवसंयुताः ।
अमङ्गलानि सर्व्वाणि भविष्यन्ति कलौ युगे ॥
एषां हिताय विप्रर्षे पञ्चास्योऽहं भवामि वै ॥ इत्यादि ।

End. हतो दारैश्च पुत्रैश्च महाराजा नरध्वजः ।
उवास निर्म्मले स्वर्गे ह्यद्यापि मुनिपुङ्गव ॥
रुद्रप्रसादाद्राजर्षिरैहिकं सुखमश्नुवन् ।
स्थितः सुरपुरे ब्रह्मन् किमन्यत् कथयामि ते ॥
यत्र तत् शृणुते मर्त्त्यो भक्तिभावसमन्वितः ।
भुक्त्वा सुखं मनोरम्यञ्चान्ते याति पराङ्गतिम् ॥
को वा दयालुरपि कामधेनु-
र्धन्यो जगत्यामपि शङ्करादहो ।
यद्देहजातो रविकोटिभासी
नीतः स्वकं वामनरं नराधिपम् ॥ (?)
श्रुत्वा वाक्यं रोमहर्षं नारदो जगदीश्वरात् ।
नत्वा रुद्रं महात्मानं कृष्णं नत्वा सुखं ययौ ॥
काकवन्ध्यादिका नार्य्यः षड्विंशतिमतास्च याः ।
स्मरणात् पठनात् दोषान् हित्वा यान्ति परां गतिम् ॥ ० ॥

Colophon. इति श्रीबृहद्रुद्रयामलीये श्रीकृष्णनारदसंवादे द्वितीयखण्डे त्रिंशोऽध्यायः ॥*॥
समाप्तश्चायं जन्मखण्डः ॥ शक १७४१ ।

विषयः । प्रथमाध्याये दैवमन्त्रणादिनिरूपणम् ॥ २ ये पञ्चाननजन्मादिनिरूपणम् । ३ ये पञ्चाननभूप्रवेशादिनिरूपणम् । ४ र्थे शान्तदान्तोत्पत्तिनिरूपणम् । ५ मे द्विजदण्डादिनिरूपणम् । ६ ष्ठे विप्रशोकापनोदनम् ॥ ७ मे पूजाप्रकाशादिनिरूपणम् । ८ मे मालिकोपाख्यानम् । ९ मे मृतपुत्रदानादिनिरूपणम् । १० मे द्विजागमनादिनिरूपणम् । ११ शे वरप्रार्थनादिनिरूपणम् । १२ शे नरध्वजसुतोत्पत्तिनिरूपणम् । १३ शे नरध्वजामोदनिरूपणम् । १४ शे यात्रोपक्रमादिनिरूपणम् । १५ शे दूतवधनिरूपणम् । १६ शे वीरसेनवधादिनिरूपणम् । १७ शे कीर्त्तिध्वजजयादिनिरूपणम् । १८ शे भगवद्वाक्यनिरूपणम् । १९ शे लोचनादानादिनिरू-

पणम् । १० शे कामाधारादिदानिरूपणम् । २१ शे नक्रोपाख्यानम् । २२ शे लङ्काप्रवेशादिनिरूपणम् । २३ शे २४ शे च सुवर्णप्राप्तिनिरूपणम् । २५ शे नरध्वजकृतरुद्रस्तवादिनिरूपणम् । २६ शे रुद्रपूजास्तवादिनिरूपणम् । २७ शे नारदोपाख्यानादिः । २८ शे असतीस्त्रीणां फलादिनिरूपणम् । २९ शे मुमुक्षुकर्त्तव्यकर्म्मादिनिरूपणम् । ३० शे नरध्वजस्वर्गवासादिनिरूपणश्चेति ॥

No. 251. **ब्रह्मपुत्रमाहात्म्यम्.** Substance, country-made paper, 14 × 2½ inches. Folia, 3. Lines, 7 on a page. Extent, 60 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Pilkhānā, Vāddānagara, Paṇḍita Kailāsacandra Tarkaratna. Appearance, new. Prose and verse. Correct.

Beginning. ॐ नमः शिवाय । अथ ब्रह्मपुत्रमाहात्म्यम् ।

नारद उवाच ।

माहात्म्यञ्चैव सर्व्वेषां श्रुतं विस्तरतो मया ।
गङ्गादिसरितां सम्यक् तीर्थराजस्य न श्रुतम् ॥
तीर्थराजस्य माहात्म्यं कथयस्व मयि प्रभो ।
स्रष्टा त्वं सर्व्वलोकानां कर्त्ता हर्त्ता पितामह ॥

ब्रह्मोवाच ।

तीर्थराजस्य माहात्म्यं शृणुष्वैकमनास्ततः ।
कथयामि न सन्देहो ब्रह्मपुत्रस्य कीर्त्तनम् ॥
तीर्थनाथस्य सर्व्वेषां पापराशिः प्रलीयते ।
दर्शनात् सर्व्वलोकानां पुनर्जन्म न विद्यते ॥ इत्यादि ।

End. ततः स्नात्वा अर्घ्यं दद्यात् ।

ॐ किरीटिन्नीलवासश्च रत्नदामविभूषित ।
गृहाणार्घ्यं मया दत्तं भवबन्धविमुक्तये ॥

ततः प्रणमेत् ।

नमस्ते ब्रह्मपुत्राय नमः शान्तनुसूनवे ।
त्रिजन्मजन्म यत् पापं तत् पापं हर मे विभो ॥

Colophon. इति स्नानविधिः समाप्तः ।

विषयः । ब्रह्मपुत्रनदस्य माहात्म्यकथनम् । तत्र स्नानादिविधिश्च ।

No. 252. ब्रह्मपुत्रोत्पत्तिः. Substance, country-made paper, 18×2 inches. Folia, 7. Lines, 6 on a page. Extent, 510 çlokas. Characte Bengali. Date, ? Place of deposit, Yaçodala, District Mayamanasimh Paṇḍita Harinātha Tarkabhūṣaṇa. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

पापराशिसमुद्दाधे नराणामागतं करुणया हरिवर्णात् ।
मुक्तिहेतुमक्षयं घनपुण्यं ब्रह्मपुत्रमनिशं प्रणमामि ॥
अथ ब्रह्मपुत्रोत्पत्तिः । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । ब्रह्मपुत्रोत्पत्तिनिरूपणमुखेन तत्र स्नानदानादिमाहात्म्यनिरूपणम् ।

No. 253. ब्रह्मसंस्कारमञ्जरी. BY नारायणशर्म्मा. Substance, countr made paper, 16×2 inches. Folia, 66. Lines, 3 on a page. Extent, 9 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpā *viâ* Naihāti, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Prose ar verse. Correct.

Beginning. ॐ नमः परमदेवाय ।

नमामि विघ्नेशगुरुं गिरीशं
वागीश्वराराधितपादपद्मम् ।
यः स्मर्य्यमाणोऽपि हरत्यघोघं
निजं पदं यच्छति चाविचारम् ॥
स्मरामि शम्भोश्चरणारविन्दं
स्वयम्भु-दम्भोलिधरानिसेव्यम् ।
यद्दर्शनाय स्वयमादरेण
नेत्रारविन्दं हरिरप्यजहार ॥
मुरारिभाष्यौबटभाष्यसार-
मशेषतः शातपथश्रुतीश्च ।
विलोक्य पारस्करसूत्रभाष्या-
ण्यशेषदेशात् परिसञ्चितानि ॥

तन्यते तर्कचार्य्येण श्रीनारायणशर्म्मणा ।
प्रीतये धर्म्मभीरूणां ब्रह्मसंस्कारमञ्जरी ॥
तत्रादावाद्यसंस्कारस्य प्रायशोऽग्निसाध्यत्वात् कुशण्डिकोच्यते । इत्यादि ।

End. तत ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि इति पाठयेत् । ततो धियो यो नः प्रचोदयात् इति पाठयेत् । तत ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति ब्रह्मचारिणा सहैवाचार्य्यः पठेत् । तत ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् इति त्रिः पाठयेत् । ब्रह्मचारी तु ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति प्रकारेण सदैव जपेत् ॥

विषयः । कुशण्डिकानिरूपणम् । संस्कारकर्म्मादिषु अग्नेर्नामनिरूपणम् । वाग्दानादिप्रयोगविधिः । विवाहोपनयनादिसंस्कारकर्म्मनिचयप्रयोगविध्यादिनिरूपणञ्चेति ।

No. 254. भक्तिजयार्णवः. By रघुनन्दनवन्द्योपाध्यायः. Substance, country-made paper, 17 × 3 inches. Folia, 14. Lines, 6 on a page. Extent, 320 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha, Vâdari, Paṇḍita Çivacandra Nyâyabhûṣaṇa. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमः श्रीकृष्णाय ।

प्रणम्यादौ जगन्नाथं सर्व्वव्यापिजनार्द्दनम् ।
भक्तिजयार्णवं वच्मि वन्द्यः श्रीरघुनन्दनः ॥
विरञ्चिरुवाच ।
विष्णुं शिवं तथा गौरीं गणेशञ्च दिवाकरम् ।
योगिन्यादिषु मन्त्रेषु सिद्धमन्त्रादिकेषु च ॥
किं मन्त्राल्लभते मोक्षं किन्नैवाराधने यशः ।
यः कामक्रोधलोभैस्तु विषयैः परिपीड़ितः ॥
बद्धः स्वकर्म्मभि र्येगि र्भृत्यदारैः समन्ततः ।
स केन निस्तरत्याशु दुस्तरं भवसागरम् ॥ इत्यादि ।

End. गङ्गा पापं शशी तापं दैन्यं कल्पतरुर्हरेत् ।
पापं तापं तथा दैन्यं सद्यः साधुसमागमे ॥

रसामृतसिन्धौ ।

भक्तिरसामृतसिन्धौ चरतः परिभूतकालजालभियः ।

भक्तमकराननेतानगणितसुक्तिनदीकान् नमस्यामः ॥

वाञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च ।

पतितानां पावनेभ्यो वैष्णवेभ्यो नमो नमः ॥

Colophon. इति श्रीविरक्तामृतसंवादे भक्तिजयार्णवः समाप्तः ॥ * ॥ समाप्तश्चायं ग्रन्थः ।

विषयः । कृष्णमन्त्रजपपूजादिफलनिरूपणम् । वैष्णवमाहात्म्यनिरूपणमुखेन तद्दानादिफलाधिक्यनिरूपणम् । गौराङ्गजन्मादिनिरूपणञ्चेति ।

No. 255. भक्तिप्रकाशः. By श्रीरघुनन्दनः. Substance, country-made paper, 19 × 3½ inches. Folia, 85. Lines, 7 on a page. Extent, 2,900 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Candrakānta Vidyāratna. Appearance, tolerable. Verse. Incorrect.

Beginning. ॐ श्रीरामः ।

शिवं प्रणम्य सशिवं शिवदं शिवकीर्त्तनम् ।

भक्तिप्रकाशं तनुते वैद्यः श्रीरघुनन्दनः ॥

नानापुराणवचनं शिवविष्णुदुर्गा-

भेदैरितं बहुविधं बहुधा प्रयत्नात् ।

आकृष्य संग्रहमिमं सुजनप्रमोदं

भक्तिप्रकाशमधुना रघुरातनोति ॥

निबद्धो वैद्येनेत्ययं मम विदुषा दैय इह न

द्विजानामारम्भो यदि तदपि सन्तोषयति मां ।

यतस्तद्दासेन स्वमतिपरिणामावधि कृतः

प्रकृत्या भक्त्यानुग्रहसुमनसां वेदविदुषां ॥ इत्यादि ।

End. यदुक्तं काशीखण्डे ।

अनासेव्य महेशानं सर्व्वदं सर्व्वदेहिनाम् ।

कोऽपि क्वापि किमप्यत्र न लभेत विनिश्चितम् ॥

मत्स्यादिपुराणे ।

अनाश्रित्य महेशानीं यभितीर्थु भवाम्बुधिम् ।

सोऽन्वेषी मरणप्राङ्गस्य यथा वा क्षितिनिष्फलः ॥

देवीपुराणे ।

अर्चयन्तीह ये भक्ताः श्रद्धया चान्यदेवताः ।

तेऽपि दुर्गामर्चयन्ति तद्रूपेण फलप्रदा ॥

कौर्म्मे शिववाक्यम् ।

ये चान्यदेवताभक्ताः पूजयन्तीह देवताः ।

मद्भावनायुताश्चापि मुच्यन्ते तेऽपि भावतः ॥

अतएव सर्व्वदेवताभजनेनैव ईश्वरभजनं अन्यथाचरणन्तु विषयस्यैव इति ।

शुभमस्तु ।

Colophon. इति भक्तिप्रकाशे विचारनिर्णयो नामाष्टमोद्योतः । समाप्तोऽयं भक्तिप्रकाशः । श्रीकृष्णाय नमः । श्रीरामचन्द्राय नमः ॥ * ॥

विषयः । शूद्राणां पुराणादिपठनश्रवणाद्यधिकारनिरूपणम् । आश्रमाचारनिरूपणम् । शिवविष्णुदुर्गालक्ष्म्यादिदेवदेवीनामभेदप्रकटनम् । साधननिरूपणम् । भक्तिमाहात्म्यकथनम् । शिवविष्णुनाममहिमकथनमुखेन पूजादिनिरूपणञ्चेति ।

No. 256. **भक्तिरसार्णवः.** By **कृष्णदासः.** Substance, palm-leaves, 12×2 inches. Folia, 110. Lines, 5 on a page. Extent, 1,719 çlokas. Character, Bengali. Date, ? Place of deposit, District Vãkuḍā, Viṣṇupura Kādākuli, Paṇḍita Raghurāma Tarkaratna. Appearance, old. Verse. Incorrect.

Beginning. ॐ विष्णवे नमः ॥ विष्णुधर्म्मे ।

श्रूयतां हि नरव्याघ्र वेदवेदान्तनिश्चयः ।

यज्ञेषु यज्ञपुरुषः पुण्डरीकाक्षसंज्ञितः ॥

स विष्णुः परमं ब्रह्म यतो नावर्त्तते पुनः ।

कर्णपर्व्वणि । नारदं प्रति रुद्रः ।

देवानामसुराणाञ्च यक्षगन्धर्व्वरक्षसाम् ।

ईश्वरोऽहं ममेशानः साक्षान्नारायणः परः ॥

इतिहाससमुच्चये ।

नारायणाज्जगत्सर्व्वं सृष्टिकाले प्रजायते ।
परादपि परश्चासौ तस्मान्नास्ति परात्परः ॥
एतज्ज्ञानं परं तात योगश्चैव परस्तथा ।
परस्परविरुद्धार्थैः किमन्यैः शास्त्रविस्तरैः ॥

मोक्षधर्म्मे ।

तत्त्वं जिज्ञासमानानां हेतुर्हि सर्व्वतोमुखः ।
तत्त्वमेके महायोगं हरिर्नारायणः परः ॥

श्रीहरिवंशे ।

विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते ।
वेदसिद्धान्तमार्गेषु तन्न जानन्ति मोहिताः ॥ इत्यादि ।

End.

सुरासुरो वाप्यथ वानरो नरः
सर्व्वात्मना यः सुकृतज्ञमीश्वरम् ।
भजेत रामं मनुजाकृतिं हरिं
य उत्तरानमयत् कोशलानिव ॥
शम्भ्वादयोऽपि देवानामृषीणां नारदादयः ।
मनुष्याणां तथा राजन् प्रसिद्धा जनकादयः ॥
प्रह्लादप्रमुखा ज्ञेया राक्षसानां गणे स्थिताः ।
शाखामृगेषु यो वायुपुत्रो भल्लेषु जाम्बवान् ॥
कुञ्जराणां गजेन्द्रोऽपि पक्षिणां गरुडादयः ।
स्त्रीणां कुन्ती तथा विप्रपत्न्यः श्रीद्रुपदात्मजाः ॥
देवहूतिः कपिलसूः सुनीतिः शवरी वरा ।
सूतो विलोमजातानामन्त्यजे शवरादयः ॥
चाण्डालोऽपि द्विजश्रेष्ठो जातो वैलोमजः पुरा ।
यल्लोमलोमशो मुनिश्चाण्डालान्नैव मंस्यति ॥
श्रपेतं शाल्मणान्नेन दुर्व्वासो वर्णनिष्ठता ॥ * ॥
श्रीमद्भक्तिरसार्णवे विरचिते श्रीकृष्णदासेन वै
नानाशास्त्रविचारदुःखजलधौ मज्जन्ति ये वा जनाः ।
तेषामुद्धरणाक्षमे सुकृतिनां सौख्यास्पदे नित्यशो
×तं भक्त्यधिकारिणा विरचितं श्रीमत्प्रभोराज्ञया ॥ * ॥

Colophon. इति भक्तिरसार्णवे भक्त्यधिकारनिरूपणं प्रथमं विवेचनम्। समाप्तोऽयं ग्रन्थः ॥*॥

विषयः। नानापुराणोक्तवचनादिभिर्विष्णुभक्तिप्रशंसादिकथनम्। शालग्रामचक्रादिनिरूपणम्। शालग्रामचक्रपूजादिफलकथनम्। तिलकधारणविध्यादिकथनम्। एकादश्युपवासफलादिकथनम्। विष्णुनाममाहात्म्यादिनिरूपणम्। भगवत्सम्बन्धिनां देशादीनां वैभवादिनिरूपणम्। श्रीपादतीर्थवैभवादिनिरूपणम्। भक्त्यधिकारादिनिरूपणञ्चेति।

No. 257. भगवद्गीतारहस्यप्रकाशः. By जगदीशपञ्चाननः. Substance, country-made paper, 14 × 3¼ inches. Folia, 75. Lines, 7 on a page. Extent, 2,198 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Parganā Sonārgã, Post Office Vaidyervāzār, Kṛṣṇapurā, Paṇḍita Kālikumāra Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय।

संसारपङ्कपर्य्यङ्के शयानं जगदुद्धरन्।
देवकीनन्दनः पायादपायात् पूतनार्द्दनः॥
श्रीमता जगदीशेन चरणाब्जं मुरद्विषः।
आधाय हृदये गीतारहस्यार्थः प्रकाश्यते॥

इह पुनरज्ञानपरम्पराहतमर्ज्जुनं प्रबोधयन्नखिलवासनाविवशविश्वहितैषी कंसद्वेषी भगवानखिलवर्णाश्रमधर्म्मिणां मोक्षस्य चोपायं गीताशास्त्रेण व्यक्तीचकार। व्यासमहर्षिस्तु तदेवाष्टादशभिरध्यायैः सप्तभिः श्लोकशतैराचचक्षे इति। अत्र धृतराष्ट्रप्रश्नज्ञानार्थमाह धृतराष्ट्र उवाचेति। कः प्रश्नः तमाह धर्म्मक्षेत्र इति। एषामादिपुरुषः कुरुनामा नृपः तस्य क्षेत्रे। ननु कृषिं विना कथं क्षेत्रमित्यत आह धर्म्मक्षेत्र इति। धर्म्मरूपकृषिक्षेत्र इत्यर्थः। कुरूणां धर्म्मोत्पत्तौ क्षेत्रं सम्पादितमिति भावः। मामका मदीयाः। युयुत्सवः युद्धेच्छावन्तः। समवेता मिलिताः। अकुर्व्वत कृतवन्तः। हे सञ्जय॥१॥ प्रश्नोत्तरमाह दृष्ट्वा त्विति। अनीकं सैन्यम्। व्यूढं चक्रव्युहविधानादिना दुर्गीकृतम्। आचार्य्यं द्रोणं अब्रवीत् उक्तवान्। उपसंगम्य समीपं गत्वा। राजा दुर्य्योधनः॥२॥ किमुक्तमित्याह। नवभिः पद्यैः। चमूं सेनां महतीं विस्तृतां व्यूढां चक्रव्युहविधानादिना दुर्गीकृतां। द्रुपदपुत्रेण धृष्टद्युम्नेन। तव शिष्येण अर्ज्जुनेन सहार्थे करणे वा तृतीया। धीमादित्याहस्त्यर्थमाह धीमतेति प्रशंसार्थे मतुप्॥४॥ इत्यादि।

End. मोहाभावज्ञापनार्थमर्ज्जुन उवाच नष्ट इति । मोहो देहादिष्वात्मभ्रमः । स्मृतिर्निदिध्यासनरूपा स्थितः स्थिरोऽस्मि युद्धादौ चित्तास्थैर्य्यं गतमिति भावः । गतसन्देहः गतो भीष्मादिबधप्रयुक्तोऽधर्म्मसन्देहो यस्य । तव त्विनेषिणः ॥ ७३ ॥ धृतराष्ट्रं प्रति सञ्जय उवाच । महात्मन इत्युभयत्रा-न्वितम् । इमं कश्चिदज्ञानमोहः प्रनष्टस्ते धनञ्जय इत्यन्तम् । अश्रौषं श्रुतवान् । रोमहर्षणं लोमाञ्चकरम् ॥ ७४ ॥ चक्षुः श्रोत्रञ्च मह्यं दत्तं व्यासप्रसादात् व्यासप्रसादं प्राप्य इदं कृष्णार्ज्जुनसंवादं कृष्णोक्तत्वात् । परं प्रकृष्टं कृष्णाच्छ्रुतवान् कीदृशात् योगं कथयतः । उत्कृष्टा एतेन पक्षपाता-शङ्का दूरीकृता । ... ... ७७ ॥ एतत् धृतराष्ट्रस्य राज्यादिस्थैर्य्यशङ्का चेतश्चिरा-करणार्थमाह यत्रेति यत्र पक्षे कृष्णो वर्त्तते पार्थोऽर्ज्जुनः धनुर्गाण्डीवं तत्रैव पक्षे श्रीः शोभा विजयो दुर्ज्जयः । भवता पुत्रादिविजिगीषुणा नो चेत् सर्व्वं नंक्ष्यतीत्यालोच्य यथोचितमाचरणीयमिति व्याख्यायितमिति ॥ ७८ ॥

Colophon. श्रीमता जगदीशेन निर्म्मितः प्रीतये सताम् ।
रहस्यार्थप्रकाशोऽयं गीताशास्त्रे समासतः ॥
इति श्रीगीतारहस्यप्रकाशे श्रीजगदीशपञ्चाननभट्टाचार्य्यकृतेऽष्टादशोऽध्यायः ॥

विषयः । श्रीमद्भगवद्गीताया व्याख्यानम् ॥

No. 258. भागवतदशमस्कन्धकतिपयश्लोकविचारः. By चतुर्भुजभट्टाचार्य्यः. Substance, country-made paper, $17 \times 2\frac{1}{2}$ inches. Folia, 43. Lines, 7 on a page. Extent, 1,354 çlokas. Character, Bengali. Date, Sk. 1757. Place of deposit, District Bãkuḍã, Visṇupura, Paṇdita Raghurãma Tarka-ratna. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीश्री रामः ।
ईश्वरं परमं कृष्णं सच्चिदानन्दविग्रहम् ।
अनादिमादिगोविन्दं सर्व्वकारणकारणम् ॥
सीतानाथं घनश्यामं भक्ताभीष्टप्रदं हरिम् ।
वन्दे नृसिंहरूपं तं स्वेच्छयावतरिं प्रभुम् ॥
कृष्णद्वैपायनप्रोक्ता यास्ते सात्वतसंहिता ।
कियद्विचारं तस्यास्तु प्रवक्ष्यामि चतुर्भुजः ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

वाचालं बहुभाषिणं करोतीत्यर्थः । आलाटौ कुत्सिते बहुभाषिणि इति सूत्रे बहुशब्दस्यापाठत्वात् प्राप्तः प्रागभावो व्यभिचारत्वान्न भूतः । वस्तुत औचित्यात् बहुभाषिणि आलः अतएव वाचालो बलवान् दिने दिनपते-रित्यादि दृश्यते । इत्यादि ।

End. तृतीयस्कन्धे अभेदोपासनायां पुनरुत्पत्तिरिति सिद्धान्तः । भगवान् स्वयमि-त्युक्तं तर्हि कलावतीर्णाविति सम्बोधनं नरनारायणाद्दृषीतीश्वरवाक्यञ्च कथं सङ्गतम् । स्वयं त्वसाम्यातिशयस्त्र्यधीशः कृष्णमित्युक्तं तस्मिन्नसाम्यातिशये कृष्णे कथमस्य रमे तमन्तिमे इत्यादेशः सम्भवेत् । उ । अहं युवयोरर्ज्जुन-स्याहङ्कारशमनार्थं मायाविना कृष्णेनैतत् सर्व्वं दर्शितं रूपान्तरेणोक्तमेति ॥०

Colophon. इति श्रीभवानीचरणविद्यालङ्कारभट्टाचार्य्यात्मज-श्रीचतुर्भुजभट्टाचार्य्यकृत दशमस्कन्धकतिपयश्लोकविचारः समाप्तः ॥ ० ॥ श्रीरामो जयति ॥
शकाब्दाः १७५७ ।

विषयः । भागवतदशमस्कन्धीयकतिपयश्लोकानां व्याख्यानं तात्पर्य्यनिर्णयश्च ॥

No. 259. भागवतव्याख्यालेशः. By गोपालचक्रवर्त्ती. Substance, country-made paper, 16×3 inches. Folia, 99. Lines, 7 on a page. Extent, 3,032 çlokas. Character, Bengali. Date, ? Place of deposit, Visṇupura, Mādhavagañja, District Vā̃kuḍā, Vaikunṭhanātha Bhaṭṭācāryya. Appearance, fresh. Prose. Correct.

Beginning. ॐ बालगोपालाय नमः ।
सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
यं ब्रह्म वेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनायकाय ॥

एतत् पद्यं टीकाकृतव्याख्यातत्वात् गायत्र्या च समारम्भ इत्यादि पुराण-वचनविरुद्धत्वाच्च श्रीभागवतस्य न । किन्तु गौड़ीयपुस्तकस्यादौ सर्व्वत्र विद्यते

इति व्याख्यायते । तस्मै विघ्नविनायकाय नम इत्युत्तानमेव । किञ्च विदन्ति स्वरूपानन्दैश्वर्य्यादिमिति विघ्नः संसारः तं विनयति खण्डयतीति विघ्नविनायकः श्रीहरिस्तस्मै इति वास्तवोऽर्थः तमेव नानावादिमतेन समुच्चिनोति यमिति वेदान्तविदो यं ब्रह्मेति वदन्ति ब्रह्मैव सदित्यादि श्रुतेः । इत्यादि ।

End. यदुक्तं नारदं प्रति ब्रह्मणा द्वितीये ।
यथा हरौ भगवति नृणां भक्तिर्भविष्यति ।
सर्व्वात्मन्यखिलाधार इति सङ्कल्पवर्णनेति ॥
प्रथमस्कन्धे च धर्म्मः प्रोज्झितकैतव इत्यस्य व्याख्याने प्रशब्देन मोक्षाभिसन्धिरपि निरस्ता इति स्वामिपादैरुक्तं तथापि यदत्र कैवल्य एकप्रयोजनमित्युच्यते तन्निरन्तरं भगवति निष्कामतया भक्तिं कुर्व्वतां अनिच्छतामपि मुक्तिरनायासेन भवति । यदुक्तं तृतीयस्कन्धे देवहूतिं प्रति कपिलेन ।
हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमन्वीं प्रयुङ्क्ते ।
इति मुक्तेः पर्य्यवसानत्वादेवमुक्तं भक्तिरसिकानां पुनस्तदंशे प्रयत्नाभाव एव तथापि भक्तेर्मोक्षाद्युत्तममिति विचित्रमिति सर्व्वोत्कृष्टतया भक्तिरेवात्र प्राचुर्य्येण वर्ण्यते इति । अतस्तृतीये तत्रैवोक्तम् ।
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ।
जरयत्याशु या कोषं निगीर्णमनलो यथा ॥ इति ॥ ०॥
जयति श्रीपरमानन्दो गोविन्दो भक्तवत्सलः ।
यत्सेवोत्सुकमात्रेण स्फुरन्ति सकला गुणाः ॥

Colophon. इति श्रीगयघटवन्द्य श्रीगोपालचक्रवर्त्तिविरचितो द्वादशस्कन्धव्याख्यालेशः समाप्तः ॥ * ॥

विषयः । श्रीमद्भागवतस्य संक्षेपेण व्याख्यानम् ।

No. 260. भारतसावित्री. By व्यासदेवः. Substance, country-made paper, 18 × 2 inches. Folia, 6. Lines, 3 on a page. Extent, 72 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Usthi, Paṇḍita Navakiçora Tarkācāryya. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणेशाय । अथ भारतसावित्री । धृतराष्ट्र उवाच ।
ब्रूहि सञ्जय यद्वृत्तं युद्धे तेषां महात्मनाम् ।
कुरूणां पाण्डवानाञ्च सम्प्रहृत्ते महाहवे ॥ इत्यादि ।

End. प्राणिनां पापशुद्ध्यर्थं प्रणम्य च विभूतये ।
गदितं व्यासदेवेन प्राणिनां पापशुद्धये ॥

Colophon. इति व्यासदेवेन भाषिता भारतसाविची समाप्ता ॥

विषयः । संक्षेपेण कुरुपाण्डवयुद्धवर्णनात्मकोऽयं ग्रन्थः ।

No. 261. भारविटीका (सुजनतोषकरी). By रामचन्द्रः. Substance, country-made paper, $22 \times 2\frac{1}{2}$ inches. Folia, 16. Lines, 4 on a page. Extent, 424 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Haraprasāda Çāstrī. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।
आनम्य सौम्यपदपद्मममन्दभक्त्या ।
श्रीमद्गुरोर्निशिततीर्थविचारबुद्धेः ।
श्रीरामचन्द्र इति नाम दधद्द्विजोऽहं
टीकामिमां सुजनतोषकरीं करोमि ॥
सन्तः सन्तोषवन्तो ननु वचसि परे शास्त्रसिद्धे प्रसिद्धे
यत्नादस्मात् कृतायामिह भवतु भवत्सूक्तिपीयूषवृष्टिः ।
मूढाहङ्कारमूढाः सरसविरसा कारणान्धाश्च जाता
आनन्दो मे विना वः कथमिह विषये सम्भविष्यन्ति भव्याः ॥
इयं शिष्यसमूहस्य हिताय विहिता मया ।
× × × × × × × × × × × ॥
श्रियः ॥ कुरवो जनपदाः ॥ इत्यादि ।

दिनादौ दिनारम्भे इत्यनेन लक्ष्म्याः स्थिरकालावस्थानं सूचितम् । दिनकृतं सूर्य्यमिव त्वां लक्ष्मीः सम्पत् शोभा च भूयः पुनरपि समभ्येतु । आशिषि लोट् । अत्र प्रतिसर्गान्ते लक्ष्मीशब्दोऽभ्युदयसूचकः कविना प्रयुक्तः । स च न दोषाय । यदाह दण्डी । कविभावकृतं यत्तु इत्यादि ॥ ० ॥ किरातश्चार्ज्जुनश्च किरातार्ज्जुनौ अभ्यर्हितत्वात् किरातस्य पुर्व्वनिपातः तमधिकृत्य कृतं काव्यं किरातार्ज्जुनीयम् । तदधिकृत्य कृतो ग्रन्थ इतीयः । काव्यमिति कथ वर्णने कथ्यतेऽनेनेति बाहुल्यात् करणे ण्यत् । यद्वा कवेः कर्म्म काव्यं ब्राह्मादित्वात् ष्यञ् । महच्च तत् काव्यञ्चेति महाकाव्यम् । तत्र प्रथमः सर्गः आद्योऽध्यायः विश्रान्तिस्थानमिति ॥ * ॥

Colophon. इति श्रीशिवसिंहात्मजगदसिंहकृतायां किरातार्ज्जुनीयटीकायां प्रथमः सर्गः ।
अतःपरं खण्डितम् ॥

विषयः । भारविकृतस्य किरातार्ज्जुनीयकाव्यस्य व्याख्यानम् । अत्र च प्रथमसर्गमात्रं वर्त्तते ।

No. 262. भास्वतीवृत्तिः. By कुवेरः. Substance, country-made paper, 15 × $2\frac{1}{2}$ inches. Folia, 8. Lines, 7 on a page. Extent, 217 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Kāṭihāli, Paṇḍita Parāṇacandra Tarkālaṅkāra. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य भानुं परमात्मनाद्यं
श्रीकाञ्चिविल्वीय-कुवेरशर्म्मा ।
निर्म्माति भास्वत्यभिधानशास्त्रे
व्याख्यां सुबोधामबुधोपकर्त्रीम् ॥
उक्तस्य च विसम्वादात् त्यक्ता तत् कर्म्मसम्भवम् ।
न्यायागतं स्वयं न्याय्यं क्रियते दृष्टिसम्मता ॥ इत्यादि ।

End. अश्विन्यादौ भचक्रे विष्कम्भादौ योगगणने चैकान्तरेण स्वचयोगावागच्छतः । (?) तदा परदिनगणनायामर्कोनचन्द्रात्युक्तस्यत्रमेवं रवीन्दोर्युक्तिस्य योगाः । इति कर्म्मत्रये कृते श्रः श्रीरामचन्द्राय नमः ॥

विषयः । शतानन्दकृतभास्वतीनामकज्योतिषग्रन्थस्य व्याख्यानम् ।

No. 263. सिद्धान्ततत्त्वम्. By श्रीकण्ठतीर्थः. Substance, country-made paper, 18 × $4\frac{1}{2}$ inches. Folia, 82. Lines, 6 on a page. Extent, 2,029 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Haraprasāda Çāstrī. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
स्वेच्छासृष्टिविधायिनीं परचितां स्वानन्दरूपां ध्रुवां
वन्दे तां परदेवतां प्रतिजनुःसंसेवितां सर्व्वदा ।

यज्ज्ञानोद्भवजन्मकर्म्मनिधनं यत्प्रोतमेतत् जगत्
या सर्व्वान्तरवस्थिता न विदिता सच्छास्त्रलच्या परम् ॥
वन्दे वेदान्तमुख्यश्रुतकृतिमचित श्रीगुरून् शान्तरूपान्
नाम्नार्थेनापि सत्यान्नयत इव सदा श्रीमहादेवतीर्थान् । (?)
ब्रह्मैक्याद्धसमस्तूनधिगतमननान् मुक्तिभूते प्रभूषान्
नानाविद्यादिदानाधिकतरगुरुतान् नष्टदुर्दण्डकामान् ॥
पूर्व्वाचार्य्यमतं वीक्ष्य तथैव गौरवं मतम् ।
भिक्षुतत्त्वं मृदुप्राज्ञं वक्ति श्रीकण्ठभिक्षुकः ॥ इत्यादि ।

End. यतिपुत्रस्य पितुर्मरणे सन्निकृष्टश्चेत् वपनपूर्व्वकं स्नात्वा पूर्व्ववत् सर्व्वं कुर्य्यात् असन्निकृष्टश्चेत् सिद्धिवार्त्तां श्रुत्वा वपनानन्दादिपूर्व्वकं शुक्लद्वादश्यां नारायणबलिं दद्यात् ॥
ब्रह्मात्मैक्यविधायिनी भुवनतुर्वेदप्रवेशोज्ज्वला
यांशुस्वांशुप्रकाशिताखिलजगद्घोरान्धकारापि या ।
मायासुस्थमहेशमाधवविधिर्न्यस्ताङ्घ्रिमस्तका
श्रीविद्याखिलमोक्षमर्द्दनपरा वर्व्वर्त्ति सर्व्वोपरि ॥ * ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्य—श्रीमहादेवतीर्थचरणारविन्दमकरन्द-पानानन्दान्तःकरण-श्रीकण्ठतीर्थकृतं भिक्षुतत्त्वं सम्पूर्णम् ।

विषयः। सन्न्यासस्याधिकारित्वानधिकारित्वादिनिरूपणम् । सन्न्यासाधिकारिणः पूर्व्वाच-कृत्यादिनिरूपणम् । साग्निकनिरग्निकभेदेन सन्न्यासविधिः । सन्न्यासिनां कर्त्तव्याकर्त्तव्यत्याज्यात्या-ज्यादिनिरूपणञ्च ।

No. 264. **मत्स्यपुराणम्.** Substance, country-made paper, 13 × 6 inches. Folia, 440. Lines, 10 on a page. Extent, 14,300 çlokas. Character, Bengali. Date, ? Place of deposit, Tamluk, Kelomāl, Bābu Amaranātha Guha. Appearance, tolerable. Verse. Incorrect.

Beginning. ॐ नमो गणेशाय ।
प्रचण्डताण्डवाटोपप्रक्षिप्तोत्क्षिप्तदिग्गजाः ।
भवन्तु विघ्नभङ्गाय भवस्य भवतां भुजाः ॥

पातालाद्रुत्पतिष्णोर्मकरवसतयो यस्य पुच्छाभिघाता-
दूर्द्ध्वं ब्रह्माण्डखण्डव्यतिकरविहितव्यत्ययेनापतन्ति ।
विष्णोर्मत्स्यावतारे सकलवसुमतीमण्डलं व्यश्नुवान-
स्तस्यास्योदीरितानां ध्वनिरपहरतादश्रियं वः श्रुतीनाम् ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
अजोऽपि यः क्रियायोगान्नारायण इति स्मृतः ।
त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयम्भुवे ॥
सूतमेकाग्रमासीनं नैमिषारण्यवासिनः ।
मुनयो दीर्घसत्रान्ते पप्रच्छुर्दीर्घसंहिताम् ॥ इत्यादि ।

End. कल्पानुकीर्त्तनन्तद्वद्ग्रन्थानुक्रमणन्तथा ।
एतत् पवित्रं मात्स्यीयमेतत् कीर्त्तिविवर्द्धनम् ।
एतद्धि सर्व्वमाङ्गल्यमेतत् पापहरं शुभम् ॥
अस्मात् पुराणादपि पादमेकं
पठेत्तु यः + + + + ।
नारायणस्यास्पदमेति नूनं
मनन्तवान्श्वयसुखानि भुंक्ते ॥ * ॥

Colophon. इति मत्स्यपुराणं समाप्तम् ॥

विषयः । प्रथमाध्याये मत्स्यरूपस्य कारणादिनिरूपणम् । २ ये ब्रह्माण्डदलननिरूपणम् । ३ ये चतुर्मुखोत्पत्तिनिरूपणम् । ४ र्थे दक्षाद्युत्पत्तिनिरूपणम् । ५ मे देवादिसृष्टिनिरूपणम् । ६ ष्ठे कश्यपान्वयनिरूपणम् । ७ मे मदनद्वादशीनिरूपणम् । ८ मे सर्व्वाधिपत्यादिनिरूपणम् । ९ मे मन्वन्तरादिनिरूपणम् । १० मे वैण्याभिषवादिनिरूपणम् । ११ शे बुधसङ्गमादिनिरूपणम् । १२ शे सूर्य्यवंशानुकीर्त्तनम् । १३ शे गौरीनामाष्टशतकम् । १४ । १५ शयोः पितृवंशानुकीर्त्तनम् । १६ शे श्राद्धकालनिरूपणम् । १७ शे साधारणाभ्युदयनिरूपणम् । १८ शे सपिण्डीकरणकालादिनिरूपणम् । १९ शे श्राद्धानुगमकालनिरूपणम् । २० शे श्राद्धमाहात्म्यम् । २१ शे पितृमाहात्म्यम् । २२ शे श्राद्धकालः । २३ शे सोमोपचारः । २४ शे सोमवंशानुकीर्त्तनम् । २५—४१ शेषु ययातिरुपाख्यानम् । ४२ । ४३ शयोः यदुवंशनिरूपणम् । ४४ शे कम्बरशापः । ४५ शे सोमवंशपुरुवंशकीर्त्तनम् । ४६ शे अग्निवंशकीर्त्तनम् । ४७ शे योगमाहात्म्यम् । ४८ शे पुराणानुक्रमः । ४९ शे नक्षत्रपुरुषव्रतम् । ५० शे आदित्यशयनव्रतम् । ५१ शे रोहिणीचन्द्रव्रतं, तड़ागविधिश्च ।

५२ शे वृक्षोत्सवः । ५३ शे सौभाग्यशयनव्रतम् । ५४ शे अगस्त्योत्पत्तिपूजादिनिरूपणम् । ५५ शे अनन्तव्रततृतीयाव्रतादिनिरूपणम् । ५६ शे रसकल्याणीव्रतम् । ५७ शे आर्द्रानन्दकरीतृतीया-निरूपणम् । ५८ शे चन्द्रादित्योपरागकल्पः । ५९ तमे सप्तमीस्नानम् । ६० तमे भविष्यभीमद्वादशी । ६१ तमे अनङ्गव्रतम् । ६२ तमे अशून्यशयनव्रतम् । ६३ तमे अङ्गारव्रतम् । ६४ तमे कल्याणसप्तमी-व्रतम् । ६५ तमे शर्करासप्तमीव्रतम् । ६६ तमे कमलसप्तमीव्रतम् । ६७ तमे मन्दारसप्तमीव्रतम् । ६८ तमे शुभसप्तमीव्रतम् । ६९ तमे विशोकद्वादशीव्रतम् । ७० तमे पर्व्वतप्रदानादिनिरूपणम् । ७१ तमे वैशम्पायनीयशान्तिविधानम् । ७२ तमे ग्रहस्वरूपाख्यानम् । ७३ तमे शिवचतुर्दशीव्रतम् । ७४ तमे सर्व्वफलमाहात्म्यम् । ७५ तमे संक्रान्त्युद्यापनविधिः । ७६ तमे विभूतिद्वादशीव्रतम् । ७७ । ७८ तमयोः षष्ठीव्रतमाहात्म्यम् । ७९—८६ तमेषु प्रयागमाहात्म्यम् । ८७ तमे भुवनकोष-निरूपणम् । ८८ तमे ऐरावतीवर्णनम् । ८९ तमे हिमवद्वर्णनम् । ९०—९२ तमेषु आश्रम-वर्णनम् । ९३ तमे जम्बुद्वीपवर्णनम् । ९४—९६ तमेषु सप्तद्वीपवर्णनम् । ९७ तमे ध्रुवप्रशंसा । ९८ तमे देवग्रहवर्णनम् । ९९ । १०० तमयोः त्रिपुरोपाख्यानम् । १०१ तमे दुःस्वप्नदर्शनम् । १०२ तमे ईश्वरस्तवः । १०३ तमे रथप्रयाणनिरूपणम् । १०४ तमे त्रिपुरदाहः । १०५—११० तमेषु अपहारादिनिरूपणम् । १११ तमे श्राद्धपरिकीर्त्तनम् । ११२ तमे मन्वन्तरकीर्त्तनम् । ११३—११५ तमेषु देवासुरसंग्रामादिनिरूपणम् । ११६ तमे तारकजयालम्भादिनिरूपणम् । ११७ तमे कुमारसम्भवः । ११८—१२० तमेषु देव्यास्तपोवनगमनादिनिरूपणम् । १२१ तमे देवासुरसंग्रामः । १२२ तमे तारक-बधः । १२३—१२५ तमेषु नरसिंहप्रादुर्भावः । १२६—१३१ तमेषु पद्मोद्भवः । १३२—१३८ तमेषु तारकामययुद्धादिनिरूपणम् । १३९ तमे अन्धकबधादिनिरूपणम् । १४० तमे वाराणसी-माहात्म्यादिनिरूपणम् । १४१—१४४ तमेषु अविमुक्तेश्वरमाहात्म्यादिनिरूपणम् । १४५—१४८ तमेषु अमरेश्वरमाहात्म्यम् । १४९ तमे नर्म्मदामाहात्म्यादिनिरूपणम् । १५० तमे शूलतीर्थवर्णनम् । १५१ । १५२ तमयोः नर्म्मदामाहात्म्यादिनिरूपणम् । १५३ । १५४ तमयोः प्रवरानुकीर्त्तनम् । १५५ तमे ऋषिवंशकीर्त्तनम् । १५६ तमे वंशानुकीर्त्तनादिः । १५७ तमे पराशरवंशकथनम् । १५८ तमे अगस्त्यवंशकथनम् । १५९ तमे धर्म्मवंशानुकीर्त्तनम् । १६० तमे पितृगाथानुकीर्त्तनम् । १६१ तमे उभयमुखीदानम् । १६२ तमे कृष्णाजिनप्रदानम् । १६३ तमे वृषलक्षणम् । १६४—१६७ तमेषु सावित्र्युपाख्यानम् । १६८ तमे सहायसम्पत्तिनिरूपणम् । १६९—१७७ तमेषु राजधर्म्मादि-निरूपणम् । १७८—१८० तमेषु अद्भुतशान्तिः । १८१ । १८२ तमयोः वृक्षोत्पातादिनिरूपणम् । १८३ तमे स्त्रीप्रसवादिनिरूपणम् । १८४ । १८५ तमयोः मृगपक्षिविकृतादिनिरूपणम् । १८६ तमे यात्रानिमित्तादिनिरूपणम् । १८७ तमे स्वप्नाध्यायः । १८८ तमे मङ्गल्याध्यायः । १८९—१९१ तमेषु वामनप्रादुर्भावः । १९२ । १९३ तमयोः वराहप्रादुर्भावः । १९४ । १९५ तमयोः अमृतमन्थनम् । १९६ तमे वास्तुभूतोद्भवः । १९७ तमे एकाशीतिपदनिर्णयः । १९८ तमे वास्तुवेधनिर्णयः । १९९ तमे गृहनिवेशः । २०० तमे गृहप्रवेशः । २०१ तमे देवतानुकीर्त्तनम् । २०२ । २०३ तमयोः नृत्येश्वर-

कीर्त्तनम् । २०४—२०६ तमेषु प्रतिमालक्षणम् । २०७—२११ तमेषु अधिवासादिनिरूपणम् । २१२ तमे भाविराजनिरूपणम् । २१३ । २१४ तमयोः तुलापुरुषदानादिनिरूपणम् । २१५ तमे कल्यादिनिरूपणञ्चेति ।

No. 265. मथुरामाहात्म्यम्. By **रूपगोस्वामी.** Substance, country-made paper, 8 × 5 inches. Folia, 21. Lines, 11 on a page. Extent, 597 çlokas. Character, Bengali. Date, ? Place of deposit, Viṣṇupura, District Vãkuḍā, Paṇḍita Rāmānuja Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. मथुरामाहात्म्यम् ॥

हरिरपि भजमानेभ्यः प्रायो मुक्तिं ददाति न तु भक्तिं ।
विहिततदुन्नतसत्त्वां मथुरे धन्यां नमामि त्वाम् ॥
धन्यानां हृदयानन्दपदं संगृह्यते मुदा ।
माहात्म्यं मथुरापूर्य्याः सर्व्वतीर्थशिरोमणेः ॥
तथास्या पापहारित्वं आदिवाराहे ।
विंशतिर्योजनानान्तु माथुरं मम मण्डलम् ।
यत्र तत्र नरः स्नातो मुच्यते घोरकिल्बिषैः ॥
सर्व्वधर्म्मविहीनानां पुरुषाणां दुरात्मनाम् ।
नरकार्त्तिहरा देवी मथुरा पापघातिनी ॥ इत्यादि ।

End. मथुरामहातीर्थानि ।

विश्रान्तिरसिकुण्डञ्च वैकुण्ठो ध्रुव एव च ।
कृष्णगङ्गा चक्रतीर्थं सरस्वत्याश्च सङ्गमम् ॥
चतुःसमुद्रिकः कृष्णो गोकर्णाख्यः शिवस्तथा ।
गोवर्द्धनं नन्दग्रामं रासक्रीड़नकं तथा ॥
वनानि द्वादश तथा सदा तीर्थानि माथुरे ।
अथ माथुरभूखण्डे पूजितो हि देववरः ॥
नारायणान्यपर्य्यायः केशवो मध्यमस्थितः ।
स्वयम्भूः पद्मनाभश्च दीर्घविष्णिर्गतश्रमः ॥
गोविन्दे हरिवाराह इति माथुरदेवता ।
मथुरास्थानमाहात्म्यं श्रवणार्थां महाद्भुतम् ॥

× ×गोपालतापन्यामन्यदप्यस्ति कीर्त्तितम् ।
तीर्थान्युक्तानि भूरीणि पुराणेष्वत्र माथुरे ॥
ख्यातान्येवाधुना ते च लिखितानीह कानिचित् ॥ * ॥

Colophon. इति श्रीमद्रूपगोस्वामिविरचितं श्रीमन्मथुरामाहात्म्यं समाप्तम् ।

विषयः । मथुराया माहात्म्यनिरूपणम् । तत्र कर्त्तव्यकर्म्मादिनिरूपणञ्च ।

No. 266. मधुमती. By नृसिंहकविराजः. Substance, country-made paper, 16 × 2 inches. Folia, 169. Lines, 7 on a page. Extent, 5,586 çlokas. Character, Bengali. Date, ? Place of deposit, Ḍhākā, Bābu Bhagavāncandra Dāsa Kavirāja. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
ईशमनीशं कारणमकारणं व्यक्तमव्यक्तम् ।
आदिमनादिं शाश्वतमशाश्वतं गोपमच्युतं वन्दे ॥
आराधिता द्विजवरैः फलदा भवेद्या
संपूजितातिरसदा च सदालिभिर्या ।
निःशेषदुःखशमनाय शिवा सुवर्णा
सा सर्व्वदा मधुमती विबुधैरुपास्या ॥
यद्यपि सुमनोवृन्दे नन्दति वन्द्यो सदालिरामोदैः ।
तदपि कदाचित् सुमते मन्दं कुन्दं न किं भजते ॥
हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानञ्च तच्च यत्रोक्तमायुर्व्वेदः स उच्यते ॥
ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहत् ।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन् ॥
हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम् ।
त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः ॥
धर्म्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् ।
रोगास्तस्यापहर्त्तारः श्रेयसो जीवितस्य च ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चाज्ज्ञानपूर्व्वं समाचरेत् ॥

नवज्वरे दिवास्वप्नस्नानाभ्यङ्गान्नमैथुनम् ।
क्रोधप्रवातव्यायामकषायांश्च विवर्जयेत् ॥
ज्वरे लङ्घनमेवादावुपदिष्टमृते ज्वरात् ।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात् ॥
प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥ इत्यादि ।

End. अल्पाल्पगन्धचूर्णं दद्याच्च षड्गुणं भूयः ।
किन्तु ज्वालायां तीव्रायां ज्वलति गन्धके वह्निः ॥
तेन रससंचयः स्यात् तदनु क्षिप्रं रसाश्रयं भाण्डम् ।
दंशनेन गृहीत्वा निकटस्थगोमये न्यसेद्धात्रौ ॥
एवं रसं नियुञ्ज्यात् प्रतिज्ञा षड्गुणरससिन्दूरस्य ॥

Colophon. इति मधुमत्यां रसमूर्च्छाधिकारः । अत्रैव पतितमास्ते । इति मधुमती समाप्ता ।

विषय: । अत्र प्रथमं ज्वरादिरोगाणां चिकित्साविधिः । ततो विविधभैषज्ययोगादिविधानम् । तत्र ज्वराधिकारे नवज्वरव्यवस्था । आमज्वरे षडङ्गादिविधिः । कस्तूरीभूषणरसविधानम् । बृहत्कस्तूरीभैरवरसविधानञ्च । अथ वातज्वरपित्तज्वरादिषु मुष्टियोगकथनम् । घनचन्दनादिविधानम् । नवाङ्गविधानम् । गुडूच्यादिविधानम् । पञ्चकोलविधानम् । आरग्वधविधानम् । स्वल्पकस्तूरीभैरवविधानञ्च । अथ सन्निपातचिकित्सा । तत्र अष्टाङ्गावलेहविधानम् । दशमूलविधानम् । चतुर्दशाङ्गविधानम् । अष्टादशाङ्गविधानम् । मुष्टियोगकथनञ्च । अथ जीर्णज्वरे भार्ग्यादिविधानम् । द्राक्षाद्यष्टादशाङ्गविधानम् । मुस्तकादिविधानम् । पथ्यापथ्यकथनञ्च । अथ विषमज्वराधिकारे, मधुकादिविधानम् । गुड़पिप्पलीविधानम् । शुण्ठ्यादिविधानम् । मुष्टियोगकथनम् । भार्ग्यादिविधानम् । दास्यादिकथनञ्च । अथ तृतीयकचातुर्थकाधिकारे मुष्टियोगकथनम् । बृहद्गुड़पिप्पलीविधानम् । महागुड़पिप्पलीविधानम् । त्रिकत्रयादिचूर्णविधानम् । सुदर्शनविधानम् । सुदर्शनभैरवचूर्णकथनम् । ज्वरभैरवचूर्णकथनम् । पथ्यापथ्यकथनम् । मुष्टियोगकथनम् । क्षीरषट्पलघृतविधानञ्च । अथ रसप्रयोगः । तत्र नवज्वराधिकारे धूमकेतुरसविधानम् । शीतभञ्जीरसविधानम् । प्रचण्डरसविधानम् । उदकभञ्जीररसविधानम् । ज्वरमुरारिरसविधानम् । रसचूड़ामणिविधानम् । श्लेष्मकालानलविधानञ्च । अथ सन्निपाते रसचिकित्सा । तत्र स्वल्पसूचिकाभरणविधानम् । सन्निपातभैरवविधानम् । कम्पज्वरजीर्णज्वरयोः सर्वेश्वरलौहविधानम् । ज्वरान्तकरसकथनम् । मृतसञ्जीवनरसविधानम् । सौभाग्यवटिकाविधानम् । सन्निपातकालानलविधानम् । सूचिकाभरणविधानम् । चिन्तामणि-

रसविधानम् । वेतालरसविधानम् । महाज्वराङ्कुशविधानम् । स्वच्छन्दभैरवविधानम् । ज्वराशनिरसविधानञ्च । अथ ज्वराधिकारे, अग्निकुमारविधानम् । रत्नगिरिरसविधानम् । पञ्चाननरसविधानम् । सञ्जीवनाभ्रविधानम् । सर्व्वज्वरहरलौहविधानम् । चातुर्थकारिरसविधानम् । विषमज्वरहरलौहविधानम् । बृहत्सुदर्शनचूर्णविधानम् । वसन्तमालतीरसविधानञ्च । अथ ज्वराधिकारे तैलव्यवस्था । तत्र षट्कट्वरतैलविधानम् । अङ्गारकतैलविधानम् । बृहल्लाक्षादितैलविधानम् । प्रसङ्गात् लोकनाथरसकथनम् । रसराजरसकथनम् । स्वल्पपिप्पल्याद्यतैलकथनम् । बृहत्पिप्पल्याद्यतैलकथनम् । रविसुन्दररसकथनम् । महाषट्कट्वतैलकथनम् । जयमङ्गलरसकथनम् । बृहद्द्राक्षादितैलविधानम् । प्रतापलङ्केश्वरविधानम् । वाड़वानलरसविधानम् । गुर्व्वाद्यतैलविधानम् । ताराविलासरसविधानम् । नत्त्वादिवल्लिविधानम् । शम्भुरसविधानम् । शम्भुनाथरसविधानम् । गुड़वटिकाविधानम् । कालीयस्तूचिकाभरणविधानम् । अघोरन्रसिंहरसविधानम् । हरपार्व्वतीरसविधानम् । कालवारणरसविधानम् । प्रसङ्गात् नासाचिकित्साकथनञ्च । अथ ज्वरातिसारचिकित्सा । तत्र धान्यशुण्ठीविधानम् । विल्वपञ्चकविधानञ्च । अथ रक्तातिसारचिकित्सा । तत्र ह्रीवेरादिविधानम् । पयस्यादिविधानम् । उशीरादिविधानम् । धातक्यादिविधानम् । किरातादिविधानम् । कुटजलेहविधानम् । कनकसुन्दररसविधानम् । करुणासागररसविधानम् । लोकनाथरसविधानम् । सिद्धप्राणेश्वरमोदकविधानम् । आनन्दभैरवरसविधानञ्च । अथ अतीसारचिकित्सा । तत्र रेचनपाचनादिविधानम् । धान्यशुण्ठ्यादिविधानम् । कच्चटादिविधानञ्च । अथ रक्तातीसारे मुष्टियोगकथनम् । वत्सकादिविधानम् । कुटजादिविधानञ्च । अथ गुदभ्रंशरोगे मुष्टियोगकथनम् । कुटजपुटपाकविधानम् । बृहत्कुटजावलेहविधानम् । कुटजाष्टकविधानम् । स्वल्पगङ्गाधरचूर्णविधानम् । बृहद्गङ्गाधरचूर्णविधानम् । आनन्दरसविधानम् । आनन्दभैरवरसविधानम् । कनकचूर्णविधानम् । अमृतार्णवरसविधानम् । मृतसञ्जीवनरसविधानञ्च । अथ ग्रहणीचिकित्सा । तत्र मुष्टियोगकथनम् । भूनिम्बाद्यचूर्णविधानम् । पिप्पल्याद्यचूर्णविधानम् । पाठाद्यचूर्णविधानम् । मसूरघृतविधानम् । शुण्ठीघृतविधानम् । कल्याणगुड़विधानम् । कामचारमण्डूरविधानम् । कच्चटलेहविधानम् । कल्याणगुड़कुष्माण्डविधानम् । मदनमोदकविधानम् । तत्र च रसप्रयोगः । ग्रहणीवज्रकवाटविधानम् । जातिफलाद्यवटिकाविधानम् । पानीयभक्तवटिकाविधानम् । लवङ्गाद्यचूर्णकथनम् । नायिकाचूर्णविधानम् । ग्रहणीशार्दूलचूर्णविधानम् । नारायणचूर्णविधानम् । ग्रहणीमिहिरतैलविधानम् । कुटजलौहविधानम् । गगनसुन्दररसविधानम् । पञ्चामृतपर्पटीविधानम् । रसपर्पटीविधानम् । ग्रहणीगजेन्द्ररसविधानम् । विजयपर्पटीविधानम् । ताम्रयोगविधानम् । दुग्धवटिकाविधानम् । महागन्धकविधानम् । न्टपवल्लभरसविधानम् । लवङ्गादिमोदकविधानञ्च । अथ अर्शोरोगचिकित्सा । तत्र मुष्टियोगकथनम् । पथ्यापथ्यविधानम् । माणिभद्रमोदकविधानम् । प्राणदागुड़िकाविधानम् । सूरणमोदकविधानम् । षट्-

पलघृतादिविधानम् । कुटजावलेहविधानम् । क्षारतोयविधानम् । अग्निमुखलौहविधानम् । ईश्वरमतलौहविधानम् । भल्लातकगुड़विधानञ्च । अथ अग्निमान्द्यचिकित्सा । तत्र मुष्टियोगविधानम् । शार्दूलकाञ्जिकविधानम् । भास्करलवणविधानम् । अग्निमुखचूर्णविधानम् । अमृतेश्वरवटिकाविधानम् । तिक्तपाकवटिकाविधानम् । बृहदग्निमुखचूर्णविधानम् । रामवाणविधानम् । अग्निकुमारविधानम् । स्वल्पाग्निकुमारविधानम् । महोदधिवटिकाविधानम् । गुणमहोदधिवटिकाविधानम् । सूचिकामुखरसविधानम् । महाशङ्खवटिकाविधानम् । महापाशुपतरसविधानम् । क्रव्यादविधानम् । सामान्याजीर्णे मुष्टियोगकथनञ्च । बृहद्भास्कररसविधानम् । स्वल्पभास्कररसविधानम् । दीपनावलेहविधानम् । विसूचीरोगे मुष्टियोगकथनञ्च । अथ क्रिमिरोगचिकित्सा । तत्र क्रिमिघातिनवटिकाविधानम् । सुधावतीवटिकाविधानम् । क्रिमिघातिरसविधानम् । विड़ङ्गादिघृतविधानम् । क्रिम्यादिगुड़विधानम् । पलाशादिवटिकाविधानम् । मुष्टियोगविधानम् । मण्डूरवटकविधानम् । पुनर्णवातैलविधानम् । पुनर्णवामण्डूरविधानम् । वज्रवटकमण्डूरविधानञ्च । अथ पाण्डुरोगचिकित्सा । तत्र पाण्डुसूदनरसविधानम् । धात्रीलौहविधानञ्च । अथ रक्तपित्तचिकित्सा । तत्र मुष्टियोगकथनम् । पथ्यापथ्यविधानम् । वासकघृतविधानम् । कामदेवघृतविधानम् । कुष्माण्डखण्डविधानम् । वासाकुष्माण्डखण्डविधानम् । त्रिफलाद्यलौहविधानम् । खण्डकाद्यलौहविधानञ्च । अथ यक्ष्मरोगचिकित्सा । तत्र मुष्टियोगकथनम् । पथ्यापथ्यविधानम् । लवङ्गादिचूर्णविधानम् । तालीशादिचूर्णविधानम् । पिप्पल्याद्यघृतविधानम् । छागलाद्यघृतविधानम् । च्यवनप्राशलेहविधानम् । स्वल्पमृगाङ्करसविधानम् । बृहन्मृगाङ्करसविधानम् । बृहच्चन्दनाद्यतैलविधानम् । मध्यमचन्दनाद्यतैलविधानम् । पयःशर्करविधानम् । बलाद्यघृतविधानम् । यक्ष्मान्तकलौहविधानम् । वसन्ततिलकरसविधानम् । रत्नगर्भरसविधानम् । सर्व्वाङ्गसुन्दररसविधानञ्च । अथ कासरोगचिकित्सा । तत्र मुष्टियोगकथनम् । पथ्यापथ्यविधानम् । कण्टकारिघृतविधानम् । समशर्करचूर्णविधानम् । चन्द्रामृतरसविधानम् । शृङ्गाराभ्ररसविधानम् । वासावलेहविधानम् । अगस्त्यहरीतकीविधानम् । ब्राह्मीहरीतकीविधानम् । आनन्दभैरवरसविधानम् । रसेन्द्ररसविधानम् । राजमृगाङ्कविधानम् । श्वासकासचिन्तामणिविधानञ्च । अथ हिक्काश्वासचिकित्सा । तत्र मुष्टियोगकथनम् । पथ्यापथ्यविधानम् । कुलत्थघृतविधानम् । भार्गीगुड़विधानम् । सूर्य्यावर्त्तरसविधानम् । श्वासकुठाररसविधानम् । पिप्पल्याद्यलौहविधानम् । श्वासारिलौहविधानञ्च । अथ स्वरभेदचिकित्सा । तत्र मुष्टियोगकथनम् । पथ्यापथ्यविधानम् । ब्राह्मीघृतविधानम् । कण्टकारिघृतविधानम् । व्याघ्रीघृतविधानञ्च । अथारोचकरोगचिकित्सा । तत्र मुष्टियोगकथनम् । पथ्यापथ्यविधानम् । कलहंसकाञ्जिकविधानञ्च । अथ छर्दिरोगचिकित्सा । तत्र मुष्टियोगविधानम् । चन्दनशारिवादिचूर्णविधानम् । कुमुदेश्वररसविधानम् । एलादिचूर्णविधानम् । गङ्गाधररसविधानम् । वृषध्वजरसविधानम् । चन्दनतण्डुलावलेहविधानञ्च । अथ

तृष्णाचिकित्सा । तत्र मुष्टियोगकथनम् । अथ मूर्च्छारोगचिकित्सा । तत्र मुष्टियोगकथनम् । अथ मदात्ययचिकित्सा । तत्र मुष्टियोगकथनम् । अथ दाहचिकित्सा । तत्र मुष्टियोगकथनम् । कृपानिधिरसविधानञ्च । अथ उन्मादचिकित्सा । तत्र मुष्टियोगकथनम् । सिद्धार्थलेपविधानम् । क्षीरकल्याणघृतविधानम् । महापैशाचिकघृतविधानम् । चैतसघृतविधानम् । शिवाघृतविधानञ्च । अथ अपस्मारचिकित्सा । तत्र मुष्टियोगकथनम् । महाचैतसघृतविधानम् । पञ्चगव्यघृतविधानम् । भूतभैरवरसविधानञ्च । अथ वातरोगचिकित्सा । तत्र मुष्टियोगकथनम् । रेचनादिविधिः । कल्याणावलेहविधानम् । स्वल्परसोनपिण्डविधानम् । त्रयोदशाङ्गगुग्गुलुविधानम् । अश्वगन्धाघृतविधानम् । स्वल्पच्छागलाद्यघृतविधानम् । बृहच्छागलाद्यघृतविधानम् । दशमूलतैलविधानम् । सैन्धवाद्यतैलविधानम् । बलाद्यतैलविधानम् । स्वल्पविष्णुतैलविधानम् । बृहद्विष्णुतैलविधानम् । हिमसागरतैलविधानम् । एलादितैलविधानम् । स्वल्पमाषतैलविधानम् । महामाषतैलविधानम् । बृहन्माषतैलविधानम् । कुब्जप्रसारणीतैलविधानम् । मध्यमनारायणतैलविधानम् । बृहन्नारायणतैलविधानम् । एकादशशतिकाप्रसारणीतैलविधानम् । महासुगन्धितैलविधानम् । तैलमूर्च्छादिविधिः । विजयभैरवतैलविधानम् । वातगजेन्द्ररसविधानम् । चन्द्रामृतलौहविधानम् । विडङ्गादिचूर्णविधानञ्च । अथ आमवातचिकित्सा । तत्र मुष्टियोगकथनम् । गुडूचीघृतविधानम् । अमृताद्यघृतविधानम् । गुडूचीतैलविधानम् । दशपाक-बलातैलविधानम् । पिण्डतैलविधानम् । बृहद्गुडूचीतैलविधानम् । कैशोरगुग्गुलुविधानम् । वातरक्तान्तकरसविधानञ्च । अथ ऊरुस्तम्भचिकित्सा । तत्र अष्टकट्वरतैलविधानम् । मुष्टियोगकथनञ्च । अथ शूलरोगचिकित्सा । तत्र मुष्टियोगकथनम् । विश्वादिपाचनविधानम् । बृहद्विश्वादिपाचनविधानम् । एरण्डसप्तकपाचनविधानम् । बीजपूरकघृतविधानम् । पिप्पली घृतविधानम् । क्षीरमण्डूरविधानञ्च । अथ मधुमत्याः सूची । गुडमण्डूरविधानम् । सितामण्डूरविधानम् । कल्पतरुरसविधानम् । शङ्खद्रावकविधानम् । शुण्ठीखण्डविधानम् । नारिकेलखण्डविधानम् । बृहन्नारिकेलखण्डविधानम् । नारिकेलामृतविधानम् । खण्डामलकीविधानम् । विद्याधराभ्रविधानञ्च । अथ उदावर्त्तरोगचिकित्सा । तत्र मुष्टियोगव्यवस्था । अथ गुल्मरोगचिकित्सा । तत्र मुष्टियोगकथनम् । गुल्मशार्दूलरसकथनम् । हिङ्ग्वादिचूर्णविधानम् । त्र्यूषणाद्यघृतविधानम् । क्षीरषट्पलघृतविधानम् । दन्तीहरीतकीविधानञ्च । अथ रक्तगुल्मरोगचिकित्सा । तत्र गुल्मकालानलरसविधानम् । अथ हृद्रोगचिकित्सा । तत्र मुष्टियोगकथनम् । अर्ज्जुनघृतविधानञ्च । अथ मूत्रकृच्छ्ररोगचिकित्सा । तत्र मुष्टियोगकथनम् । शतावरीघृतविधानम् । कुसुमाकररसविधानम् । वसन्तकुसुमाकररसविधानञ्च । अथ मूत्राघातचिकित्सा । तत्र मुष्टियोगव्यवस्था । धात्रीघृतविधानञ्च । अथ अश्मरीरोगचिकित्सा । तत्र मुष्टियोगकथनम् । शरादिपञ्चमूलघृतविधानम् । कुलत्थघृतविधानञ्च । अथ प्रमेहचिकित्सा । तत्र मुष्टियोगकथनम् । पञ्चकषायविधानम् । न्यग्रोधाद्यचूर्णविधानम् । सोमेश्वररसविधानम् । मेहमुद्गर-

रसविधानम् । दाडिमाद्यघृतविधानम् । वसन्तकुसुमाकररसविधानम् । कर्पूराद्यमोदकविधानम् । चन्द्रप्रभावटिकाविधानम् । वङ्गावलेहविधानम् । प्रमेहसेतुरसविधानम् । रजाद्लनीवटिकाविधानम् । तारकेश्वररसविधानम् । इन्द्रवटिकाविधानम् । मेहमुद्गरवटिकाविधानञ्च । अथ सोमरोगव्यवस्था । तत्र चिकित्साप्रकारश्च । अथ मेदोरोगव्यवस्था । तत्र मुष्टियोगकथनम् । लौहरसायनविधानम् । अमृताद्यगुग्गुलुविधानम् । त्रिफलाद्यतैलविधानञ्च । अथ अङ्गदौर्गन्ध्यचिकित्सा । तत्र मुष्टियोगकथनम् । अथ उदररोगचिकित्सा । तत्र मुष्टियोगव्यवस्था । सामुद्राद्यचूर्णविधानम् । नारायणचूर्णविधानम् । अर्कलवणविधानम् । षट्पलघृतविधानम् । विष्णुघृतविधानम् । शोथोदरे भेदवटिकाविधानम् । त्रैलोक्यडम्बररसविधानम् । महावह्निरसविधानम् । नाराचरसविधानञ्च । अथ प्लीहरोगचिकित्सा । तत्र मुष्टियोगकथनम् । मानगुड़िकाविधानम् । अभयालवणविधानम् । रोहितकघृतविधानम् । चित्रकघृतविधानम् । महारोहितकघृतविधानञ्च । अथ शोथरोगचिकित्सा । तत्र मुष्टियोगकथनम् । चौरवटिकाविधानम् । दुग्धवटिकाविधानम् । पुनर्णवाघृतविधानम् । मानकघृतविधानम् । स्थलपद्माद्यघृतविधानम् । शुष्कमूल्याद्यतैलविधानम् । शैलाद्यतैलविधानम् । वृहद्दुग्धवटिकाविधानम् । दशमूलतैलविधानम् । कंसहरीतकीविधानम् । शोथशार्दूलतैलविधानम् । कटुकादिलौहविधानञ्च । अथ वृद्धिरोगचिकित्सा । तत्र मुष्टियोगविधानम् । शतपुष्पादिघृतविधानञ्च । अथ गलगण्डचिकित्सा । तत्र मुष्टियोगकथनम् । तुम्बीतैलविधानम् । निर्गुण्डीतैलविधानञ्च । अथ गण्डमालाचिकित्सा । तत्र मुष्टियोगकथनम् । अथ श्लीपदचिकित्सा । तत्र मुष्टियोगकथनम् । कृष्णाद्यमोदकविधानम् । दण्डीघृतविधानम् । वृहत्सौरेश्वरघृतविधानम् । श्लीपदगजकेशरिरसविधानम् । नित्यानन्दरसविधानम् । कनकतैलविधानञ्च । अथ विद्रधिरोगचिकित्सा । तत्र मुष्टियोगकथनम् । अथ व्रणरोगचिकित्सा । तत्र मुष्टियोगकथनम् । पद्माद्यतैलविधानम् । त्रिफलागुग्गुलुविधानम् । अमृतवटीगुग्गुलुविधानम् । जात्याद्यघृतविधानम् । गौराद्यघृतविधानम् । विपरीतमल्लतैलविधानम् । व्रणराक्षसतैलविधानञ्च । अथ भग्नचिकित्सा । तत्र मुष्टियोगकथनम् । अथ नाड़ीव्रणचिकित्सा । तत्र मुष्टियोगकथनम् । अथ भगन्दरचिकित्सा । तत्र मुष्टियोगकथनम् । नवकार्षिकगुग्गुलुविधानम् । विष्यन्दनतैलविधानञ्च । अथ उपदंशचिकित्सा । तत्र मुष्टियोगकथनम् । करञ्जाद्यघृतविधानञ्च । अथ शूकदोषचिकित्सा । तत्र मुष्टियोगकथनम् । अथ कुष्ठरोगचिकित्सा । तत्र मुष्टियोगकथनम् । पञ्चकषायविधानम् । पञ्चनिम्बविधानम् । एकविंशतिगुग्गुलुविधानम् । पञ्चतिक्तघृतविधानम् । महाभल्लातकविधानम् । सिन्दूराद्यतैलविधानम् । अर्कतैलविधानम् । मरीचाद्यतैलविधानम् । वृहन्मरीचाद्यतैलविधानम् । विषतैलविधानम् । सोमराजतैलविधानम् । गलत्कुष्ठारियोगविधानम् । हरितालशुद्धिविधानम् । तालकेश्वररसविधानम् । महातालेश्वरविधानम् । अमृताङ्कुरलौहविधानञ्च । अथ शीतपित्तरोगचिकित्सा । तत्र मुष्टियोगकथनम् । अम्लपित्तरोगे

मुष्टियोगव्यवस्था। शतावरीघृतविधानम्। सुधावतीवटिकाविधानञ्च। अथ विसर्परोगचिकित्सा। तत्र मुष्टियोगकथनम्। पञ्चतिक्तघृतविधानञ्च। अथ मसूरिकाचिकित्सा। तत्र मुष्टियोगविधानम्। खदिराष्टकविधानञ्च। अथ क्षुद्ररोगचिकित्सा। तत्र मुष्टियोगकथनम्। चाङ्गेरीघृतविधानम्। मञ्जिष्ठाद्यतैलविधानम्। कुङ्कुमाद्यतैलविधानम्। हरिद्राद्यतैलविधानम्। गुञ्जातैलविधानम्। मध्यमभृङ्गराजतैलविधानम्। महाभृङ्गराजतैलविधानञ्च। अथ मुखरोगचिकित्सा। तत्र मुष्टियोगकथनम्। कनकचूर्णविधानम्। पीतकचूर्णविधानम्। बृहत्खदिरादिवटिकाविधानम्। वकुलाद्यतैलविधानम्। सहकारवटिकाविधानञ्च। अथ कर्णरोगचिकित्सा। तत्र मुष्टियोगविधानम्। क्षारतैलविधानम्। दशमूलीतैलविधानम्। शम्बूकतैलविधानम्। कुष्ठादितैलविधानञ्च। अथ नासारोगचिकित्सा। तत्र मुष्टियोगकथनम्। व्योषादिचूर्णविधानम्। पुष्पाद्यतैलविधानम्। चित्रकहरीतकीविधानम्। दूर्व्वातैलविधानञ्च। अथ चक्षूरोगचिकित्सा। तत्र मुष्टियोगकथनम्। बिल्वाञ्जनविधिः। षडङ्गगुग्गुलुघृतविधानम्। पटोलाद्यघृतविधानम्। शशकघृतविधानम्। कुमारिका-वर्त्तिकथनम्। सुखावती-वर्त्तिकथनम्। चन्द्रप्रभा-वर्त्तिकथनम्। चन्द्रोदया-वर्त्तिकथनम्। नयनसुखा-वर्त्तिकथनम्। नयनाञ्जनविधानम्। त्रिफलाघृतविधानम्। गृपवल्लभतैलविधानम्। सप्तामृतलौहविधानञ्च। अथ शिरोरोगचिकित्सा। तत्र मुष्टियोगकथनम्। षड्बिन्दुतैलविधानम्। अपामार्गतैलविधानम्। शिरोवज्ररसविधानञ्च। अथ स्त्रीरोगचिकित्सा। तत्र मुष्टियोगकथनम्। शीतकल्याणघृतविधानम्। शतावरीघृतविधानम्। अशोकघृतविधानञ्च। अथ प्रदरचिकित्सा। तत्र मुष्टियोगकथनम्। अथ योनिव्यापचिकित्सा। तत्र महाश्वगन्धाघृतविधानम्। अथ गर्भिणीचिकित्सा। तत्र मुष्टियोगकथनम्। गर्भविलासरसविधानञ्च। अथ गर्भस्रावचिकित्सा। तत्र गर्भिणीकल्याणाभ्रविधानम्। भद्रोत्कटावलेहविधानञ्च। अथ स्तनरोगचिकित्सा। तत्र श्रीपर्णतैलविधानम्। मुष्टियोगकथनम्। काशीशतैलविधानञ्च। अथ बालरोगचिकित्सा। तत्र मुष्टियोगकथनम्। बालचातुर्भद्रावलेहविधानम्। धातक्यवलेहविधानम्। पञ्चकोल्यवलेहविधानम्। श्यामाद्यवलेहविधानम्। अश्वगन्धाघृतविधानम्। अष्टमङ्गलघृतविधानञ्च। अथ विषरोगचिकित्सा। तत्र मुष्टियोगकथनम्। पाचनस्वेदन-वमन-विरेकादिविधिः। दुच्छामयरसविधानञ्च। अथ वस्तिकर्म्मविधानम्। तत्र नस्य-धूमरक्त-मोक्षणादिविधिः। अथ प्रकीर्णकाधिकारः। तत्र मानाध्यायः। गणाध्यायः। अथ ऋतुचर्य्या। अथ वृष्याधिकारः। तत्र गोधूमाद्यघृतविधानम्। रतिवल्लभमोदकविधानम्। कामेश्वरमोदकविधानम्। पूर्णचन्द्रमोदकविधानम्। कामाग्निसन्दीपनमोदकविधानम्। मदनमोदकविधानम्। दुग्धवटीविधानम्। चन्द्रोदयरसविधानञ्च। अथ रसायनाधिकारः। तत्र अमृतभल्लातकविधानम्। खण्डाम्रकविधानम्। पूगखण्डविधानम्। महाभ्रवटिकाविधानम्। शृङ्गाराभ्रकथनम्। मन्मथाभ्रकथनम्। चतुर्मुखरसकथनम्। पूर्णचन्द्ररसकथनञ्च। अथ धातूनां मारणशोधनपुटीकरणपाचन-स्वेदनादिविधिः। दरसिन्दूरादिविधिश्च। इति शम्॥

No. 267. मनःशिक्षाश्लोकः. By दासगोस्वामी. Substance, country-made paper, 14½ × 8½ inches. Folia, 3. Lines, 6 on a page. Extent, 46 çlokas. Character, Bengali. Date, ? Place of deposit, Āgartalā Vṛddhanagara Tripurā, Paṇḍita Mīneçvara Sārbbabhauma. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीश्रीकृष्णचन्द्राय नमः ।
गुरौ गोष्ठे गोष्ठालयिषु सुजने भूसुरगणे
स्वमन्त्रे श्रीनाम्नि व्रजनवयुवद्वन्द्वशरणे ।
सदा दम्भं हित्वा कुरु रतिमपूर्व्वामतितरा-
मये स्वान्त भ्रातश्चटुभिरभियाचे धृतपदः ॥ इत्यादि ।

End. मनःशिक्षादैकादशकवरमेतन्मधुरया
गिरा गायत्युच्चैः समधिगतसर्व्वार्थततयः । (?)
सयूथश्रीरूपानुग इह भवन् गोकुलवने
जनो राधाकृष्णातुलभजनरत्नं स लभते ॥

Colophon. इति श्रीमद्दासगोस्वामिविरचितो मनःशिक्षाश्लोकः सम्पूर्णः ॥

विषयः । वैष्णवग्रन्थोऽयम् । अत्र च यदि श्रीकृष्णराधिकयोः सेवारत्नं लब्धुमिच्छसि तर्हि सगण-श्रीगौराङ्गरूपगोस्वामिप्रभृतिभिरनुष्ठितां सेवां कुरु इति मनः प्रति शिक्षाप्रदानम् ॥

No. 268. मनःशिक्षाश्लोकावलीटीका. By विश्वनाथचक्रवर्त्ती. Substance, country-made paper, 14½ × 4½ inches. Folia, 6. Lines, 9 on a page. Extent, 153 çlokas. Character, Bengali. Date, San 1245. Place of deposit, Āgartalā Vṛddhanagara Tripurā, Paṇḍita Mīneçvara Sārvvabhauma. Appearance, new. Prose. Generally correct.

Beginning. श्रीश्रीनित्यानन्दचैतन्यौ जयेताम् ।
निर्णीय साध्यं बहुसाधनानि
कुर्व्वन्ति विज्ञाः परमादरेण ।
श्रीरूपपादाब्जरजोऽभिषेकं
मतं हि चैतन्मम साधनानि ॥
रूपानुसारिणी सेवा मनसि क्रियते यदि ।
श्रीराधाकृष्णयोः कुञ्जे सिद्धरूपेण गम्यते ॥

स्वाभीष्टदेवभावर्णनपूर्ब्बकं मङ्गलरूपं श्रीकृष्णनिरूपितैश्वर्य्यज्ञाननिवारकानुकूलभजनं दर्शयति गुराविति । इत्यादि ।

End. यूथेन सह श्रीरूपानुगो भवन् यः गोकुलवने उभयोः सेवारतं लभते श्रीरूपस्यानुमतिं विना मुख्यकामानुगा न स्यात् अतो यूथेन सह श्रीरूपस्यानुसारिणीं सेवां कुर्ब्बित्याशयः ।

Colophon. इति श्रीविश्वनाथचक्रवर्त्तिना विरचिता मनःशिक्षाश्लोकावलीटीका समाप्ता ॥ समाप्तश्चायं ग्रन्थः ॥

विषयः । मनःशिक्षाश्लोकावलीनामकवैष्णवग्रन्थस्य व्याख्यानम् ॥

No. 269. मधुमञ्जरी, (मनीषापञ्चकटीका). By बालगोपालेन्दुः. Substance, country-made paper, 12 × 5 inches. Folia, 13. Lines, 8 on a page. Extent, 214 çlokas. Character, Bengali. Date, ? Place of deposit, Yaçodal, District Mayamanasimha, Paṇḍita Harinātha Tarkabhūṣaṇa. Appearance, tolerable. Prose. Correct.

Beginning. श्रीमन्मङ्गलमूर्त्तये नमः ।

श्रीमन्मुनीन्द्रमानम्य जगन्नाथमुनिं गुरुम् ।
मनीषापञ्चकव्याख्या तन्यते मधुमञ्जरी ॥
तत्रादौ कथा निरूप्यते । इत्यादि ।

End. सर्व्वसिद्धो ब्रह्मविद्वरिष्ठः । सुरेन्द्रवन्दितपदं सुराः देवाः तेषामिन्द्रः स्वामी शतमखस्तेन वन्दितं नमस्कृतं पदं पादो यस्य स तथा । नूनं सत्यं चश्चिन्मयं न संशयः ॥ एवं मम मनीषेति स्पष्टम् ।
मनीषापञ्चकस्यैवं कृता टीका मनोहरा ।
बालगोपालेन्दुनाम्ना मुनिना मधुमञ्जरी ॥

Colophon. इति मनीषापञ्चकव्याख्या सम्पूर्णा ।

विषयः । शङ्कराचार्य्यकृतस्य मनीषापञ्चकनामकस्य वेदान्तग्रन्थस्य व्याख्या ।

No. 270. मनोरमा. By रमानाथशर्म्मा. Substance, country-made paper, 13 × 4½ inches. Folia, 105. Lines, 4 on a page. Extent, 2,054 çlokas. Character, Bengali. Date, Sk. 1780. Place of deposit, District Tripurā, Parganā Nurnagara, grāma Pattana, Paṇḍita Tārānātha Çiromaṇi. Appearance, new. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय । श्रीगुरवे नमः ।
सम्यक् प्रणम्य तां वाणीमानीय च सतां वचः ।
मनोरमा रमानाथशर्म्मणा परिनिर्म्मिता ॥
प्रायेण धातुवैषम्यात् सर्व्वेषां घूर्णते शिरः ।
या तत्क्रियार्थे प्रभवेत् सैव वृत्तिर्मनोरमा ॥
भूरिस्फुरित्नता वृत्तिर्भूयसी युक्तयुक्तिका ।
निश्चेतुं धातवस्सर्व्वा न शक्यास्तेन मे श्रमः ॥
यो मत्सरं प्रथयति प्रथितस्य नाम्ना
कस्यापि वा निजमहत्त्वसमीहया वा ।
उच्छिद्य नाम मम वीक्ष्य कृतौ समन्तात्
तस्यैव नश्यतितरां सुकृतं कृतन्तु ॥
भूसत्तायां सतो भावः प्रवृत्तिनिमित्तं सत्ता तस्याश्च सिद्धरूपाया अपि क्रियात्वम् । इत्यादि ।

End. परिहारस्तु पूर्व्ववत् भूचुराद्योरपरिसमाप्तत्वात् न वृत्कारणं (?) ततः कर्त्तां नार्च्चन्ति षोड्शीम् । विक्षयन्ते वरिविग्रहाः । यन्त्रिसुदूयितुं हृद्रा यशः । इति माघः ॥ इत्यादयोऽप्यनुसर्त्तव्या इति ॥

Colophon. इति वेदगर्भतर्काचार्य्यात्मज-रायिकुलप्रसूत-श्रीरमानाथशर्म्मणा विनिर्म्मितायां मनोरमायां कातन्त्रधातुवृत्तौ चुरादिविवरणं समाप्तम् ॥

विषयः । नानादृष्टान्तपूर्व्वकं कातन्त्रीयधातुगणवृत्तिकथनम् ॥

No. 271. मन्त्रपुरश्चरणम्. By गोविन्दकविकङ्कणः. Substance, country-made paper, 16 × 4½ inches. Folia, 5. Lines, 7 on a page. Extent, 140 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā, District 24-Parganās, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमश्चण्डिकायै ।

नीलं किमपि किशोरं निधाय हृदये पुरश्क्रियाचर्य्याम् ।

मन्त्राणामभितनुते श्रीगोविन्दकविकङ्कणाचार्य्यः ॥

यत्नात् पुरश्क्रियां कुर्य्यान्मन्त्रवित् सिद्धिकाङ्क्षया ।

जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः ।

पुरश्चरणहीनो हि तथा मन्त्रः प्रकीर्त्तितः ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । अत्र प्रथमं पुरश्चरणस्थानादिनिरूपणम् । ततो मालादिनिरूपणम् । पुरश्चरण-विधिस्तत्प्रयोगादिश्चेति ।

No. 272. मन्त्ररत्नावली. By विद्याधरः. Substance, country-made paper, 12 × 1½ inches. Folia, 189. Lines, 5 on a page. Extent, 4,843 çlokas. Character, Bengali. Date, ? Place of deposit, Visnupura, District Vãkudā, Candranārāyaṇa Bhaṭṭāçāryya. Appearance, old. Prose. Incorrect.

Beginning. (अस्य प्रथमपत्रत्रयाभावात् चतुर्थपत्रस्य प्रारम्भवाक्यं लिखितम् ॥) ये मन्त्रा भवन्ति ते स्थानभ्रष्टाः । ये मन्त्रास्त्रयोदशाक्षराः पञ्चदशाक्षरा वा ये मन्त्रास्ते विफलाः । चतुःशताक्षराण्यारभ्य सहस्रवर्णा ये मन्त्रास्ते इद्धाः । शताक्षरा ये मन्त्राः सार्द्धशताक्षरा वा ये मन्त्राः त्रिशताक्षरा वा ये मन्त्रास्ते निःस्नेहाः । सहस्रवर्णाधिका ये मन्त्रास्ते पीड़िताः ॥

दोषानिमानविज्ञाय यो मन्त्रं भजते जड़ः ।

सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥ इत्यादि ।

End. प्रवालै रचिता माला प्रयच्छेत् पुष्कलं धनम् ।

सौभाग्यं स्फाटिकी माला मौक्तिकैर्विहिता श्रियम् ॥

निर्म्मिता रौप्यमालाभिः कुरुते कीर्त्तिमक्षयाम् ।

स्वर्णैरेव विरचिता माला स्यान्मुक्तये नृणाम् ॥

योगास्तु अथ योगं प्रवक्ष्यामीत्यादि कालादिविवर्जिते इति श्लोकान्तग्रन्थेन मूलग्रन्थप्रतिपादितेन बोद्धव्याः । केवलं ग्रन्थविस्तृतिभयान्नैव लिखिताः ॥

वाच्यं न वाचा मनसा न गम्यं
ज्ञेयं परं यद्गुरुसेवयैव ।
ब्रह्मादिसृष्टिस्थितिसंहृतीशं
वन्दे महस्तनुजं दैवतीयम् ॥
रामानुजो देशिकसत्तमो यत्
श्रीशारदातिलकनाम चकार तन्त्रं ।
न ...... शिष्युकप्रश्रीविद्याधरो
रचितवान् मन्त्ररत्नमालाम् ॥
श्रीमद्भुवः प्रवरछन्दं भट्टम्बपरामस्य बोधविभवाय ।
सदागमाख्यो विश्वोपकारविषये मया निबद्धः ॥
सम्यक् निबद्ध इह सन्मतिरस्तु कृपा ॥ (?)
सत् सिंहासनमासने जनपदे श्रीश्रीवस्तूतौ ।
मीमांसातर्कतत्त्वप्रखरमतिरभून्मूर्त्तिशर्म्मा द्विजेन्द्रः ।
तत्सूनुः स जगद्वरो गामरवाजाद्वल्लभनीधरः । (?)
श्रीविद्याधर एतदीयतनयश्चक्रे सुरत्नावलीम् ॥
कायस्थचक्रधरवर्म्मकुलावतंसः
श्रीमत्प्रतापसत्स्वल्पनतासमीपे । (?)
सेनायिनाम्नि नगरे मनुरत्नमालां
विद्याधरो ग्रथितवान् भुवनातिवल्गा ॥ (?)
आचार्य्यभट्टपदहृत्कविवल्लभस्य
श्रीवल्लभस्य चरणौ प्रणिपत्य मूर्द्ध्ना ।
विद्याधरेण रचिता मनुरत्नमाला
सम्पूर्ण एष पटलो दशमो हि यत्र ॥

Colophon. इति श्रीजगद्वल्लभभट्टाचार्य्यान्तेवासि + + + + + विद्याधरशर्म्मविरचितायां मन्त्ररत्नावल्यां शारदातिलकपद्धतौ प्रकीर्णकमानं नाम दशमः पटलः समाप्तः ॥ ० ॥ श्री ॥ * ॥

विषयः । प्रथमपटले योनिमुद्रादिनिरूपणम् । राश्यादिविचारः । दीक्षादिनिरूपणञ्च ॥ (२ यपटलात् ५ मपटलपर्य्यन्तं नास्ति ।) ६ ष्ठपटले दीक्षापूर्व्वाङ्गकृत्यप्रयोगादिः । होमादिनिरूपणञ्च । ७ मपटले विष्णुपूजाविध्यादिः । द्वादशाक्षरमन्त्रविध्यादिः । हयग्रीवमन्त्रविधिः । वामनमन्त्रयन्त्रधारादिनिरूपणम् । वराहमन्त्रादिविधिः । गोपालादिसकलमन्त्रविधिः प्रयो-

गादिश्च । ८ मपटले न्यासादिनिरूपणम् । उमामहेश्वरादिविधिः । मृत्युञ्जयमन्त्रादिनिरूपणम् । नीलकण्ठमन्त्रपूजाप्रयोगादिः । चिन्तामणिमन्त्रादिनिरूपणम् । पाशुपतास्त्रमन्त्रविध्यादिः । वटुकभैरवमन्त्रविधिः । पूजायन्त्रादिनिरूपणम् । चण्डेश्वरमन्त्रविध्यादिः । शैवमन्त्रराशिविवेचनादिश्च । ९ मपटले गायत्रीप्रमुखमन्त्रादिनिरूपणम् । वशीकरणहोमादिनिरूपणम् । वारुणीकृतिविध्यादिः । प्राणप्रतिष्ठामन्त्रयन्त्रादिश्च । १० मपटले पुरश्चरणमन्त्रप्रयोगादिनिरूपणमिति ।

No. 273. मन्त्रव्यक्तिः. By जगन्नाथः. Substance, country-made paper, 18 x 3 inches. Folia, 8. Lines, 6 on a page. Extent, 180 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha, Vāḍari, Paṇḍita Rāmakamala Bhaṭṭāçāryya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमस्तारिण्यै ।
नत्वानन्दमयीं देवीं भारतीं सर्व्वसिद्धिदाम् ।
मन्त्रव्यक्तिं वितनुते जगन्नाथो द्विजोत्तमः ॥
अथ व्यक्तिं प्रवक्ष्यामि वर्णानां वदने नृणाम् ।
प्रेरितां वायुना(?)लिकां सुसुम्नारन्ध्रनिर्गताम् ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । मन्त्राक्षरादिव्यक्तीकरणादिः । मन्त्राक्षरादिमाहात्म्यकथनञ्च ।

No. 274. मन्त्रार्थदीपिका वा सारसंग्रहः. By श्रीहर्षः. Substance, country-made paper, 13 x $2\frac{1}{2}$ inches. Folia, 18. Lines, 4 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, Kṛṣṇapurā, District Ḍhākā, Post Office Vaidyerbāzār, Paṇḍita Kālikṛṣṇa Vidyāvinoda. Appearance, very old. Verse. Generally correct.

Beginning. ॐ नमः परमदेवतायै ।
देवतायाः पदद्वन्द्वं प्रणम्य भक्तितो गुरुः ।
तन्त्रसारं समालोक्य वक्ष्ये मन्त्रार्थदीपिकाम् ॥
आगमस्य च संक्षेपो मन्दधियां विबुद्धये ।
श्रीहर्षकृतिना चैव लिख्यते सारसंग्रहः ॥

स्वरचक्रं विचार्य्यैव नामचक्रं विचारयेत् ।
ऋणिधनीति पश्चाद्धि नक्षत्रं राशिचक्रकम् ।
नाड़ीचक्रं विचार्य्यैव चक्राण्यानि विचारयेत् ॥

तत्र प्रथमतो स्वरचक्रं निरूप्यते ।

चतस्रः पूर्व्वगा रेखास्तिस्रो दक्षिणाग्रकाः ।
कोणे + + ततो दत्त्वा स्वरचक्रमिदं भवेत् ॥
ऐशान्यादिग्गृहद्वन्द्वं शोभितं त्रिपुरादिभिः ।
दिक्षु दुर्गाञ्च वाणीञ्च ताराञ्च भैरवीं तथा ॥
ईशानाद्यं कुबेरान्तं क्रमाच्च विन्यसेत् तथा ।
इन्द्राणीञ्चैव हेरम्बं पितामहमनन्तरम् ॥
महामायाञ्च कालीञ्च यदन्यत् सौम्यदैवतम् ।
त्रिपुरादौ ... ... शिवः ... ... ॥
त्रिपुरां भुवनेशीञ्च पीठेशीञ्चैव त्र्यम्बकम् ।
वासुदेवं श्रियञ्चैव छिन्नमस्ताञ्च चण्डिकाम् ॥

अस्यार्थः । पूर्व्वस्यां दुर्गां, दक्षिणस्यां वाणीं, पश्चिमस्यां तारां, उत्तरस्यां भैरवीं, ईशानकोष्ठद्वये इन्द्राणीहेरम्बौ, वह्निकोष्ठद्वये पीठेशीत्र्यम्बकौ, नैर्ऋतकोष्ठद्वये वासुदेवश्रियौ, वायुकोष्ठद्वये छिन्नमस्ताचण्डिके ॥ इत्यादि ।

End. अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः ।
रविसंक्रमणे चैव युगाद्यायां सुरेश्वरि ॥
मन्वन्तरासु सर्व्वासु षड़शीतिमुखेषु च ।
शिष्यत्रिजन्मदिवसे समस्ते सुखदा भवेत् ॥
युगाद्यायां जन्मदिने विवाहदिवसे तथा ।
पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये ॥
प्रयागे श्रीगुरौ काश्यां कालाकालं न शोधयेत् ॥
पीठचतुष्टये उड्डीयान-जालन्धर-पूर्णगिरि-कामरूपाख्ये ।
देव्या बोधं समारभ्य यावत् स्यान्नवमी तिथिः ।
... ... ॥

निषिद्धतीर्थानि ।

गयायां भास्करक्षेत्रे तथैव चन्द्रपर्व्वते ।
कोङ्कने च मतङ्गे च तथा कन्याश्रमेषु च ॥

... ... |

कन्याश्रमे जयपुर इति ख्याते । अस्तं गते दैत्यगुरौ शिशौ च ... ...

... ... जीवे हरौ दैत्यगुरौ सहस्र्ये केतूद्गमे भूचलादिदोषे ॥

इत्यादि । अतःपरं खण्डितम् ।

विषयः । हरचक्रनिर्णयः । अकथहचक्रनिर्णयः । अटिधिनिचक्रनिर्णयः । नक्षत्रगण-मैत्रीविचारः । राशिचक्रकथनम् । भौतिकचक्रकथनम् । अकडमचक्रनिरूपणम् । कूर्मचक्र-निरूपणम् । दीक्षाफलनिरूपणम् । गुरुलक्षणकथनम् । शिष्यलक्षणकथनम् । दीक्षायां मासतिथि-नक्षत्रलग्नतीर्थस्थाननिर्णयः । एतत् सर्वनिरूपकवचनपरम्परया व्याख्यानञ्च ॥

No. 275. मन्त्रोद्धारः. Substance, country-made paper, 16×3 inches. Folia, 20. Lines, 7 on a page. Extent, 437 çlokas. Character, Bengali. Date, ? Place of deposit, Kātihālī, District Mayamanasiṁha, Paṇḍita Parāṇacandra Tarkālaṇkāra. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः परदेवतायै ।

अथ क्रमान्मन्त्रोद्धारो लिख्यते तत्रादौ भुवनेश्वर्य्याः । ह्रीं ।

नकुलीशोऽग्निमारूढो वामनेत्रार्द्धचन्द्रवान् ।

वीजं तस्याः समाख्यातं सेवितं सिद्धिकाङ्क्षिभिः ॥ इत्यादि ।

End. क्रीं गौरि रुद्रदयिते योगेश्वरि ह्रीं फट् स्वाहा । क्रीं गौरि रुद्रदयिते योगेश्वरि सर्व्वम्मे फट् ॥ * ॥ (?)

विषयः । मन्त्रोद्धारादिनिरूपणम् ।

No. 276. मलमासार्थसंग्रहः. By **गुरुप्रसादशर्म्मा.** Substance, country-made paper, 17×3 inches. Folia, 30. Lines, 8 on a page. Extent, 990 çlokas. Character, Bengali. Date, ? Place of deposit, Pargaṇa Vagḍi, District Medinīpura grāma Telivani, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ।

स्मृते स्मृतिवचनस्य एकत्वमविवक्षितम् ।

नानास्मृतिवचनानां व्याख्येयत्वात् तच्चं अर्थविशेषं वास्तविकार्थमिति यावत्

वक्ति निरूपयति । निरूपणं ज्ञानानुकूलवचनं । व्याख्येयस्मृतिवचनस्य सामान्यतो विषयानाह मलिम्लुच इत्यादि । अत्र सप्तम्यर्थो विषयत्वं यत्र निर्णयपदोत्तरं सप्तमी तत्र जनकत्वरूपं विषयत्वं अन्यत्र ज्ञानजनकत्वरूपमिति विशेषः ॥ इत्यादि ।

End. तथाविधकन्यादातौ विमाता सपिण्डनाधिकारिणौ तत्र कथं तद्दिने नापकर्षः ।
कालबाधाभावादिति चेदुच्यते ।
बहूनामेकधर्म्माणामेकस्यापि यदुच्यते ।
सर्व्वेषामेव तत् कुर्य्यादेकरूपा हि ते स्मृताः ॥
इति बौधायनवचनात् यद्वर्वेत्यनेन सर्व्वेषामन्नपूर्व्वदिनेऽपकर्षः ।

Colophon. इत्यास्तां मलमतिविस्तरेण ॥ ० ॥
छात्राणां स्मरणार्थन्तु श्रीगुरुप्रसादशर्म्मणा ।
संकलितान्यमूनीह वचनानि मलिम्लुचे ॥
धूलिधवलभुजाभ्यां गलमवलम्ब्य स्थितो यशोदायाः ।
रजतस्त्रग्ग्रथितो हरिरिव नीलमणिर्जयति ॥

विषयः । संक्षेपेण मलमासार्थव्यवस्थादिनिरूपणम् ।

No. 277. **महाप्रदीपदानपद्धतिः ।** Substance, country-made paper, 14 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 48 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā, District 24-Parganās, Paṇḍita Ramatāraṇa Ṭhākūra. Appearance, old. Prose. Correct.

Beginning. अथ महाप्रदीपदानविधिः । मार्कण्डेय उवाच ।
येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि ।
तत्र दीपप्रदानेन कुलानामुद्धरेच्छतम् ॥ इत्यादि ।

End. ततस्तामशलाकया दीपं प्रबोधयेत् ततः प्रभाते दक्षिणां दत्वाच्छिद्रावधारणं कुर्य्यात् ।

Colophon. इति महाप्रदीपदानपद्धतिः समाप्ता ॥

विषयः । दीपान्वितामावास्यायां महाप्रदीपदानविधिस्तत्प्रयोगादिश्च ।

No. 278. महामोक्षतन्त्रम्. Substance, country-made paper, 13×3 inches. Folia, 112. Lines, 8 on a page. Extent, 3,024 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Mājhapāḍā, Bābu Rāsavihārī Rāya. Appearance, new. Verse. Incorrect.

Beginning. ॐ नमः परदेवतायै ।

कैलासशिखरे रम्ये संस्थिते भवसन्निधौ ।
पप्रच्छ भक्तियोगेन पार्व्वती शङ्करं प्रति ॥
शङ्कर्य्युवाच ।
आलोक्य सर्व्वशास्त्राणि यानि यानि श्रुतं प्रभो ।
भूयो भूयो विचार्य्यं हि ब्रह्माण्डवच देहकम् ॥
बृहद्विश्वन्तु यद्रूपं तद्रूपं क्षुद्रविश्वकम् ।
यानि गुणानि ब्रह्माण्डे तानि सन्ति कलेवरे ॥
अधिकन्तु भुक्त्यर्थं च विचारार्थं दशेन्द्रियाः ।
यस्मान्निराकारं ब्रह्म सहस्रारे स्थितं प्रभो ॥
ब्रह्माण्डाद्ये तु मध्ये यत् सर्व्वं तिष्ठ कलेवरे ।
अभ्रान्तं तव वाक्यं हि तद्ब्रह्म हरिर्व्विचः (?) ॥
तथापि परमेशान सन्देहो मां न मुञ्चति ।
बृहद्ब्रह्माण्डमध्ये तु महाभीमः सुमेरुकः ॥
सुमेरुस्थं सप्तस्वर्गं दक्षभागे सुरेश्वर ।
स एव सप्तपद्मं स मूलावधि सहस्रकम् ॥
ततृकुक्षौ हरिकिंपुरुषभारतवर्षं क्रमात्त्रयम् (?) ।
इलादिकुरुवर्षान्तं चतुर्मेरोत्तरे क्रमात् ।
केतुमानभवद्वर्षो पूर्व्वपश्चिमतः स्थितः ॥ इत्यादि ।

End. चैतन्याकारजीवस्थं यद्यद् दुःखमवस्थितम् ।
तत्तत् ज्ञात्वं लभेद्दुःखं गर्भागारे यावत् स्थितः ॥
ब्रह्मध्यानं ब्रह्मज्ञानं ब्रह्मस्थानञ्च तद्वद् ।
महामोक्षतन्त्रविद् यः स सर्व्वज्ञ एव मोक्षगः ॥

Colophon. इति महामोक्षतन्त्रे शङ्करीशङ्करसंवादे महामोक्षकल्पे सूक्ष्मब्रह्मादिब्रह्मयोगविवरणे चतुःषष्टितमः पटलः समाप्तः ॥

विषयः। १ मे पटले,— शङ्करीशङ्करयोः संवादेन शरीरस्य क्षुद्रब्रह्माण्डरूपत्वकथनम्। बृहद्ब्रह्माण्डे भारतवर्षादिनिरूपणम्। धन्वयोगादिविषये दिङ्निरूपणम्। महाकाल्याः प्रकृतित्व-कथनपूर्व्वकं प्रकृतिपुरुषयोर्जगत्सृष्टिप्रक्रियाकथनञ्च। २ ये पटले,— अष्टादशमहाविद्योत्पत्ति-कथनम्। अष्टादशभैरवोत्पत्तिकथनम्। तत्र तत्र तेषां रूपादिवर्णनञ्च। ३ ये पटले,— कालि-कायाः शववाहनादिकारणकथनम्। शिवलिङ्गोत्पत्तिकथनम्। शिवस्य शवरूपत्वे कारणादि-कथनञ्च। ४ र्थे पटले,— शिवस्य चित्याद्यष्टमूर्त्तिदृष्टान्तकथनम्। योनिबीजकथनम्। लिङ्ग-बीजकथनम्। महाबीजकथनम्। यम्वमिति गणपवाहमाहात्म्यादिकथनञ्च। ५ मे पटले,— कालीस्वरूपककारादिशतनामस्तोत्रकथनम्। ६ ष्ठे पटले,— तारैकजटा-नीलसरस्वतीस्वरूप-तकारादिशतनामकथनम्। ७ मे पटले,— त्रिपुरसुन्दरीसकारादिशतनामस्तोत्रकथनम्। ८ मे पटले,— भुवनेश्वरीभकारादिशतनामस्तोत्रकथनम्। ९ मे पटले,— भैरवीस्वरूपभकारादिशत-नामस्तोत्रकथनम्। १० मे पटले,— छिन्नमस्तास्वरूपछकारादिशतनामस्तोत्रकथनम्। ११ शे पटले,— धूमावतीस्वरूपधकारादिशतनामस्तोत्रकथनम्। १२ शे पटले,— बगलामुखीस्वरूप-बकारादिशतनामस्तोत्रकथनम्। १३ शे पटले,— मातङ्गीस्वरूपमकारादिशतनामस्तोत्रकथनम्। १४ शे पटले,— कमलास्वरूपककारादिशतनामस्तोत्रकथनम्। १५ शे पटले,— वाग्वादिनी-स्वरूपवकारादिशतनामस्तोत्रकथनम्। १६ शे पटले,— अन्नपूर्णास्वरूपाकारादिशतनामस्तोत्र-कथनम्। १७ शे पटले,— प्रत्यङ्गिरास्वरूपशतनामस्तोत्रकथनम्। १८ शे पटले,— त्वरिता-स्वरूपतकारादिशतनामस्तोत्रकथनम्। १९ शे पटले,— दुर्गास्वरूपदकारादिशतनामस्तोत्र-कथनम्। २० शे पटले,— मातङ्गीस्वरूपमकारादिशतनामस्तोत्रकथनम्। २१ शे पटले,— कामाख्यास्वरूपककारादिशतनामस्तोत्रकथनम्। २२ शे पटले,— बालास्वरूपबकारादिशतनाम-स्तोत्रकथनम्। २३ शे पटले,— निगमशास्त्रपुराणशास्त्रादीनामुद्भवकथनम्। तत्र रुद्रयामल-ब्रह्मयामलादितः सामवेदादीनामुत्पत्तिकथनम्। अश्वक्रान्त रथक्रान्त विष्णुक्रान्तविवरणकथनञ्च। अथ अष्टाविंशत्युत्तरशतसंख्यतन्त्रशास्त्रोत्पत्तिकथनम्। तत्र तेषां नामकथनम्। यथा,— काली-तन्त्रं, मुण्डमालातन्त्रं, तारातन्त्रं, वीरतन्त्रं, शिवसारतन्त्रं, दीक्षातन्त्रं, बृहत्सारतन्त्रं, महा-सारतन्त्रं, निर्व्वाणतन्त्रं, विश्वसारतन्त्रं, तत्त्वसारतन्त्रं, वर्णसारतन्त्रं, गुरुतन्त्रं, गुप्तसारतन्त्रं, शतसहस्रतन्त्रं, लिङ्गार्च्चनतन्त्रं, भैरवतन्त्रं, भैरवीतन्त्रं, लतार्च्चनतन्त्रं, गौड़लतन्त्रं, बृहद्गौड़ल-तन्त्रं, नीलतन्त्रं, बृहन्नीलतन्त्रं, कङ्कालमालिनीतन्त्रं, महानिर्व्वाणतन्त्रं, बृहन्निर्व्वाणतन्त्रं, राधातन्त्रं, माहेश्वरीतन्त्रं, सिद्धेश्वरतन्त्रं, मातृकाभेदतन्त्रं समयातन्त्रं, सिद्धतन्त्रं, गुप्तसाधनतन्त्रं, सर्व्वस्वतन्त्रं, मातृकातन्त्रं, महातन्त्रं, शिवतन्त्रं, अभयातन्त्रं, कुमारीतन्त्रं, सारात्सारतन्त्रं, कुलार्णवतन्त्रं, कालिकाकुलसर्व्वस्वतन्त्रं, कालीकल्पतन्त्रं, कालीतन्त्रं, वाराहीतन्त्रं, योगिनी-तन्त्रं, योगिनीहृदयतन्त्रं, गौरीतन्त्रं, योगतन्त्रं, धर्म्मतन्त्रं, वीणातन्त्रं, विन्दुतन्त्रं सनत्कुमार-तन्त्रं, त्रिपुरासारतन्त्रं, योगिनीविजयतन्त्रं, महायोगिनीतन्त्रं, बृहद्योगिनीतन्त्रं, शिवार्च्चन-

तन्त्रं, शम्बरतन्त्रं, मालिनीतन्त्रं, शूलिनीतन्त्रं, महामालिनीतन्त्रं, वृहन्मालिनीतन्त्रं, कुक्कुटतन्त्रं, महामोक्षतन्त्रं, वृहन्मोक्षतन्त्रं, मोक्षतन्त्रं, गणेशतन्त्रं, शारदातन्त्रं, श्यामातन्त्रं, गोपीतन्त्रं, भूततन्त्रं, भूतलिपितन्त्रं, उड्डीशतन्त्रं, कामधेनुतन्त्रं, कामिनीतन्त्रं, मोहनतन्त्रं, मोहिनीतन्त्रं, सम्मोहनतन्त्रं, समीरणतन्त्रं, वीरभद्रतन्त्रं, महावीरतन्त्रं, कामकेशरतन्त्रं, कुलचूड़ामणितन्त्रं, चूड़ामणितन्त्रं, भावचूड़ामणितन्त्रं, चिन्तामणितन्त्रं, वरदातन्त्रं, ज्ञानार्णवतन्त्रं, हंसतन्त्रं, कालीविलासतन्त्रं, नित्यातन्त्रं, चिदम्बरतन्त्रं, विज्ञापनतन्त्रं, फेत्कारिणीतन्त्रं, उत्तरतन्त्रं, नारायणीतन्त्रं, ऊर्द्धाम्नायतन्त्रं, ज्ञानदीपतन्त्रं, निरुत्तरतन्त्रं, गौतमीयतन्त्रं, गन्धर्व्वतन्त्रं, कुब्जिकातन्त्रं, योनितन्त्रं, मुक्तावलितन्त्रं, कामाख्यातन्त्रं, श्रीक्रमतन्त्रं, स्वतन्त्रतन्त्रं, वृहच्छ्रीक्रमतन्त्रं, वालाविलासतन्त्रं, गुर्व्वर्चनतन्त्रं, तीक्ष्णतन्त्रं, कामरत्नतन्त्रं, डामरतन्त्रं, समयाचारतन्त्रं, अन्नदातन्त्रं, राजराजेश्वरीतन्त्रं, मेरुतन्त्रं, गोप्यगोपनलीलामृततन्त्रं, सङ्केततन्त्रं, महिषमर्द्दिनीतन्त्रं, मङ्गलतन्त्रं, चीनतन्त्रं, गायत्रीतन्त्रं, सिद्धलहरीतन्त्रं, ब्रह्माण्डतन्त्रं, महानिरुत्तरतन्त्रं, भूतेश्वरतन्त्रञ्च । २४ शे पटले,—कली संसर्गजपापनिरूपणम् । तत्र घटकादीच्छितब्राह्मणादीनां संसर्गपरित्यागावश्यकतानिरूपणम् । तुलसीमालातिलकाद्यलङ्कृतस्य राधे कृष्णेति मुहुर्भाषमाणस्य भिक्षापरायणस्य सङ्करणे रौरवादिप्राप्तिकथनम् । कन्याविक्रयादिदोषकथनम् । शूद्रादियाजनदोषकथनम् । शूद्रादिगमनदोषकथनञ्च । अथ तान्त्रिकप्रायश्चित्तविधिः । २५ शे पटले,— स्त्रीशूद्रबालकादीनां प्रायश्चित्तार्द्धविधानम् । अथ विस्तरतो नरकवर्णनम् । स्वर्गादिवर्णनञ्च । २६ शे पटले,— कालीतारयोः महामहाविद्यात्वकथनम् । २७ शे पटले,— हरिशयने मन्त्रसिद्ध्युपायकथनम् । २८ शे पटले,— कौलाचारस्य सर्व्वथा प्राधान्यकथनम् । कौलाचारनिरूपणम् । २९ शे पटले,— जीवन्मुक्त्युपायादिकथनम् । ब्रह्मयोगादिकथनम् । ३० शे पटले,— धर्म्मार्थकाममोक्षरूपचतुर्व्वर्गविवरणम् । ३१ शे पटले,— परममुक्तियोगविवरणम् । तत्र भक्तियोगविवरणम् । ३२ शे पटले,— महायोगकथनम् । तत्र विस्तरतः धर्म्मयोगादिकथनम् । ३३ शे पटले,— महामोक्षकल्पकथनम् । तत्र ब्रह्मयोगप्राणायामस्वरूपादिकथनञ्च । ३४ शे पटले,— वर्णमालाविवरणम् । अन्तर्मालाकथनम् । ३५ शे पटले,— अं अः परविन्दुप्रकरणे लकारद्वयविवरणम् । ३६ शे पटले,— महाक्षरमालाविवरणम् । तत्र सहस्रारपद्मस्वरूपादिकथनञ्च । ३७ शे पटले,— वर्णब्रह्मलोचकथनम् । ३८ शे पटले,— अन्तर्होमविधिः । तत्र आब्रह्म-स्तम्बपर्य्यन्तं मन्त्रपुटादिविवरणञ्च । ३९ शे पटले,— शून्यस्थब्रह्माण्डगोले कालराज्यादिविवरणम् । ४० शे वहिर्यागविधिः । तत्र कुलकादिस्वरूपकथनम् । ४१ शे पटले,— वहिर्यागलक्षणादिकथनम् । ४२ शे पटले,— प्राणायामस्वरूपादिकथनम् । ४३ शे पटले,— भूतशुद्ध्यादिविधिः । ४४ शे पटले,— ऋष्यादिन्यासविधिः । षोढ़ान्यासादिविधिश्च । ४५ शे पटले,— षोड़शोपचारविधिः । तत्र यन्त्रपुष्पादिविवेचनम् । मुद्रालक्षणकथनञ्च । ४६ शे पटले,— वहिर्यागान्तर्यजनयोः स्मरण-

कीर्त्तनादिविधिः । ४७ शे पटले गायत्रीजपविधिः । ४८ शे पटले,— गायत्रीस्तोत्रकथनम् । ४९ शे पटले,— होमविधिः । बलिदानविधिश्च । ५० शे पटले,— एकादशाश्रमकथनम् । सन्न्यासिलक्षणादिकथनम् । दण्डिलक्षणकथनम् । अवधूतलक्षणादिकथनम् । वानप्रस्थादि-लक्षणकथनम् । ५१ शे पटले,— ब्राह्मणलक्षणकथनम् । ५२ शे पटले,— मन्त्रदात्रादिगुण-लक्षणकथनम् । हंसादिस्वरूपकथनञ्च । ५३ शे पटले,— महापुरश्चरणादिविधिः । ५४ शे पटले,— षट्चक्रविवरणम् । तत्र विशेषतो मूलाधारविवरणञ्च । ५५ शे पटले,— स्वाधिष्ठान-विवरणम् । ५६ शे पटले,— मणिपूरचक्रविवरणम् । ५७ शे पटले,— अनाहतचक्रविवरणम् । ५८ शे पटले,— विशुद्धचक्रविवरणम् । ५९ तमे पटले,— आज्ञाख्यचक्रविवरणम् । ६० तमे पटले,— विस्तरतः सहस्रदलविवरणम् ।६१ तमे पटले,— भक्तिस्वरूपादिकथनम् । सत्सङ्गादि-माहात्म्यकथनम् । वेदादिलक्षणञ्च । ६२ तमे पटले,— ब्रह्मज्ञानयोगकथनम् । अमरयोग-कथनञ्च । ६३ तमे पटले,— ब्रह्मयोगविवरणम् । ६४ तमे पटले,— ब्रह्मणः स्थूलसूक्ष्मादिरूप-कथनम् । सुखदुःखयोः स्वरूपादिकथनञ्च ॥ इति शम् ।

No. 279. महिम्नःस्तवकौमुदी. By गोविन्दानन्दतर्काचार्य्यः. Substance, country-made paper, $13 \times 2\frac{1}{2}$ inches. Folia, 11. Lines, 7 on a page. Extent, 298 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganas, Paṇḍita Haraprasāda Çāstrī. Appearance, old. Prose. Generally correct.

सत्यमेव जयते

Beginning. ॐ नमो गणेशाय ॥

श्रीगोविन्दपदद्वन्द्वनखेन्दुरश्मिसन्ततिः ।
अस्तचिन्तातिसम्भ्रान्तचित्तध्वान्तं धुनोतु मे ॥
क्रियते श्रीमता तातपादरेणूपदेशतः ।
गोविन्दसुधिया शस्तो महिम्नः स्तवकौमुदी ॥ इत्यादि ।

End. कुसुम इति ॥ पुष्पदन्तनामा गन्धर्व्वराजः इन्दुमौलेर्महादेवस्य दासः अस्य निर्म्माल्यलङ्घनेन रोषात् निजमहिम्नो भ्रष्टः सन् स्तवनमकार्षीत् कीदृशं स्तवनं × × × गुरु गूढार्थं दिव्यानां देवानां दिव्यमुपादेयं इत्यर्थः ॥

Colophon. इति श्रीगोविन्दानन्दाचार्य्यविरचिता महिम्नः स्तवकौमुदी समाप्ता ॥ ० ॥

विषयः । पुष्पदन्तप्रणीतस्य "महिम्नः पारन्ते" इत्यादिस्तवस्य व्याख्यानम् ।

No. 280. **महिम्नःस्तवपञ्जिका .** Substance, country-made paper, 15 × 3 inches. Folia, 9. Lines, 9 on a page. Extent, 364 çlokas. Character, Bengali. Date, Sk. 1774. Place of deposit, District Vā̃kuḍā Viṣṇupura, Kādākuli, Paṇḍita Rāmaprasanna Bhaṭṭācāryya. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ॥

अनुसर सततं प्रभोः स्वरूपं
शमयति यः परमापदो नराणाम् ।
श्रितकमलतरोः शशाङ्कमौले-
र्निरुपमलोचन × × नूपुराङ्घ्रिः ॥
स्तोत्रराज-सुविस्तीर्ण-दुर्ब्बोध-पदपञ्जिका ।
श्लोकपाठविशुद्ध्यर्थं क्रियते पञ्जिका मया ॥
पुरा किलासीद्दक्षिणापथे शान्तिकर्णिनामन्दपतेरुद्याने शिवनिर्म्माल्यलङ्घनाद्व्याहतगतिः पुष्पदन्तनामा कश्चन गन्धर्व्वस्तत्राभून्महादृष्टात्मा । अनन्तरं स्वर्गगमनाय बन्धनमोचनाय च स्तुतिमिमां चकार सः ॥ इत्यादि ।

End. असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रं
सुरतरुवरशाखा लेखनी पत्रमुर्व्वी ।
लिखति यदि गृहीत्वा सारदा सर्व्वकालं
तदपि तव गुणानामीश पारं न याति ॥
श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरिप्रियेण
कण्ठस्थितेन पठितेन गृहाश्रितेन
संप्रीणितो भवति भूतपतिर्म्महेशः ॥

Colophon. इति पुष्पदन्तविरचितमहिम्नःस्तोत्रटीका समाप्ता ॥ * ॥ शकाब्दाः १७७४ ।

विषयः । पुष्पदन्तविरचितस्य महिम्नःस्तोत्रस्य व्याख्यानम् ।

No. 281. **महिम्नःस्तवरहस्यप्रकाशः .** By **जगदीशपञ्चाननभट्टाचार्य्यः .** Substance, country-made paper, 20 × 4 inches. Folia, 20. Lines, 6 on a page. Extent, 817 çlokas. Character, Bengali. Date, Sk. 1570. Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Haraprasāda Çāstrī. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

अर्द्धस्थाणुविलग्नाप्यर्द्धमपर्णाभिता कापि ।
अधिकफलजननयित्री भवतां भूत्यै चिरं भूयात् ॥
पुष्पदन्तसम्यग्गीतस्तवे सम्प्रति शूलिनः ।
विदुषा जगदीशेन रच्यस्यार्थः प्रकाश्यते ॥ इत्यादि ।

End. वाग्देवताया अथाध्यत्नेन सुतरां देवतान्तरमतिदूरपरागतमिति । पारं समाप्तिं । याति प्राप्नोति । पचत्रयेऽपि तुल्यमिति दिक् ।

Colophon. इति श्रीजगदीशपञ्चाननभट्टाचार्य्यविरचितः श्रीशिवमहिम्नःस्तवरहस्यप्रकाशः सम्पूर्णः ॥ हरये नमः शुभमस्तु शकाब्दाः १५७० ता० १५ चैत्र ।

विषयः । पुष्पदन्तप्रणीतस्य "महिम्नः पारन्ते" इत्यादिस्तवस्य व्याख्यानम् ॥

No. 282. महिषमर्दिनीतन्त्रम् . Substance, country-made paper, 6 x 3 inches. Folia, 9. Lines, 5 on a page. Extent, 95 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā, District 24-Parganās, Paṇḍita Navinacandra Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning. नमः परदेवतायै ॥ श्रीचण्डिकोवाच ॥

प्रासादं मण्डपं वापीं यदि देवै निवेदयेत् ।
विधानं तस्य माहात्म्यं वद मे परमेश्वर ॥
श्रीशङ्कर उवाच ।
शृणु देवि प्रवक्ष्यामि येन प्रासादमुत्सृजेत् ।
तस्यैव पश्चिमे भागे वेदिकां चतुरस्त्रिकाम् ॥
प्रकुर्य्याद्धृदयत्नेन वस्त्रेण वेष्टनञ्चरेत् ।
तदभावे महेशानि तृणेन वेष्टयेत् सुधीः ॥ इत्यादि ।

End. गुरोरङ्गं महेशानि देवताकारमुत्तमम् ।
गुरोः क्रिया महेशानि पूजामूलं महत् पदम् ॥
गुरोर्वाक्यं मूलमन्त्रं परं ब्रह्ममयो गुरुः ।
अनेन विधिना देवि भावयेत् प्रत्यहं गुरुम् ॥
तदैव सकला सिद्धिर्जायते कमलेक्षणे ॥ ० ॥

Colophon. इति महिषमर्द्दिनीतन्त्रे देवीदेवसंवादे दशमः पटलः ॥ ० ॥ श्रीदुर्गा ।

विषयः । देवीप्रासादाद्युत्सर्गनिरूपणम् । गुरुपूजाविधानादिनिरूपणञ्च ।

No. 283. महोड्डीशतन्त्रम्. Substance, country-made paper, 8×4 inches. Folia, 21. Lines, 11 on a page. Extent, 462 çlokas. Character, Nāgara. Date, Sambat 1821. Place of deposit, at the Kālimaṭha, Ramnā, Ḍhākā. Appearance, tolerable. Prose and verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।

उड्डीशे च समाकीर्णे योगिवृन्दसमाकुले ।
प्रणम्य शिरसा गौरी परिपृच्छति शङ्करम् ॥
विशेषेण तु तन्त्रं कथयस्व प्रभो मम ।
अन्यांश्च विविधैः कार्य्यान् मन्त्रांश्च ब्रूहि भैरव ॥
ईश्वर श्रोतुमिच्छामि लोकनाथ जगद्गुरो ।
प्रसादं कुरु मे देव ब्रूहि कर्म्मार्थसाधनम् ॥
शुभङ्कर महाभाग सर्व्वसिद्धिप्रदायक ।
पृच्छामि त्वां जगन्नाथ संसारस्थितिकारणम् ॥
पृच्छामि देवदेवेश लोकानां हितकाम्यया ।
वशीकरणमुच्चाटं मोहनं स्तम्भनं तथा ॥
शान्तिकं पौष्टिकं कर्म्म विविधानि महेश्वर ।
चतुर्व्वानि मनोहानिः श्रुतिहानिस्तथैव च ॥
ज्ञानहानिः क्रियाहानिः कीलकञ्च तथापरम् ।
कार्य्यलक्षः सुरेशान शोषणं पोषणं तथा ॥
तदुद्दिश्यापि विशेषेण तत्परं ब्रूहि मे प्रभो ।
अन्यांश्च विविधान् कार्य्यान् साक्विकान् ब्रूहि भैरव ॥ (?) इत्यादि ।

End. लोहत्रिशूलं कृत्वा विषरुधिरलिप्तमनुतेनाभिमन्त्रितं यस्य नाम्ना भूमौ लिखति तस्योपरि त्रिशूलं रोपणीयम् । तस्य मृत्युर्भवति । पलाशबीज भेदा करीये मन्दारको दुधसों पुटदेव ।२०१। फेरि दुधसों गोलि बांधि राखलु । जहां विछु मारै तहां मन्दारके दुधसे घसि लगावै विछु अवश्य उतर जाइ ॥

Colophon. इति श्रीमहान् उड्डीशोऽगात् समाप्तिम् ॥ संवत् १८२१ ।

विषय: । आकर्षणविधिः । उन्मादनविधिः । विद्वेषणविधिः । उच्चाटनविधिः । स्तम्भनविधिः । वशीकरणविधिः । अन्धीकरणविधिः । मूकीकरणविधिः । गात्रसङ्कोचनविधिः । खञ्जीकरणविधिः । भूतज्वरकरणविधिः । शस्त्रशास्त्रदूषणविधिः । पानीयशोषणविधिः । दधिमधुनाशनविधिः । मद्यकरणविधिः । गजवाजिप्रकोपनविधिः । भुजगावेशनविधिः । सर्पविनाशनविधिः । पुरप्रवेशनादिविधिः । वेतालसिद्धिकथनम् । पादुकासिद्धिकथनम् । अञ्जनादिविधिः । क्वचित् क्वचित् हिन्दीभाषया तत्तत्प्रक्रियादिकथनञ्च । इति शम् ।

No. 284. मातृकाभेदतन्त्रम् . Substance, country-made paper 19 × 5 inches. Folia, 36. Lines, 5 on a page. Extent, 664 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Mājhapāḍā, Bābu Rāsavihārī Rāya. Appearance, new. Verse. Incorrect.

Beginning. ॐ नमः परदेवतायै ॥

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
पप्रच्छ परया भक्त्या भैरवं परमेश्वरम् ॥
श्रीचण्डिकोवाच ।
त्रिपुरापूजनं नाथ सर्व्वरत्नैर्विशेषतः ।
कलिशेषे सर्व्वरत्नं गुप्तभावं तथा मणिम् ॥
केनोपायेन देवेश स्वर्णरत्नादि लभ्यते ।
तद्वदस्व विशेषेण यथा रत्नादिकं भवेत् ॥
यन्नोक्तं सर्व्वतन्त्रेषु तद्वदस्व दयानिधे ।
श्रीशङ्कर उवाच ।
शृणु देवि प्रवक्ष्यामि यथा रत्नादिकं भवेत् ।
मन्त्रजसा पावकेन किं रत्नं न हि लभ्यते ॥
यथा सामुद्रकेणैव शुभसम्बलकेन च ।
समूलस्य प्रकारं हि शृणु देवि प्रयत्नतः ॥
चीनतन्त्रानुसारेण पूजयेत् सिद्धकालिकाम् ।
अथवा पूजयेद्देवीं दक्षिणां कालिकां पराम् ॥
कालीतन्त्रोक्तविधिना सम्यक् जपपूजनम् ।
सत्ये चैकगुणं त्रेतायां द्विगुणं द्वापरे त्रयम् ॥

एवं सर्व्वत्र जानीयाच्चतुर्गुणजपं कलौ ।
आनीय बकयन्त्रेन सम्बलं तोलकद्वयम् ॥
वह्नि वाद्यं शिवं चाद्यं मायाबिन्दुविभूषितम् ।
बीजत्रयं चाष्टशतं प्रजपेत् सम्बलोपरि ॥
अशीतितोलकं मानं कृष्णाधेनुसमुद्भवम् ।
दुग्धमानीय यत्नेन चाष्टोत्तरशतं जपेत् ॥
वस्त्रयुक्तेन सूत्रेण दुग्धमध्ये विनिःक्षिपेत् ।
उत्तापं जनयेद्धीमान् मन्दमन्देन वह्निना ॥ इत्यादि ।

End. अभक्त्या परमेशानि यदि धारणमाचरेत् ।
जपपूजादिकं तस्याः सन्दहेत् तेन तेजसा ॥
श्रीचण्डिकोवाच ।
प्राणान्तेऽपि च कर्त्तव्यं पूजनं मोक्षदायकम् ।
न यजेद् यदि मोहेन सैव पापनशी भवेत् ॥

Colophon. इति मातृकाभेदतन्त्रे चतुर्दशः पटलः ॥

विषयः । चण्डिकया सह शङ्करस्य संवादेन स्वर्णरत्नादिप्राप्त्युपायकथनम् । तत्र स्वर्णादिलिप्सया युगभेदेन जपपूजादिनियमः । कारणस्य शुद्धीकरणविधिः । कारणस्य गन्धहीनत्वकरणविधिश्च । अथ पुत्रोत्पादनकारणकथनम् । तत्र नाभिपद्मादिनिरूपणञ्च । अथ भोगेनैव मोक्षप्राप्तिकथनम् । कुण्डलिनीमुखे आहुतिक्रमकथनम् । प्रसङ्गात् होमकुण्डविधिः । आहुतिपरिमाणादिकथनम् । ब्राह्मणानां कारणपानाधिकारकथनम् । ब्राह्मणलक्षणादिकथनम् । कारणग्रहणविधिः । शिवनिर्म्माल्यग्रहणविधिः । गङ्गामाहात्म्यकथनम् । सुरादेवीमाहात्म्यकथनम् । महामालामाहात्म्यकथनम् । महामालाया गङ्गाजलस्पर्शदोषकथनञ्च । अथ पारदभस्मीकरणक्रमकथनम् । स्वयम्भूकुसुमादिनिरूपणम् । पारदभस्मपरीक्षाप्रकारः । पारदभस्ममाहात्म्यकथनञ्च । अथ रोगभयादिनिवारणोपायकथनम् । ततः चामुण्डामन्त्राराधनाविधिः । तत्र चण्डीपाठक्रमकथनम् । तत्पाठमाहात्म्यकथनञ्च । अथ त्रिपुरामहामन्त्रादिकथनम् । तत्र प्रातःकृत्यादिकथनम् । गुरुस्तोत्रादिकथनम् । गुरुकवचकथनम् । श्रीविद्याध्यानादिकथनम् । शिवपूजां विना शक्तिपूजायामनधिकारकथनम् । शिवपूजाधारादिनिरूपणम् । शिवलिङ्गगठनादिविधिः । तत्र पारदशब्दनिर्व्वचनम् । पारदलिङ्गपूजामाहात्म्यादिकथनम् । पारदताडनादौ शान्तिविधिः । तद्विषये मत्स्यताम्बूलादिविधिः । पारदभस्मक्रमकथनम् । तत्र होमद्रव्यकथनञ्च । अथ महिषादिबलिदानक्रमकथनम् । शक्तिविषये बलिदानस्यावश्यकत्वकथनम् । मातृकाभेदतन्त्रश्रवणादिमाहात्म्यकथनञ्च । अथ प्रासादादिप्रतिष्ठाविधिः ।

तान्त्रिके कर्म्मणि तन्त्रधारकादेरनावश्यकत्वकथनञ्च । अथ कूपादिदानविधिः । तत्फलादि-कथनञ्च । अथ यज्ञे स्रुवादिपरिमाणकथनम् । अथ पूजाधारनिरूपणम् । तत्र घटस्थापनादि-विधिः । यन्त्रसन्निधाने प्रतिमादिकरणदोषकथनम् । बिल्वपत्रमाहात्म्यकथनम् । लिङ्गपूजादि-माहात्म्यकथनञ्च । अथ शक्तिभेदनिरूपणम् । मन्त्रग्रहणविधानादिः । मालाग्रहणादिविधिः । जपविधिः । दिव्यवीरादिभावलक्षणादिकथनम् । ब्राह्मणादिभेदेन मोक्षाधिकारनिरूपणम् । साधिकाया लक्षणादिकथनञ्चेति ।

No. 285. **मायातन्त्रम् .** Substance, country-made paper, 16 × 5 inches. Folia, 5. Lines, 6 on a page. Extent, 140 çlokas. Character, Bengali. Date, ? Place of deposit, Calcutta Çyāmavāzāra, Viçvakoṣa office, Bābu Nagendranātha Vasu. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीमहादेव उवाच ।

शृणु प्रिये प्रवक्ष्यामि योगसाधनमुत्तमम् ।
विना भावेन देवेशि न सिध्येत कदाचन ॥
त्रिधा भावो महेशानि साधकानां सुखप्रदः ।
वरं मुक्तिमवाप्नोति भावाद्धि साधकाग्रणीः ॥
पशुभावस्थितो मन्त्री बहुक्लेशेन सिध्यति ॥ इत्यादि ।

End. तथैवासितपक्षे तु पञ्चदश्यां निशार्द्धके ।
पूजयेच्च फलैर्लक्षैः शक्तितो वापि कालिकाम् ॥
भाद्रे मास्यसिते पक्षे रोहिणीसहिताष्टमी ।
तस्यां निशार्द्धसमये पूजयेच्चण्डिकां पराम् ॥
नभस्ये शुक्लपक्षे तु नवमी दौर्गसंज्ञिता ।
तस्यां प्रपूजयेद्दुर्गां शतपत्रे महेश्वरि ॥ ० ॥

Colophon. इति मायातन्त्रे सप्तदशः पटलः ।

विषयः । अत्र प्रथमं भावादिनिरूपणम् । ततो भुवनेश्वरीकवचादिः । चण्डीपाठ-विध्यादिः । चण्डीपाठफलादिकथनञ्च । अथ दिव्यपश्वादिभावत्रयनिरूपणम् । कलौ ज्ञानो-पायादिनिरूपणञ्चेति ।

No. 286. मुक्तिकोपनिषद् . Substance, country-made paper, 10 × 6 inches. Folia, 7. Lines, 11 on a page. Extent, 173 çlokas. Character, Bengali. Date, ? Place of deposit, Teliveni *viâ* Gadveta, District Medinîpura, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ तत् सत् ॥ अथ मुक्तिकोपनिषत् ।
ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः हरिः ॐ ॥
ॐ अयोध्यानगरे रम्ये रत्नमण्डपमध्यमे ।
सीता-भरत-सौमित्रि-शत्रुघ्नाद्यैः समन्वितम् ॥
सनकाद्यैर्मुनिगणैर्वशिष्ठाद्यैः शुकादिभिः ।
अन्यैर्भागवतैश्चापि स्तूयमानमहर्निशम् ॥ इत्यादि ।

End. तदेतत् तदृचाभ्युक्तं तद्विष्णोः परमं पदम् ।
सदा पश्यन्ति सूरयः दिवीव चक्षुराततम् ॥
तद्विप्रासोऽतद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत् परमं पदं ॐ सत्यमित्युपनिषत् सत्यमित्युपनिषत् ॥
ॐ पूर्णमदः इति शान्तिः । ॐ तत् सत् ।

Colophon. इति शुक्लयजुर्वेदगता मुक्तिकोपनिषत् समाप्ता ॥ * ॥

विषयः । मुक्त्युपायादिनिरूपणम् ।

No. 287. मुक्तिविचारः . Substance, country-made paper, 18 × 2½ inches. Folia, 8. Lines, 7 on a page. Extent, 357 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍā, Viṣṇupura, Kāḍākuli, Paṇḍita Rāmaprasanna Bhaṭṭācāryya. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय ॥ अथ कस्तावदपवर्गः तत्रात्यन्तिकी दुःखनिवृत्तिरपवर्गः इत्याचार्य्यप्रभृतयः । तत्र निवृत्तिः ध्वंसः । तस्यात्यन्तिकत्वञ्च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वं स्वसमानाधिकरणदुःखासमानकालीनत्वं वा । मुक्त्यनन्तरञ्च तस्य पुंसो दुःखानुत्पादात् । इत्यादि ।

End. न लेकपचो विश्वमः प्रयातीति तद्वत् तादृशकर्म्मणां तत्त्वज्ञानस्य प्रतिबन्धकदुरितनिवर्त्तकतया प्रागपेक्षितत्वेऽपि गौणदर्शितत्वेनोपकारत्वेन उभाभ्यामुपपत्तेः तेषां मुक्तिकारणत्वे मानाभावादित्यास्तां विस्तरः ॥

Colophon. इति समाप्तोऽयं मुक्तिविचारः ॥

विषयः । विचारमुखेन मुक्तिनिरूपणम् ।

No. 288. मुग्धबोधटीका . By कार्त्तिकेयसिद्धान्तः . Substance, country-made paper, 20 × 4 inches. Folia, 217. Lines, 7 on a page. Extent, 9,399 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Haraprasāda Çāstri. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य पार्व्वतीशानौ मूढानां ज्ञानदौ यतः ।
क्रियते मुग्धबोधस्य टीकेयं यत्नतो मया ॥
यद्यहं श्रीकार्त्तिकेयो मन्दबुद्धिस्तथापि च ।
पूर्व्वकोविदपन्थानमवलम्ब्य-चिकीर्षितम् ॥
सारांशः प्राज्ञविधेयो वरमेकं पदानतः ।
यदर्थं यस्य संचिन्त्य तस्य कार्य्या परिष्क्रिया ॥

अन्यान्यव्याकरणविद्यावदिद्द्गणगुणनिचयाशेषविज्ञमयूरमञ्जुलकुञ्जरधरपराभूतसंख्यावद्विवेकद्विरदोदारनिपत्नीकरण-प्रकृतमुग्धबोधार्थकठिनकूटपद्यास्य-श्रीमन्महामहोपाध्यायाशेषवुधाचक्रार-जनशार्दूल-चातुर्य्यार्णवतरणैक-तरणि-विविधविद्यावज्ज्ञानसम्पादक-श्रीमन्महोवरवोपदेवचरणसरसीरुहं शिरसा विधृत्य तत्कृतमुग्धबोधव्याकरणाङ्गीभूत अ इ उ इत्यादि बहुलं प्रस्तुणीत्यन्तर्गतस्वबावस्था यथामति व्याख्यानमारभते । इत्यादि ।

End. स्वादिः । स आदिर्यस्य सः । चैत्राचुदसवो ऽरित्यनेन विहितो योऽप्रत्ययः तमारभ्य एतत् पादसमाप्तिपर्य्यन्तं ये प्रत्यया उक्तास्ते तसंज्ञाः तद्धित संज्ञाः स्युरित्यर्थः॥ इति पादः । स्वादिरन्ते येषां तानि स्वाद्यन्तानि पदानि तेषामध्यायः स्वाद्यन्ताध्यायः । सुवन्ताध्यायः इति पाणिनीयाः ।

Colophon. इति श्रीकार्त्तिकेयसिद्धान्तसंग्रहीत-तद्धितपादटिप्पनी सम्पूर्णा ॥०॥ श्रीरामः

विषयः । बोपदेवगोस्वामिकृतस्य मुग्धबोधव्याकरणस्य टीका ।

No. 289. मुग्धबोधपरिशिष्टम्. By नन्दकिशोरशर्म्मा. Substance, country-made paper, 14×4 inches. Folia, 17. Lines, 6 on a page. Extent, 302 çlokas. Character, Bengali. Date, ? Place of deposit, Rājapura, Post office, Sonārpur, District 24-Parganās, Paṇḍita Rājendranārāyaṇa Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य गौरीचरणौ सुरार्च्चितौ
बहुश्रिवन्यानवलोक्य यत्नतः ।
सुमौग्धबोधं परिशिष्टमुच्यते
समासतो नन्दकिशोरशर्म्मणा ॥ इत्यादि ।

End. बहुत्वे वर्त्तमानात् पुंस्यार्थात् परात् पुनर्वर्षोर्बहुत्वे द्विवचनं न स्यात् । नित्यं द्वन्द्वे । उभयः उभये । दारादेर्व्वम् । दारादेरेकत्वद्वित्वयोरपि बहुवचनं स्यात् । दाराः वर्षाः जलौकसः आप इत्यादि ।

Colophon. इति मुग्धबोधपरिशिष्टे कारकप्रकरणं समाप्तम् ।

विषयः । मुग्धबोधव्याकरणानुक्तानां विषयाणां पूरणम् । अत्र च सन्धिप्रकरणम् शब्दप्रकरणम् । णत्वप्रकरणम् । षत्वप्रकरणम् । कारकप्रकरणञ्चेति पञ्च प्रकरणानि सन्ति ।

सत्यमेव जयते

No. 290. मूर्त्तिप्रतिष्ठा. Substance, country-made paper, 13×6 inches. Folia, 18. Lines, 9 on a page. Extent, 600 çlokas. Character, Bengali. Date, ? Place of deposit, Tamluk, Kelomāl, Bābu Amaranātha Ghoṣa. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीकृष्णाय नमः ।
श्रीचैतन्यप्रतिष्ठोऽस्मि शरणं सुष्ठु येन हि ।
आविष्टो याति दुष्टोऽपि प्रतिष्ठां सद्भिरुन्नतां ॥
अथ श्रीमूर्त्तिप्रतिष्ठा ।
प्रतिष्ठयैव भगवदाविर्भावो विशेषतः ।
प्रतिमासु ततस्तासां प्रतिष्ठां विधिनाचरेत् ॥
तथाचोक्तमेकादशस्कन्धे श्रीभगवता । प्रतिष्ठाञोवमन्दिरमिति ॥ अथ प्रतिष्ठालक्षणम् । श्रीहयशीर्षपञ्चरात्रे ।

परमात्मा हरिर्देवस्तच्छक्तिः श्रीरिहोदिता ।
श्रीर्देवी प्रकृतिः प्रोक्ता केशवः पुरुषः स्मृतः ॥ इत्यादि ।

End. पञ्चाङ्गुलप्रमाणेन त्रिकाद्विस्तार उच्यते ।
निम्नं करतलं कुर्य्यात् शुभरेखाविभूषितम् ॥
अतःपरं खण्डितम् ।

विषयः । अत्र प्रथमं प्रतिष्ठालक्षणम् । ततः प्रतिष्ठामाहात्म्यनिरूपणम् । शिल्पिकृत्यादिनिरूपणम् । शिलालक्षणादिनिरूपणम् । मूर्त्तिनिर्माणादिप्रकारनिरूपणञ्चेति ।

No. 291. मृत्युञ्जयगीता. Substance, country-made paper, 12×2 inches. Folia, 51. Lines, 6 on a page. Extent, 1,062 çlokas. Character, Bengali. Date, Sk 1713. Place of deposit, District Mayamanasimha, Serapura, Paṇḍita Candrakānta Tarkālaṃkāra. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः काल्यै ॥
कैलासशिखरे रम्ये नानारत्नविभूषिते ।
नानावृक्षलताकीर्णे नानापक्षिरवैर्युते ॥
चतुर्मण्डपसंयुक्ते शृङ्गारमण्डपान्विते ।
समाधौ संस्थितं शान्तं क्रीडन्तं योगिनीप्रियम् ।
तत्र मौनधरं दृष्ट्वा देवी पप्रच्छ शङ्करम् ॥
देव्युवाच ।
किं त्वया जप्यते नाथ किं त्वया स्मर्य्यते सदा ।
सृष्टिः कुत्र विलीनास्ति पुनः कुत्र प्रजायते ॥
ब्रह्माण्डकारणं तत्र किमाद्यं कारणं महत् ।
मनोरथमयी सिद्धिस्तथा वाञ्छामयी शिव ॥ इत्यादि ।

End. स्थिरो मनो भवेन्नित्यं चिन्ता-निद्राविवर्जितः ।
आत्मा संजायते सिद्धिर्नान्यथा शिवभाषितम् ॥
य इदं पठते नित्यं शृणोति च दिने दिने ।
सर्व्वपापविशुद्धात्मा शिवलोकं स गच्छति ॥
ब्रह्मज्ञानमिदं शास्त्रं समयं शिवभाषितम् ।
अमरीगाः स्वयं मार्गे इति शास्त्रस्य निर्णयः ॥

Colophon. इति मृत्युञ्जयगीतायां हरगौरीसंवादे ब्रह्मचिन्ता नाम प्रथमोऽध्यायः ॥ ० ॥ ॐ तत्सत् ॥ ० ॥ श्रीगुरुचरणे भक्तिरस्तु शकाब्दाः १७१३ ।

विषयः । जपस्मरणस्तोत्रादिनिरूपणमुखेन जगतः स्थितिध्वंसकारणादिनिरूपणम् । तथा ब्रह्मचिन्तासिद्ध्यादिनिरूपणञ्च ॥

No. 292. मृत्युञ्जयमन्त्रोद्धारटीका (सारदाख्या). Substance, country-made paper, $18 \times 3\frac{1}{2}$ inches. Folia, 2. Lines, 7 on a page. Extent, 68 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha, Kāṭihāli, Paṇḍita Ānandakiçora Nyāyālaṃkāra. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो मृत्युञ्जयाय । अथ मृत्युञ्जयमन्त्रोद्धारटीका । शान्त्यर्थमित्यादि अस्यार्थः । मृत्युञ्जयनाम यन्त्रं समासतः संक्षेपतः प्रवक्ष्यामि किमर्थं सर्व्वलोकानां शान्त्यर्थम् ॥ इत्यादि ।

End. शुभे दिने रिक्तेतरे तिथौ शनिकुजवारे शान्त्युत्तरे काले तस्मिन् भुवि निःक्षिपेत् ।

Colophon. इति सारदायां टीकायां मृत्युञ्जयप्रकरणं समाप्तम् ॥ ० ॥

विषयः । मृत्युञ्जयमन्त्रोद्धारटीका ।

No. 293. मेघदूतटीका. Substance, country-made paper, 13×3 inches. Folia, 22. Lines, 10 on a page. Extent, 1,127 çlokas. Character, Bengali. Date, Sk. 1751. Place of deposit, District Vākuḍā, Viṣṇupura, Paṇḍita Raghurāma Tarkaratna. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीशिवाय नमः । कश्चिदित्यादि । कश्चिद्यक्षो रामगिर्य्याश्रमेषु वसतिं चक्रे कृतवान् । अभिशप्तत्वादस्य नाम न कीर्त्तितम् । तथाच ।

न नामग्रहणं कुर्य्यात् कृपणस्य गुरोरपि ।
अभिशप्तस्य पत्न्याश्च जनकस्य विशेषतः ॥ इति ।

रामेणाश्रितो गिरौ रामगिरिः । तस्याश्रमा रामगिर्य्याश्रमास्तेषु विरहानलसन्तप्तोऽयं नैकत्र वसतीति आश्रमस्य बहुत्वं वर्णितम् । अत्र स्थित्वा श्रीरामः कान्तामचिरेण लेभे अतोऽहमपि कान्तामचिरेण लप्स्ये इति स्थानान्तरमनादृत्य तत्र वसतिं चक्रे इत्यभिप्रायः । इत्यादि ।

End. एतत् कृत्वेत्यादि ॥ हे जलद मेघ एतत् प्रियसमुचितं प्रियस्योचितं कार्य्यं कृत्वा इष्टान् विचर गच्छ मे किम्भूतस्य प्रार्थनाचेतसः प्रार्थनायां चेतो यस्य तस्य सौहार्दात् स्नेहात् विधुरोऽनिदुःखितोऽयमिति मयि अनुक्रोशबुद्ध्या वा । कृपा दयानुकम्पा स्यादनुक्रोशोऽपीत्यमरः । त्वं किम्भूतः प्रावृषा वर्षाभिः संभृतश्रीः । ते तव चणमप्येवं यथा मम प्रियया वियोगः तथा विद्युता विप्रयोगो माभूत् न भूयात् मायोगे ऽशिषि लुङ् ॥ * ॥

Colophon. इति मेघदूताख्यकाव्यटीका समाप्ता ॥ * ॥ ॐ शिवः शरणम् । शकाब्दाः १७५१ ।

विषयः । कालिदासकृतस्य मेघदूतकाव्यस्य व्याख्यानम् ।

No. 294. मेरुतन्त्रम् . Substance, country-made paper, 16 x 6 inches. Folia, 282. Lines, 12 on a page. Extent, 14,170 çlokas Character, Bengali. Date, ? Place of deposit, Calcutta, Çyāmavāzāra, Viçvakoṣa office, Bābu Nagendranātha Vasu. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीश्रीगणेशाय नमः ॥

यथासत् सदिवाभाति न च भाति कदापि सत् ।
यस्मिन् ज्ञानेन सा भाति तस्मै तस्मै नमो नमः ॥
जलन्धरेण विजिते सुरासुरनरेऽखिले ।
सूक्ष्मरूपेण ते सर्व्वे महेशं शरणं गताः ॥
दिव्यान्यब्दसहस्राणि समाधिस्थं विलोक्य तम् ।
प्रार्थिता चार्च्चिता तैस्तु वामदक्षिणमार्गिभिः ॥
अमरा सदा बोधयुता नत्वा तं संव्यजिज्ञपत् ।
ध्यायन्ति विधिहर्य्याद्यास्त्वां त्वं ध्यायसि कं पुनः ॥
मां वदन्ति परां शक्तिं त्वां वदन्ति परं शिवम् ।
आवयोरपि किं ध्येयं तत्त्वं मे कृपया वद ॥
इति श्रुत्वा वचस्तस्याः स्मृत्वा किञ्चिन्महेश्वरः ।
उपवेश्य विधात्रादीन् वाक्यमेतदुवाच ह ॥
नराणां परमं ह्यङ्गेरायुः सौराः शतं समाः ।
तदब्दं देवयोनीनां दिनमायुश्च तच्छृतम् ॥

वर्द्धते परमं तस्य मानं कलियुगस्य तत् ।
धर्म्मार्द्धसार्द्धसंपूर्णं धर्म्माणान्तं प्रमाणतः ॥ (?)
इदं भूमैलनिष्ठतमैन्द्रायुर्मानवं परम् ।
ज्ञातप्रमाणमब्दन्तु समये कायपूरकः ॥ (?)
एवमिन्द्रैरिन्द्रसंख्यैर्ब्रह्मणो दिनमुच्यते ॥ इत्यादि ।

End. ध्यात्वैव विधिना देवं पूजयेदिष्टसिद्धये ।
दासाद्यैरङ्गकैश्चापि महिषीभिश्च तत्परम् ॥
वसुदेवादिभिः पश्चात् कल्पवृक्षैरनन्तरम् ।
इन्द्राद्यैश्च तदस्त्रैश्च सप्तावरणसंयुतम् ॥
अर्च्चयित्वा तु गोविन्दं विधिवत् साधकोत्तमः ।
नैवेद्यं काञ्चने पात्रे पूर्वोक्तञ्च निवेदयेत् ॥
अष्टाधिकं शतं पश्चाद्धुनेत् साधु पयोधसा ।
शर्कराघृतयुक्तेन वलिं पश्चात् प्रकल्पयेत् ॥
देवर्षियोगिसर्वेभ्योऽप्युपदेवेभ्य आदरात् ।
शश्वद्भक्तियुतो विद्वान् भक्तियुक्तः प्रसन्नधीः ॥
नवनीतं हविर्दत्त्वा तोयैः सन्तर्पयेन्मुखे ।
सहस्रं शतनामं वा साष्टकं पूजयेज्जपेत् ॥
मध्याह्ने कृष्णमेवं यः पूजयेद्भक्तितत्परः ।
गीर्व्वाणवृन्दवन्द्योऽसौ सम्मतः सर्वजन्तुषु ॥

(अतःपरं खण्डितत्वात् समाप्तिवाक्यं नोपलभ्यते ।)

२५२ पत्रस्य शेष ।

हिन्दुधर्म्मप्रलोप्तारो जायन्ते चक्रवर्त्तिनः ।
पूर्व्वाम्नाये नवशतं षड्शीतिः प्रकीर्त्तिता ॥
फिरङ्गभाषया मन्त्रा तेषां संसाधनाद्भुवि ।
अधिपमण्डलानाञ्च संग्रामेषु पराजिताः ॥
इंरेजा नवषट्पञ्चलण्डजाश्चापि भाविनः ।
विद्या बौद्धनिदर्शिन्यः पञ्च प्रोक्तास्तु या मया ॥
तद्बीजपूर्व्वाः सर्वेऽपि मनवो मनसिद्धिदा ॥

विषयः । प्रथमप्रकाशे,— सुराप्रशंसामुखेन तत्पानादिव्यवस्था । द्वितीयप्रकाशे,— षोड़श-संस्कारादिनिरूपणम् । तृतीयप्रकाशे,— दीक्षादिनिरूपणम् । चतुर्थे प्रकाशे,— होमविध्यादिः ।

पञ्चम प्रकाशे,— आह्निकादिनिरूपणम्। षष्ठे प्रकाशे,— पुरश्चरणादिनिरूपणम्। सप्तमे प्रकाशे,— सिद्धिस्थिरीकरणादिनिरूपणम्। अष्टमे प्रकाशे,— मुद्रालक्षणादिनिरूपणम्। नवमे प्रकाशे,— पार्थिवपूजाविध्यादिः। दशमे प्रकाशे,— पुरश्चर्य्या-कौलिकाचारादिनिरूपणम्। एकादशे प्रकाशे,— सम्बिधिमन्त्रादिकथनम्। द्वादशे प्रकाशे,— वेदमन्त्रादिनिरूपणम्। त्रयोदशे प्रकाशे,— नवग्रह-वैदिकमन्त्रादिनिरूपणम। चतुर्दशे प्रकाशे,— प्रत्यङ्गिरामन्त्रादिकथनम्। पञ्चदशे प्रकाशे,— वैदिकमन्त्रादिनिरूपणम्। षोड़शे प्रकाशे,— दक्षिणाम्नायगणपतिमन्त्रकथनम्। सप्तदशे प्रकाशे,— ऊर्द्ध्वाम्नायगणपतिमन्त्रादिनिरूपणम्। अष्टादशे प्रकाशे,— पूर्व्वाम्नायगणपतिमन्त्रादिकथनम्। ऊनविंशे प्रकाशे,— पश्चिमाम्नायगणपतिमन्त्रादिनिरूपणम्। विंशेप्रकाशे,— उत्तराम्नायगणपति-मन्त्रकथनम्। एकविंशे प्रकाशे,— सूर्य्यमन्त्रादिनिरूपणम्। द्वाविंशे प्रकाशे,— नवग्रहमन्त्रादि-कथनम्। त्रयोविंशे प्रकाशे,— अष्टशाक्तीमन्त्रनिरूपणम्। शान्तमन्त्रादिनिरूपणञ्च। चतुर्विंशे प्रकाशे,— दशदिगीशमन्त्रादिनिरूपणम्। पञ्चविंशे प्रकाशे,— दीपविध्यादिनिरूपणञ्च। अतःपरं नोपलभ्यते ॥

No. 295. **मोक्षधर्म्मार्थदीपिका.** By **अर्ज्जुनमिश्रः.** Substance, Palm-leaf, $16 \times 2\frac{1}{2}$ inches. Folia, 212. Lines, 5 on a page. Extent, 4,439 çlokas. Character, Bengali. Date, Sk. 1456. Place of deposit, Tamluk, Kelomāl, Bābu Sāradāprasanna Ghoṣa. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः कृष्णाय ॥

नत्वा जगद्गुरुं विष्णुं व्यासं पितरमेव च।
क्रियतेऽर्जुनमिश्रेण मोक्षधर्म्मार्थदीपिका ॥

सर्व्वोत्कृष्टधर्म्मजिज्ञासया प्रश्नं कृतवान्। युधिष्ठिर उवाच। धर्म्माः पिता-महेनेत्यादिना। अत्र प्रश्ने भीष्म उवाच उत्तरं दत्तवान्। शत्रूणां भयहेतु-त्वात् भीष्मः। इत्यादि।

End. त्वयि चाहमित्यनेन सर्व्वगतत्वमन्योऽन्यसादृश्यञ्च दर्शयता रागद्वेषविषय-भूता जन्तवः कः समत्वे यत्नः कार्य्य इत्युपदेशोऽपि मुमुक्षुमुक्तवृत्तिकथा-भावादुत्पन्नतत्त्वज्ञानं प्रतीत्याशयः। उपदिष्टपरम्पराकथनं युधिष्ठिरस्य औदार्य्येण। तद्यथानुष्ठानद्वारा परमश्रेयोऽनुमितमिति सूचितम् ॥ ०॥

Colophon. इति भारताचार्य्यपाठकराज-श्रीमदीशानतनयस्य भारताचार्य्य-श्रीमदर्ज्जुन-मिश्रस्य कृतौ महाभारतार्थदीपिकायां टीकायां शान्तिपर्व्वणि मोक्षधर्म्मे उञ्छवृत्त्युपाख्यानं समाप्तम् ॥ ० ॥ समाप्तञ्च मोक्षधर्म्मार्थविवरणमिति।

प्रागुपायस्य संशुद्धिमेंयाकारि यथामति ।
मोक्षधर्म्मार्थविवृतौ कः सम्बन्धोऽस्ति सम्प्रति ॥
पितुः सदुपदेशेन विद्वद्भ्रातुरनुरोधतः ।
प्राङ्निबन्धस्य संशुद्धौ कृतो यत्नोऽधुना मया ॥
अल्पाशीति-लिपिग्रन्थशुद्धाक्षरसमुच्चयः ।
विदुषां हेलया प्राच्यग्रन्थो नाशमुपेयिवान् ॥
बुधैर्विमत्सरैरत्र क्षन्तव्यं मम चापलम् ।
मूलग्रन्थोऽपि सोपायो लिपिभूषणवाञ्छितः ॥
गौड़ेश्वरमहामन्त्रि श्रीमद्विश्वासरायतः ।
लब्धानुज्ञेन लिखिता मोक्षधर्म्मार्थदीपिका ॥ ० ॥
श्रीलश्रीमन्तमिश्रेण लिखितमिदम् । शकाब्दाः १४५६ ।

विषयः । महाभारतस्य शान्तिपर्व्वीयमोक्षधर्मप्रकरणस्य व्याख्यानम् ।

No. 296. मोक्षोपायसारः. Substance, country-made paper, 16 × $2\frac{1}{2}$ inches. Folia, 245. Lines, 5 on a page. Extent, 5,297 çlokas. Character. Bengali. Date, Sk. 1588. Place of deposit, District Vā̃kuḍā, Viṣṇupura, Kādākuli, Paṇḍita Rāmaprasanna Bhaṭṭācāryya. Appearance, old. Verse. Incorrect.

Beginning. ॐ नमः श्रीरामचन्द्राय ।

दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः ।
यो विभात्यवभासात्मा तस्मै सर्व्वात्मने नमः ॥
अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिन् शास्त्रेऽधिकारवान् ॥
गुरुमासीनमेकान्ते वाल्मीकिं सर्व्वदर्शिनम् ।
पप्रच्छ प्रणतो भूत्वा भरद्वाजो मृदुस्वरम् ॥
भगवन् ज्ञातुमिच्छामि कथं संसारसङ्कटे ।
रामो व्यवहृतो ह्यस्मिन् कारणाद् ब्रूहि मे गुरो ॥
वाल्मीकिरुवाच ।
साधु वत्स भरद्वाज योग्योऽसि कथयामि ते ।
श्रुतेन येन सम्मोहमलं दूरे करिष्यसि ॥

समस्य आपनस्यास्य (?) ज्ञानस्याकाशवर्णनम् ।
अपुनः स्मरणं साधो मन्ये विस्मरणं वरम् ॥
दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।
सम्पन्नं चेत्तदुत्पन्ना परा निर्व्वाणनिर्वृतिः ॥
अशेषेण परित्यागो वासनानां य उत्तमः ।
मोक्ष इत्युच्यते सद्भिः स एव विमलक्रमः ॥
वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा ।
मलिना जन्मनो हेतुः शुद्धा जन्मविनाशिनी ॥
अज्ञानसुघनाकारा वासनाहङ्कारशालिनी । (?)
पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः ॥
पुनर्जन्मान्तरं त्यक्त्वा स्थिता संभृष्टबीजवत् ।
देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते ॥
या शुद्धवासना भूयो न जन्मानर्थभाजनम् ।
ज्ञातज्ञेयास्त उच्यन्ते जीवन्मुक्ता महाधियः ॥
जीवन्मुक्तिपदं प्राप्तो यथा रामो महामनाः ।
तत्तेऽहं शृणु वक्ष्यामि जरामरणशान्तये ॥
विद्यागृहाद्विनिष्क्रम्य रामो राजीवलोचनः ।
दिवसान्यनयद्गेहे लीलानि चाकुतोभयः ॥
अथ गच्छति काले तु रामस्य गुणशालिनः ।
तीर्थपुण्याश्रमश्रेणीर्द्रष्टुमुत्कण्ठितं मनः ॥
राघवश्चिन्तयन्नेवं उपेत्य चरणौ पितुः ।
हंसः पद्माविवा + + जग्राह नखकेशरौ ॥ इत्यादि ।

End.

इच्छाविस्फुरितो जीवो विजहाति न दीनताम् ।
असद्वेदनयत्नस्तु तूष्णीमेवास्तु वासनम् ॥
अबोधाद्यदि निर्मुक्तं भुक्तं शरगतं यथा ।
तं प्रत्याहारवड्शिनेच्छामत्स्यं नियच्छति ॥
इदमस्त्विति सोद्वेगमाङ्गः कल्पनमुत्तमम् ।
तत्सर्व्वाभावनं तस्य कल्पनात्याग उच्यते ॥
स्मरणं विद्धि सङ्कल्पं शिवमस्मरणं विदुः ।
तच्च प्राणानुभूतञ्च नानुभूतं तदुच्यते ॥ (?)

अनुभूतां नानुभूतां स्मृतिं विस्मृत्य काष्ठवत् ।
सर्व्वमेवाशु विस्मृत्य मूढ़स्तिष्ठ महामतिः ॥
ऊर्द्धबाहुर्विरौम्येष न च कश्चित् शृणोति मे ।
असङ्कल्पः परं श्रेयः स किमर्थं निषेव्यते ॥
किल तूष्णीं स्थितेनैव कल्पदं प्राप्यते यदा ।
परमं यत्र साम्राज्यमपि राम तृणायते ॥
गम्यदेशैकनिष्ठस्य यथा पान्थस्य पादयोः ।
स्पन्दो ... ... तथा स्पन्दः स्वकर्मसु ॥
अत्यन्तं तन्मयो भूत्वा तथा तिष्ठ यथासि नो ।
अहं ममेति संविन्न दुःखतोऽपि विमुच्यसे ॥
असंविदन् प्रमुच्यसे यदिच्छसि तथाचर ।
शिवं सर्वगतं शान्तं बोधात्मकमजं शुभम् ॥
तदेकभावनं राम कर्म्मत्याग इति स्मृतः ॥ * ॥

Colophon. इति श्रीमहेश्वरस्वच्छन्दाचार्य्यमङ्गलालङ्कारपण्डित—श्रीमदभिनन्दसमुद्धृते वाल्मीकीये रामायणे मोक्षोपायसारे निर्व्वाणप्रकरणं समाप्तम् ॥०॥ शुभमस्तु
शाकेऽष्टाचलवाणभूमिगणिते सूर्य्ये धनूराशिगे ।
ग्रामे काञ्चनपाड़के सुरधुनीतीरे च दर्शे तिथौ ॥
एषा श्रीद्विजरामकृष्णकरजावष्टावलिपुस्तके (?)
वाशिष्ठे रघुनन्दनस्तदनया प्रीणातु वर्णश्रिया ॥
मासपौषलिखितम् । शकाब्दाः १५८८ ॥०॥

विषयः । योगवाशिष्ठस्य निर्व्वाणप्रकरणमिदम् । अत्र च प्रथमसर्गे विश्वामित्रस्य दशरथ-सम्भाषणम् । वैराग्योत्पत्तिनिरूपणञ्च । २य सर्गे जगद्दोषप्रकाशादिनिरूपणम् । ३य सर्गे भोगदोषादिनिरूपणम् । ४ र्थ सर्गे मुमुक्षुव्यवहारादिनिरूपणम् । ५मसर्गे प्रकरणार्थनिर्द्देशादिः । ६ष्ठ-७मयोः सर्गयोः मृत्युपाख्यानादिः । ८मसर्गे ऐन्दवोपाख्यानम् । ९मसर्गे कृत्रिमेन्द्रोपाख्यानम् । १० मसर्गे चित्तोपाख्यानादिः । ११ शसर्गे बालाख्यायिकादिः । १२ शसर्गे सम्बरिकोपाख्यानादिः । १३ शसर्गे उत्पत्तिप्रकरणम् । १४ शसर्गे भार्गवोपाख्यानादिः । १५ शसर्गे दामाद्युपाख्यानम । १६ शसर्गे भीमाद्युपाख्यानम् । १७ शसर्गे दाशूराख्यायिकादिः । १८ शसर्गे उपशमप्रकरणादिः । १९ शसर्गे गाधिवृत्तान्तादिः । २० शसर्गे उद्दालकोपाख्यानादिः । २१ शसर्गे सरघूपाख्यानादिः । २२ शसर्गे भासविलाससंवादादिः । २३ शसर्गे वीतहव्योपाख्यानादिः । २४ शसर्गे निर्व्वाणादिनिरूपणम् । २५ शसर्गे आध्यात्मिकपूजनादिनिरूपणम् ।

२१ प्रसर्गे विन्दुनिदर्शनम् । २७ प्रसर्गे भीलाख्यायिका । १८ प्रसर्गे अर्ज्जुनोपाख्यानादिः । १९ प्रसर्गे वैतालोपाख्यानादिः । २० प्रसर्गे किरातोपाख्यानम् । ३१ प्रसर्गे गजहन्तान्तादिः । ३२ प्रसर्गे शिखिध्वजज्ञानप्राप्तिः । ३३ प्रसर्गे शिखिध्वजोपाख्यानादिः । ३४ प्रसर्गे ग्रन्तचयनिरूपणम् । ३५ प्रसर्गे इक्ष्वाकुबोधनादिनिरूपणम् ।

No. 297. यन्त्रचिन्तामणिः, (यन्त्रकल्पः). Substance, country-made paper, 12 × 3 inches. Folia, 38. Lines, 9 on a page. Extent, 662 çlokas. Character, Bengali. Date, Sambat, 1843. Place of deposit, Ḍhākā, Ramuṇā's Kālimaṭha. Appearance, old, Verse. Generally correct.

Beginning. श्रीगणेशाय नमः । शिव उवाच ।

साधु साधु महाप्राज्ञे लोकानां हितकारिके ।
इममर्थं न केनापि दृष्टोऽहं पद्मलोचने ॥
शृणुष्वैकाग्रचित्ता त्वं रहस्यं च्चणसिद्धिदम् ।
कल्पचिन्तामणिर्नाम गुह्याद्गुह्यतमं महत् ॥
सर्व्वागमस्य सारञ्च मन्त्राणां सारमुत्तमम् ।
आथर्व्वणस्य वेदस्य सारात्सारतरं परम् ॥
अस्मिन् कल्पे भविष्यन्ति चिन्तामणिमहे शुभे ।
यन्त्राणि बहुधा देवि कामकर्म्मकराणि च ॥
एतत् कल्पं सदा यस्य लिखितं विद्यते गृहे ।
संपूज्यते प्रतिदिनं प्रभावं तस्य मे शृणु ॥
अपमृत्युभयं नास्ति नास्ति चौरभयं तथा ।
भूत-प्रेत-पिशाचानां प्रभावो नैव जायते ॥ इत्यादि ।

End. बन्धमोचणसन्देहो बन्दी देवीप्रसादतः ।
शृणोति यस्तु धर्म्मात्मा वाच्यमानं कदाचन ॥
नापपूज्यश्च मान्यश्च जायते मत्प्रसादतः ॥

Colophon. इति श्रीहरगौरीसंवादे द्वादशशतश्लोकनिर्गतयन्त्रचिन्तामणौ यन्त्रकल्पः सम्पूर्णः ॥ संवत् १८४३ ॥

विषयः । शिवाशिवयोः संवादेन अभीष्टदायकविविधयन्त्रविधिः । तत्र तत्र प्रत्येकं यन्त्राणां संस्थानकथनञ्च । अनेनैतानि यन्त्राणि प्रदर्शितानि । यथा,— मोहनयन्त्रम् ।

राजवशीकरणयन्त्रम् । यावज्जीवं स्वामिवशीकरणयन्त्रम् । दिव्यस्तम्भनयन्त्रम् । राजकोपमोचनयन्त्रम् । दुष्टवशीकरणमृत्युञ्जययन्त्रम् । धनिकवशीकरणयन्त्रम् । राजदुष्टवशीकरणयन्त्रम् । विवादविजययन्त्रम् । जगद्वशीकरणयन्त्रम् । भृत्यवश्यपिशाचयन्त्रम् । स्वामिवश्यकालानलयन्त्रम् । कोपहरयन्त्रम् । स्त्रीसौभाग्यप्रदयन्त्रम् । प्रियवशीकरणयन्त्रम् । कामराजयन्त्रम् । कामिनीमदनभञ्जनयन्त्रम् । राजाङ्गनावश्यकरयन्त्रम् । आकर्षणयन्त्रम् । मित्रदर्शनयन्त्रम् । मानिनीकर्षणयन्त्रम् । मुखस्तम्भनादियन्त्रम् । गमनस्तम्भनादियन्त्रम् । पिशुनमर्द्दनयन्त्रम् । दौर्भाग्यवर्द्धनयन्त्रम् । शत्रुविद्वेषणयन्त्रम् । बन्धुविद्वेषणयन्त्रम् । मारणयन्त्रम् । उच्चाटनयन्त्रम् । रक्षाकरयन्त्रम् । शान्तिकयन्त्रम् । पौष्टिकयन्त्रम् । दौर्भाग्यनाशनयन्त्रम् । ज्वरोपशमनयन्त्रम् । बालकरक्षाकरयन्त्रम् । भूतापस्मारादिनाशनयन्त्रम् । सर्पस्तम्भनयन्त्रम् । भूतनाशनादियन्त्रम् । एकान्तज्वरनाशनयन्त्रम् । गर्भरक्षाकरयन्त्रम् । सर्व्वरक्षाकरयन्त्रम् । बन्धमोक्षकरयन्त्रम् । दुष्टसत्त्वमोहनयन्त्रम् । निगड़मोचनयन्त्रञ्च । इति शम् ।

No. 298. यन्त्रचिन्तामणिः (वश्याधिकारः). Substance, country-made paper, 10 × 5 inches. Folia, 16. Lines, 8 on a page. Extent, 384 çlokas. Character, Bengali. Date, ? Place of deposit, District 24-Parganās, Post Office Naihāṭi, Kā̃ṭhālpāḍā, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Verse. Generally correct.

Beginning. ॐ श्रीगुरवे नमः ।

स पातु देव्याः कवरीविलासो
लास्येन सत्या गिरिकन्यकायाः ।
यः पश्यतो बालमृगाङ्कमौलेः
क्षणं न सर्व्वज्ञत्वपदं बभूव ॥ (?)
एकान्ते देवदेवेशं गत्वा देवी शुचिस्मिता ।
उपगम्य शनैर्वाक्यं प्रोवाच जगदम्बिका ॥ इत्यादि ।

End. इति वश्याख्यं महायन्त्रं सृष्टन्तु ब्रह्मणा पुरा ।
न देयं यस्य कस्यापि साधकेन वरानने ॥ ० ॥

Colophon. इति यन्त्रचिन्तामणौ प्रत्यक्षसिद्धिप्रदे वश्याधिकारे तृतीयपाठिका ॥ ० ॥

विषयः । महामोहनयन्त्रनिरूपणम् । वैराजसम्पुटयन्त्रादिनिरूपणम् । राजमोहनयन्त्रादिनिरूपणम् । मृत्युञ्जययन्त्रादिनिरूपणम् । शत्रुसानुकूलयन्त्रनिरूपणम् । क्रोधशमन-

यन्त्रनिरूपणम् । स्त्रीसौभाग्यकरयन्त्रनिरूपणम् । स्त्रीवश्ययन्त्रनिरूपणम् । मदनमर्द्दनयन्त्रनिरूपणम् । कामाख्यायन्त्रादिनिरूपणञ्च ।

No. 299. योगकल्पलतिका. By रामगतिसेनः. Substance, country-made paper, 10×4 inches. Folia, 101. Lines, 7 on a page. Extent 1,988 çlokas. Character, Bengali. Date, ? Place of deposit, Ḍhākā Paṭuyāṭuli, Bābu Rājakumāra Sena. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
यस्यैतत्करुणारजोऽणुरमलोऽज्ञानान्धकारं हरन्
बोधेन्दूदय ... ... श्रीनाथपादाम्बुजम् ।
सम्राचारणमञ्जुचित्तसरसीमध्ये मुदश्चिन्तयन्
श्रीमद्रामगतिर्भिषग्वर इमं ग्रथ्नाति सत्संग्रहम् ॥
ये ये योगविशेषवेदविषयास्तद्योगिनो योगिनो
ये योगामृतमत्र हस्तसुलभं कर्त्तुं यतन्ते बुधाः ।
ये वा जन्मसमस्तपापनिगडं ... ... त्द्योगका-
स्ते तेऽस्मत्कृतयोगकल्पलतिकां ... ... भजन्तु द्रुतम् ॥
अज्ञानदैन्यचयखण्डनचारुशीला
या हेलया सकलवर्गधनं ददाति ।
आनन्दपुष्पस्थिरसत्वकावदीप्रा
सा योगकल्पलतिकास्तु सतां मुदेऽसौ ॥
... ... ।
यावद्भ्रमलयो न स्यात् ममता यावदेव हि ।
यावद्देहाभिमानोऽस्ति तावत् तत्त्वकथा कुतः ॥
अतएव रागादौ विवेकोदयमाह । तदुक्तं कुलार्णवे ।
दुःखमूलं हि संसारः स यस्यास्ति स दुःखितः ।
तस्य त्यागः कृतो येन स सुखी नापरः प्रिये ॥

आरम्भं सर्व्वदुःखानामाश्रयं सकलापदाम् ।
आलयं सर्व्वपापानां संसारं वर्जयेत् प्रिये ॥
अरज्जुबन्धनं घोरं मिश्रीकृतमहाविषम् ।
अशस्त्रखण्डनं देवि संसारासक्तचेतसाम् ॥ इत्यादि ।

End.

यथा दृष्टं मुने प्रोक्तं त्वयि कल्याणमस्तु ते ।
देशं प्रयामोऽभिमतमागच्छोत्तिष्ठ पार्व्वति ॥
इत्युक्ता नीलकण्ठोऽसौ त्यक्तपुष्पाञ्जलिर्मयि ।
ततार परिवारेण सममम्बरकोटरम् ॥
ततः प्रभृति तेनैव क्रमेणार्चनमात्मनः ।
अद्य यावत् गतव्यग्रः कुर्व्वन्नमरसंस्थितः ॥
अनेनार्चाविधानेन मये ... वासना ।
... ... ॥
दृष्टा मया रघुपते सत्त्वमुक्तेन चेतसा ।
संसारविरसारण्ये विचरास्मिन् ... ॥

राम उवाच ।

इदानीं संशयो ब्रह्मन् विनिवृत्तो विशेषतः ।
ज्ञातं ज्ञातव्यमखिलं जाता ... ... ॥
परासमेश्वामपरैर्दलितामागतत्वजाम् ।
संसारसमरे सम्यग् धीरतामागतं मनः ॥
परिगलितविकल्पतामुपेतं
प्रगलित ... दीनसारसत्वम् ।
विजगति यद्‌तिप्रसन्नरूपं
प्रमुदितमन्तर ... ... मनो मे ॥
इति निर्व्वाणप्रकरणे पूजोपाख्यानम् ॥

Colophon. इति श्रीरामगतिसेनकृत सारसंग्रहे योगकल्पलतिकायां जीवन्मुक्तलक्षणं नाम चतुर्दशस्तवकः समाप्तः ॥

विषयः । चतुर्दशस्तवकपल्लवितेऽस्मिन् योगकल्पलतिकाग्रन्थे कुलार्णवादितन्त्रोक्तनानाविध-प्रमाणवचनैर्योगविवरणं सम्यक् प्रमापितम् । तत्र प्रथमे स्तवके विवेकोदयविवरणम् । द्वितीये स्तवके योगस्थल-कूटज्ञान-योगिनियमादिकथनम् । तृतीये स्तवके योगासनविवरणम् । चतुर्थे

स्तवके षट्शुद्धिविवरणम् । पञ्चमे स्तवके नाड़ीशुद्धिविवरणम् । षष्ठे स्तवके प्राणायामविवरणम् । सप्तमे स्तवके प्रत्याहार-धारणा-पञ्चभूतचिन्तन-द्विविधध्यानसमाधीनां विवरणम् । अष्टमे स्तवके पञ्चामरयोगविवरणम् । नवमे स्तवके मुद्राभेदविवरणम् । दशमे स्तवके कुम्भकभेद-षट्चक्रभेद-कथनम् । एकादशे स्तवके शक्तिचालनविवरणम् । द्वादशे स्तवके नादसन्धानविवरणं, वायोह्रासवृद्धिनिरूपणं, सप्तपदाज्ञानभूमिनिरूपणं, संसारबन्धात् मुक्त्युपायकथनञ्च । त्रयोदशे स्तवके चित्तशमनोपाय-आधारबोध-जीवन्मुक्तलक्षणादिविवरणम् । चतुर्दशे स्तवके योगशास्त्रे अभ्रान्तस्यैव योगाधिकारित्वमिति कीर्त्तनम् ।

No. 300. योगविचारणम् . By गोपीकान्तः . Substance, country-made paper, 17 × 5 inches. Folia, 8. Lines, 9 on a page. Extent, 252 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha, Vādari, Paṇdita Çivacandra Nyāyabhūṣaṇa. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः श्रीगुरवे ।

नत्वा श्रीगुरुपादाब्जं नखचन्द्रविराजितम् ।
निष्कलङ्कं रश्मिवृन्दप्रकाशितदिगन्तरम् ॥
सहस्रदलमध्यस्थं चन्द्रमण्डलमध्यगम् ।
हंसपीठे तु सततं ध्यानगम्यञ्च ज्ञानदम् ॥
अज्ञानतिमिरान्धस्य नाशनं सर्व्वसिद्धिदम् ।
योगशास्त्रमतं ज्ञात्वा योगिनाञ्च मतं तथा ॥
स्वदेहे भावयेन्नित्यं योगं नान्यमनाः सदा ॥
श्रीगुरोरुपदेशेन गोपीकान्तेन धीमता ।
योगतत्त्वं हि संक्षेपात् तन्यते यत्नतो मुदा ॥
स्वदेहे भावयेदिति कथमित्याह उक्तः कौलार्णवे शिवेन पार्व्वतीं प्रति ॥
इत्यादि ।

End. मात्राभिः परिपूरितैः कुलगतं विशुद्धिशुद्धाम्बुजम्
अर्घं षष्ठरसंयुतं द्विदलकं रत्नाभमाज्ञापुरम् ।
तस्मादूर्द्धमधोमुखं विकसितं पद्मं सहस्रच्छदम्
नित्यानन्दमयीं सदा शिवपुरीं शक्तिं मनः शाश्वतीम् ॥

दश्शशतदलशोभाप्रोल्लसत्पूर्णचन्द्रो
हिमरुचिरुचिराङ्गो हंसपीठान्तरस्थः ।
अभयवरकराञ्जो योगपूर्णस्त्रिनेत्रः
कुलकमलविलासी पातु मां देवदेवः ॥
अज्ञानां ज्ञाननेत्रं विदितनवयुवा रागसन्तानहासी
ज्योत्स्नाजालैर्नखेन्दुकुलकमलवनीकान्तकान्तिप्रकाशम् ।
गङ्गाकाश्यादितीर्थोल्लसदमलमहापुण्यपुञ्जप्रवाहं
वन्दे दीक्षागुरूणां चरणसरसिजं वन्द्यमानन्दकान्तम् ॥

Colophon. इति योगविचारणं समाप्तम् ।

विषयः । तन्त्रोक्तवाक्यादिविचारमुखेन योगतत्त्वनिरूपणम् ।

No. 301. योगसारः. Substance, country-made paper, 17×4 inches. Folia, 24. Lines, 8 on a page. Extent, 684 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Mājhapāḍā, Bābu Rāsavihārī Rāya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
श्रीमहादेव उवाच ।
मातर्मे देवदेवेशि योगेशि प्राणवल्लभे ।
सर्व्वमातः सुरेशानि संसारतारिणि शिवे ॥
शरणागतदीनार्त्तपरित्राणपरायणे ।
त्वां विना देवदेवेशि संसारं तृणवत् प्रिये ॥
एकं संप्रष्टुमिच्छामि यदि तेऽनुग्रहो मयि ।
योगसारं महेशानि कथयास्मानुकम्पया ॥
संसारतारणे देवि तरणिस्त्वं यतः प्रिये ।
असारघोरसंसारे सर्व्वे दुःखमलीमसाः ॥
जायन्ते च म्रियन्ते च असंख्या जीवराशयः ।
तेषामन्तो महेशानि विद्यते न महीतले ॥
अनेकदुःखसम्भूतास्वेन्द्रियां × × तत्पराः ।
भवन्त्येव महेशानि सम्भूतानि युगे युगे ॥
केनोपायेन देवेशि नरा मोक्षमवाप्नुयुः ॥

श्रीदेव्युवाच ।
अस्ति देव परब्रह्मस्वरूपो निर्गुणः परः ।
सर्व्वज्ञो विश्ववेत्ता च सर्व्वेशो निर्म्ममोदयः ।
स्वयं ज्योतिर्मयो देवो निर्व्विकारो निरञ्जनः ॥ इत्यादि ।

End. ततो ज्ञात्वा ब्रह्मवर्त्म योगकर्म्म समभ्यसेत् ।
शरीरस्थापि नित्यं तज्ज्ञात्वा योगं समभ्यसेत् ॥
परं ब्रह्म नित्यरूपं सर्व्वस्मिन्नस्ति भैरव ।
ज्ञात्वा च साधयेद् योगं परं ब्रह्मस्वरूपकम् ॥
इति ते कथितं किञ्चिद् द्विदलाख्यस्य वर्णनम् ।
विस्तरेण महेशान किमन्यत् कथयामि ते ॥

Colophon. इति श्रीमद्योगसारमहाग्रन्थे सर्व्वागमोत्तमे श्रीपार्व्वतीशिवसंवादे ब्रह्मसाक्षर्यां संहितायां षट्चक्रादिचक्रे द्विपानद्विदलाख्यस्य वर्णनं नवमः परिच्छेदः ॥

विषयः । महादेवं प्रति देव्या ब्रह्मस्वरूपादिकथनम् । ब्रह्मणो योगगम्यत्वकथनम् । तत्रादौ नीरोगस्यैव योगाधिकारकथनप्रसङ्गेन व्याधिनाशनोपायकथनम् । तृष्णानाशनोपायकथनम् । अनाहारीकरणोपायकथनम् । मूत्रपुरीषनाशनोपायकथनम् । शुक्रस्तम्भनोपायकथनम् । आलस्यनाशनोपायकथनम् । निद्रानाशनोपायकथनम् । इन्द्रियनिग्रहोपायकथनम् । मन्त्रसिद्धिकथनम् । इष्टविद्यायां मन्त्रादिकथनञ्च । अथ पुरश्चरणविधिः । भक्ष्याभक्ष्यकथनम् । आसनादिकथनम् । जपमालानिरूपणम् । जपसंख्यायां निषिद्धद्रव्यकथनम् । वर्णमालाकथनम् । विविधयोगनिरूपणम् । रुद्राक्षमाहात्म्यादिकथनम् । योगिमाहात्म्यादिकथनम् । शरीरस्थचक्रादिनिरूपणम् । षट्चक्रदेवतानां ध्यानपूजादिविधिः । षट्चक्रवर्णनञ्च ।

No 302. योगावली. Substance, country-made paper, 12 × 3 inches. Folia, 19. Lines, 11 on a page. Extent, 836 çlokas. Character, Bengali. Date, Sk. 1644. Place of deposit, Brāmhanamandalī, *viâ* Bārāsāt, Pandita Rāmanārāyana Bhattācāryya. Appearance, old. Verse. Generally correct.

Beginning. (खण्डितत्वात् प्रारम्भवाक्यं नास्ति तेन द्वितीयपत्रस्य प्रारम्भवाक्यं लिखितम् ।)
हृद्ये शिलातले घृष्ट्वा मधुना रक्तचन्दनम् ।
नेत्रयो रञ्जयेद्यस्तु तिमिरं हन्ति लेखितम् ॥

वटबीजं समानीय मधुना चापि सेवितम् ।
समं शिलातले घृष्ट्वा चक्षुषोरञ्जनात्तथा ।
त्रिफलाबीजमानीय मरीचं तत्र योजयेत् ॥ इत्यादि ।

End.

गोदन्तं हरितालेन संयुक्तं काकजिह्वया
चूर्णयित्वा यस्याः शिरसि दीयते सा वशीभवति ।
अपामार्गं शम्बूकञ्च तिन्तिडीत्वचकस्तुकम् ।
दग्धं कृत्वा लौहकिट्टं शोधयित्वा समं नयेत् ॥
यवक्षारं टङ्कणञ्च समभागं तथैव च ।
रसनायां स्थापयित्वा जलेन सहितं पिबेत् ॥
यत्किञ्चिदौदरं रोगमामजन्यं हरेत् क्षणात् ।
अम्लपित्तं नाशयति प्लीहगुल्मादिकं तथा ॥

Colophon.

इति शिवदुर्गासंवादे योगावली समाप्ता ॥ ० ॥
श्रुतिश्रुतीनीन्दुमिते शकाब्दे
नत्वा महेशं द्विजरामरामः ।
रवौ धनुःस्थे शुभशुक्लपक्षे
तिथौ चतुर्थ्यां व्यलिखत् सपुस्तम् ॥ ० ॥
इयं योगावली प्राप्ता ग्रामे कटकसंज्ञके ।
श्रीजगन्नाथमालोक्यागमदिष्टे सुराधिपम् ॥ ॐ

विषयः । चक्षूरोगादिचिकित्सा । मुखरोगादिचिकित्सा । शूलचिकित्सा । दन्तगलरोगादिचिकित्सा । कामगुल्मोदररोगादिचिकित्सा । यक्ष्मवातरोगादिचिकित्सा । बन्ध्याया गर्भधारणोपायकथनम् । भगरोगचिकित्सा । अतिसाररोगादिचिकित्सा । श्लीपददद्रुरोगादिचिकित्सा । कुष्ठरोगादिचिकित्सा । निर्गुण्डीकल्पनिरूपणम् । गन्धकभृङ्गराजादिकल्पनिरूपणम् । स्तम्भनवशीकरणादिश्च ।

No. 303. योगावलीतन्त्रम्. Substance, country-made paper, 8 × 3 inches. Folia, 18. Lines, 8 on a page. Extent, 297 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā, Post Office Naihāṭi, District 24-Parganās, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ श्रीराधाकृष्ण ॥

श्रीमहादेव उवाच ।

एकीभूतं यथाकामं शरीरं जायते तथा ।
पद्मं सप्तदलं चक्रं प्रमाणं द्वादशाङ्गुलम् ॥
तस्य मध्ये गते वायौ तदा गर्भः प्रजायते ।
वामचक्रे भवेन्नारी दक्षिणे पुरुषोत्तमः ॥
वामागतिश्च तच्चक्रं द्विचक्रं दक्षिणागतिः ।
एकीभवेद्यदा कामं तदा क्लीवः प्रजायते ॥
कर्म्मणा दैवनेत्रेण जन्तुर्देहं प्रपद्यते ।
स्त्रियः प्रविष्ट उदरं पुंसोरेतकणाश्रयः ॥
कल्लोलनं त्रिरात्रेण पञ्चरात्रेण बुद्बुदम् ।
शोणितं दशरात्रेण मांसपिण्डं चतुर्दशे ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । स्त्रीपुंनपुंसकादिजन्मकारणनिरूपणम् । शरीरादीनां शोणितमांसास्थ्याद्युत्पत्ति-कालनिरूपणम् । देहस्थवाय्वादिनिरूपणम् । नाड्यादिनिरूपणम् । नाड्यादिस्थितिनिरूपणम् । वायुनाड्यादिरोधादिना चित्तशोधायनिरूपणञ्च ।

No. 304. **योनितन्त्रम् ।** Substance, country-made paper, 13 × 3 inches. Folia, 22. Lines, 8 on a page. Extent, 473 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Mājhapāḍā, Babu Rāsavihāri Rāya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः परदेवतायै ।

कैलासशिखरारूढं देवदेवं जगद्गुरुम् ।
सदा तत्त्वसुखी दुर्गा पप्रच्छ नगनन्दिनी ॥
चतुःषष्टीनि तन्त्राणि कृतानि भवता प्रभो ।
तेषां मध्ये प्रधानानि वद मे करुणानिधे ॥

श्रीशिव उवाच ।

शृणु पार्व्वति चार्व्वङ्गि अतिगुह्यतमं प्रिये ।
कोटिवारं प्रवक्ताहं तथापि श्रोतुमिच्छसि ॥

स्त्रीणां स्वभावाच्चार्व्वङ्गि शृणु मां परिपृच्छसि ।
गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन ॥
यन्त्रपीठं मन्त्रपीठं योनिपीठञ्च पार्व्वति ।
योनिपीठं प्रधानं हि तव स्नेहात् प्रकाश्यते ॥
हरिहरादिदेवाश्च सृष्टिस्थित्यन्तकारकाः ।
सर्व्वे योनिसमुद्भूताः शृणुष्व नगनन्दिनि ॥
शक्तिमन्त्रमुपास्यैव यदि योनिं न पूजयेत् ।
तेषां दीक्षा च मन्त्रश्च नरकायोपपद्यते ॥
अहं मृत्युञ्जयो नाम तव योनिप्रसादतः ।
तव योनिं महादेवि भावयाम्यहमहर्निशम् ॥
पूजयामि सदा दुर्गे हृत्पद्मे चैव सुन्दरि ।
दिव्यभावो वीरभावो यस्य चित्ते विराजते ॥
अनायासेन देवेशि मुक्तिस्तस्य करे स्थिता ।
शक्तिमन्त्रं पुरस्कृत्य यो वै योनिं प्रपूजयेत् ॥
स धन्यः स कविर्धीमान् × × पि च सुरासुरैः । इत्यादि ।

End. कृष्णपुष्पैः पूजयित्वा ध्यात्वा चैव दिगम्बरीम् ।
जप्त्वा युक्तं श्मशाने च शत्रूणां मरणं भवेत् ॥
कालीकल्पमिदं प्रोक्तं गोपयेन्मातृजारवत् ।
गोपने सर्व्वसिद्धिः स्यात् प्रकाशान्मरणं भवेत् ॥

Colophon. इति योनितन्त्रे हरपार्व्वतीसंवादे सप्तदशः पटलः ॥

विषयः। अत्र प्रथमं योनिपूजाप्राशस्त्यादिकथनम् । ततः पूज्यापूज्ययोनिकथनम् । अक्षताया योनेः पूजने दोषादिकथनम् । पञ्चतत्त्वविधिः । कौलानामुत्तमादिभेदकथनम् । योनौ महाविद्योपासनाविधिः । तत्त्वेन तिलकविधिः । तत्त्वेन पूजाविधिः । वीरसाधनविधिः । आसवोपासनाविधिः । अन्तर्य्यागविधिः । मन्त्रराजविधिः । कालीप्रीतिजननोपचारादिकथनम् । वीरपुरश्चरणविधिः । पञ्चतत्त्वशोधनादिविधिः । पूजास्थानादिनिरूपणम् । साधनविधिश्च ।

No. 305. रत्नकोषविचारः. By रत्नेश्वरन्यायालङ्कारः. Substance, country-made paper, $16\frac{1}{2} \times 3$ inches. Folia, 32. Lines, 8 on a page. Extent, 1,456 çlokas. Character, Bengali. Date, ? Place of deposit, Sātbheyepāḍā, *viâ* Vaidyerbāzār, District Ḍhākā, Paṇḍita Tārākānta Vācaspati. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तः । रत्नकोषकारस्तु सत्प्रतिपक्षसम्वलनदशायां संशयात्मिकानुमितिं स्वीकरोति तच्च संशयत्वस्य लिङ्गपरामर्शादिजन्यतावच्छेदकतया कथं तत्र संशय उत्पद्यते इति नाशङ्कनीयं संशयत्वस्य जन्यतावच्छेदकत्वेऽपि एकधर्म्मिकविरुद्धोभयव्याप्यवत्ताज्ञानदशायामर्थवशादेकधर्म्मिकविरुद्धोभयधर्म्मप्रकारकज्ञानरूपसंशयत्वावच्छिन्नोत्पत्तेरावश्यकत्वात् । अतएव सामग्रीसमाजादेव सर्व्वत्र संशयोत्पत्तिनिर्व्वाहात् विरुद्धधर्म्मप्रकारकज्ञानत्वादिरूपसंशयत्वं न कस्यापि जन्यतावच्छेदकमिति नव्याः । न चैकधर्म्मिकविरुद्धोभयव्याप्यवत्तानिर्णयदशायामेकधर्म्मिकवास्तवविरुद्धोभयधर्म्मप्रकारकानुमित्युत्पत्तावपि तत्र प्रयोजनविरहेण विरोधाभासकस्याकल्पनात् तादृशानुमितिविरोधावगाहित्वं न सम्भवतीति कथं तस्याः संशयत्वं विरोधविषयकज्ञानस्यैव तथात्वादिति वाच्यं । वह्न्यभावविरुद्धवह्नित्वादिना व्यापकत्वावगाहिपरामर्शस्य तेनैव रूपेण वह्न्याद्यनुमित्युत्पादकतया तादृशपरामर्शकालीनविरुद्धोभयप्रकारकानुमितौ तत एव विरोधभानसम्भवात् एककोटिव्याप्यवत्तानिर्णयस्यापरकोट्यनुमितिप्रतिबन्धकत्वात् कथमुभयव्याप्यवत्ताज्ञानकालेऽनुमितिरिति तु नाशङ्कनीयं तादृशप्रतिबध्यप्रतिबन्धकभावे मानाभावात् ॥ इत्यादि ।

End. अथ प्रतिबन्धकताकल्पनाधिक्यविरहेऽपि परामर्शादिघटितानुमित्युत्पादप्रयोजकसामग्रीव्याप्तौ विरोधिकोट्यनुमितिसामग्र्यभावनिवेशे प्रयोजनाभावादुक्तसंशयानुयोगापत्तिर्दुर्व्वारेति तु नाशङ्कनीयं स्वपरकोट्यनुमितिसामग्र्यभावस्य सामग्रीव्याप्तावनिवेशे उपदर्शितनानाविधशाब्दादिसामग्र्यभावनिवेशप्रसङ्गात्तदपेक्षया लाघवेनापरकोट्यनुमितिसामग्र्यभावस्यैव निवेशयितुमुचितत्वमिति न किञ्चिदप्यनुमितेः संशयत्वापत्तिरिति कृतमतिविस्तरेण ॥

Colophon. इति श्रीरत्नेश्वरन्यायालङ्कारस्य रत्नकोषविचारः ॥

विषयः । निश्चयात्मकस्य परोक्षज्ञानस्य सत्प्रतिपक्षसम्वलनदशायां संशयात्मिकानुमितिस्वीकाररूपस्य रत्नकोषकारमतस्य च सम्यग्विचारणम् । तत्र संशयस्य लक्षणकथनम् । चक्षुरादिगोचराणां लक्षणकथनम् । अनुमितेर्लक्षणकथनम् । प्रत्यक्षस्य लक्षणकथनम् । अथ विशेष्यविशेषणविचारः । अवच्छेदकविचारः । जातिविचारः । सामग्रीविचारः । विरुद्धधर्म्मविचारश्चेति ।

No. 306. **रत्नमाला .** Substance, country-made paper, 13 x 3 inches. Folia, 8. Lines, 8 on a page. Extent, 176 çlokas. Character, Bengali. Date, Sk. 1696. Place of deposit, District Ḍhākā, Vikramapura, Bharākor, Bābu Dvārakānātha Dāsa Vaidya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः परदेवतायै।

मूर्द्धन्यब्जे निषण्णं तुहिनकरसमं शुक्लवर्णं द्विहस्तम्
वामोर्व्वासीनकान्तं सकलभयहरं कल्पवृक्षस्वरूपम् ।
ध्यानस्थं ध्यानगम्यं दुरितचयमहाध्वान्तविध्वंसदीपं
दिव्यज्ञानप्रदीपं स्मितसुभगमुखं श्रीगुरुं संस्मरामि ॥
के कञ्जे कर्णिकायां कमलवरमुखीं कान्तकञ्जायताक्षीं
कान्तं कञ्जं दधानामशुभभयहरां रक्तवर्णां द्विहस्ताम् ।
कान्तालङ्कारयुक्तां त्रिभुवनजननीं कान्तसव्योरुसंस्थां
कान्तां कान्ताङ्गिकञ्जां सुकलितकरुणां नाथकान्तां स्मरामि ॥ इत्यादि ।

End. कस्त्वां स्तोतुं समर्थस्त्रिजगति वरदां पुण्यवान् लब्धवर्णो
नाहं विद्याविनोदी गुणमयि सुतरां मादृशान् पापयुक्ताः ।
मत्वैतद्देवि दीने मयि कुरु करुणालेशमम्ब प्रसन्ने
दीनत्वं नैव सिन्धुर्व्रजति जलधरत्यागतः क्वापि काले ॥
स्तोत्रञ्चैतत् पठेद् यो गुरुपदकमलध्यानशुद्धान्तरात्मा
मर्त्यो नत्वे कदाचित् कुलजगतयनासारसङ्गाधिरूढः ।
कीर्त्तिं कान्तिञ्च लक्ष्मीं रिपुकुलविजयं दिव्यकान्ताञ्च पुत्रान्
दीर्घायुष्यञ्च धर्म्मं धनमपि विपुलं मुक्तिमन्ते समेति ॥

Colophon. इति रत्नमालाग्रन्थरहस्यस्तोत्रं समाप्तम् ॥ शकाब्दाः १६९६ ।

विषयः । स्तुतिव्याजेन भगवत्या रूपगुणमाहात्म्यादिवर्णनम् ।

No. 307. **रसकल्पसारतत्त्वम् .** By **वृन्दावनदासः .** Substance, country-made paper, 13×5 inches. Folia, 6. Lines, 9 on a page. Extent, 135 çlokas. Character, Bengali. Date, ? Place of deposit, Kãṭhālpāḍā *vid* Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearauce, old. Verse. Incorrect.

Beginning. श्रीश्रीराधाकृष्णः ।

नित्यानन्दावधूताय नमस्ते जाह्नवीपते ।
नमः कृष्णस्वरूपाय नमस्तेऽनङ्गमञ्जरि ॥

नमस्ते भक्तपादाब्जौ नमो भक्तिश्च प्रेमदाम् ।
गुरुं जगद्गुरुञ्चैव नमः परात्परेश्वरम् ॥ (?)
या धर्म्मार्थकाममोक्षनिस्पृहा चञ्चला श्रीकृष्णसुखमोदका । तेन ताम्भक्तिं वन्दे मनसा मुदा निर्भया निश्चलान्विताम् ॥ वन्दे श्रीगुरुपादद्वन्द्वं वै मुदा यत्पादाश्रयादस्मात् कृष्णे रतिं नित्यं वर्द्धते । यत्र सत्सङ्गानुप्रचारार्थाय भवेत् प्रसन्नता गुरोः । इत्यादि ।

End. त्रैलोक्ये पृथिवी धन्या यत्र कृष्णः पुनः पुनः ।
लीलया स्वयमानन्दी स्वेच्छामयः स्वयं प्रभुः ॥

Colophon. इति सर्व्वशास्त्रसारमाहृत्य श्रीनित्यानन्दतत्त्वे यथोक्तम् । श्रीप्रबोधानन्द-प्रश्नोत्तर-श्रीवृन्दावनदास-श्रीमत्रसकल्पसारतत्त्वे षट्प्रकरणम् ॥ ० ॥

विषयः । वृन्दावनमाहात्म्यादिनिरूपणम् । लीलावर्णनमुखेन राधाकृष्णादीनां माहात्म्यादिनिरूपणञ्च ।

No. 308. रसरत्नाकरः. By नित्यनाथः. Substance, country-made paper, 19×4 inches. Folia, 29. Lines, 6 on page. Extent, 830 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha, Kāṭihālī, Paṇḍita Viçvanātha Tarkabhūṣaṇa. Appearance, tolerable. Verse. Incorrect.

Beginning. ॐ नमः परदेवतायै । अथ रत्नाकरस्य मन्त्रखण्डो लिख्यते । सर्व्वजनस्य वश्यमाह ।
एकचित्तस्थितो मन्त्री मन्त्रं जप्त्वायुतद्वयम् ।
ततः क्षोभयते लोकान् दर्शनादेव साधकः ॥
भूतारवटमूलञ्च जलेन सह घर्षयेत् ।
विष्णुक्रान्ता संयुतं मन्त्रं तिलकी लोकवश्यकृत् ॥ इत्यादि ।

End. भल्लूकव्याघ्रमहिषचासरटप्रविलोचनैः ।
श्रोताञ्जनयुतैश्चाक्षि दिवावद्दृश्यते निशि ॥
ॐ नमो रुद्राय ज्योतिषां शिवाय यतयेत् यत्ने बीजम् ॥ ० ॥

Colophon. इति श्रीपार्व्वतीपुत्र-नित्यनाथसिद्धविरचिते रसरत्नाकरे मन्त्रखण्डः समाप्तः ।

विषयः । सकलवशीकरणमन्त्रौषधादिनिरूपणम् ।

No. 309. **रससारः.** By **गोविन्दाचार्य्यः** Substance, country-made paper, 10 × 5 inches. Folia, 74. Lines, 8 on a page. Extent, 1,217 çlokas. Character, Nāgara. Date, ? Place of deposit, Ḍhākā, Ramnā's Kālīmaṭha. Appearance, new. Verse. Generally correct.

Beginning. गणेशं प्रणिपत्यादौ शिवञ्च शिवया सह ।
गुरुभैरवसिद्धेशौ योगिनीपञ्चमण्डलम् ॥
प्रणम्य शिरसा नित्यं भक्त्या तत्पादपङ्कजम् ।
हरिं ध्यात्वा परं देवं रसेन्द्रं शिवमव्ययम् ॥
आलोक्य सर्व्वशास्त्राणि अनुभूय यथास्थितम् ।
सारात् सारं समुद्धृत्य संक्षेपादर्थगौरवम् ॥
रससारं प्रवक्ष्यामि नानासिद्धैश्च भाषितम् ।
साधकानां हितार्थाय लोकानामनुकम्पया ॥
मलहीनो यदा सूतः पितामहसमो भवेत् ।
स बद्धो विष्णुः × साक्षात् रञ्जितः शिव उच्यते ॥
मारितो मारितश्चैव स एव जगदीश्वरः । इत्यादि ।

End. स्तम्भयत्यस्त्रसंघातं कामोन्मादनकारकः ।
पुनर्नववपुः कुर्य्यात् साधको नात्र संशयः ॥
अतिवेगी भवेत् कामी महाबलपराक्रमः ।
क्षुद्राधो जायते सद्यो × ×र्थं जापयेद्गुरुम् ॥
अनया जनयेत् कामम् अत्यर्थञ्च सुखं भवेत् ।
अत्यर्थं लभते पुष्टिं बलवानिन्न जायते ॥
इति सिद्धिगुटिका ॥

Colophon. इति श्रीमद्गोविन्दाचार्य्यविरचितो रससारः समाप्तः ॥

विषयः। पारदविधिः । नवबद्धादिपारदगुणकथनम् । तत्पूजाविधिः । तदधिकारिकथनम् । रसकर्म्मकरणे द्रव्यसङ्ग्रहविधिः । रससंस्कारादिविधिः । रसशोधनादिविधिः । उपरसशोधनविधिः । रसलोहशुद्धिविधिः । रससत्त्वस्थिरीकरणविधिः । विड्पाकविषौषधमारणादिविधिः । रत्नलक्षणादिकथनम् । रत्नद्रावणभेदनादिविधिः । बीजपाकादिविधिः । महारसजारणादिविधिः । शतवेधादिक्रमकथनम् । उपरसबन्धन-मारण-पेषण-स्तम्भनादिविधिः । रत्नप्रयोगादिविधिः । कल्कादिविधिः । मणिमूषादिविधिः । रसगुटिकाविधिः ।

—मत्र वयःस्तम्भनविधिः। स्वरग्रामस्तम्भनादिविधिः। सर्व्वव्याधिनिवारणविधिः। धातुमारण-प्रयोगादिश्च। इति शम्।

No. 310. रागानुगाविवृतिः. Substance, country-made paper, 12×5 inches. Folia, 22. Lines, 8 on a page. Extent, 572 çlokas. Character, Bengali. Date, Sk. 1719. Place of deposit, District Vãkuḍā, Viṣṇupura, Kādākuli, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, old. Prose and verse. Incorrect.

Beginning. ॐ श्रीश्रीगुरवे नमः। श्रीश्रीचैतन्यचन्द्राय नमः।
आदद्दानः स्तृणं दन्तैरिदं याचे पुनः पुनः।
श्रीमद्रूपपदाम्भोजधूलिर्भूयां भवे भवे ॥
अथ साधनचतुष्टये प्रथमं सुखसाधनविवृतिः।
इष्टे स्वारसिकी रागः परमाविष्टता भवेत्।
तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोच्यते ॥
अत्राविष्टता रागकार्य्यरूपा तस्मात्तटस्थलक्षणेनानुवादत्वम् चेष्टितप्रवणाय।
तत्तु रागानुगायां चेष्टितप्रवणापेक्षया। सा तु तस्यां कायिकी वाचिकीति द्वयस्वीकाराय। स तु सर्व्वथा व्रजलोकानुसाराय स श्रीव्रजेन्द्रनन्दनप्राप्तये अन्यथा न स्यात्। अत आविष्टता त्रिधा मनोगता रागगता कायगतेति। अत्र मनोगता स्मरणादिरूपा। अतो रागानुगायां तदनुसारिणी साधक-रूपेण सिद्धरूपेण च सेवा प्रत्येकं त्रिधा मानसी वाचिकी कायिकीति।
रागानुगालक्षणम्।
विराजन्तीमभिव्यक्तां व्रजवासिजनादिषु।
रागात्मिकामनुसृता या सा रागानुगोच्यते ॥ इति।
रागात्मिका द्विधा। सम्बन्धरूपा कामरूपेति। अत्र सम्बन्धरूपालक्षणम्।
सम्बन्धरूपा गोविन्दे पितृत्वाद्यभिमानितेति। पितृत्वाद्यभिमानिता पितृत्वा-द्यभिमानकार्य्यरूपा। स्वारसिकी परमा मनोवाक्कायाविष्टता। इत्यादि।

End. पूर्व्वमारोपस्फूर्त्तिभ्यां द्विविधस्य विचारतः।
लोभस्य साधुसङ्गस्य सद्भावाद्भजनेऽपि च ॥
तयोर्दशाया असत्त्वायाः स्थायित्वं मयि रचितम्।
सिद्धरूपस्य सम्भूतिः केवलाज्ज्ञानदशां विना ॥

सानुमेया विना तान्तु केवलो न हि सम्भवेत् ।
व्रजलोकानुसाराणां विना रूपत्वपां कुतः ॥
प्रतिलोमेन विज्ञेयः प्रयोगोऽत्र मनीषिभिः ।
दशाचतुष्टयं त्वस्या वाञ्छादिफलमुच्यते ॥
रागानुगाविवृतेस्तद्विना नैषा प्रयोजिका ।
सिद्धान्तकथनादौ यत् कृष्णैश्वर्य्यं प्रकाशते ॥
व्रजेन्द्ररतिमूलं तज्ज्ञानं भक्तौ तदुत्थितम् ।
रसो द्विधा प्राकृतश्चाप्राकृतश्चेति तच्च हि ॥
प्राकृते वत्सलत्वादि × ईश्वररतिमूलका ।
अप्राकृते ईश्वररतिर्वत्सलत्वादिमूलका ॥ ० ॥

Colophon. इति रागानुगाविवृतिः समाप्ता ॥
समञ्जसा ईश्वररतिसमाधानकरैर्जनैः ।
समाधेया ईश्वरति द्वितीयादिदशाचये ॥ * ॥
शाके रन्ध्रेन्दुमहिसु ... मासे च तापे तथा इन्दुसुतवासरे द्वितीयायाञ्च शुक्लायां रात्रौ च दण्डद्वये रागानुगाविवृतिरियं सम्पूर्णा । मित इति १७१९ लिखितं रागानुगादिपुस्तकम् ॥ * ॥

विषयः । राधाकृष्णयोः रागानुगादिलक्षणनिरूपणमुखेन तद्व्याख्यानादिः ।

सत्यमेव जयते

No. 311. राघवपाण्डवीयकाव्यटीका. By रामचन्द्रन्यायालङ्कारः. Substance, country-made paper, 16 × 3 inches. Folia, 105. Lines, 8 on a page. Extent, 2,730 çlokas. Character, Bengali. Date, ? Place of deposit, Ḍhākā, Bābu Bhagavāncandra Kavirāja. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
विपश्चनाशाञ्चितरम्यकीर्त्तिं
वामार्त्तिनाशं ++ देवसूनुम् ।
नमामि भूयः प्रणतेन मूर्द्ध्ना
भीमानुजं सावरजं सदारम् ॥
प्रणम्य नारायणमादिदेवं
श्रीरामचन्द्रो द्विज एष धीरः ।

मनोज्ञरामायणभारताख्य-
काव्यस्य टीकां कुरुते सुयत्नात् ॥

ग्रन्थारम्भे बहुतरविघ्नविनाशकानेकदेवतानतिरूपं मङ्गलं कविनावश्यं कर्त्तव्यं तत् शिष्ययितुमाह स्वाधिष्ठानेत्यादि। तथाच स्थितिकर्त्तृत्वेन प्रख्यातमेवादौ नमस्कुरुते ब्रह्मणे नमः स्थितिकर्त्रे नमः इत्यर्थः। एतेन च सर्व्वेषां स्थितिकर्त्तृत्वेन तदन्तःपातितया एतद्ग्रन्थस्य सुतरामेव स्थितिकर्त्तृकर्त्तृत्वमुपपन्नम्। किम्भूताय स्वाधीति। स्व आत्मा ईश्वरः विष्णुः तच अधिष्ठानं स्थितिर्यस्य। इत्यादि।

End. पक्षे वीरलक्ष्मीः अस्य अश्वत्थाम्नः आश्रयं अस्त्रं प्रतापमिव राजा नरदेवपुत्रं युधिष्ठिरं सेवते स्म ॥ अत्र दृष्टान्तः शृङ्गारलक्ष्मीः यथा कामदेवं सेवते। तद्वत्। सुगममन्यत् ॥

Colophon. इति रामचन्द्रन्यायालङ्कारभट्टाचार्य्यकृतायां राघवपाण्डवीयटीकायां शेष-निकुम्भवधो नाम एकादशः सर्गः ॥

विषयः। कविराजकृत-राघवपाण्डवीयकाव्यस्य व्याख्यानम्।

No. 312. राजादिवृत्तिः. Substance, country-made paper, 14×2 inches. Folia, 5. Lines, 9 on a page. Extent, 169 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Ātpāḍā, Paṇḍita Prasannacandra Vidyāratna. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय।

नत्वा हरपदद्वन्द्वं बालानामाशुबोधनम्।
राजादिगणसूत्राणां व्याख्यानं लिख्यते मया ॥

राजन्नहःसखि। तत्पुरुषसमासे एते राजादयो भवन्ति। देवानां राजा देवराजः। परमश्च तदहश्चेति परमाहः। देवानां सखा देवसखः। तत्पुरुष इति किम्। इत्यादि।

End. स्त्री च पुमांश्च स्त्रीपुंसौ स्त्रीपुंसाभ्याम्। ऋक् च साम च ऋक्सामे। वाक् च मनश्च वाङ्मनसे। धेन्वनडुहादिः

Colophon. इति समाप्तः।

विषयः। कातन्त्रीय-राजादिगणसूत्राणां सोदाहरणं व्याख्यानम्।

No. 313. राधाचरितम्. By रामचन्द्रः. Substance, country-made paper, 15 × 2½ inches. Folia, 9. Lines, 4 on a page. Extent, 144 çlokas. Character, Bengali. Date, Sk. 1758. Place of deposit, District Vãkuḍā, Viṣṇupura, Kādākuli, Paṇḍita Rāmaprasanna Bhaṭṭācāryya. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीरामः ।

काचिद्गोपी विमुग्धा मुररिपुविरहैः स्रस्तवेणी धरण्यां
सा सम्भ्रान्ता लुठन्ती स्म लपति सततं गच्छ गच्छेति नाथ ।
अस्मिन् कुञ्जे मनोज्ञे विश विश नयनं ज्ञानमात्रा कदाचिद्-
विस्मृत्यं तं जगाद स्वकृतनिजपिपासुद्भवेणुं विलोक्य ॥ इत्यादि ।

End. आसन्नोऽयं प्रकृत्या यत सितसमयं प्राप्य धैर्यं निगूढं
यावत् कृष्णागमो नो मधुनगरपथि प्राप्तवाणा प्रतीच्यै ।
एतद्ध्यायं प्रगच्छेत च लघु चरिणा सार्द्धमेव यूयं
नो चेत् प्राणान् प्रहास्ये दिवसपतिसुतातोयगा मज्जयन्त्या ॥

Colophon. देवश्रीयुतवीरसिंहकृतिनादिष्टेन शुश्रूषया
श्रीमद्विष्णुपुरापवासयुक्ति-श्रीरामचन्द्रेण तु ।
श्रीराधाचरिते कृते परिपरिच्छेदो द्वितीयो महान्
श्रीमद्विष्णवमोदको चरिकथाराधाप्रबोधाभिधः ॥ ० ॥
श्रीरामो जयति । शकाब्दाः १७५८ ।

विषयः । प्रथमपरिच्छेदे—कृष्णे मथुरां गतवति विरहविधुराया राधिकाया दूतलेन वेणुप्रेरणादिकम् । २ ये परिच्छेदे—राधिकाप्रबोधनम् ।

No. 314. रामगीताटीका. Substance, country-made paper, 14 × 2½ inches. Folia, 14. Lines, 7 on a page. Extent, 367 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Serapura, Paṇḍita Candrakānta Tarkālaṅkāra. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमः श्रीरामचन्द्राय ।

श्रीकृष्णाय नमो नित्यं गुरवे बुद्धिदायिने ।
कृपया तत्समाख्यातं लक्ष्मणाय विपश्चिते ॥

पञ्चाननैर्हि पञ्चास्यैश्चतुर्भिश्चतुराननैः ।
सहस्रास्यैरहं शेषैरमितं किमु वर्णये ॥
स्ववचः सफलीकर्त्तुं महिम्ना राघवस्य तु ।
आरब्धं तेन गीताया व्याख्यानं मे यथामति ॥ इत्यादि ।

End. सगुणं सन्तं मां हृदा मनसा यः सेवते स हि मद्रूप एवातः संस्पृशन् स्वपाद-गतरेणुभिः लोकत्रितयं पुनाति यथा रवि मंदात्मकरैर्गे लोकत्रितयं प्रकाशयति तद्वदित्यर्थः ॥ * ॥ श्रीरस्तु मयि ।

विषयः । रामगीताया व्याख्यानम् ॥

No. 315. रामचरितकाव्यम्. Substance, country-made paper, 12 × 3 inches. Folia, 53. Lines, 7 on a page. Extent, 1,113 çlokas. Character, Bengali. Date, Sk. 1754. Place of deposit, Tamluk, Kelomāl, Bābu Amaranātha Ghoṣa. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो भगवते रामचन्द्राय ।
अथ रामोऽश्वमेधेन यष्टुं यज्ञेश्वरो हरिः ।
मनश्चक्रेऽतिधर्म्मात्मा निहतो राजसूयतः ॥
प्रजानां राजसूयेन प्रायशो वै श्रमो भवेत् ।
यः प्रजारञ्जनाद्रामः कथं नाम समाचरेत् ॥
इति निश्चित्य मतिमान् भ्रातृंश्चैव पुरोधसः ।
मन्त्रिणश्चैव कुशलान् रामो वाक्यमथाब्रवीत् ॥ इत्यादि ।

End. केचित् पर्णपुटं नीत्वा वन्यपुष्पफलोत्करैः ।
तमसाजलजातानि प्रफुल्लकमलानि च ॥
गृहीत्वा प्रययुः केचित् कुशांश्च कुशहस्तिणः ।
मुनिश्च सपरीवारो मुनींश्च सपरिच्छदान् ॥
स्मरयन् जानकीं यात्रां चक्रे मङ्गलपूर्व्विकाम् ॥ ० ॥

Colophon. इति श्रीरामचरितोत्तरकाण्डमहाकाव्ये वाशिष्ठीये व्रतोत्कथनं नाम चतुर्दशः सर्गः ॥ ० ॥ शकाब्दाः ১৭৫৪ ।

विषयः । रामायणोत्तरकाण्डमवलम्ब्य श्रीरामचन्द्रचरितवर्णनम् ।

No. 316. रामपूजापद्धतिः. Substance, country-made paper, 17 × 3½ inches. Folia, 8. Lines, 7 on a page. Extent, 287 çlokas. Character, Bengali. Date, ? Place of deposit, Teliveni *viâ* Gadbetā, District Medinipura, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो रामाय । अथ रामपूजापटलः । ब्राह्मे मुहूर्त्ते उत्थाय सुप्त-स्वापः रात्रिवासस्त्यक्त्वा शिरसि सहस्रदलकमलकर्णिकावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशरूपं स्ववामस्थितया स्वप्रकाश-रूपया शक्त्या सहितं गुरुं विभाव्य मानसोपचारैराराध्य ऐं इति दशधा जप्त्वा नमस्कुर्य्यात् ॥ इत्यादि ।

End. निर्माल्यं शिरसा धार्य्यं सर्व्वाङ्गे चानुलेपनम् ।
नैवेद्यं चोपभुञ्जीत दत्त्वा तद्भक्तिशालिने ॥
पादोदकं पीत्वा नैवेद्यं किञ्चित् स्वीकृत्य अन्यद्दुयथायोग्याय दत्त्वा यथासुखं विहरेत् ॥

Colophon. इति रामपूजापद्धतिः ॥

विषयः । रामपूजाविधिस्तत्प्रयोगादिश्च ।

सत्यमेव जयते

No. 317. रामलीलामृतम्. By कृष्णमोहनः. Substance, country-made paper, 18 × 2½ inches. Folia, 46. Lines, 5 on a page. Extent, 920 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Phursāil, Paṇḍita Advaitacandra Nyāyaratna. Appearance, old. Verse. Incorrect.

Beginning. (आदितस्त्रीणि पत्राणि न सन्ति ।)
या प्राणप्रतिमा सुहृन्निरुपमा या पापपुण्ये समा
यामाश्रित्य गृहाश्रमः सुखमिहान्यत्रापि दुःखापहा ।
पुत्रान्मुक्तिपदं सदुक्तिसुखदं सर्व्वत्र भव्यास्पदं
तत्पुत्रस्य खनौ रसैकसरणौ कस्तां त्यजेत् कामिनीम् ॥
नित्यं नव्यजनं निषेकनिपुणं तेजस्विनं शोभनं
रामा कामयते स्थितेऽपि दयितेऽभ्यासे वदान्योद्यते ।

श्वासृा तं दयितं त्यजत्यपि सुतं कः प्रत्ययस्तेन चेत्
त्यक्त्वा तन्नु जनं भृशप्रणयिनं हन्तुं दया न क्षणम् ॥
दुष्प्रेक्षे दहने चिताधिशयने मित्रान्वयोद्दीपने
पुत्रादप्यजरं वपुः प्रियतरं प्रेम्णा प्रिया कातरम् ।
++ यानुपतिं स्वधर्म्मविरतिं निःशेषपापस्थितिं
सद्यस्तारयते कुलानि ++ ते कस्तां त्यजेत् त्वामृते ॥ इत्यादि ।

End. दुर्ज्ञेयं चरितं सुरैरपि तु यत् तस्या + लेशो मया
तद्दौ ++मतीव यत्नकलितो रामेति मे शासनम् ।
ज्ञानाग्नौ प्रियतातिव ++++ तत्ताथ भक्त्याम्बुधौ
नो चे+क्षिप घोरजन्मजलधेः पारे जगन्नायक ॥
येनाकारि गुरुद्विजाच्युतरमावाणीपिणाकीश्वरी
गङ्गा शम्भुसुतात्मजा हरिहरादित्यादिकानां परा ।
रम्या तत्स्तुतिमालिकातिविमलै ++++
नानातन्त्रसमुद्रमज्जदचयः सत्प्रीतये तद्यथा ॥
मन्त्राद्दानविधानपूजनपुरश्चर्य्यादि यच्चेरितं
तद्रम्यागमचन्द्रिकाख्य इतरस्तानन्दसिन्ध्वाह्वयः ।
यत्नोक्ताप्युपचारभक्तियजना ++ क्रिया प्रायशो-
ऽदृष्टज्ञानमितोऽगदाङ्कदुरितं पौर्व्वन्तु यच्चेरितम् ॥
ध्यानावल्यभिधोऽपरः सुमनसां ध्यानं यतो भाषितं
नानाकौशलकाव्यचित्ररचितं श्रीरामलीलामृतम् ।
काव्यं नव्यमिदं कृतञ्च कविना तेनैव किञ्चित् तत-
श्छन्दः प्राकृतपारसीकसुमनोवाणीविमिश्रैः पृथक् ॥
सीतारामानुजतनुजगद्व्याकृतं मौधकन्दं
सर्व्वानन्दागममुपनयेत् सौमनस्यञ्च पात्रम् ।
ब्रह्मज्ञानं फलमसृतकं सत्पदे स्वेच्छया
स्वान्ते सन्तः कलयत हितं सावधानं तदेतत् ॥

Colophon. तारा सा जननी सुघोरजठरा+तीव दुर्गापदो
मुक्ता रामसतो तु यत्करुणया सर्व्वं समुन्मीलितम् ।
तत्प्रीतीप्सितकृष्णमोहनकृते श्रीरामलीलामृते
काव्ये भव्यजनैकमोदजनके सर्गोऽगमत् सप्तमः ॥

विषयः । विश्वामित्रपुरस्कृतस्य रामस्य अहल्याशापविमोचनादिरावणवधान्तं यावच्चरित्र-वर्णनम् । तत्र चतुर्थे सर्गे चित्रकाव्यप्रदर्शनव्याजेन विविधबन्धकथनम् । यथा,— खड्गबन्धः । पद्मबन्धः । सोपानबन्धः । गोमूत्रबन्धः । अश्वबन्धः । कुलालचक्रबन्धः । पक्षिबन्धः । खड्गबन्धः । दुर्गबन्धः । सुदर्शनचक्रबन्धः । मुरजबन्धः । नागपाशबन्धः । वारणबन्धश्चेति ।

No. 318. रामार्चनचन्द्रिका. By आनन्दवनः. Substance, country-made paper, 14 × 3 inches. Folia, 102. Lines, 7 on a page. Extent, 2,499 çlokas. Character, Bengali. Date, ? Place of deposit, District Vãkuḍā, Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. नमः श्रीरामचन्द्राय ।

यत्त्वं संस्तुतिवारिधिं त्रिजगतां मौलिर्मा यस्य प्रभो-
र्येनेदं सकलं विभाति सततं जातं स्थितं संहृतम् ।
यस्मिन्नो निगमा भवन्ति न मनो मानं वराधीश्वरे
तं वन्दे सहजप्रकाशममलं श्रीरामचन्द्रं परम् ॥
विश्वव्यापितनोः शुभा रघुपतेर्मूर्त्तिरमूर्त्तिस्तयो-
र्वाक्यार्थप्रतिपादनैकचतुरः शान्त्यादिशीलः शुचिः ।
अज्ञानान्ध + वारणैकतरणिर्विज्ञानचिन्तामणि-
र्नित्यानन्दपदैकभूर्विजयते श्रीमान्मुकुन्दो मुनिः ॥
वेदान्तवाक्यार्थचरैर्विराजते
यस्मिन् गजाः काममदादयो न हि ।
बुधाः सदानन्दपदं प्रपेदिरे
वन्दे मुकुन्दाख्यवनं गुरुं परम् ॥
पूर्व्वैश्रीतरतापनीयमखिलं कल्पं वनं मासते
ब्रह्मागस्तिवशिष्ठनामसहिताः कल्पास्तथा संहिताः ।
शास्त्रं मन्त्रमयं मया कुवलयं लालोच्य सीतादिकं
श्रीरामार्चनचन्द्रिका कलिमलप्रध्वंसिका प्रोच्यते ॥
तत्तद्ग्रन्थगतैर्नानावाक्यैरेव च संस्कृतैः ।
सौकर्य्यार्थं क्रमः सम्यक् संक्षेपेण प्रतन्यते ।
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः ॥ इत्यादि ।

End. कोऽप्यनुग्रहमसुधियं यमपि प्रेमाङ्कुरं साम्प्रतं
संसारद्वानलतापशान्त्यै × × श्रीरामार्चनचन्द्रिकेयम् ।
स्यात् संहितामार्गसुपाश्रयद्भिर्वादिचिभिर्नन्दितसोधयत् ॥ (?)
पटलैः पञ्चभिः प्रोक्ता श्रीरामार्चनचन्द्रिका ।
आनन्दवननाम्ना चि यतिना हरितुष्टये ॥ ० ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीमन्मुकुन्दवनश्रीचरणशिष्यानन्दवन-विरचितायां रामार्चनचन्द्रिकायां पञ्चमः पटलः ॥ समाप्तश्चायं ग्रन्थः ॥

विषयः । गुरुशिष्यलक्षणादिनिरूपणम् । सुप्तप्रबोधकालादिनिरूपणम् । राशिशुद्ध्यादि-निरूपणम् । मन्त्रसंस्कारादिः । रामसीताध्यानादिः । बीजाद्यर्थनिरूपणम् । मासनक्षत्रादि-शुद्धिनिरूपणम् । होमविध्यादिः । दीक्षाप्रकरणादिः । तिलकधारणविध्यादिः । द्वितीयदिन-भागकृत्यविधिः । शुद्धिचतुष्टयादिः । भूतशुद्ध्यादिः । न्यासादिनिरूपणम् । प्रथमे द्वितीये च पटले एते विषयाः सन्ति । ३ यपटले ध्यानपूजाप्रयोगादिः । तीर्थधारणादिश्च । ४ र्थपटले षष्ठदिनभागकर्त्तव्यादिः । पुरश्चरणादिः । सर्व्वयन्त्रसाधारणक्रमादिश्च । ५ मपटले रामनवमी माहात्म्यादिनिरूपणमुखेन पूजादिनिरूपणमिति ।

No. 319. रावणचेटकम् . Substance, country paper. Folia, 5. Lines, 8 on a page. Extent, 115 çlokas. Character, Nāgara. Place of deposit, Gobardhanasarāi, Benares, Paṇḍita Vindhyeçvarīprasāda Dube. Appearance, fresh. Generally correct.

Beginning. श्रीगणेशाय नमः ॥ अथ रावणचेटकस्य सर्व्वोपस्करमन्त्रचेटकानां इत्यारा-धनेन सिध्यति । अथ मन्त्रः ॐ ह्रीं क्लीं मुं चां चौं चूं चें चौं चः ॐ नमो भगवते दशकण्ठाय दशग्रीवाय दशाननविंशतिनेत्रधराय एकादश-शिक्षाद्दशग्रीव-नवनासा-विंशत्योष्ठाय विंशतिपाणिने विंशतिभुजाभूषि-ताय नागयज्ञोपवीताय नमः सर्व्वविद्याविशारदाय । इत्यादि ।

End. अथार्जुनचेटकं ॐ प्रों म्रों श्रों श्रीं श्रीकार्त्तवीर्य्यार्जुन-सहस्रकरसंस्थित-सहस्रायुधधर-सहस्ररश्मिधर—सहस्रमूर्त्तिधर—सहस्रकवचधर—सहस्र—अस्त्र-धर—दण्ड-पाश—गदा-शक्ति—खड्गाङ्कुश-शूल-मुद्गर-मुषल-तोमर-कुठाराङ्कुश-चक्र-करवाल-परिघचक्र-राखग्निवाणधर सर्व्वदुष्टचौरान् नाशय नाशय

सर्व्वलोकान् पालय पालय ॐ ह्रीं सहवारे ह्रं फट् स्वाहा परस्य बाध राष्ट्रं स्वराष्ट्रस्यात्मनो परि परितोषमोक्षमार्गेण रक्षा च इत्यजरं जपेत् ।

Colophon. इत्यागमोक्तकुम्भकर्णचेटकाख्यं रावणोक्तं नवोदशचेटकं समाप्तिमगात् । श्रीशिवशक्तिशङ्करो जयति जय शङ्कर जय शङ्कर जय शङ्कर जय शङ्कर जय शङ्कर ।

विषयः । रावणचेटकम् । रम्भकचेटकम् । भृङ्गिचेटकम् । विश्वावसुचेटकम् । चोला-चेटकम् । कुम्भकर्णचेटकम् । वाचाटचेटकम् । विश्वचेटकम् । रक्तकम्बलचेटकम् । चोभ-चेटकम् । सागरचेटकम् । निशाचरचेटकम् । चुम्बुकचेटकम् । सुपथचेटकम् । प्रेरकचेटकम् । भवचेटकम् । अर्ज्जुनचेटकञ्च ।

No. 320. रुग्विनिश्चयटीका (वैद्यमनोरमा) By रामकृष्णभट्टः. Substance, palm-leaf, 18 × 1 inches. Folia, 241. Lines, 4 on a page. Extent, 5,061 çlokas. Character, Bengali. Date, Sk. 1685. Place of deposit, District Ḍhākā, Vikramapura, Vāsirā, Bābu Bhagavāncandra Kavirāja. Appearance, tolerable. Prose. Correct.

Beginning. नमो गणेशाय ।

लोकेशं व्यक्तमव्यक्तं निर्गुणं त्रिगुणात्मकम् ।
सदसद्रूपिणं वन्दे तं कारणमकारणम् ॥
वन्दे चरणसरोजं श्रीगौरीनीलकण्ठयोः पित्रोः ।
यद्भक्त्या कृतकृत्यास्तरन्ति दुःखाम्भोधिं लोकाः ॥
.... ।
तन्यते रामकृष्णेन टीका वैद्यमनोरमा ॥

अथ खलु सुश्रुताद्यखिलविश्रुतविशुद्धबुद्धिर्माधवकरो निखिलतन्त्रतत्त्वसङ्ग्रह-ज्ञापकं त्रिविधशिष्यव्युत्पादनाय .... परम्परापरिप्राप्तमखिलप्रत्यूह-व्यूहव्यपोहहेतुमीश्वरनमस्कारं प्रागकार्षीत् । प्रणम्येत्यादि ।
रुग्विनिश्चयसंज्ञकोऽयं ग्रन्थो निबध्यते । इति श्लोकद्वयेन—इत्यादि ।

End. प्रसन्नदोषमिति । प्रसन्ना अविकृता दोषा यस्य तम् । त्वमेव कथं जानीया इत्याह । प्रतिस्वधातुमित्यादिधातुशब्देन वातादयो रसादयो-ऽविशेषादुच्यन्ते ।

Colophon. इति श्रीरामकृष्णभट्टकृतायां रुग्विनिश्चयटीकायां वैद्यमनोरमायां विषनिदानवृत्तिः समाप्ता ॥ शुभमस्तु शकाब्दाः १६८५ ।

विषयः । माधवकरकृत-निदानापरनामकरुग्विनिश्चयाभिधान-वैद्यकग्रन्थस्य व्याख्यानम् ।

No. 321. रुचादिवृत्तिः. By मधुसूदनः. Substance, country-made paper, 16 × 3 inches. Folia, 16. Lines, 5 on a page. Extent, 230 çlokas. Character, Bengali. Date, Sk. 1702. Place of deposit, District Mayamanasiṁha, Kāṅihārī, Paṇḍita Mukundacandra Smṛtiratna. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो हरये ।

नत्वा पदाब्जं शिवदं शिवाया विलोक्य कातन्त्रविचारसारम् ।
चक्रे रुचादेर्विवृतिं विपश्चित्तते कृतिश्रीमधुसूदनोऽयम् ॥
नेर्विशः । नेः परो विशतो रुचादिर्भवति । इत्यादि ।

End. न्यक्षतावयवसम्प्रदाये लेकवचनमपि व्यतिलुनीते सेनेति ।
इह टीकायाः समाकृष्य व्यलेखीत् विदुषां मुदे ।
रुचादिवृत्तिर्नेता तु श्रीमान् श्रीमधुसूदनः ॥ * ॥

Colophon. इति रुचादिवृत्तिः समाप्ता ॥ ० ॥ शकाब्दाः १७०२ ।

विषयः । रुचादिगणीयधातुरूपकथनम् ।

No. 322. रुद्रचण्डिका. Substance, country-made paper, $13\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 10. Lines, 8 on a page. Extent, 290 çlokas. Character, Bengali. Date, ? Place of deposit, District Tripurā, Parganā Sarāil, Vuḍīçvara, Paṇḍita Kṛṣṇakiçora Vidyāvāgīça. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमश्चण्डिकायै ।

ॐ चण्डिकेयं चतुर्वर्गफलदा साधकेश्वरी ।
कोटिजन्मार्जितं पुण्यं दया श्रद्धा विधीयते ॥
श्रीपार्वत्युवाच ।
भगवन् भूतभव्येश त्रैलोक्याधिपते हर ।
यदुपाख्यानमाश्चर्यं सौरथेयं वदस्व मे ॥

रुद्र उवाच ।

अस्या रुद्रचण्डिकाया ब्रह्मादय ऋषयोऽनुष्टुप्छन्दश्चण्डिका देवता । इत्यादि

End. अतएव महामाये किं वच्मि तव सन्निधौ ।

लम्बोदराधिकां चण्डीं श्रवणात् पठनाद् जनः ।

तत् लमतीति वाक्येन मृत्योरपि सुदुर्लभम् ॥ (?)

Colophon. इति रुद्रयामले हरगौरीसंवादे रुद्रचण्डिका समाप्ता ॥

विषयः । शिवकार्त्तिकेयसंवादेन रुद्रयामलीयरुद्रचण्डिकायाः कवचकथनम् । हरगौरीसंवादमुखेनागमसन्दर्भीयरुद्रचण्डिकान्तर्गतप्रथमपरिच्छेदे चण्डीरहस्यकथनम् । शिवदुर्गासंवादेनागमसन्दर्भे श्रीरुद्रयामलीयरुद्रचण्डिकान्तर्गतमध्यमावच्छेदपटले साधनरहस्यकथनम् । हरगौरीसंवादेन श्रीरुद्रयामलीयरुद्रचण्डिकाया वारभेदे भैरव्यादिमूर्त्तिभेदपूजनात् फलभेदकथनञ्च ॥

No. 323. रुद्रयामलतन्त्रम् . Substance, country-made paper, 17 × 5 inches. Folia, 195. Lines, 9 on a page. Extent, 5,460 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Mājhapāḍā, Bābu Rāsavihārī Rāya. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमः परमगुरवे ।

आनन्दभैरव उवाच ।

पुरा श्रीपरमेशानीवदनाम्भोजनिःसृतम् ।

श्रीयामलं महातन्त्रं स्वतन्त्रं विष्णुयामलम् ॥

शक्तियामलमाख्यातं ब्रह्मणः स्तुतिहेतुना ।

ब्रह्मयामलवेदाङ्गं सर्व्वञ्च कथितं प्रिये ॥

इदानीमुत्तराकाण्डं वद श्रीरुद्रयामलम् ।

यदि भाग्यवशाद्देवि तव श्रीमुखपङ्कजे ॥

यानि यानि स्वतन्त्राणि संदत्तानि महीतले ।

प्रकाशय महातन्त्रं मान्यतन्त्रेषु त्वम्निमान् ॥

सर्व्ववेदान्तवेदेषु कथितव्यं ततः परम् ।

तदा ते भक्तवर्गाणां सिद्धिः सञ्चरते ध्रुवम् ॥ इत्यादि ।

End.

शतमष्टोत्तरञ्चास्य पुरश्चर्य्याविधिः स्मृतः ।
न स्नानं न तपः कार्य्यं न पूजादिविधानकम् ॥
केवलं स्तवपाठेनानाहते सुस्थिरो भवेत् ।
चिरजीवी वीरतरो वीतसंसारभावनः ॥
पठित्वा धारयित्वा च योगभ्रष्टो न सम्भवेत् ।
अनायासे योगसिद्धिं प्राप्नोति परमां श्रियम् ॥

Colophon. इति श्रीरुद्रयामले उत्तरकाण्डे तन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे स्तोत्रविन्यासो नाम चतुःषष्टितमः पटलः ॥

विषयः । आनन्दभैरवं प्रति आनन्दभैरव्या उक्तिरूपोऽयं निगमः । तत्र यामलशब्दव्युत्पत्तिकथनम् । तन्त्रपाठमाहात्म्यकीर्त्तनम् । भावशब्दनिर्व्वचनम् । तत्र प्रसङ्गात् सुरापानविधिः । दिव्यवीरपशुभावभेदात् भावस्य त्रैविध्यनिरूपणम् । दिव्यभाववीरभावपशुभावेषु सिद्धिक्रमनिरूपणम् । पशूनां रात्रिकर्म्मनिषेधः । विशेषतो वीरभावदिव्यभावयोर्निरूपणम् । कलौ भावविशेषविधिः । गुरूपसदनविधिः । तत्र गुरुमन्त्रदेवतादिस्वरूपकथनञ्च । अथ कुलाचारविधौ व्रतभङ्गप्रायश्चित्तादिः । पशुभावनिर्णयः । गुरुस्तोत्रादिकथनम् । दीक्षादिविधिः । सर्व्वासां विद्यानां दीक्षासु चक्रनिरूपणम् । तत्र कालाकालविचारचक्रम् । अकडमचक्रम् । ताराचक्रम् । राशिचक्रम् । कूर्म्मचक्रम् । शिवचक्रम् । विष्णुचक्रम् । ब्रह्मचक्रम् । श्रीचिदंशात्मकचक्रम् । ऋणिधनिमहाचक्रम् । उल्काचक्रम् । चक्रसाररामचक्रम् । चतुश्चक्रम् । शुद्धचक्रम् । अकथहचक्रम् । अरिमन्त्रविसर्ज्जनविधिः । वर्णमालाकथनम् । कुण्डलिनीस्तोत्रम् । भावसङ्केतकथनम् । कौलिकस्य दिव्यभावावश्यकताकथनञ्च । अथ कुमारीपूजाकथनम् । तत्र कुमारीमन्त्रोद्धारादिविधिः । कुमारीमन्त्रजपहोमादिविधिः । कुमारीस्तोत्रम् । कुमारीकवचम् । कुमारीसहस्रनामस्तोत्रञ्च । अथ अरुणोदयादिकालनिरूपणम् । तत्र प्रश्नसारचक्रम् । आज्ञाचक्रम् । सन्ध्याकालादिकथनम् । आज्ञाप्रश्नार्थभाववर्णविन्यासः । भावचक्रकथनम् । वेदशाखापल्लवकथनम् । आज्ञाचक्रस्य तृतीयदलनिरूपणम् । अथर्व्ववेदलक्षणम् । ब्रह्मज्ञानकथनम् । सुरामांसादिस्वरूपव्याख्यानम् । कामचक्रवर्णनम् । षड़ाधारभेदकथनम् । सिद्धमन्त्रविवेचनम् । वीरभावमाहात्म्यकथनम् । षट्चक्रफलोदयकथनञ्च । अथ योगसाधनविधिः । बृहद्धंसमन्त्रः । हंसप्रणवव्याख्या । ब्रह्ममार्गनिरूपणम् । आसनभेदकथनम् । योगशास्त्रार्थनिरूपणम् । योगसाधनविधिः । प्राणायामस्वरूपादिकथनम् । जपविधिः । ध्यानविधिः । कुण्डलिनीध्यानविधिः । दिव्यध्यानविधिः । ब्रह्मतत्त्वनिरूपणम् । त्रिविधस्नानकथनम् । तर्पणविधिः । होमविधिः । अन्तर्यजनविधिः । पञ्चमकारविधिः । अष्टाङ्गयोगः । समाधिमाहात्म्यम् । शुक्लकृष्णपक्षभेदात् प्राणायामचिन्तनविधिः । प्रत्याहारादिफलकथनम् । वैष्णवानां परमपुरुषस्थानम् ।

मन्त्रसिद्धिलक्षणम् । कन्दवासिनीस्तोत्रम् । षट्चक्रयोगः । महाकालमूलपद्मविवेचनम् । मनुष्य-जन्मप्रशंसा । धौतिनेत्यादियोगः । चैतन्यकुण्डलिनीसहस्रनामकथनम् । स्वाधिष्ठानस्वरूपादि-कथनञ्च । अथ श्रीकृष्णसाधनविधिः । भेदिनीसाधनविधिः । कुण्डलिनीकवचम् । विजया-विधिः । राकिणीस्तोत्रम् । तत्साधनक्रमः । रुद्राणीस्तोत्रम् । महामृत्युञ्जयविधानम् । महा-रुद्रस्तवः । लाकिनीस्तोत्रम् । सप्तस्वर्गनिरूपणम् । तत्र तत्र पश्वादिभावनिरूपणम् । मणिपूरानु-क्रमः । मन्त्रार्थचैतन्यम् । पञ्चद्रव्यादिसाधनविधिः । निर्गुण्डीशोधनविधिः । सिद्धाष्टकमाहात्म्यम् । काकिनीसहस्रनामकथनञ्च । अथ भेदिनीस्तोत्रम् । छेदिनीस्तोत्रम् । कुण्डलिनीध्यानादिः । कुण्डलिनीस्तवः । कुण्डलिनीकवचम् । पञ्चासवपानविधिः । कुण्डलिन्या अष्टोत्तरसहस्रनाम-कथनञ्च । अथ श्रीकृष्णराकिणीकथनम् । तत्र मन्त्रोद्धारादिविधिः । ततो नरसिंहमन्त्रः । श्रीकृष्णमन्त्रः । श्रीकृष्णध्यानम् । तत्पूजाविधिः । श्रीकृष्णस्तवः । श्रीकृष्णकवचम् । षड्दल-स्थितषड्वर्णस्तोत्रम् । राकिणीतर्पणादिविधिः । श्रीकृष्णराकिणीसहस्रनामकथनम् । मणिपूर-भेदकथनम् । लाकिनीस्तोत्रम् । डादिफान्तवर्णध्यानादिः । महारुद्रशक्तिस्तोत्रम् । मृत्युञ्जय-मन्त्रोद्धारप्रकारश्च । अथ श्रीकण्ठमातृकान्यासादिः । पीठन्यासश्च । अथ रुद्रपूजाविधानम् । रुद्रशक्तिपूजाविधिः । रुद्रस्तवः । मृत्युञ्जयपूजाविधिः । मृत्युञ्जयस्तोत्रम् । लाकिनीस्तोत्रम् । मृत्युञ्जयलाकिनीकथनम् । तस्या अष्टोत्तरशतनामकथनम् । तस्याः सहस्रनामकथनञ्च । मन्त्रार्थ-चैतन्यविन्यासविधिः । काकिनी[illegible]

End. ऋ गतिप्रापणयोः भुवादौ ऋच्छति । ऋ सृ गतौ इयर्त्ति । ऋ गतौ ऋणोति । ऋणु दीप्तौ तनादौ स्वरितेत् अर्णोति अर्णुते ऋणोति ऋणुते इति । संज्ञा-पूर्व्वकत्वात् अत्र गुणाभावः । ऋधु वृद्धौ ऋध्नोति । ऋ । एजृ दीप्तौ । भुवादावात्मनेपदी एजते । एजृ कम्पने भुवादौ एजति । चुरादौ च एजयति ।

Colophon. इति श्रीकुब्जकभट्टकृतरूपप्रकाशः समाप्तः ॥ * ॥ श्रीरामाय नमः ।

विषयः । धात्वर्थनिरूपणमुखेन धातुरूपादिनिरूपणम् ।

No. 325. ललितावली. By दिगम्बरभट्टः. Substance, country-made paper, $14\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 5. Lines, 6 on a page. Extent, 99 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Parganā Sonārgā̃, Post Office Vaidyervāzār, grāma Sātbheyepāḍā, [illegible] Appearance, tolerable. Verse. Gen-

ईवे च सुरभौ चैव वारिकुम्भे खरे नखे ।
मन्दारके च गगने नाकशब्दोऽभिधीयते ॥
दिवसे पिङ्गलायां ... ... ।
पुञ्जे ...... प्रघोषे च ग्रामे गौरवभाषणे ॥
ऐश्वर्य्ये मधुरे चैव पुरः सर्व्वत्र कथ्यते ।
पाकपात्रे च सप्तम्यां सैन्धवे घोटके पथि ॥
पिप्पल्यां मुषले कच्छे चयः सर्व्वत्र गीयते ।
शाकभेषजकाके च शीघ्रगे ... ... ।
आश्चर्य्ये घोरनादे च मुनिनार्य्यां रिपुक्षये ॥
कुक्कुरे गजविष्ठायां श्वाशब्दः परिकीर्त्तितः ॥

Colophon. (खण्डितशेषत्वात् समाप्तिसूचकं वाक्यं नास्ति ॥)

विषयः । नानार्थ-द्व्यर्थ पर्य्यायबोधकमभिधानम् ।

No. 326. लाघवज्ञानम् . Substance, country-made paper, $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 4. Lines, 8 on a page. Extent, 236 çlokas. Character, Bengali. Date, ? Place of deposit, District Pharidpur, Post Office Pālang, grāma Dhānukā, Paṇḍita Kāliçaṇkara Vidyābhūṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. ॐ महानसीयवह्नित्वादिना व्यापकताज्ञानं विनापि शुद्धवह्नित्वादिना व्यापकताज्ञानस्य महानसीयवह्नौ लाघवादिति लाघवज्ञानसहकारेण महानसीयवह्निभिन्नवह्न्यभाववानितीतरबाधकसहकारेण महानसीयत्वविशिष्टवह्नित्वादिरूपेण तादृशवह्न्यादिविधेयकानुमितिजनकत्वात् तादृशानुमितौ लाघवज्ञानेतरबाधयोर्हेतुत्वं कल्पनीयं । अन्यथा तच्छून्यकालेऽपि तथाविधानुमित्यापत्तेः । न चैवं लाघवज्ञानस्यानुमितौ महानसीयवह्नित्वावच्छिन्ननिरूपितव्याप्यावगाहिपरामर्शस्य व्यभिचारतेति वाच्यं अन्यलिङ्गकानुमितौ व्यभिचारवारणाय परामर्शजन्यतावच्छेदककोटौ तल्लिङ्गकपरामर्शाव्यवहितोत्तरत्वनिवेशेन व्यभिचाराभावात् । एवं तादृशपरामर्शजन्यानुमितौ लाघवज्ञानादीनां व्यभिचारवारणाय लाघवज्ञानजन्यतावच्छेदककोटावपि तदव्यवहितोत्तरत्वं निवेशनीयम् । यच्च तादृशलाघवज्ञानस्य कार्य्यतावच्छेदकविशिष्टवैशिष्ट्यविषयत्वं परामर्शजन्यानुमितौ च विशेष्ये विशेषणमिति रीत्यैव महानसीयवह्न्यादिभानमिति न व्यभिचारः ॥ इत्यादि ॥

End. नव्यमतेऽपि तादृशपरामर्शस्य स्वतन्त्रहेतुताया आवश्यकत्वम् । तथाहि तन्मते स्वनिष्ठायाः स्वावच्छिन्नप्रकारतानिरूपितप्रतियोगितानिष्ठसांसर्गिकविषयतावच्छिन्नाभावत्वावच्छिन्नविषयतावच्छिन्नविशेष्यताकत्व—सम्बन्धावच्छिन्ना प्रतियोगितावच्छेदकता तन्निरूपकभेदवत्त्वव्याप्तिप्रकारतानिरूपितस्वावच्छिन्नप्रकारतानिरूपितपर्य्यन्तत्वावच्छिन्नविशेष्यताकत्वोभयसम्बन्धेन किञ्चिद्धर्मविशिष्टत्वमेव निश्चयत्वं निवेश्य परमसम्बन्धघटकस्वनिष्ठावच्छेदकता स्वनिरूपकप्रकारतानिरूपितत्वसम्बन्धेन व्याप्यत्वनिष्ठावच्छेदकताभिन्नावच्छेदकता विशिष्टा- ...... निवेश्या ... ...
हेतुत्वस्य तादृशनिश्चयविशिष्टतावच्छिन्नं प्रति क्लृप्तत्वात् तादृशकार्य्यतावच्छेदकाक्रान्तत्वादनुमितेरपि तत एवोपपत्तेः । मन्मतेऽपि स्वतन्त्रहेतुताकल्पनापि नास्तीति मद्धानसीयत्वादिविषयत्वमनुमितौ निर्युक्तिकमेवेति संक्षेपः ।

Colophon. इति लाघवज्ञानस्य समाप्तः ।

विषयः । गुरुलघुभेदेन वस्तूनां द्विविधज्ञानमस्त्येव । तत्रास्मिन् लाघवज्ञानस्यैव सम्यग् विचारः ।

No. 327. वर्णजातिसङ्करमाला (पराशरपद्धतीया). By भार्गवरामः. Substance, country-made paper, 13 × 3 inches. Folia, 2. Lines, 8 on a page. Extent, 64 çlokas. Character, Bengali. Date, ? Place of deposit, Nalkōḍā *viâ* Vaçirhāṭ, Paṇḍita Prasannacandra Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णाश्चतुर्व्विधाः ।
वर्णानां सङ्करोत्पत्तिं निशामय महाशय ।
आदौ विष्णोर्मुखाज्जाता ब्राह्मणा वेदपारगाः ॥
बाह्वोश्च क्षत्रिया जाता ऊर्व्वोर्वैश्या धनान्विताः ।
पद्भ्यां शूद्राश्च सम्भूतास्त्रिवर्णस्य च सेवकाः ॥ इत्यादि ।

End. तीवरौदाय च दातव्यं चाण्डालाय ततः परम् ।
चड्डिपाय च काण्ड्राय स्तपाय च म्लेच्छजातये ॥ (?)
इमां क्रियां भार्गवरामनीतां
योऽप्यन्यथा मूढजनः करोति ।

तस्योत्तमाङ्गे खलु वज्रपातः
पतेत् सदा शुद्धि भृगोः कुठारः ॥ (?)

Colophon. इति पराशरपद्धतौ भार्गवरामकृतौ वर्णजातिसङ्करमाला समाप्ता ॥ ० ॥

विषयः । ब्राह्मणाद्युत्पत्तिनिरूपणमुखेन सङ्करजातिनिरूपणम् ।

No. 328. वर्णप्रकाशः. By कर्णपूरगोस्वामी. Substance, country-made paper, 17×3 inches. Folia, 10. Lines, 6 on a page. Extent, 225 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Sonārgā̃, Purāpāḍā, Paṇḍita Kālikāuta Çiromaṇi. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

कलुषगट्टीनो रसः सुरारे-
र्नखदलितादृहगालिकैतवेन ।
विनिच्छितमयमानयत्नपदं (?)
निखिलनरं नरकेशरी पुनातु ॥
साधारणसुधाभोगैर्विविधैर्विबुधालयैः ।
पुरन्दरपुरीवान्या धन्यास्ति चैपुरी पुरी ॥
सोमसन्तानसम्भूतः पुरुहूत इवापरः ।
तस्या अमरमाणिक्यनामाभूनृपनायकः ॥
कमलानन्दिनोऽनन्तकैरवक्रमकारिणः ।
सर्व्वे एवाभवन् शूराः पौरा यस्य प्रभावतः ॥
स्थिते रतः समस्तानां भूतानां भूतिभूषितः ।
तस्य राजधरो नाम सूनुः स्थाणुरिवाजनि ॥
शब्दशास्त्रातिशूरेण कर्णपूरेण सूरिणा ।
अयं तस्यानुबन्धेन निबन्धः क्रियते मया ॥
आनन्दनो ... ... यज्ञानां दानदायकः ।
कर्णपूरकविः कस्मै ... ... न रोचते ॥
सन्देहध्वान्तसन्दोहच्छन्ने विज्ञानचक्षुषि ।
वर्णप्रकाशदीपेन लिपिकर्म्म प्रयुज्यताम् ॥

पुराणयमकश्लेषान् कोषानेकोनविंशतिम् ।
धातुवृत्ति ... ... समाहृत्यायमुच्यते ॥
... ... जयजल्पकजीवनं जवनं जवः ।
जिघ्नगो ज्वभनं ज्वभा जनको जननं जनः ॥ इत्यादि ।

End. मूर्द्धन्ये च नथा दन्त्ये नारीवरणमीरितम् ।
स्याच्छिरीषणनं ... ... पणसस्तथा ॥
तथा ब्रीहिवणश्चैव चीर ... ... प्रकोपणम् ।
प्रणिपङ्कः ... ... प्रणिंसकश्च काकिणी ॥
भवेत् प्रनिंसकश्चैव प्रणिन्द्यश्च तथैव च ।
चक्रणदी सुरापाणं तथा चक्रनितम्बकः ॥
गिरिनद् गिरिनदी तथा गिरिनितम्बकः ।
चराचनीत्यादि पुनः प्रोक्तः शिष्टप्रयोगतः ॥

Colophon. इति त्रिपुरपुरुहूतासरमाणिक्यमहामात्य श्रीकर्णपूरकृते वर्णप्रकाशे मूर्द्धन्य-णकारप्रकरणम् ॥

विषयः । यकारनकारवकारादिवर्णानां वर्गीयान्तःस्थताविचारः । अत्र प्रथमं वर्गीयान्तःस्थ-ज (य) कारनिरूपणम् । तत्र वर्गीयजकारनिरूपणम् । एकद्वित्र्यक्षरान्तरवर्गीयजकारनिरूपणम् । एकद्वित्र्यक्षरान्तरान्तःस्थयकारप्रकरणम् । मूर्द्धण्यनकारप्रकरणम् । तत्र एकद्वित्र्यक्षरान्तरमूर्द्धन्य-णकारनिरूपणम् । दन्त्यनकारप्रकरणम् । तत्र एकद्वित्र्यक्षरान्तरदन्त्यनकारनिरूपणञ्च । इति ।

No. 329. वादमाला. By जयतीर्थः. Substance, country-made paper, 12 × 6 inches. Folia, 25. Lines, 9 on a page. Extent, 727 çlokas. Character, Nāgara. Date, ? Place of deposit, Kāçidhāma, Khālispurā, Paṇḍita Priyanātha Tattvaratna. Appearance, tolerable. Prose. Correct.

Beginning. श्रीवेदव्यासाय नमः । शुभमस्तु ।
नमोऽमितकल्याणगुणपूर्णाय विष्णवे ।
सत्याशेषजगज्जन्मपूर्व्वकर्त्रे सुरद्विषे ॥
ननु कथं सत्यं जगदङ्गीकाराधिकारिणो विमतं मिथ्यादृश्यत्वात् जड़त्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत् इत्यनुमानविरोधात् मैवम् । इत्यादि ।

End. प्राङ्मुखात् वाङ्मुखात् भूयात् प्रीत्यै माधवमध्ययोः ।

Colophon. इति श्रीमद्वादमाला जयतीर्थमुनिविरचिता ।

विषयः । माध्वाचार्य्यमतादीनां विशदीकरणम् ।

No. 330. वादिभूषणम् . By पुरुषोत्तमाचार्य्यः . Substance, country-made paper, 12×3 inches. Folia, 8. Lines, 9 on a page. Extent, 274 çlokas. Character, Nāgara. Date, ? Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Rāmānuja Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।

पूर्णबोधसुखसद्गुणदेहं पूर्णभक्तिहृदयाम्बुजगेहम् ।
तं जगज्जननसंहृतिहेतुं नौम्यहं यदुपतिं गतदोषम् ॥
न्यक्कृत्य बन्धमिथ्यात्वं रचिता वेदमानता ।
सूत्रव्याख्या कृता येन पूर्णबोधं नमामि तम् ॥
यद्वाणी भवसन्तापक्लिष्टपाणीव सदा सताम् ।
नत्वा जयार्य्यं संनौमि विद्याधीशमुखान् गुरून् ॥
प्रणम्य पितरौ भक्त्या पितृव्यं तत्प्रपूजितम् ।
करिष्ये बन्धमिथ्यात्वदूषणं वादिभूषणम् ॥
ननु सर्व्वागमानामद्वितीयपरत्वान्यथानुपपत्त्या बन्धमिथ्यात्वमवश्यमन्वेष्टव्यम् ।
इत्यादि ।

End. तथा सति वैदिकबन्धेऽपि तदभावेन मिथ्यात्वानुपपत्तिः न चोभयोराविद्यकवेदवेद्यत्वेऽपि बन्धमिथ्याविद्यकत्वात् मिथ्यात्वं न ब्रह्मण इति वाच्यं वेदाप्रामाण्यानिस्तारात् । तस्मात् बन्धमिथ्यात्वखण्डनं वेदप्रामाण्यानुकूलमिति सिद्धम् ।

Colophon. इति श्रीपुरुषोत्तमाचार्य्यविरचितं वादिभूषणं समाप्तम् । श्रीरामानुजाय नमः ।

विषयः । विचारमुखेन बन्धमिथ्यात्वखण्डनादिः ।

No. 331. वासन्तीविवेकः . **By** शूलपाणिः . Substance, country-made paper, 18×3½ inches. Folia, 19. Lines, 6 on a page. Extent, 306 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamana-

siṁha Serapura, Paṇḍita Durgāsundara Kṛtiratna. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. अथ कामरूपीयनिबन्धोक्ता वासन्तीपूजाव्यवस्था । अत्र विशेषानुक्तौ शरदुक्त-
प्रमाणो ग्राह्यः । यथा भविष्ये ।
विशेषानभिधानात्तु शरदुक्तक्रमो श्रेयः ।
इत्थं बोधनं विनैव पूजा कार्य्या ॥ इत्यादि ।

End. अत्रामन्त्रणाधिवासौ पत्रीप्रवेशाद्यव्यवहितपूर्व्वदिने षष्ठीं विनापि सायं कार्य्यौ दोलयात्राव्यवहितपूर्व्वदिने चतुर्द्दशीं विनापि वह्न्युत्सव इति विहितम् ॥ दोलयात्राविवेकः ।

Colophon. इति शूलपाणिकृतौ वासन्तीविवेकः समाप्तः ॥

विषयः । वासन्तीपूजाव्यवस्थामुखेन तत्पूजाप्रकरणादिनिरूपणम् ।

No. 332. विधानमाला. Substance, country-made paper. Folia, 47. Lines, 8 on a page. Extent, 600 çlokas. Character, Nāgara. Place of deposit, Benares Govardhanasarāi, Paṇḍita Vindhyeçvarīprasāda Dube. Appearance, old. Prose and verse. Incorrect.

Beginning. श्रीगणेशाय नमः । अथ विधानमालारम्भः ॥
प्रणम्य लम्बोदरमातरं तां सन्तोषदां सर्व्वपुराणदृष्टाम् ।
धर्म्मार्थकामव्यवहारसिद्ध्यै करोमि शास्त्रार्थविधानमालाम् ॥
तत्र आदौ पुष्पवतीविधानं लिख्यते । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । गर्भिणीनां बालकानाञ्च भूतग्रहादिकृतोपद्रवशान्तिः ।

No. 333. विभक्तितत्त्वम्. By रमाकान्तचक्रवर्त्ती. Substance, country-made paper, $18 \times 1\frac{1}{4}$ inches. Folia, 56. Lines, 4 on a page. Extent, 1,176 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Parganā Sonārgā̃, Post Office Vaidyervāzār, grāma Candrakīrti, Paṇḍita Rajanikānta Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य गौरीमखलात्मधाम्नीं
गुरुञ्च मोक्षस्य निदानमादौ ।
विभक्तितत्त्वार्थमिदं विचित्रं
तनोमि चेतोः कृपया हि धातुः ॥
इमं ग्रन्थं दृष्ट्वा नहि कुरुत दोषाय च मतिं
रमाकान्ते यस्मात् सुबुधगणभक्त्यै कृतमिति ।
कदाचिद्दोषः स्यात्तदपि च हि कुर्य्यात् स दयया
निरङ्कं साधूनां ननु चरणचुम्बेति दयिता ॥ (?)

प्रथमा । व्याकरणं हि शक्तिग्राहकं । ततः हृत्त इत्यादिपदज्ञानजन्यपुंस्त्व-सांसर्गिकैकत्वसमानाधिकरणहृत्तत्वावच्छिन्नो हृत्त इति श्रोतुर्बोधे प्रकृतेः प्रत्ययस्य वा कस्मिन् खण्डे शक्तिरिति बालं बोधयन्नाह प्रथमेति । लिङ्गं हि वस्तु-विषयकज्ञानकारणीभूतधातुविभक्तिभिन्ननिरूढशक्तिमत् । तस्यार्थे तत्ताकज्ञान-जन्यज्ञानविषयीभूते विशेष्यत्वेन प्रतीयमाने प्रथमा इत्यर्थे स्वार्थविशिष्टद्रव्यस्य अर्थान्तरविशिष्टत्वेन तत्प्रतिपादिका प्रथमेत्यायातम् । ननु अन्यार्थविशिष्ट-द्रव्याभिधेये यदि प्रथमा तदा "राज्ञः पुरुषः" इत्यादौ राजन् शब्दात् पुंस्त्वाद्यर्थविशिष्टराजनिरूपितस्वत्ववानिति बोधेऽप्यर्थान्तरपुंस्त्वादिविशिष्टत्वेन प्रतीयमानत्वात् कथं प्रथमा स्यात्, अन्यार्थविशिष्टार्थेन यदि शब्दान्तरार्थो न विशिष्यते तदा प्रथमा इति वचनग्रहणाद् वक्तव्यमिति । तथाचाह ।

"अर्थान्तरैरसम्बिष्टो लिङ्गस्यार्थो भवेद् यदि ।
प्रथमा स्यात्तदैवापि तावन्मात्रविवक्षया ॥" इति ।

अन्यथा लिङ्गार्थे प्रथमा इति कृते सिध्यति किं वचनग्रहणेन । इत्यादि ।

End. "तत्तेन सह युक्तार्थं यत् पदं यदपेक्ष्यते ।" इति ।

"ऐकार्थ्यं पृथगर्थानां वृत्तिं युक्तार्थतां विदुः ।
पदानां प्रत्ययैर्योगः समासस्येति वृत्तयः ॥"

पृथक्शक्तिप्रतिपाद्यार्थानां एकशक्तिप्रतीतिविशेषं यतां युक्तार्थतां वृत्तिं विदुरित्यर्थः । महतो चित्रा गौर्यस्य इति वाक्ये महत्पदापेक्षया समास इति । न च महत्पदस्य समासान्तर्निविष्टविशेष्यपदान्वितत्वमिति वाच्यम्, समासार्थापेक्षया गोशब्दार्थस्यापि विशेषणत्वात् । तथा चोक्तं ।

"प्रतियोगिपदादन्यत् यदन्यत् कारकादपि ।
वृत्तिशब्दैकदेशस्य सम्बन्धस्तेन नेष्यते ॥"

आपेक्षत्वादित्यर्थः । वाक्यप्रकृतिसमासपक्षे वृत्तिरपि नेष्यत इत्याह ।
"कारकप्रतियोगिभ्यां यद्‌यदन्यदपेक्ष्यते ।
अर्वाग्बहुलकादेव वृत्तिस्तत्र तु नेष्यते ॥" इति ।
नित्यसमासपक्षे तु समस्तपदस्य विशेषणार्थेन सहान्वय इति । ... ...
... ... नीललोहितपक्षौ इत्यादौ स्याद्यन्त-
समासे "स्त्रियामादौ" इति कृते नीललोहिते इति प्रयोगः स्यात्, सत्यं
स्याद्यन्तस्यादिप्रकृत्यन्यतरार्थोपस्थापकं नाम ... ... देनेति यत्र
निर्देशः तत्र पदेनैव समास इति ॥

Colophon. इति श्रीरमाकान्तचक्रवर्त्तिविरचितं विभक्तितत्त्वं समाप्तम् ॥

विषयः। कातन्त्रसूत्राणि परिशिष्टकारिकाः शब्दशक्तिप्रकाशिकाकारिकाः कातन्त्र-व्याख्यानग्रन्थसमुदायांशविशेषांश्चोद्धृत्य वादार्थरीत्या प्रथमादिविभक्तीनामर्थस्य प्राञ्जलालोचनम् । संक्षेपतः समासलुप्तविभक्त्याद्यर्थालोचनञ्च ।

No. 334. विराटपर्व्वटीका (भावार्थप्रकाशिका). By रामकृष्णः. Substance, country-made paper, 12 × 3½ inches. Folia, 12. Lines, 8 on a page. Extent, 348 çlokas. Character, Bengali. Date, ? Place of deposit. District Mayamanasimha Vādari, Paṇḍita Çivacandra Nyāyabhūṣaṇa, Appearance, old. Prose. Incorrect.

Beginning. ॐ नमः शिवाय ।
भगवन्तं नमस्कृत्य भक्त्या च कामदं हरिम् ।
विराटपर्व्वव्याख्यानं रामकृष्णेन तन्यते ॥
अथ धर्म्मादेव विपत्तिनस्तारं परमविपत्तावपि धर्म्मो न त्याज्य इति बोधयितुं युधिष्ठिरं प्रति ज्ञापनरूपैककार्य्यत्वसङ्गत्या भगवान् द्वैपायनस्तुरीयं पर्व्व-मारभते जनमेजय उवाचेति । इत्यादि ।

End. अभिषङ्गमादिति पाठे अभिषङ्गः पराभवः ।
यत् कृत्यं मत्कृत्यं पर्य्याप्तञ्च । अनन्तरं शीघ्रं गत्वा स्वीकृत्य । परिबर्हं नृपार्हद्रव्यम् ।
मैरेयं मधुतोलिकाः पाणिखनिकाः । सर्व्वं सत्वञ्च जीवितञ्च । कृते कारिते ॥
विराटपर्व्वण्यभिमन्युविवाहः । समाप्तञ्चेदं विराटपर्व्व अनन्तरमुद्योगपर्व्व भविष्यति ।

Colophon. इति विरोधभञ्जिन्यां भावार्थप्रकाशिकायां विराटपर्व्वव्याख्या समाप्ता ।

विषय: । महाभारतीयविराटपर्व्वव्याख्यानम् ।

No. 335. विवादार्णवसेतुः. Substance, country-made paper, 13 × 5 inches. Folia, 149. Lines, 9 on a page. Extent, 5,783 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ श्रीकृष्णाय नमः ।

विश्वेषां शरणं नवाम्बुदरुचिः सद्भक्तचिन्तामणि-
र्यः प्रत्यूहतमोविनाशमिहिरः श्रीवाशभीवाशनः ।
संसारैकमहार्णवे निपततां विस्तारबीजं नृणां
गोविन्दः कृपया सुरासुरगणैर्वन्द्यश्चिरं पातु वः ॥
चण्डेश-विश्वेश्वर-विश्वरूपा मिताक्षराकार-हलायुधौ च ।
श्रीकृष्ण-वाचस्पति-धर्मरत्नकृतस्तथा श्रीकरशूलपाणी ॥
गोविन्द-लक्ष्मीधर-तत्त्वकारा आचार्य्यचूडामणिना च भट्टः ।
वाक्यानि चैषां सुविमृश्य कुर्म्मो ग्रन्थं विवादार्णवसेतुबन्धम् ॥
इह वाक्यानि वर्ण्यन्ते हरिहरस्य च हृत्तयः ।
राजप्रशंसा तत्रैव मन्त्रि-दूतादिलक्षणम् ॥
राजधर्म्म ऋणादानं इत्याादिविधिलक्षकाः ।
ऋणादानोद्धरणयोर्विधिर्द्दायनिरूपणम् ॥
कृतादीनां तत्र पुंसामधिकारिविवेचनम् ।
स्त्रीधनस्य निर्णयस्तदधिकारिनिरूपणम् ॥
भागानर्हस्य दायानामविभाज्यविभाज्यता ।
पितृकृत्यविभागस्य भ्रातृभागविधिस्तथा ॥
संसृष्टानां विभागस्य विदेशागतवण्टनम् ।
निह्नुतस्य विभागस्य भागसन्देहनिर्णयः ॥
भुक्तिव्यवहारलक्षणादि भाषापादस्ततःपरम् ।
उत्तरपादक्रियापादौ ततो निर्णयपादकः ॥
साक्ष्यादिनिर्णयस्तत्र ततः क्रियाबलाबलम् ।
निक्षेपविधिरस्वामी विक्रये च विधिस्तथा ।

विधिस्तत्र सम्भूय समुत्थानेऽत्र भण्यते ।
कर्षकादेर्भागविधिस्तथा दत्ताप्रदानिकम् ॥
अत्रादेयदेयदत्तादत्तानां विधिरुच्यते ।
भृतकानां विधिस्तत्र दास्यमोक्षाधिकारिणौ ॥
वेतनस्यानपाकर्म्म स्वामिपालविधिस्तथा ।
पण्यस्त्रीविधिरत्रैव गृहादिभाटको विधिः ॥
विक्रियासम्प्रदानश्च क्रीत्वानुशयनिर्णयः ।
सीमाविवादे च विधिः क्षुष्टाक्षुष्टे विधिस्तथा ॥
शस्यरक्षाविधिस्तत्र शस्यघातादयस्तथा ।
शस्यघातेऽप्यदण्ड्याश्च वाक्पारुष्ये विधिस्तथा ॥
विधिश्च दण्डपारुष्ये तथा स्तेयनिरूपणम् ।
प्रकाशतस्करदमोऽप्रकाशचौर्य्यदण्डनम् ॥
चौरान्वेषणचौरातिदेशापवादनिर्णयः ।
साहसे तु दण्डभेदो घातकान्वेषणं ततः ।
स्त्रीसंग्रहणतद्दण्डो परदारागमे दमः ॥
स्त्रीपुंधर्म्मनिर्णयश्च तथा द्यूतसमाह्वयः ।
ऋणादिषु विवादेषु प्रकीर्णकमतःपरम् ॥
बहुधा विषयस्तत्र विधिर्दण्डाश्रितः पुनः ।
अथ वर्णादिसृष्टिः । तत्र महाभारते युधिष्ठिरं प्रति भीष्मवाक्यम् ।
महाभूतानि भूतात्मा महात्मा पुरुषोत्तमः ।
वायुर्ज्योतिस्तथा चापः खञ्च गाञ्चान्वकल्पयत् ॥ इत्यादि ।

End. अष्टापाद्यमित्यस्याष्टभिरापद्यते गुण्यते इत्यष्टापाद्यमष्टगुणम् । किल्बिषदण्ड-वाधनम् । तद्दोषगुणवदिति सर्व्वत्रान्वितम् । तेन यत्र स्तेयदण्ड उक्तः । य स्तेयदोषगुणतः तस्य शूद्रस्याष्टगुणः । तादृशवैश्यस्य षोड़शगुणः । तादृश-क्षत्रियस्य द्वात्रिंशतिगुणः । तादृशब्राह्मणस्य चतुःषष्ठिगुणः । ततोऽप्यधिक-तरगुणस्य ब्राह्मणस्याष्टविंशत्यधिकशतगुण इत्यर्थ इति रत्नाकरादयः ।
मनुः । स्तेयाः सुरापा ब्रह्मघ्ना गुरुदाराभिगामिनः ।
न सन्ति यस्य राष्ट्रेषु स राजा शक्रलोकभाक् ॥
मनुः । अनेन विधिना राजा मिथ्या विवदतां नृणाम् ।
साक्षिप्रत्ययसिद्धानि कार्य्याणि समतां नयेत् ॥

उदितो विस्तरेणायं मिथ्या विवदमानयोः ।
अष्टादशसु मार्गेषु व्यवहारविनिर्णयः ॥
एवं कार्य्याणि सर्व्वाणि सम्यक् ज्ञात्वा महीपतिः ।
देशानलब्धांल्लिप्सेत लब्धांश्च परिपालयेत् ॥

Colophon. इति विद्वद्भिरचिते विवादार्णवसेतुके ।
तरङ्गो निधिदृग्भाग्यैरेकविंशोऽत्र कीर्त्तितः ॥
वाणेश्वर-कृपाराम-रामगोपाल-कृष्णजीवनाख्यैः ।
वीरेश्वर-कृष्णचन्द्र-श्रीगौरीकान्ताभिधानैः ॥
सद्भिः कालीशङ्कर-श्यामसुन्दर-कृष्णकिशोरसंज्ञैः ।
सीतारामसंज्ञैश्च कृतो ग्रन्थः स्फुरतु सभायाम् ॥
इत्यनेकविषयवाग्भि विद्वद्वृन्दोपवर्णितः ।
विवादार्णवसेत्वाख्यो ग्रन्थः संपूर्णतां गतः ॥

विषयः । मन्वादिसंहिताभ्यः मिताक्षराकृत्-धर्मरत्नकृत्-शूलपाणि-वाचस्पतिप्रभृतिपूर्व्वतन निबन्धवाक्येभ्यश्च प्रमाणमुद्धृत्य नानाविषयवासिभिः विद्वद्वृन्दैः वाणेश्वर-कृपारामप्रभृतिभिः निबद्धोऽयं ग्रन्थः । अत्र च स्मृतिशास्त्रगताः सर्व्व एव विषयाः सम्यग्विचारपूर्व्वकं निर्णीता इति ।

No. 336. विषयतावादार्थः वा विषयताविचारः. Substance, country-made paper, 17×4 inches. Folia, 13. Lines, 9 on a page. Extent, 599 çlokas. Character, Bengali. Date, ? Place of deposit, Dhānukā *viâ* Pālaṇg, District Faridpur, Paṇḍita Kālikiṇkara Vidyābhūṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
बुद्धिर्नाम कश्चिदात्मविशेषगुणस्तद्व्यवस्थितिर्घटमहं जानामीत्याकारका ...
... रसाधारणानुभवबलादेव सा च सविषयिका उक्तधर्म्मिग्राहकप्रतीत्य-घटादिविषयकत्वेनैव तदवगाहनात् । घटादिनिष्ठं तद्विषयत्वञ्च तत्प्रति-योगिकसम्बन्धविशेषः । स च प्रतियोगित्ववत् स्वरूपानतिरिक्तः स्वरूपेण स्वरूपे-णैवोपपत्तौ अतिरिक्तकल्पनाया अनवकाशात् । इत्यादि ।

End. तत एव तादृशज्ञानस्य तद्विषयकत्वोपपत्तेः प्रकारतादीनां तत्राभ्युपगमे तादृ-शानुमित्यादीनां बाधाद्यप्रतिबन्धकत्वप्रसङ्गः । विरोधिज्ञानाप्रतिबध्यत्वप्रसङ्गश्च । प्रकारतादीनामेव तादृशप्रतिबध्यप्रतिबन्धकतावच्छेदकत्वादिति दिक् ॥

Colophon. इति विषयतांविचारः ॥ श्रीहरिः शरणम् ॥ श्रीगुरवे नमः ॥

विषयः । अनुमानादिभिर्विषयज्ञानस्य विचारः । प्रवृत्त्याधाराधेयोद्देश्यविशेषणादीनां विचारः ॥

No. 337. विष्णुसहस्रनामविवरणम्. By विद्यारण्यतीर्थः. Substance, country-made paper, 12 × 8 inches. Folia, 58. Lines, 13 on a page. Extent, 754 çlokas. Character, Nāgara. Date, ? Place of deposit, Kāçidhāma, Khālispurā, Paṇḍita Priyanātha Tattvaratna. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गुरुभ्यः ।
धर्म्मगाङ्गेयसंवादे महार्थव्रतवर्णाणाम् ।
कृष्णनामसहस्रस्य परिचर्य्या विरच्यते ॥ इत्यादि ।

End. तर्पयेन्मार्जयेच्चैव ब्राह्मणान् भोजयेत्ततः ।
सुवर्णं दक्षिणां दद्यात् विप्रशाखं विवर्जयेत् ॥
एवमाराध्य लक्ष्मीशं सततं स्त्रिमान् भवेत् । इति ।
कृष्णनाम्नां सहस्रस्य परिचर्य्या कृता शुभा ।
सहस्रशाखिनः प्रीत्यै श्रीमतः काशीभूपतेः ॥
शं नो वातः पवतां शं न स्तपतु सूर्य्यः ।
शं नः ...... वः पर्ज्जन्योऽभिवर्षतु ॥

Colophon. इति श्रीविद्यारण्यतीर्थकृत सहस्रनामविवरणपरिशिष्टं समाप्तम् । शुभम् ।

विषयः । महाभारतान्तर्गतविष्णुसहस्रनामव्याख्या ।

No. 338. विष्णुसिद्धान्तग्रन्थः. Substance, country-made paper, 47 × 3 inches. Folia, 35. Lines, 6 on a page. Extent, 497 çlokas. Character, Bengali. Date, ? Place of deposit, Calcutta Çyāmapukura Viçvakoṣa office, Bābu Nagendranātha Vasu. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ श्रीश्रीसूर्य्यादिभ्यो ग्रहेभ्यो नमः ।
अये वैकुण्ठसंस्थानश्रीलनारायण प्रभो ।
श्रीलक्ष्मीश्वेत् प्रियाहन्ते ज्योतिषां चरितं वद ॥

ये श्रीसूर्य्यादयः खेटा ज्योतिश्चक्रनिवासिनः ।
तेषां गुणानां गरिमा कः प्रवक्तुं समर्हति ॥
तथापि तव प्रीत्यर्थं श्रीलनारायणः स्वयम् ।
प्रवदेयं मनाक् गुह्यं सावधानावकर्णय ॥
श्रीसूर्य्यः परमो ब्रह्मा श्रीसूर्य्यः परमः शिवः ।
श्रीसूर्य्यः परमो विष्णुस्तस्मै श्रीब्रह्मणे नमः ॥
खखाभ्रवेदर्त्तुखसप्तचन्द्राभ्राभ्राम्बराक्षीषुशरेषुचन्द्रैः (१५५५२०००१७०६४०००)।
मितेऽत्र वर्षे प्रगते विधातुः श्रीविष्णुनामावतरं भवेऽद्यम् ॥ इत्यादि ।

End. ग्रहाणामर्च्चने होमे यज्ञे वौषधिधारणे ।
दाने जपे वा मन्त्रस्य शान्तये मन्त्रधारणे ॥
धारणे कवचस्यैवं ग्रहविप्रार्च्चनं चरेत् ।
धारणे ग्रहमूलस्य कवचस्यापि धारणे ॥
ग्रहविप्रान्यविप्राणां न कुर्य्यान्मुखदर्शनम् ।
अन्यथा विफलं तस्य बन्ध्यास्त्रीरमणं यथा ॥

Colophon. इति श्रीलक्ष्मीनारायणसंवादे विष्णुसिद्धान्तग्रन्थे द्वेषनिन्द्यस्वन्यादिप्रतिक्रिया-दानाधिकारो द्वादशः ॥ अतःपरं खण्डितम् ।

विषयः । प्रथमाधिकारे,— ताराध्रुवादिनिरूपणम् । द्वितीयाधिकारे,— भौमादिपञ्चध्रुवादि-निरूपणम् । तृतीयाधिकारे,— नाचविकरविराङ्कतूनां स्फुटाधिकारादिः । चतुर्थाधिकारे,— भौमादिपञ्चस्फुटादिनिरूपणम् । ५म—६ ष्ठाधिकारयोः,—शकाब्दपतेरुत्पत्त्यादिनिरूपणम् । तद्यथा,—

(नवाग्निचन्द्राग्निगजाष्टबाणपञ्चाङ्कचन्द्रप्रमिते गतेऽब्दे ।
कल्यांशकादित्यनृपोऽपि भावी तदब्दयुक्ते चितिरुद्रवर्षम् ॥

एषः सप्तमपत्रस्थतः श्लोकः ।) ७ माधिकारे,— चिप्रश्नादिनिरूपणम् । ८ माधिकारे,— चन्द्र-ग्रहणादिनिरूपणम् । ९ माधिकारे,— रविसञ्चरणादिः । १०म—११ शाधिकारयोः,— दुष्टग्रहजन्य-दोषप्रतीकारकरणदानादिः । १२ शाधिकारे,— द्वेषनिन्द्यस्वन्यादिप्रतिक्रियानिरूपणम् ।

No. 339. वीरभद्रतन्त्रम्. Substance, country-made paper, 13 × 2 inches. Folia, 10. Lines, 6 on a page. Extent, 232 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā *viâ* Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Verse. Incorrect.

Beginning. श्रीगुरुः ।

पार्व्वत्युवाच ।

एतत् व्याप्तं जगत्सर्व्वं नानाविधिसमाकुलम् ।

उपायं ब्रूहि लोकानां साधकानां सुखावहम् ॥

दुर्ज्जनानाञ्च पापानां दुर्ज्जयानां तथैव च ।

अशुभान् ब्रूहि मे योगान् नानाव्याधिकरान् प्रभो ॥

ईश्वर उवाच ।

शृणु त्वं हि वरारोहे यत्सिद्धार्थञ्च वाञ्छसि ।

तद्वदामि च ते देवि यत्सर्व्वं समुदाहृतम् ॥ इत्यादि ।

End. ॐ क्रों कामीः क्रां नमः आकर्षणमन्त्रः । ॐ चण्डिकायै नमः । ह्रीँ हैँ ह्रौँ नमः । अस्य शतजपेन सर्व्वकामः सिद्धो भवति । ॐ कामिनी स्वाहा अनेन हृतमासर्व्वोमाद्दाकर्सिद्धिर्भवति ॥ ० ॥

Colophon. इति वीरभद्रतन्त्रे चतुर्थः पटलः ॥ समाप्तोऽयं ग्रन्थः ।

विषयः । भूताकर्षणम् । मोहनादिः । विद्वेषणादिः । उच्चाटनादिः । स्तम्भनवशी-करणादिश्चेति ।

No. 340. वृन्दावनकाव्यम्. By मालाङ्कराजः. Substance, palm-leaf, 13 × 1½ inches. Folia, 10. Lines, 2 on a page. Extent, 58 çlokas. Character, Bengali. Date, Sk. 1662. Place of deposit, District Vãkuḍā, Viṣṇupura, Paṇḍita Candranārāyaṇa Bhaṭṭācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीश्रीहरये नमः ॥

वरदाय नमो हरये

पतति जनोऽयं स्मरन्नपि न मोहरये ।

बकुशस्वक्रन्द हता

मनसि दितिर्येन दैत्यचक्रं दहता ॥

स्मिव भुजङ्गवि शेषं

वृपधाय स्वपिति भुजङ्गविशेषम् ।

नवपल्लवसमकरया

श्रियोर्म्मिपङ्क्त्या च समकरया ॥ इत्यादि ।

End. इत्याद्य पीतवाससमायतनेत्रस्तं
कंसासुरात् पशुमतामायतने चस्तं ।
हसितानां विमलतया सह लीलाजानां
छायां विकिरन्निव दशनैः सह लीलाजानाम् ॥ * ॥

Colophon. इति मालाङ्केन विरचितं वृन्दावनाख्यं काव्यं समाप्तम् ॥ ० ॥
श्रीश्रीजाने दयाधाने चरणाम्बुजतले नत ।
श्रीकाशीरामशर्म्मणा लिपिरेषा समर्पिता ॥ ० ॥ शकाब्दाः १६६२ ।

विषयः । कृष्णस्तुतिविषयकं काव्यमिदम् । अत्र च यमकादि नानाविधवाक्यभङ्गी विन्यस्ता ।

No. 341. वृन्दावनकाव्यटीका. Substance, palm-leaf, 14×2 inches. Folia, 20. Lines, 5 on a page. Extent, 375 çlokas. Character, Bengali. Date, Sk. 1662. Place of deposit, District Vāֹkudā Visnupura, Kādākuli, Pandita Candranārāyana Bhattācāryya. Appearance, old. Prose. Generally correct.

Beginning. श्रीश्रीहरये नमः । मालाङ्काभिधानो महीपालः सकलगुणलक्षणो यमकितेनार्य्याद्वत्तिनाम्ना जातिप्रभेदेन भगवतोर्वासुदेवयोः स्तुतिं कृतवान् । तत्र विघ्नविनाशाय विष्णोरनुस्मरणमाह वरदायेत्यादि । अस्यार्थः । आस्तां पूजानमस्कारादि यं हरिं स्मरन्नपि मनसि कुर्व्वाणोऽपि लोकः । सुष्ठ्वत्यन्तमिति मोघोऽविद्या अस्य रये प्रवाहे न निमज्जतीत्यर्थः । येन हरिणा वासुदेवेन दैत्यचक्रं दहता भस्मसात् कुर्व्वता दितिर्दैत्यमाता मनसि हृदये हता ताड़िता सती बहुशो विस्वरवारान् चक्रन्द क्रन्दितवती । तस्मै हरये नमः इति सम्बन्धः ॥ इत्यादि ।

End. तं पीतवाससं विष्णुमित्याद्य । कीदृश आयतनेत्रः आयते दीर्घे नेत्रे यस्य सः । कीदृशं तं पशुमतां गोपानां आयतने स्थले कंसासुरात्त्रस्तं । अवस्थमिति वा । किं कुर्व्वन्निवाह । तत्राह । दशनैर्दन्तैः सह हसितानां । विमलत्वा अपि विमला इति भावः । कीदृशानां लाजानां लीलाजानां लीलया जनितानां गोपस्त्रीभिर्लीलया दत्तानामिति यावत् ॥ * ॥

Colophon. इति राजाधिराजमालाङ्कविरचित-वृन्दावनाख्यकाव्य-टीका समाप्ता ॥
श्रीश्रीजाने दयाधाने चरणाम्बुजतले नत ।
श्रीकाशीरामशर्म्मणा लिपिरेषा समर्पिता ॥ शकाब्दाः १६६२ ।

विषयः । मालाङ्कराजविरचितस्य वृन्दावनाख्यकाव्यस्य व्याख्यानम् ।

No. 342. वैद्यवल्लभः. By श्रीकान्तदासः. Substance, country-made paper, $19\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 30. Lines, 7 on a page. Extent, 604 çlokas, Character, Bengali. Date, ? Place of deposit, District Dhākā, Sonārgā, Bābu Prabhātacandra Sena. Appearance, tolerable. Verse. Incorrect.

Beginning. नमः कात्यायन्यै ।

...... श्रमसुखशायिकां गतायाः
सत्यायाः स्तनकटकक्षतानि पश्यन् ।
....
...... प्रदिशतु केशवः शिवं वः ॥
मुद्रामद्धां त्रिभुवनगुरोरीक्षमाणा...
.... ।
भावाद्भीतेः सपदि विकला वेपथुं संवहन्ती
रन्तुं गन्तुं न च बलवती पातु वः श्रीभवानी ॥
श्रीमत्श्रीकान्तदासेन राजवैद्येन धीमता ।
आकृष्य सर्व्वतन्त्रेभ्यः क्रियते वैद्यवल्लभः ॥
ये बालभावादनधीततन्त्रा
दारिद्र्यदुःखानलदग्धचित्ताः ।
अनन्यजीवाः प्रतिकर्त्तुमज्ञा-
स्तेषां प्रबोधार्थमयं निबन्धः ॥
अन्येषु शास्त्रेषु विवादमात्रं
न लभ्यते तत्र फलं समस्तम् ।
पदे पदे ज्योतिषि मन्त्रवादे
चिकित्सिते प्रत्ययमावहन्ति ॥
पूर्व्वं सूत्रमाह ।
आयुर्वेदागमं पूर्व्वमायुर्वेदं ततः परम् ।
साङ्गोपायं ततः शिष्यं गुरुञ्चापि यथोदितम् ॥
.... ।

आयुर्वेदागममाह ।

ब्रह्मणा हि यथा प्रोक्तमायुर्वेदं प्रजापतिः ।
जग्राह निखिलेनादावश्विनौ च ततः परम् ॥ इत्यादि ॥

End. अथ मूत्रलक्षणमाह ।

पाश्चात्ये रजनीयामे घटिकानां चतुष्टये ।
उत्थाय रोगिणं वैद्यो मूत्रोत्सर्गञ्च कारयेत् ॥
आद्यन्तधारां सन्त्यज्य मध्यधारां समुद्धरेत् ।
शुभे कांस्यादिके पात्रे कृत्वा मूत्रं परीक्षयेत् ॥
वातेषु पाण्डुरं मूत्रं सफेनं कफरोगिणाम् ।
रक्तवर्णं भवेत् पित्ते द्वन्द्वजे मिश्रितं भवेत् ॥
... ... ।
पाण्डुरं शीतलं मूत्रं भूरि संयाप्ज्वरे भवेत् ।
कृष्णं चाविलकं मूत्रं सन्निपातज्वरे भवेत् ॥
यस्येक्षुरससङ्काशं मूत्रं नेत्रे च पिञ्जरे ।
रसाधिक्यं विजानीयान्निर्दिशेत्तस्य लङ्घनम् ॥

Colophon. समाप्तिसूचकं वाक्यं नास्ति ॥

विषयः । आयुर्वेदस्य लक्षणकथनपूर्वकमायुर्वेदागमस्याद्योत्पत्तिविवरणम् । वेदाङ्गलक्षणम् । शिष्यलक्षणम् । परिषल्लक्षणम् । वैद्यलक्षणम् । चिकित्सालक्षणम् । असद्वैद्यलक्षणम् । सद्वैद्य-प्रशंसा । द्रव्याणां गुणदोषनिरूपणम् । रोगिणां गुणदोषयोर्द्विविधचिकित्सा । आतुरलक्षणम् । त्रिविधौषधनिरूपणम् । सप्ताशय-सप्तधातु-सप्तोपधातु-सप्तत्वगादीनां परस्परलक्षणम् । शारीर-दोषाणां लक्षणम् । तेषां स्थाननिरूपणञ्च । प्राकृतविकृतसंज्ञकानां दोषाणां कर्म्मनिरूपणम् । स्त्रीपुंसभेदेन शरीरस्वरूपनिरूपणम् । धातूनां कर्म्मनिरूपणम् । धातूनां वृद्धिक्षयजनितरोग-निरूपणम् । तेषां चिकित्सानिरूपणञ्च । पञ्चेन्द्रियनिरूपणम् । तेषां प्रत्येकस्य गुणनिरूपणञ्च । पुरुषलक्षणम् । शुक्रभेदेन स्त्रीपुंनपुंसकजन्मनिरूपणम् । तेषां सात्त्विकादिभेदेन गुणदोषभेद-कथनञ्च । वातपित्तादि सप्तधा प्रकृतिलक्षणम् । अतिह्रस्वादिनिन्दिताष्टपुरुषनिरूपणम् । अति-ह्रस्वादिपुरुषगतरोगविशेषनिरूपणम् । तत्तद्रोगप्रशमनोपायकथनञ्च । ऋतुभेदे वातादिदोषाणां प्रकोपकथनम् । तेषां हेतुकथनञ्च । कुपितलिङ्गनिरूपणम् । तेषां कर्म्मनिरूपणञ्च । त्रिगुण-वातादिनिरूपणम् । प्रज्ञापराधस्य लक्षणम् । तस्य व्याधिकारणत्वं तच्चिकित्सा च । षड्विधा-हारनिरूपणम् । लघुगुरुद्रव्याणां मात्रानिरूपणम् । सुस्थाचारनिरूपणम् । ऋतुभेदे आहारीय-द्रव्यभेदनिरूपणम् । षड्रसनिरूपणम् । नाडीपरीक्षणम् । शिरासकललक्षणम् । मूत्रलक्षणञ्चेति ।

No. 343. वैष्णवगीता. Substance, country-made paper, $11 \times 4\frac{1}{3}$ inches. Folia, 8. Lines, 8 on a page. Extent, 128 çlokas. Character, Bengali. Date, ? Place of deposit, Tripurā Agartalā Vṛddhanagara, Paṇḍita Mīneçvara Sārbbabhauma. Appearance, new. Verse. Generally correct.

Beginning. श्रीराधाकृष्णाभ्यां नमः ।
अथ वैष्णवगीता ।
श्रीसूत उवाच ।
एकदा नैमिषारण्ये केवलं पुरुषं शुभम् ।
प्रेममाश्रित्य संस्तुत्य पप्रच्छ पार्थसत्तमः ॥
अर्ज्जुन उवाच ।
वैष्णवानां गतिं कृष्ण कथयस्व महाप्रभो ॥ इत्यादि ।

End. त्रिसन्ध्यं यः पठेन्नित्यं श्रद्धाभक्तिसमन्वितः ।
जीवमानः सुखं याति अन्ते मुक्तिपदं लभेत् ॥

Colophon. इति श्रीकृष्णार्ज्जुनसंवादे वैष्णवगीता स्तोत्रोपाख्यानं समाप्तम् ॥

विषयः । श्रीकृष्णार्ज्जुनसंवादच्छलेन वैष्णवानामेव सर्व्वोत्तमत्वकथनम् ।

No. 344. वैष्णवरहस्यम्. Substance, country-made paper, 12×5 inches. Folia, 7. Lines, 9 on a page. Extent, 284 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhalpāḍā *viā* Naihāṭi, Pāṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Prose. Generally correct.

Beginning. श्रीराधाकृष्णौ जयतः ।
श्रीगोविन्दं व्रजानन्दसन्दोहानन्दमन्दिरम् ।
वन्दे वृन्दावनानन्दं श्रीराधासङ्गनन्दितम् ॥
श्रीराधाकृष्णौ जयतां
जयति विश्व ... भक्तवृन्दसहितो निगूढवेशः ।
कीर्त्तनयज्ञविताना(यान्तः)कृष्णो बहिर्गौरः ।
इह खलु सकललोकहितावतारो भगवान् श्रीशचीनन्दनः कलियुगे परम-धर्म्मप्रवर्त्तनाय ... ... वेशेनावततार । इत्यादि ।

End. ततो महाप्रभुः स्वपार्षदैः सह भगवद्भजनमार्गं प्रवर्त्तयामास ... ... राज्ञा-ज्ञानां विषयवैतृष्ण्यप्रबोधनामकृत सन्न्यासः सन्न्यासाश्रमपावनो भक्तवृन्दसहितो नीलाचलमनुससार ।

प्रभुना कथितं यद्रहस्यं वैष्णवाम्वये ।
तदेव लिखितं किञ्चिन्न तु स्वमतिवैभवात् ॥
भवभयमपहर्त्तुं कृष्णचैतन्यनामा
स्वयमपि हरिनाम याचयन्नप्रमेयः ।
अनुचरगणयुक्तो भक्तवेशावतारी
तमहमखिललोकत्राणहेतुं नमामि ॥ ० ॥

Colophon. इति वैष्णवरहस्ये साध्यसाधनो नाम चतुर्थः प्रकाशः ॥*॥ समाप्तश्चायं ग्रन्थः ॥

विषयः। नामोपदेशनिरूपणम् । गुरुपदाश्रयनिरूपणम् । आराध्यनिर्णयः । साध्यसाधननिरूपणञ्चेति ।

No. 345. व्यवस्थासारसंग्रहः. By रामगोविन्दशर्म्मा. Substance, country-made paper, 14 × 2 inches. Folia, 89. Lines, 7 on a page. Extent, 2,422 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Pilkhānā, Vāḍḍānagara, Paṇḍita Kailāsacandra Tarkaratna. Appearance, old. Prose and verse. Correct.

Beginning. ॐ नमो गणेशाय ।
गुरोः पादयुगं नत्वा रामगोविन्दशर्म्मणा ।
क्रियते बालबोधाय व्यवस्थासारसङ्ग्रहः ॥
तत्रादौ तिथिव्यवस्था निरूप्यते । तिथिस्तु द्वादशभिर्भागैश्चन्द्रक्रियोपलक्षितः कालविशेषः । तदेव चान्द्रमसं दिनम् । यथा,—
अर्कादिविनिःसृतः प्राची यद्यात्यहरहः शशी ।
भागैर्द्वादशभिस्तत् स्यात् तिथिश्चान्द्रमसं दिनम् ॥ इति सूर्य्यसिद्धान्तात् ।
तत्त्रिंशता चान्द्रो मासः । स च द्विविधः मुख्यो गौणश्च । इत्यादि ।

End. दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव च ।
अपविद्धाश्च ये पुत्राः भरणीयाः सदैव ते ॥
भिन्नगोत्राः पृथक्पिण्डाः पृथक् वंशकराश्च ये ।
सूतके मृतके चैव त्र्यहाशौचस्य भागिनः ॥ इति ॥
विरुद्धं स्मृतिशास्त्रेषु यदुक्तं बुद्धिविभ्रमात् ।
तत्क्षम्यं कृपया शोध्यं स्मृतिशास्त्रविशारदैः ॥

Colophon. इति बालिचामटग्रामनिवासि चट्टवंशज-श्रीरामगोपालचक्रवर्त्यात्मज-श्रीरामगोविन्दशर्म्मविरचिते व्यवस्थासारसंग्रहे अशौचव्यवस्था समाप्ता ।

विषयः । अत्रादौ तिथिस्वरूपादिनिरूपणम् । तिथिद्वैधव्यवस्थादिः । जन्मतिथिनिरूपणम् । प्रतिपदादितिथिषु प्रत्येकं कृत्यविशेषव्यवस्थादिः । संक्रान्तिनिरूपणादिकम् । अथ अद्भुत-निरूपणम् । तत्र तत्र व्यवस्थादिः । उद्वाहव्यवस्थादिः । और्द्ध्वदेहिकव्यवस्थादिः । तत्र प्रेत-तर्पणादिविधानम् । अशौचान्तद्वितीयदिनकृत्यनिरूपणम् । श्राद्धविधिः । सपिण्डीकरणविधिः । वृषोत्सर्गादिविधिश्च । अथ आभ्युदयिकश्राद्धकालादिः । नवान्नविधिः । व्रतादिविहितश्राद्ध-कालादिश्च । अथ प्रायश्चित्तव्यवस्थादिः । अशौचव्यवस्थादिश्चेति ।

No. 346. व्युत्पत्तिविचारः. Substance, country-made paper, 20 × 5 inches. Folia, 47. Lines, 8 on a page. Extent, 1,692 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Candrakānta Vidyāratna. Appearance, tolerable. Prose. Generally correct.

Beginning. नमः शिवाय ॥ अनुमित्यर्थकधातुयोगे विधेयत्वं द्वितीयार्थः । तेन वह्न्यादि-पक्षकानुमितिपरस्य वह्निमनुमिनोमीत्यादिवाक्यस्य न प्रामाण्यं । यदि च वह्निसाध्यकपर्व्वतपक्षकानुमितिपरस्य वह्निमत्त्वेन पर्व्वतमनुमिनोमीत्यादि-वाक्यस्यापि प्रामाण्यमनुमन्यते तदा तादृशधातुयोगे उद्देश्यत्वमपि द्वितीयार्थः । इत्यादि ।

End. इत्थञ्च कपोतमात्रवृत्तिपतत्त्वादिपर्य्याप्तावपि अतिरिक्तवृत्तिकपोतत्वावच्छिन्नत्व-निर्व्वाहात् कपोतशतादावपि कपोतादिव्यवहारोपपत्तिपर्य्याप्तमतिप्रसक्त-धर्म्मस्य तदनवच्छेदकत्वे गत्यन्तरं चिन्तनीयम् ॥ * ॥

Colophon. इति व्युत्पत्तिविचारः ।

विषयः । कालभावादियोगजद्वितीयादीनां तथान्येषामपि व्युत्पत्तिविचारमुखेन कर्त्तृ-करणादिव्युत्पत्तिविचारः ।

No. 347. व्रतकालविवेकः. By शूलपाणिमहामहोपाध्यायः. Substance, country-made paper, 19 × 5 inches. Folia, 9. Lines, 8 on a page. Extent, 328 çlokas. Character, Bengali. Date, Sk. 1737. Place of deposit, Naihāti, District 24-Parganās, Paṇḍita Haraprasāda Çāstrī. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

नानामुनिमतद्वैधजातसंशयशान्तये ।
व्रतकालविवेकोऽयं क्रियते शूलपाणिना ॥

मत दीर्घकालानुपालनीयतत्वदितिकर्त्तव्यता। कलापरहित नियतसङ्ख्यविषयो व्रतमिति व्रतलक्षणम्। इत्यादि।

End. कालविशेषानियन्त्रितश्च न तस्य प्रतिष्ठापूर्व्वोक्तत्वयमीर्षे फलार्थिभिरित्यनेन काम्यस्यैव प्रतिष्ठाविधानात्। कालविशेषानियन्त्रिते तदसम्भवाच्च। प्रतिष्ठाविधानञ्च प्रतिष्ठाविवेकेऽनुसन्धेयमिति ॥ ० ॥

Colophon. इति साण्डियान महामहोपाध्याय-श्रीशूलपाणिविरचितो व्रतकालविवेकः समाप्तः ॥ ० ॥

मुनिरामसिन्धुचन्द्रे शाके नभस्य षष्ठदिने।
आलिलेख विवेकेदं (?) जयनारायणद्विजः ॥

विषयः। व्रतानुष्ठानम्। गृहीतव्रताकरणे दोषश्रुतिः। व्रतभङ्गप्रायश्चित्तम्। व्रतानुष्ठाने विहितकालः। ललितासप्तमीव्रतादयः। कार्त्तिकेयव्रतविधिः। प्रतिष्ठाकालश्चेति ॥

No. 348. शक्तितन्त्रम्। Substance, country-made paper, 14×4 inches. Folia, 41. Lines, 8 on a page. Extent, 615 çlokas. Character, Bengali. Date, ? Place of deposit, District Dhākā, Vikramapura, Ichāpurā, Paṇḍita, Devīdāsa Cūḍāmaṇi. Appearance, old. Verse. Generally correct.

Beginning. श्रीभगवत्युवाच।

शक्तोर्मिमहतं ध्यानं मन्त्राश्च विविधाः श्रुताः।
इदानीं श्रोतुमिच्छामि साधनं सर्व्वसिद्धिदम् ॥
स्थानं कालं तथा मालां यच्चान्यच्छक्तिसम्भवम्।
अल्पायासेन सिध्यन्ति येन तत् कथ्यतां प्रभो ॥

ईश्वर उवाच।

शृणु देवि प्रवक्ष्यामि सावधानावधारय।
गुह्याद् गुह्यतरं देवि साधकानां सुखावहम् ॥
एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे।
शवस्योपरि मुण्डे वा जले वा कण्ठपूरिते ॥
सङ्ग्रामभूमौ योनौ वा स्थले वा निर्ज्जने वने।
पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते ॥
तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा।

बिल्वमूले नदीतीरे गुहायाञ्च शिवालये ॥
निश्छिद्रमण्डपे चैव कूर्म्मे धात्रीतले तथा । इत्यादि ।

End. नश्यन्तु चाभिषेकेण शक्तिबीजेन ताडिताः ।
विश्वानिला महारोगा डाकिन्यभिभवास्तथा ॥
घोराभिचाराः क्रूराश्च महा रोगास्तथैव च ।
नश्यन्तु चाभिषेकेण कालीबीजेन ताडिताः ॥
नश्यन्ति विपदः सर्व्वाः सम्पदः सन्तु सुस्थिराः ।
अभिषेकेण शाक्तेन पूर्णाः सन्तु मनोरथाः ॥

Colophon. इति शक्तितन्त्रे शक्त्युपन्यासे त्रयोदशः पटलः ॥

विषयः । (प्रथमतः सप्तमं पटलं यावत् नोपलभ्यते ।) अष्टमे पटले, सिद्धियोग-निरूपणम् । आकर्षणस्तम्भनादिषु कर्म्मसु ऋतुभेदकथनम् । तत्र दिङ्नियमादिकथनम् । मारणादौ मालाविधानकथनपूर्व्वकं जपविधिः । आसनादिविधिश्च । नवमे पटले, शवसाधन-विधिः । तत्र विस्तरादितिकर्त्तव्यताकथनञ्च । दशमे पटले, कुलाचारविधिः । तत्र कुलनारी-लक्षणादिकथनम् । तत्पूजादिविधिः । कुलद्रव्यादिविधिश्च । एकादशे पटले, दूतीयागविधिः । तत्र सम्विदासवयोर्विधिः । सम्विदादिशोधनविधिः । पञ्चमकारविधिः । शक्तिनिरूपणञ्च । द्वादशे पटले, कुलीनानां पुरश्चरणविधिः । कुमारीपूजनविधिः । पञ्चमकारेण अन्तर्यजन-विधिश्च । त्रयोदशे पटले, शाक्ताभिषेकविधिः । ततो विशेषत इतिकर्त्तव्यताकथनञ्च ॥ इति शम् ।

सत्यमेव जयते

No. 349. शनिस्तोत्रम् (स्कन्दपुराणीयम्). Substance, country-made paper, 6 x $2\frac{1}{2}$ inches. Folia, 9. Lines, 5 on a page. Extent, 79 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā *viâ* Naihāṭi, Paṇḍita Govinda Candra Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः श्रीरामचन्द्राय । ॐ नमः शनैश्चराय ।
प्रणम्य देवदेवेशं सर्व्वग्रहनिवारणम् ।
शनैश्चरस्य शान्त्यर्थं चिन्तयामास एव च ॥
युधिष्ठिर उवाच ।
देवदेव जगन्नाथ ग्रहपीडाविनाशनम् ।
सौरे पीडाविनाशाय उपायं वद मे प्रभो ॥ इत्यादि ।

End. य इदं प्रातरुत्थाय शनिवारे पठेन्नरः ।
पूजयित्वा शनिं वापि तस्य तुष्यति भास्करः ॥
सर्वाभीष्टप्रदो नित्यं भविष्यति न संशयः ।
सर्वेषामेव वर्णानां शनिपूजा विधीयते ।
शूद्रेणापि विशेषेण कर्त्तव्यमिति चादरात् ॥

Colophon. इति स्कन्दपुराणे रेवाखण्डे शनैश्चरस्तोत्रं समाप्तम् ॥

विषयः । नवग्रहान्तर्गतशनैश्चरग्रहस्य स्तोत्रम् ।

No. 350. शब्दघोषा. Substance, country-made paper, $18 \times 2\frac{1}{2}$ inches Folia, 41. Lines, 8 on a page. Extent, 1,230 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita, Haraprasāda Çāstri. Appearance, old. Prose. Generally correct.

Beginning. (अस्य प्रथमपत्रं नास्ति तेन द्वितीयपत्रस्य प्रारम्भवाक्यम् ।) स्त्रीपुंनपुंसकानि चि लिङ्गानि शब्दसंस्कारमात्रोपयोगीनि लोकरूढानि धर्म्मान्तराणीव भेदेनोपादीयन्त इति शब्दसंस्कारमात्रोपयोगीनीत्यनेन लोकव्यवहारोपयोगीनि व्यावर्त्तन्ते ॥ अथ प्रथमतोऽकारान्तानि लिख्यन्ते ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । अजन्तहसन्तादिशब्दरूपनिरूपणम् ।

No. 351. शब्दरत्नम्. By रामशरणः. Substance, country-made paper, 14×3 inches. Folia, 7. Lines, 8 on a page. Extent, 139 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Vaidyervāzār Sātbheyepāḍā, Paṇḍita Nīlakamala Smṛtibhūṣaṇa. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
शब्दब्रह्ममयीं नत्वा शब्दशास्त्रं विलोकयन् ।
श्रीरामशरणो वक्ति शब्दरत्नं समासतः ॥
तत्र प्रकृतिप्रत्ययाभ्यामर्थस्य वाचकः शब्दः । शब्द गतौ बाहुलकात् दः । तथा चामरे । शास्त्रे शब्दस्तु वाचक इति । स च षोढ़ा भवति ।
शक्तो लाक्षणिको रूढो योगरूढश्च यौगिकः ।
क्वचित् यौगिकरूढश्च शब्दः षोढ़ा निगद्यते ॥ इति शब्दशक्तिप्रकाशिका ।

तत्र शक्त्यर्थप्रतिपादकः शक्तः। शक्तिश्च शब्दानां मुख्यव्यापारः। शब्दनिष्ठो यो मुख्यव्यापारो भगवत्सङ्केतोऽस्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छारूपः सैव शक्तिरित्यर्थः। तद्विशिष्टश्चार्थः शक्यः तत्प्रतिपादकः शक्तो वाचक इति यावत्। इत्यादि।

End. तथैव सर्व्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति। परं तु
यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥
तथाच खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः। तात्पर्य्यं वक्तुरिच्छा च यदि तात्पर्य्यं शब्दबोधकारणं न स्यात् तदा सैन्धवमानय इत्यादौ कचिदश्वस्य कचित् पूरणस्य बोधो न स्यात्। न च तात्पर्य्यग्राहकप्रकरणादीनामेव शब्दबोधे कारणत्वमस्तीति वाच्यम्। तेषामननुगमात् तात्पर्य्यज्ञानजनकत्वेन तेषामननुगमे तु तात्पर्य्यज्ञानमेव लाघवात् कारणमिति स्थितम्॥

Colophon. इति शब्दरत्नं सम्पूर्णम्॥

विषयः। अत्र प्रथमं शब्दलक्षणम्। ततो रूढयौगिकादिभेदेन शब्दस्य षड्विधत्वकथनम्। आकाङ्क्षायोग्यतासत्तिमच्छब्दस्य लक्षणादिनार्थबोधभेदकथनम्। लक्षणाया जहत्स्वार्थाजहत्-स्वार्थेति द्विविधभेदकथनम्। लिङ्गस्य शुद्धमिश्रसंकीर्णविशिष्टोपसर्जनाव्यक्तेति षड्विधभेदकथनम्। शब्दानां शाब्दबोधकथनम्॥

No. 352. शब्दशक्तिप्रकाशिकाटिप्पनी. By कृष्णकान्तविद्यावागीशः. Substance, country-made paper, 22 × 4 inches. Folia, 150. Lines, 10 on a page. Extent, 7,162 çlokas. Character, Bengali. Date, ? Place of deposit, District Dhākā, Vikramapura, Ichāpurā, Paṇḍita Vrajanātha Vidyāratna. Appearance, new. Prose. Correct.

Beginning. ॐ नमो गणेशाय।
योगेश क्व गतं चिरं हिमगिरेः शृङ्गे कुटीरे प्रिये
योगार्थं किमुतास्ति कोऽपि रमणी तत्रेति सम्भाषणम्।
श्रुत्वा हाससमन्वितं गिरिसुतागौरीशयोर्मेनका
तत्रास्तीति वदन् सलज्जहृदयो मां पातु लम्बोदरः॥
न्यायालङ्कारयुक्तं त्रिभुवनजनकश्रीपतीशेन जुष्टं
तुष्टं धीरेषु रुष्टं सततमविदुषां श्यामलं सामगीतम्।

ज्ञातं तातं नितान्तं सदयमसदृशं माहशां साधुसङ्गं
श्रीयुक्तश्चाथ कालीचरणमरचयं ग्रन्थमादौ प्रणम्य ॥
श्रश्रीकृष्णकान्त + + सुत + जनश्रीलसत् पादपद्मा
सानन्दानन्दमन्दस्मितमिलितवचोभाषणध्वस्तपापा ।
किञ्चित्क्रोधात्मतापाहतरिपुकलितानिष्टचेष्टादिदोषा
शिष्टाखर्व्वा विशिष्टा प्रभवतु जननी तारिणी मे नमस्या ॥
न्यायार्थस्थितिवृत्तिसंहृतिविधेर्हेतुं सुकृत्या युतान्
धीरानुच्चपदं नयन्तमयुतान् दुर्बुद्धिकान् मूढताम् ।
वेदाख्यानसमुद्धृताखिलधरादित्यं महान्तं मुदा
श्रीलश्रीजगदीशमथ कमलाधीशं नमस्याम्यहम् ॥
न्यायसंसारपाथोधिमग्नोपासकतारकम् ।
रामनारायणं वन्दे तर्कपञ्चाननं गुरुम् ॥
श्रीरश्रीकृष्णकान्तेन विद्यावागीशसंज्ञिना ।
व्याख्यायते सतां तुष्ट्यै शब्दशक्तिप्रकाशिका ॥
प्रणम्य भूमौ विनयेन मान्यान्
धीरान् समस्तानिति वेदयामि ।
अशेषमात्सर्य्यमिदं विहाय
प्रदर्शनीयं सुविभाव्य दूष्यम् ॥

मङ्गलाचरणपूर्व्वकनिजकृतकारिकावलीं व्याख्यातुं प्रेक्षावत्प्रवृत्तये शिष्यशिक्षायै च प्रयोजनाभिधेयसम्बन्धप्रतिपादकं पद्यमादौ निबध्नाति तर्कमित्यादि । तर्को वितर्क आपत्तिरिति यावत् । तन्तं सिद्धान्तः । तथाच पूर्व्वपक्षं सिद्धान्तञ्च जानता इत्यर्थः । इत्यादि ।

End. अनादिरित्यस्य व्यावृत्तिमाह पुना + + नीत्यादि । उक्तार्थेन इत्यस्य व्यावृत्तिमाह स्वप्रभृतिभ्यश्चेति । शुभि रुचि इत्यादि । कुत इत्याकाङ्क्षायामाह पुनः पुनः शोभते इत्यादि ॥ इत्याख्यातटिप्पनी समाप्ता । नच्चितस्य न्यायसमन्वितार्थकत्वेन विचारविधुरतयातिसुगमतया च टिप्पनीकरणे मदीयप्रवृत्तिर्नोत्पद्यते । समाप्तश्चायं ग्रन्थः ॥

Colophon. इति श्रीकृष्णकान्तविद्यावागीशभट्टाचार्य्यविरचिता शब्दशक्तिप्रकाशिकाटिप्पनी समाप्ता ॥

विषयः । जगदीशतर्कालङ्कारकृत-शब्दशक्तिप्रकाशिकाख्य-प्रकृतिप्रत्ययार्थविचारात्मकग्रन्थस्य व्याख्यानम् ।

No. 353. शब्दशास्त्रविवृतिः. By रघुनन्दनशिरोमणिः. Substance, country-made paper, 12 × 2½ inches. Folia, 85. Lines, 9 on a page. Extent, 3,394 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Serapura, Paṇḍita Candrakānta Tarkālaṅkāra. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य परमं देवं ... चित्तनन्दनम् ।

करोमि शब्दशास्त्रस्य विवृतिं प्रस्फुटां शुभाम् ॥

समर्थास्तत्त्वलाभाय स्वशिरत्नाय च कृतम् ।

कलापपूर्वतन्त्रस्य समुद्रः सेव्यतामयम् ॥

+ + + + समुत्सृज्य दूरतः खलु सेव्यताम् ।

ग्रन्थोऽयं यत्नतः साधो मनोज्ञज्ञानचेतवे ॥

अथ कृदन्ताः शब्दाः सर्ववर्म्मणा कथं न व्युत्पादिताः वररुचिना वा कथं व्युत्पादिता इति शिष्यजिज्ञासायां प्रतिपादयन्नाह वृक्षादिवदित्यादि ॥

End. क्त्वा प्रत्यये विमोचने विभाषा विमोचनादन्यत्र न स्यादेतदर्थमपि सूत्रं स्यादिति पुनरिह ग्रहणम् । नु भोः । यद्यपीत्यादि । एवं ननु भो विमोचन इति तुदादौ पाठो नास्ति इति बोध्यम् ॥ * ॥

Colophon. इति रघुनन्दनभट्टाचार्य्यशिरोमणिकृता शब्दशास्त्रस्य-विवृतिः समाप्ता ।

विषयः । कातन्त्रव्याकरणस्य कृदन्तांशस्य टीका ।

No. 354. शब्दसंग्रहमाला. By काशीश्वरः. Substance, country-made paper, 15 × 2½ inches. Folia, 56. Lines, 6 on a page. Extent, 2,344 çlokas. Character, Bengali. Date, Sk, 1688. Place of deposit, Kāṭhālpāḍā *viâ* Naihāti, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

अपारसंसारपयोधिनावं

सरस्वती-कुम्भभवादिसेव्यम् ।

प्रणम्य पादाम्बुजमाद्य विष्णोः

काशीश्वरः शब्दनिकायमालाम् ॥

आङ्गलीति वनि वौढि वादाय वचनोज्ज्वलः । (?)

अमरानुक्तविख्यात-शब्दसंग्रहमालिका ॥
श्वेतपत्रपरो श्रद्धा हेमाङ्गः कञ्जनिर्जरौ ॥ इत्यादि ।

End. संश्लेषरन्ध्रयोः सन्धिः सारः शुक्रे धनेऽपि च ।
श्रेष्ठे धाम्नि च पुंसि स्यात् ग्रावः पर्वतदेवयोः ॥
चाग्रनिर्द्वयोर्बन्धुरे स्यात् तालव्यदन्त्यपादिवत् ॥ ० ॥
इति सङ्कीर्णवर्गः ॥ ० ॥

Colophon. इति काशीश्वरकृतौ शब्दसंग्रहमाला समाप्ता ॥ शकाब्दाः १६८८ ।

विषयः । नानार्थद्व्यर्थादिशब्दानां पर्य्यायबन्धः ।

No. 355. शब्दसाध्यप्रबोधिनी. By रमानाथचक्रवर्त्ती. Substance, country-made paper, 16×3 inches. Folia, 37. Lines, 10 on a page. Extent, 1,434 çlokas. Character, Bengali. Date, Baŋgābda 1264. Place of deposit, District Ḍhākā, Vikramapura Vajrayoginī, Paṇḍita Dvārakānātha Tarkabhūṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः शिवायै नमः ।
शौरिं प्रणम्य देवञ्च भक्त्यानुग्रहकाम्यया ।
क्रियते बालबोधाय शब्दसाध्यप्रबोधिनी ॥
तत्र तावदकारान्ताः । दाशरथिवाचको रामशब्दः पुंलिङ्गः । रामः रामौ रामाः । रामं रामौ रामान् । रामेण रामाभ्यां रामैः । भिन्नविषयेऽपि निरवकाशतया येषा रत्नं बाध्यते । इत्यादि ॥

End. अत्रावर्णादेव इति टीकाकृतोक्तमपघुटस्वरविषयकमिति बोध्यम् । मधुलिडादीनां विरामे व्यञ्जनादौ च डत्वं भवतीति ॥

Colophon. इति रमानाथचक्रवर्त्तिविरचिता शब्दसाध्यप्रबोधिनी समाप्ता ॥
वङ्गाब्दाः १२६४ ॥

विषयः । कातन्त्रानुसारेण अकारान्तादिशब्दानां रूपकथनम् ।

No. 356. शब्दानित्यतारहस्यम्. By **मथुरानाथतर्कवागीशः.** Substance, country-made paper, 20×4 inches. Folia, 24. Lines, 8 on a page. Extent, 1,128 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Haraprasāda Çāstrī. Appearance, old. Prose. Generally correct.

Beginning. (अस्य प्रथमपत्रचतुष्कं नास्ति तेन पञ्चमपत्रस्य प्रारम्भवाक्यं लिखितम्।) यदि च परमाणुपरिमाणे द्व्यणुकपरिमाणापेक्षयापि नोत्कर्षोऽस्ति किन्त्वपकर्ष एव तस्यात्यन्तापकृष्टत्वेन सुप्रसिद्धत्वात् अधिकदेशव्यापकत्वेनैव परिमाणस्योत्कृष्टत्वमिति गुणकिरणावल्यामप्याचार्य्यैरभिहितत्वाच्च तदा तु सजातीयेत्यनुपादाय तादृशोपाधिमद्वृत्तिप्रतियोगिकत्वेनापकर्ष एव विवक्षणीयः॥ इत्यादि।

End. यथाश्रुते अणुपरिमाणादेरपि व्यावर्त्तनादसङ्गतेः। पक्षेतरत्वादिति पक्षेतरत्वतुल्यत्वादित्यर्थः। ननु सन्तु वर्णा नित्यास्तथापि पदवाक्यवेदा नित्या एव इत्यत आह यदा चेति। तत्सन्दोहरूपस्य पदसमूहरूपस्य॥

Colophon. इति शब्दपरिच्छेदरहस्ये शब्दानित्यतारहस्यं सम्पूर्णम्॥ * ॥

विषयः। तत्त्वचिन्तामण्यन्तर्गतस्य शब्दाख्यतुरीयखण्डस्य कश्चिदंशोऽयं। अत्र च नानाविधन्याययुक्तितर्कोपन्यासमुखेन शब्दानित्यत्वं प्रदर्शितम्॥

No. 357. शब्दाप्रामाण्यरहस्यम्. By मथुरानाथतर्कवागीशः. Substance, country-made paper, $17 \times 3\frac{1}{2}$ inches. Folia, 63. Lines, 8 on a page. Extent, 2,835 çlokas. Character, Bengali. Date, ? Place of deposit, District Pharidpur, Post Office Pālang, grāma Dhānukā, Paṇḍita Rajanīkānta Tarkaratna. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय।

न्यायाम्बुधिकृतसेतुं हेतुं श्रीराममखिलसम्पत्तेः।
तातं त्रिभुवनगीतं तर्कालङ्कारमादरान्नत्वा॥
श्रीमता मथुरानाथतर्कवागीशधीमता।
विशदीकृत्य दर्श्यन्ते तुरीयमणिफक्किकाः॥
आन्वीक्षिकीपण्डितमण्डलीषु
सत्ताण्डवैरध्ययनं विनापि॥
मदुक्तमेतत् परिचिन्त्य धीरा
निःशङ्कमध्यापनमातनुध्वम्॥

प्रत्यक्षादिप्रमाणत्रयं निरूपितम्। इदानीं चरमप्रमाणं शब्दो निरूपणीयोऽतः शिष्यावधानाय प्रतिजानीते अथेत्यादिना। अथ उपमाननिरूपणानन्तरम्। निरूढः शब्दः शब्दप्रमाकारणम्। यथाश्रुतेऽग्रे प्रमाणशब्दलक्षणकारणस्यार्थान्तरापत्तेः। निरूप्यत इति निरूपणं लक्षणस्वरूपप्रामाण्यादिभिर्ज्ञापनम्।

लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलो व्यापार इति यावत्। आख्यातस्य च विषयत्वमर्थः। तथाच उपमानविशेष्यकलक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलव्यापारानन्तरक्षणनिष्ठाभिन्नो यो लक्षणस्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलो व्यापारस्तद्विषयः प्रमाणं शब्द इत्यन्वयः। अथ पदस्य लुप्तद्वितीयाविभक्तिकस्य निरूपणक्रियाविशेषणतया स्तोकं पचतीत्यादिवदभेदस्य संसर्गमर्य्यादावलभ्यत्वात्। नान्तः क्रियाविशेषणत्वस्थले अभेदान्वयबोधस्यैव साकाङ्क्षत्वात्। व्यापारस्य शब्दप्रयोग एव तद्विषयता व्यापारानुबन्धिनी। तेन शब्दस्य निर्विषयकत्वेऽपि न क्षतिः॥ इत्यादि॥

End. ननु श्रुतपदेभ्य एव तात्पर्य्यग्रहात् पूर्व्वं कर्म्मत्वादौ घटादिमत्त्वानुभवः स्यादित्यत आह। पदानीति सम्भूय तात्पर्य्यग्रहेण समं मिलित्वैव तथाचान्योन्याश्रय इति भावः। इदमुपलक्षणम्। विशिष्य तत्परत्वग्रहस्य हेतुत्वे शब्दमात्रस्यानुभावकतापत्तेरित्यपि बोध्यम्। अतएवेति एतादृशतात्पर्य्यग्रहस्य शाब्दधीहेतुत्वादेवेत्यर्थः। न तु प्रकरणादिज्ञानस्य हेतुत्वादिति। विनिगमनेति। शक्तिजन्योपस्थित्यादेरितरसकलकारणस्याविशिष्टत्वेऽपि कदाचिदेकमर्थमादायैवान्वयबोध इत्यर्थः। तदनुपपत्तिरेवेति अतएवेत्यनुषज्यते एवकारोऽप्यर्थे। तात्पर्य्यानुपपत्तिरपीत्यर्थः लक्षणाबीजमिति शेषः (?) प्रवेशयेत्यादौ शक्त्या वाक्यार्थस्मरणस्य वाक्यार्थयोग्यतादिज्ञानस्य सत्त्वेऽपि लक्ष्यार्थस्यैवान्वयबोध इत्यत्र नियामिका इत्यर्थः। तदानीं शक्त्याऽन्वयबोधाभावे नियामिका इति तु फलितार्थः। तथाच न तादृशसिद्धान्तव्याघात इति भावः। तदभावादिति अतएवानुषज्यते पचति पद इति प्रयुक्त इति शेषः। स्मृतेति अन्योक्त .... स्मृतेत्यर्थ शब्दस्य लोकवेदसाधारणशब्दस्य प्रमाणान्तरत्वमित्यनुमानादिभिन्नत्वेन न गृहीतग्राहित्वार्थानुभवजनकत्वमित्यर्थः॥

विषयः। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणमित्यादिचतुर्विधप्रमाणं नैयायिकसम्मतम्। वैशेषिकनये प्रत्यक्षानुमानमेव प्रमाणं शब्दोपमानानामनुमानगतार्थत्वादिति मतं दूषयितुं शब्दस्य पृथक्प्रमाणत्वं व्यवस्थापयति शब्दाप्रामाण्यग्रन्थेनेति संक्षेपः॥

No. 358. शाक्तामोदः. By शङ्करदविड़ाचार्य्यः. Substance, country-made paper, 19×5 inches. Folia, 13. Lines, 10 on a page. Extent, 471 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura Mājhapāḍa, Bābu Rasavihāri Rāya. Appearance, new. Prose and verse. Incorrect.

Beginning. ॐ नमो गणेशाय ।

क्वणत्काञ्चीनाले करिकरभकुम्भस्तनयुगे
शरच्चन्द्राकाखर्व्वोज्ज्वलितवचनचार्व्वी स्मरहरे ।
प्रमोदांस्तन्वन्ती दधति खड्गपाशाङ्कुशधनुः
परिक्षीणा मध्ये वसतु मम चेतस्तव पदे ॥
योगिध्येयममोघपत्त्रसिजद्वन्द्वं परामोददं
मूढानां दयया गुरोर्हृदि सदा भानूपमं मोक्षदम् ।
नत्वा शङ्करनामको द्रविड़जः सिद्धेः परैकायनः
पुष्णीं सनानुते हरस्य वचनान्याहृत्य तन्त्रादिकम् ॥
स्तनपानरते मह्यं यदुक्तं यक्षयामले ।
शिवोक्तञ्च तथा तन्त्रं यामलादौ विशेषतः ।
साधनं संप्रवक्ष्यामि सेतुबन्धे महोदधौ ॥
रघुवंशसमुद्भूत-श्रीरामचन्द्रसन्निधौ ।
कथितं शपथैर्यद्यद्दाशुसिद्धिप्रदायकम् ॥
कामरूपे योनिपीठे शङ्करस्य पदद्वयम् ।
स्पृष्ट्वा काल्या महादेवं यद्यदुक्तमनुत्तमम् ॥
यदुक्तं नागभट्टेन तथा सारसमुच्चये ।
श्यामातारविलासे च तत्त्वचिन्तामणौ यथा ॥
कल्पद्रुमे महादेव्या नीलतन्त्रे शिवेन यत् ।
ललितामालिनीयक्षरुद्रयामलमव्ययम् ॥
तथा चान्यानि तन्त्राणि समालोच्य यथाविधि ।
सारात्सारतरं वक्ष्ये कलौ सिद्धिप्रदायकम् ॥
उल्लासे प्रथमे वक्ष्ये पूजाजपविधानकम् ।
द्वितीये तु पुरश्चर्य्यां यामिन्यां मूर्त्तिदर्शनम् ॥
दिव्यानाञ्च पशूनाञ्च भावभेदं तृतीयके ।
चतुर्थे देशदोषादिप्रतिबन्धनिरीक्षणम् ॥
काम्यानां कर्म्मणां सिद्धिस्तथैव शुभलक्षणम् ।
नायिकासाधनञ्चैव वक्ष्यामि पञ्चमे मतम् ॥

कुलार्णवे ।

आत्म-स्थान-मनु-द्रव्य-देवशुद्धिश्च पञ्चमी ॥ इत्यादि ।

End.

जप्त्वा मन्त्रस्य प्रायेण चात्मभेदेन साधनम् ।
कृत्वा देव्याः पदाम्भोजं दृश्यते शिवचक्षुषा ॥
बहुजन्मक्रियायोगात् तत्रापि मानवे क्वचित् ।
मूर्च्छिदं पूर्व्वचिह्नं जायते नात्र संशयः ॥
(अतःपरं खण्डितम् ।)

विषयः । शक्तिपूजाविधिः । पञ्चशुद्धिकथनम् । तत्र आत्मशुद्धिप्रकारः । स्थानप्रकारः । मन्त्रशुद्धिप्रकारः । द्रव्यशुद्धिप्रकारः । देवशुद्धिप्रकारः । पूजास्थलम् । जपस्थलञ्च । अथ मन्त्रकथनम् । तत्र चौरमन्त्रकथनम् । दीपनीमन्त्रकथनम् । मन्त्रसिद्धिलक्षणम् । पूजाप्रयोगः । जपादिनियमः । मन्त्रस्य स्वापकालादिः । ब्राह्मणादिवर्णभेदेन सेतुकथनम् । महासेतुकथनम् । कामकलाकथनम् । मन्त्रसङ्केतकथनम् । मन्त्रस्थानकथनम् । भूतलिपिकथनम् । चौरमन्त्रादिजपस्थानञ्च । अथ मन्त्रसाधकयोरैकत्वकथनम् । जीवतत्त्वकथनम् । मन्त्रशिखादिकथनञ्च । अथ पुरश्चरणविधिः । तत्र स्थानकथनम् । भक्ष्याभक्ष्यकथनम् । वर्ज्यावर्ज्यकथनम् । तत्प्रयोगकथनञ्च । (अतःखण्डितम् ।)

No. 359. **शाबरतन्त्रम्** . Substance, country-made paper, 10 × 4 inches. Folia, 50. Lines, 9 on a page. Extent, 984 çlokas. Character, Bengali. Date, ? Place of deposit, Dhākā, at the Kālīmatha at Ramnā. Appearance, old. Prose and verse. Incorrect.

सत्यमेव जयते

Beginning.

श्रीगणेशाय नमः ।
श्रीशङ्कर उवाच ।
आदिनाथो ह्यनादिश्च कालश्चैवातिकालकः ।
करालो विकरालश्च महाकालश्च सप्तमः ॥
कालभैरवनाथश्च वटुकस्तदनन्तरम् ।
भूतनाथो वीरनाथः श्रीकण्ठो द्वादशो मतः ॥
एते कापालिकाः प्रोक्ता वीरतुम्बीमहाफलैः । (?)
शिष्याणां सूर्य्यसङ्ख्या च तानहं वच्मि संशृणु ॥
नागार्ज्जुनो जडभर्थो हरिश्चन्द्रस्तृतीयकः ।
सत्यनाथो भीमनाथो गोरक्षश्चर्पटस्तथा ॥
अवघटश्चैव वैराग्यः कन्थाधारी जलन्धरिः ।
मार्गप्रवर्त्तका ह्येते तद्वच्च मलयार्ज्जुनः ॥
एतदुक्तं शाबराणां मन्त्राणां सिद्धिदायकम् । इत्यादि ।

End. भैरव मेरा दुसमनकी माड़ी पाको गाका वेरा मारण मारे तो गुरु गोरखयतीको आम। २१५ जप १०००० । अष्टोत्तर आहुती बकराका करे आम दाचाम दिन ११ तब् चलावे जब् बकराको कलेजी मदमन्त्र पड़ी आके धरी धारी और पाके आप करे॥

Colophon. इति श्रीशावरतन्त्रं सम्पूर्णम् ।

विषय:। शावरसिद्धिविधिः। तत्र क्वचित् क्वचित् हिन्दीभाषया मन्त्रादिश्च। अथ सर्वविषभिद्वरसिद्धवलिमन्त्रादिः। योगिनीमन्त्रः। क्षेत्रपालमन्त्रः। गणेशमन्त्रः। कालीमन्त्रः। बगलामन्त्रः। भैरवीमन्त्रः। त्रिपुरासुन्दरीमन्त्रः। हेलकोमन्त्रः। मातङ्गीमन्त्रश्च। अथ डाकिनी-शाकिनी-भूत-सर्पादिभयनाशनमन्त्रः। उच्चाटनवशीकरणस्तम्भनादिमन्त्रः प्रयोगविधिश्च।

No. 360. शिवताण्डवटीका. Substance, country-made paper, Folia, 60. Lines, 9 on a page. Extent 1,100 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares Govardhanasarāi, Paṇḍita Vindhyeçvariprasāda Dube. Appearance, old. Correct.

Beginning. ॐ गणेशाय नमः। श्रीदक्षिणामूर्त्तये नमः।

श्रीदक्षिणामूर्त्तिगुरुं प्रणम्य
तदीरित-श्रीशिवताण्डवाख्यम्।
यन्त्रावलीमङ्गमपि पुनस्तां
व्याकुर्म्महे सज्जनरञ्जनाय॥
पूर्वं मया विरचितोऽङ्कः यन्त्रव्याख्या
स्वल्पैः सा पिहितातिभीत्यात्।
अतः पुनः श्रीमदनूपभूप-
नियोगतः स्पष्टतरां करोमि॥
कः पुनरनूपभूप इत्याकाङ्क्षायां तद्वंशावलीमाह।
येनायं प्राप्यमार्के (?) वसति मदनीं जङ्गलं नन्दनत्वं
यः संसद्मकश्रीपदमथत्यमभूत् पविका नैर नाम्नी। (?)
शूरः श्रीमान् वदान्यः शमदमसहितो नीतिशिक्षागुरूणां
आद्यः सो व्यापिकीर्त्या जगति विजयते रायकल्याणमल्लः॥
समजनि विक्रमनगरे राजा श्रीरायसिंहाख्यः
यस्मिन्नदति गजौघान् मृगजपतिभावं गतो विलोपोऽपि। इत्यादि।

No. 361. शिवरहस्यखण्डः (स्कन्दपुराणीयः) (द्वितीयांशः) Substance, country-made paper, 12 × 5 inches. Folia, 60. Lines, 10 on a page. Extent, 1,950 çlokas. Character, Nāgara. Date, ? Place of deposit, District Vā̃kuḍā Kuccekol, Bābu Yogīndranātha Siṁha Deva. Appearance, tolerable. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः । श्रीमद्दक्षिणामूर्त्तिशिवाय नमः ।

आगजाननपाथोजविकाशनदिवाकरम् ।
विघ्नाद्रिकुलिशं श्रीमदेकदन्तं नमाम्यहम् ॥

सूत उवाच ।

पुनः प्रणम्य मुनयो जैगीषव्यो महामुनिः ।
स भक्त्या तारकारातेः पुरारातेः कथाः शुभाः ॥
पप्रच्छ विनयोपेतस्तच्छौनकजगाद्वयः ।
स्वच्छाच्छमानसोत्फुल्लप्रस्फुटवदनाम्बुजः ॥
धृतत्रिपुण्ड्रभूत्यैव सर्वाङ्गधवलान्तरः ।
रुद्राक्षमालकोटीरः शम्भवारपि रसस्तदा ॥
गणेषु देवसंघेषु मुनिव्रातेषु सम्भ्रमाः ।
पश्यत्स्वच्छदयानन्दः षड्‌ास्यं प्रेक्ष्य भक्तितः ॥
प्राह स्मरारिमाशास्य ध्यानपूतहृदन्तरः । इत्यादि ।

End. देवैश्च वेदविधिना पुरुषोत्तमेन
स्कन्देन गौरीगणा येन च पूज्यपादा ॥ ० ॥

अतःपरं खण्डितम् ।

विषयः। प्रथमाध्याये,—स्कन्दवाक्यम् । २ याध्याये,—देवीतपोवर्णनम् । ३ । ४ र्थाध्याययोः,—अम्बिकेश्वरपूजनादिः । ५ माध्याये,—अम्बिकेशप्रादुर्भावादिः । ६ ष्ठाध्याये,—शिवगौरीसंवादादिः । ७ । ८ माध्याययोः,—देवस्तवादिः । ९ । १० माध्याययोः,—शिवागमनादिः । ११ । १२ शाध्याययोः,—रत्नद्वीपवर्णनादिः । १३ । १४ शाध्याययोः,—श्रीचक्रसौधवर्णनम् । १५ शाध्याये,—चिन्तामणिसौधवर्णनम् । १६ । १७ शाध्याययोः,—श्रीचक्रवर्णनादिः । १८ । १९ शाध्याययोः,—हिमाचलेश्वरसमागमः । २० । २१ शाध्याययोः,—देवीविहारादिः । २२ । २३ शाध्याययोः,—कैलासदर्शनादिः । २४ । २५ शाध्याययोः,—शिवरहस्यवाक्यादिः । २६ । २७ शाध्याययोः,—दुर्व्वासस्तपश्चर्य्यादिश्च । अतःपरं खण्डितम् ।

No. 362. शिवार्चनमहारत्नम् . By गौड़शङ्कराचार्य्यः . Substance, country-made paper, 14 × 2½ inches. Folia, 3. Lines, 7 on a page. Extent, 63 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha, Serapura, Mādhavapura, Paṇḍita Gaṅgādhara Tarkasiddhānta. Appearance, old. Verse. Correct.

Beginning. ॐ नमः शिवाय ।
संसारार्णवमग्नानां समुद्धरणहेतवे ।
शिवार्चनमहारत्नं शङ्करेण वितन्यते ॥
व्यापारान् सकलांस्त्यक्त्वा पूजयध्वं सदाशिवम् ।
निकटा इव दृश्यन्ते × × × नगरद्रुमाः ॥ इत्यादि ।

End. भूतशुद्धिं लिपिन्यासं विना चेत् साधनञ्चरेत् ।
विपरीतफलं दद्यादभक्त्या पूजनं यथा ॥

Colophon. इति गौड़भूमिनिवासि श्रीशङ्कराचार्य्यविरचिते शिवार्चनमहारत्ने प्रथमः प्रकाशः ॥ ० ॥

विषयः । शिवपूजाकालाकालाधारन्यासादिनिरूपणमुखेन पूजाविधिः ।

No. 363. शिशुपालवधटीका (नवमसर्गस्य कियदंशपर्य्यन्ता) By वल्लभदेवः. Substance, country-made paper, 13 × 3 inches. Folia, 148. Lines, 7 on a page. Extent, 3,431 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Parganā Sonārgā̃, Post Office Vaidyervāzār, grāma Sātbheyepāḍā, Paṇḍita Tārākānta Vācaspati. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो विनायकाय । श्रियः पतिरित्यादि । श्रियो लक्ष्म्याः पतिः स्वामी हरिर्नारायणः जगच्छासितुं आज्ञां कारयितुं वसुदेवसद्मनि वसुदेवगृहे वसन् हिरण्यगर्भाङ्गभुवं ब्रह्मपुत्रं मुनिं नारदाख्यं ददर्श दृष्टवान् । मुनिं कीदृशं अम्बरादाकाशादवतरन्तं अधः पतन्तम् । हरिः कीदृशः जगतां निवासो यत्र स जगन्निवासः । वसुदेवसद्मनि कीदृशे श्रीमति सलक्ष्मीके । श्रियः पतिरित्यन्यहरिव्यवच्छेदार्थं कृतं मङ्गलार्थं वा । वसन् ददर्शेति धातुसम्बन्धे प्रत्यया इति साधु .... अम्बरादवतरन्तं अम्बरमाश्रित्याधःपतन्तं ल्यब्लोपे पञ्चमी वक्तव्या । अन्यथा आकाशस्यानवधित्वात् भुवमपाये-ऽपादानमिति पञ्चम्येव न स्यात् । अङ्गभूशब्दश्चात्र रूढिवशात् मानसेऽपि पुत्रे

वर्त्तते। भुवः संज्ञान्तरयोरिति क्विप्। केचिदत्र श्लोके पञ्चान्तरमाहुः। वसद्मनि वरुणालये समुद्रे। वसुदे धनदे। वसन् चरिर्मुनिं ददर्श चरिः कीदृशः श्रीमतिशासितुञ्जगत्। श्रीश्च मतिश्च ताभ्यां शासितुं शीलं येषां ते श्रीमतिशासिनः तान् तुञ्जन्ति हिंसन्ति ते श्रीमतिशासितुञ्जा दानवाः तान् गच्छन्ति श्रीमतिशासितुञ्जगत् क्विपि रूपम्। श्रयन्ति तामिति श्रीः ... ... इत्यादिना क्विपि दीर्घश्च पातीति पतिः ... ... त्यौणादिकः॥ अतः सर्व्व-व्यापकत्वात् .... तथाहि तत्र नारदागमनेन .... कार्य्योचित-मन्त्रादिसूचनं वसुदेवसद्मनि वसन्निति ... ... युधिष्ठिर-प्रीतये जगामेति भाविकार्य्यार्थसूचनम्। श्रियः पतिरिति ... ... एवञ्च ध्वननद्वारा चतुर्थसर्गमारभ्य दशमसर्गपर्य्यन्त-मुद्दीपन .... स्कन्धावारसन्निवेश वसन्तादिवर्णन-वनविहार जलक्रीड़ा तत्तदवसरे तत्तदुक्तिप्रकार-मधुपान-सुरतोत्कर्षः सूचितः। अतः सर्व्व-व्यापकत्वा ... ... वस्तुनिर्द्देशः॥ इत्यादि॥

End. अथ। सुतनोरभिसारिकायाः दयितोपगमे प्राणनाथाभिसरणे सान्द्रतम-मतिनिविड़ं सन्तमसं गाढ़ान्धकारः भयाय त्रासाय नाभवत्। तनौ शरीरे ... शुक्ला या रोमराजिस्तस्याः पथा वेपथवे कम्पाय नाभवत्। कथन्तर्हि नाभवदित्याह कार्य्यगुरुतां प्रयोजनगौरवं प्रियोपकण्ठप्राप्तिलक्षणमवधार्य्य-निश्चित्य ... ... तेन कार्य्यगुरुतामवधार्य्य-चलितायाः इत्यध्याहार्य्यं तत् समानकर्तृकता भवतीति सन्तमसमिति अव-समन्वेभ्यस्तम इति तमसोऽच्समासान्तः॥ स ग्रहगणताराससूहः तमोभि-स्तान्तां व्याप्तां तमीं रात्रिमधिगम्य प्राप्य द्युतिमपदीत् कान्तिमाददे। स क इत्याह। यः अह्नपि दिवसेऽपि आदित्यतेजसा हेतुना न ददृशे न दृष्टः यो दिवसेऽपि न दृश्यते स कथं रात्रौ दृश्यत इत्याह। लघवः प्राकृताः मलिनाश्रयतः कलुषाधारात् प्रकटीभवन्ति व्यक्ता जायन्ते। अल्पप्रमाणत्वात् लघुर्ग्रहगणः। तमःशून्यत्वात् रात्रिर्मलिना। रजनी यामिनी तमीत्यमरः। अनु। तेन समयेन प्रदोषाख्येन अबला नार्य्यः॥ (इतः परं खण्डितम्)

विषयः। माघकविकृतस्य शिशुपालवधकाव्यस्य व्याख्यानम्। खण्डितत्वाद्गास्य ग्रन्थ ग्रन्थस्य ग्रन्थकर्तुर्वा नामनिर्द्देशोऽस्ति केवलं सर्गशेषेष्वस्ति वल्लभसारटीकेति नाम॥

No. 364. शिशुपालवधटीका (शिशुबोधिनी) By महेशशर्म्मा. Substance, country-made paper, 19×3 inches. Folia, 80. Lines, 8 on a page. Extent, 2,560 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍa Viṣṇupura, Kārtika Candra Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ।

यत्पत्पातलवतः प्रथमं जडोऽपि
वाचस्पतिं सपदि मूकयितुं समर्थः ।
तद्गौरवं चरणमन्वहमादरेण
वाक्कायमानसभवैः प्रणमामि भावैः ॥
कृष्णाख्यं प्रणमामि धाम दिविषन्मन्दारमाला गल-
द्धाराधङ्मकरन्दवृन्दशिशिरश्रीपादपीठान्तकम् ।
यस्मात्तन्त्र शुपात्तमेव जगतां सृष्टिस्थितिव्यापदः
कर्त्तुं ते तु सुरा विभूतिरतुला ब्रह्माच्युतत्र्यम्बकाः ॥
यद्यपि बहवो ग्रन्थाः सन्ति महान्तो निगूढभावार्थाः ।
तदपि च शिष्यहितैषी कुरुते टीकां स्फुटां द्विजः कश्चित् ॥

वस्तुनिर्देशप्रारम्भकं महाकाव्यलक्षणं सम्पादयन् प्रतिसर्गान्तश्लोके चिह्नतया श्रीशब्दं प्रयुञ्जानः शिशुपालवधसचेष्टभगवच्छ्रीकृष्णोत्तेजनार्थं भगवत्पाकशासनप्रेरितस्य देवर्षेर्नारदस्य दर्शनं प्रथमतो ग्रन्थकृत् प्रक्रमते । श्रियः । इत्यादि ।

End. उपालम्भमाह । ननु हे श्रीकृष्ण त्वं धरस्य पर्व्वतस्य उद्धर्त्ता श्रीगोवर्द्धनो भवता उद्धृत इति सर्व्वत्र जगति भुवने प्रतीतः ख्यातोऽसि तत्तदा अतिभरं मां किं अधः प्रापयिषुः पातालं प्रापयितुमिच्छुः । किं प्रश्ने । यो धरस्योद्धर्त्ता स कथं धरमधः प्रापयतीति प्रश्नार्थः ॥ शिखरिणीवृत्तम् ॥ ० ॥

Colophon. इति श्रीमहेशशर्म्मकृतायां शिशुबोधिन्यां माघटीकायां पञ्चमसर्गः ॥ * ॥

(अतःपरं खण्डितम् ॥)

विषयः । माघकविकृतस्य शिशुपालवधकाव्यस्य व्याख्यानं पञ्चमसर्गपर्य्यन्तम् ॥

No. 365. शिशुलोचनम्. By मुकुन्दरामदैवज्ञः. Substance, country-made paper, 16×3½ inches. Folia, 93. Lines, 5 on a page. Extent, 1,220 çlokas. Character, Bengali. Date, Sk. 1792. Place of deposit, District Mayamanasiṁha, Āsujiyā, Ānandakiçora Rāya. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमः श्रीसूर्य्याय ।

नत्वा भक्तविशेषमिष्टफलदं कृष्णाङ्घ्रिपङ्केरुहं
इन्द्राद्यामरवर्गयुष्टमनिशं निःशेषविघ्नापहम् ।
स्पष्टार्थं शिशुलोचनं सुकमलं वारादिभिर्निर्णयं
विद्यानन्दकुलोद्भवो वितनुते श्रीमन्मुकुन्दः स्वयम् ॥
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।
एतेषां नामतो वाराः सप्तैते कथिताः क्रमात् ॥ इत्यादि ।

End. मृत्युकाले जपेत् कृष्णं रामं नारायणं हरिम् ।
अभिषेकश्च आज्ञ्यास्तोये कुर्य्यान्मनोरमम् ॥
साम्नो ग्रीवायां रुद्राक्षो धार्य्यते तुलसीदलम् ।
भवपाशविमुक्तोस्तु याति विष्णोः परं पदम् ॥

Colophon. इति श्रीमुकुन्दरामदेवशर्म्मविरचिते शिशुलोचनाख्ये भूलक्षणादिनिर्णयो नाम अष्टमोऽध्यायः ॥ शकाब्दाः १७९२ ।

विषयः । वारकथनम् । वारशुभाशुभकथनम् । वारगुणकथनम् । राशिस्वरूपनिरूपणम् । ग्रहोदयादिः । संक्रान्तिनिर्णयः । गुरुविरुद्धादिनिर्णयः । ग्रहमण्डलनिरूपणम् । युग्मादिविचारः मुहूर्त्तकथनम् । सर्व्वौषधि-महौषध्यादिः । वारवेला-कालवेलादिः । कालशुद्धिः । भूकम्प-दिग्दाहादिजन्याकालनिरूपणम् । कन्याकरादिलक्षणम् । मासनिर्णयः । मृतवित्सुकगोधूलि-योगादिः । नववध्वागमनगर्भाधानादिसमयनिरूपणम् । सरोवरादिलक्षणम् । धान्यादिमूल्य-ज्ञानम् । वास्तुभूम्यादिलक्षणम् । मुमुर्षुकालौषधसेवनादिविधिश्च ।

No. 366. शुद्धिकारिकाली . By मोहनचन्द्रवन्द्योपाध्यायः . Substance, country-made paper, $14 \times 3\frac{1}{4}$ inches. Folia, 20. Lines, 5 on a page. Extent, 262 çlokas. Character, Bengali. Date, Sana 1277. Place of deposit, District Ḍhākā, Parganā Sonārgā̃, Post Office Vaidyerbāzār, grāma, Sātbheyepaḍā, Paṇḍita Nīlakamala Smṛtibhūṣaṇa. Appearance, new. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

नत्वा गुरुं विबुधवृन्दमतं विलोक्य
संक्षेपतो जयपुरस्थितिरेष यत्नात् ।
सश्रीसुवन्द्यजनिमोहनदेवशर्म्मा
शुद्धेस्तनोति जनरञ्जनकारिकालीम् ॥

अथ सपिण्डादिनिर्णयः ।

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥
दशमं पुरुषं यावत् साकुल्यन्तु प्रकीर्त्तितम् ।
चतुर्द्दशं भवेद् यावत् समानोदकमुच्यते ॥

अदत्तकन्यायास्तु ॥

प्रपितामहपर्य्यन्तं सापिण्ड्यन्तु त्रिपौरुषम् ।
तेषां सन्ततयो ग्राह्या आद्यं त्यक्त्वा त्रयः किल ॥

तथाच शुद्धिरत्नाकरे ॥

अप्रत्तानां तथा स्त्रीणां सापिण्ड्यन्तु त्रिपौरुषम् ।
विहाय जीवितं तातं शास्त्र पौत्रे प्रदर्शनात् ॥
अनिरूढसुतायाः सापिण्ड्यस्येति शेषः । अन्यच ।
अनिरूढसुतायास्तु शास्त्र पौत्रात् त्रिरात्रकम् ॥
पौत्रादित्यस्य परमिति शेषः ॥
आत्मापेक्ष्य पञ्चमे च तद्वृद्धप्रपितामहे ।
निवर्त्तेत च सापिण्ड्यं कन्यायाः शास्त्रयुक्तितः ॥
पञ्चमादित्रिपुरुषं यावत् साकुल्यमुच्यते ।
दशमं पुरुषं यावत् तावत् केषाञ्च सम्मतम् ॥

दत्तकन्यायास्तु ।

दत्ता या कन्यका स्यात्तु भर्त्तृसापिण्ड्यगोत्रभाक् ।
पितृसापिण्ड्यगोत्राच निवर्त्तेत च शास्त्रतः ॥

अथाशौचकालनिर्णयः ।

शुद्ध्येत् विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥
साकुल्ये सर्व्वजातीनां त्र्यहाशौचं भवेद् ध्रुवम् ।
स्यात् समानोदके तेषां पक्षिणी मुनिवाक्यतः ॥
नामगोत्रस्मृतौ यस्यास्तेषा .... मुच्यते ॥ इत्यादि ॥

End. अथ स्त्रियाः श्राद्धाधिकारे क्रमः ।

ज्येष्ठः पुत्रः कनिष्ठश्च पौत्रः प्रपौत्र एव च ॥
अदत्ता .... दत्ता दौहित्र एव च ।

पत्नी च पुत्रकश्चैव पतिः पुत्रवधूस्तथा ।
देवरश्च तथा स्वामी भ्रातृपुत्रास्ततः परम् ॥
श्वशुरादिसपिण्डाश्च समानोदकगोत्रजाः ।
पिता कनिष्ठभ्राता च ज्येष्ठश्चैव सहोदरः ॥
भगिनीपुत्रकश्चैव स्याद्‌ भर्त्तुर्भगिनीसुतः ।
भ्रातृपुत्रश्च जामाता भर्त्तुर्मातुल एव च ॥
भर्त्तृशिष्याः पितृवंश्या मातृवंश्यास्तथैव च ।
आद्यश्राद्धादिकं कुर्य्यात् निर्द्दिष्टाश्च क्रमादिमे ॥
ज्येष्ठा यद्यवीरा कन्या कनिष्ठा च सपुत्रिका ।
तदा कनिष्ठया कार्य्या क्रिया प्रेतस्य सर्व्वदा ॥
अवीरा चैव बन्ध्यापि श्राद्धाधिकारिणी भवेत् ।
कनिष्ठा चेत् सपुत्रापि ज्येष्ठावीरा चरेत् क्रियाम् ॥

अथानधिकारिणः ।

न स्यातां क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजड़मूकाश्च ये च केचिन्निरिन्द्रियाः ॥
सर्व्वथा भागशून्या ये ते न स्युरधिकारिणः ।
एवं नानाविधाः सन्ति श्राद्धे चानधिकारिणः ॥

Colophon. इति वन्द्यघटीय-श्रीमोहनचन्द्रविद्यावाचस्पतिविरचिता शुद्धिकारिकाली समाप्ता ॥

विषयः । सपिण्डादिनिर्णयः । साकुल्यनिर्णयः । ब्राह्मणादिवर्णभेदेनाशौचकालनिर्णयः । रजस्वलाशौचनिर्णयः । गर्भस्रावाशौचनिर्णयः । जाते बालके ब्राह्मणादिवर्णभेदेन प्रसूतीनामशौचकालनिर्णयः । अनधिगतचूड़ोपनयने मृते बालके पित्रादीनामशौचकालनिर्णयः । कृतचूड़ोपनयनबालकमरणे सपिण्डसकुल्यानामशौचकालनिर्णयः । कन्यामरणे पित्रादीनां सद्यःशौचकथनम् । वाग्दत्तायाः कन्याया मरणे पित्रादीनामशौचकालनिर्णयः । दत्ताया मरणे भर्त्तृतत्सपिण्डादीनामेवाशौचं न पित्रादीनामिति कथनम् । खण्डाशौचनिर्णयः । युद्धादिनिमित्तकेषु मृतिविशेषेषु अशौचकालनिर्णयः । असपिण्डाशौचनिर्णयः । पर्णनरदाहाशौचनिर्णयः । ब्राह्मणादिवर्णभेदेनाशुचीनामङ्गास्पृश्यत्वकथनम् । अचारलवणनिर्णयः । अशौचस्य गुरुत्वलघुत्वनिर्णयः । अघवृद्धिमदशौचनिर्णयः । अशौचसङ्करनिरूपणम् । पतितादीनां मरणजनने अशौचाभावनिर्णयः । पातकिनिर्णयः । महापापिप्रायश्चित्तनिर्णयः । अशौचमध्येऽपि जातकर्म्मादिकर्म्मकरणनिरूपणम् । पूरकपिण्डदानादिविधिः । प्रेतश्राद्धविशेषकथनम् । तर्पणविधानम् । आद्यकृत्याधिकारिनिर्णयः । आद्यकृत्यानधिकारिनिर्णयश्च ॥

No. 367. शुद्धिकौमुदी. *By* गोविन्दानन्दकविकङ्कणाचार्य्यः. Substance, country-made paper, 18 × 3 inches. Folia, 9. Lines, 8 on a page. Extent, 441 çlokas. Character, Bengali. Date, Sk 1735. Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, fresh, Prose and verse. Generally correct.

Beginning. श्रीरामः शरणम् ।

सानन्दं प्रणमन्महेन्द्रमुकुटप्रोतेन्द्रनीलामल-
श्रेणीस्वीकृतचञ्चरीकनिवहव्यासङ्गसम्भावनम् ।
स्वप्रोद्भूतभवोत्तमाङ्गतटिनीसम्भूतशङ्कावहं
श्रीगोविन्दपदाम्बुजं वितनुतामृद्धिं परामान्तरीम् ॥
आलोच्याखिलसंग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यगथो विविच्य मुनिभिर्मन्वादिभिः संहिताः ।
श्रीमत्तातपदारविन्दविलसद्भक्तीभवोद्देशतः
श्रीगोविन्दकविः करोति गहनां शुद्धेरिमां कौमुदीम् ॥

अथ शुद्धिस्वरूपं निरूप्यते । तत्र वेदबोधितकर्म्मार्हता शुद्धिः । अर्हता तत्तद्विधिबोधितत्वं यत्कर्म्मसम्पादनाय येषां पात्रकालादीनां यादृशं विधिबोधितत्वं तत्कर्म्मणि तेषां सैव शुद्धिरित्यर्थः ॥ इत्यादि ।

End. अथवा कायिकव्यभिचारिस्थले सर्व्वैव सकलमुनिभिः प्रायश्चित्तोपदेशात् यथाविधिकृतप्रायश्चित्ताया अपि रजोयोगानन्तरमेव शुद्धिनियमविधायकं रजसा स्त्री मनोदुष्टेति मनुवचनन्तु मनोदोषे तन्मात्रशुद्ध्यर्थमिति ध्येयम् ।

मनुः । अन्यथा शुध्यन्ति विद्वांसो दानेनाकार्य्यकारिणः ।
प्रच्छन्नपापा जप्येन नदी वेगेन शुध्यति ॥

मरीचिः । येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः ।
तत्र तं नावमन्येत धर्म्मस्तत्रैव तादृशः ॥ ० ॥

गणपतिभट्टतनुजो गोविन्दानन्दकविकङ्कणः श्रीमान् ।
समकृत सन्तोषार्थं सुधियां श्रीशुद्धिकौमुदीमेताम् ॥
सर्व्वान्तर्य्यामिने तस्मै गोविन्दाय नमो नमः ।
अत्रानुरागं धास्यन्ति यत्कृपाभिर्विपश्चितः ॥ ० ॥

Colophon. इति गोविन्दानन्दकविकङ्कणाचार्य्यकृता शुद्धिकौमुदी समाप्ता ॥ * ॥
श्रीरामः शरणम् । शकाब्दाः १७३५ ।

विषयः। शुद्धिस्वरूपनिरूपणम् । अशौचकालादिनिरूपणम् । जननाद्यशौचनिरूपणम् । अशौचे एकोद्दिष्टविचारादिः । बालाद्यशौचनिरूपणम् । रजस्वलाशौचनिरूपणम् । सपिण्डाद्यशौचनिरूपणमुखेन सपिण्डविचारादिः । अशौचिनामन्नभक्षणविचारादिः । मृत्युविशेषाशौचनिरूपणम् । सहमरणानुमरणादिः । मुमूर्षुकर्त्तव्यादिः । वैतरणीधेनुदानविधिः । पर्य्यन्तरदानादिविधिः । अस्थिसञ्चयनविध्यादिः । दशाहकृत्यादिविधिः एकोद्दिष्टविधानादिश्च ।

No. 368. शुद्धितत्त्वव्याख्या. By गुरुप्रसादन्यायभूषणः. Substance, country-made paper, 15 × 3 inches. Folia, 16. Lines, 8 on a page. Extent, 650 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Raghurāma Tarkaratna. Appearance, tolerable. Prose. Correct.

Beginning. श्रीरामः शरणम् ।

सहानुगमनमिति सहानुशब्दावसमस्तौ सहगमनमनुगमनञ्चेत्यर्थः । अनुशब्दः पश्चादर्थः भर्त्त्रेति भर्त्तुरिति च पूरणीयम् । तेन भर्त्तृसहगमनं तदनुगमनञ्च लभ्यते । गमनपदं परलोकगमनपरम् । तेन मरणमित्यर्थः । सहशब्दार्थः समभिव्याहृतगमनक्रियाकालः । इत्यादि ।

End. मरणं यदि तुल्यं स्यादिति तुल्यं अभिन्नदिनजाततया दशरात्रव्यापितया च समानमिति वक्ष्यते । किन्तु महागुरुनिपात इति इदमुपलक्षणं महागुरुनिपाताशौचान्मिन्नदिने तुल्यसपिण्डमरणद्वये दिनद्वयवृद्धिरिति मन्तव्यमिति गोस्वामी । अतएव मरणाशौचस्य दीर्घकालीनजननाशौचमपेक्ष्य गुरुत्वाभावादेव । एतेन मरणाशौचस्य दीर्घकालीनजननाशौचापेक्षया गुरुत्वाभाविन ।

Colophon. इति महामहोपाध्यायगुरुप्रसादन्यायभूषणभट्टाचार्य्यविरचिता शुद्धितत्त्वीयकतिचिद्व्याख्या समाप्ता ॥ ० ॥ ॐ रामः शरणम् ।

विषयः। रघुनन्दनभट्टाचार्य्यकृतस्य शुद्धितत्त्वाख्यस्मृतिशास्त्रीयग्रन्थस्य कठिनांशव्याख्यानम् ।

No. 369. शुद्धिदीपिकावृत्तिः. By मथुरानाथचक्रवर्त्ती. Substance, country-made paper, 18 × 5 inches. Folia, 86. Lines, 8 on a page. Extent, 3,053 çlokas. Character, Bengali. Date, ? Place of deposit, Usṭhi, District Mayamanasiṁha, Paṇḍita Kālīcandra Nyāyālaṅkāra. Appearance, new. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य सम्यग्ज्ञानतमःस्तोमापहं महः ।
क्रियते दीपिकावृत्तिर्मथुरानाथशर्म्मणा ॥
अथेह वक्ष्यमाणग्रन्थे कालस्य शुद्धिः प्रतिपाद्या कालश्चाहोरात्रादिः स च सूर्य्याधीन एवेति ॥ इत्यादि ।

End. अत्र यदि लग्नस्य प्रथमद्रेक्काणे जन्म तदा षष्ठाष्टमराशेरपि प्रथमद्रेक्काणः द्वितीये द्वितीयः तृतीये तृतीयः द्रेक्काणो ग्राह्य इति । अथ कृतग्रन्थस्य प्रामाण्यप्रयोजनाभिधानपूर्व्वकं परीहारमाह सुविस्तर इति । समाहृतं न तु स्वयं कृतमित्यर्थः ।
मया मुनीनां वचनानि दृष्ट्वा
निबन्धसिद्धान्तवचो विचार्य्य ।
निरस्य चान्यस्य विरुद्धवादान्
संक्षिप्य वृत्तिर्व्विरोधे (?) सुबोधा ॥

Colophon. इति मथुरानाथचक्रवर्त्तिकृत-दीपिकावृत्तावष्टमाध्यायविवरणं समाप्तम् ॥*॥

विषयः । शुद्धिदीपिकाख्यस्मृतिशास्त्रीयग्रन्थस्य व्याख्यानम् ।

No. 370. शुद्धिसारः. By श्रीकण्ठशर्म्मा. Substance, country-made paper, 16 × 3 inches. Folia, 21. Lines, 7 on a page. Extent, 750 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Sākoyāi grāma, Paṇḍita Vrajakānta Smṛtipañcānana. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।
नत्वा शम्भुपदद्वन्द्वं श्रीश्रीकण्ठेन शर्म्मणा ।
गुरुभ्रातृजपाठार्थं शुद्धिसारः प्रतन्यते ॥
अथ गर्भस्रावाशौचम् । लौकिककर्म्मणि स्त्रीणामेव तृतीयमासात् षण्मास-पर्य्यन्तं माससमसंख्यकदिनमशौचम् । इत्यादि ।

End. ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्द्दिनैः ।
गतैः शूद्रा तु संस्पृश्या त्रयोदशभिरेव च ॥
अन्यत् भाव्यं सुधीभिरिति ॥

Colophon. इति शुद्धिसारः समाप्तः ॥

विषयः । गर्भस्रावजन्ममरणाद्यशौचनिरूपणम् ॥

No. 371. शूद्राह्निकाचारसारः. By यादवेन्द्रशर्म्मा. Substance, country-made paper, 18 × 3 inches. Folia, 67. Lines, 6 on a page. Extent, 750 çlokas. Character, Bengali. Place of deposit, District Ḍhākā, Post Office Sonārgā̃, Baidyerbāzār grāma, Paṇḍita Kālikumāra Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ दुर्गायै नमः ।

पीयूषमन्थिपरिपन्थिबलाचलं यो
निःशेषमत्ति विदशैरभिवन्द्यमानः ।
येनार्द्दितं पुरबलं भुवनं लये च
तं पार्व्वतीपरिवृढं प्रणमामि शम्भुम् ॥
आसीत् सर्व्वगुणाकरो गुणिगणाम्भोजोदये भास्करो
.... विपक्षकैरवकुलं सम्मोहने दक्षकः ।
कीर्त्त्युद्भासितभूमिपालतिलको दीनद्विजाकाङ्क्षिते
चिन्तारत्नमयो नराधिपवरः श्रीयुक्तवागीश्वरः ॥
भातासीद् यस्य राज्ञः कलिकलुष ......
जनक इव सुधी .... शास्त्रेष्वभिज्ञः ।
भिक्षाप्रायो वदान्यः शिबिरिव विदुषामाश्रयो रामतुल्यः
... शक्रप्रतापो विजय इव वरः श्रीयुतो वासुदेवः ॥
अलङ्करिष्यन् स्वगुणैरिदं कुलं ... ... ख्यातलकीर्त्तिमण्डलः ।
प्रतापतप्तारिगणः ... ... ततोऽजनि श्रीरघुदेवभूपतिः ॥
सोऽयं भूपालचूड़ामणिनिकरकराक्षीढ़पादारविन्दो
गङ्गासङ्गाधिपुण्यीकृतपुरवसतिर्गौड़राजाधिराजः ।
लक्ष्मीनाथाङ्घ्रिपाथोरुह .... यादवेन्द्रं
विप्रोऽनुज्ञाप्य विप्रं विरचयति नवं आह्निकाचारसारम् ॥
अथ न्यायतो धर्म्ममानानां नित्यनैमित्तिकानुष्ठानवतां शूद्राणां दिनकृत्यान्युच्यन्ते । यद्यपि
विप्राणां वेदविदुषां धर्म्मज्ञानां यशस्विनाम् ।

शुश्रूषैव हि शूद्रस्य धर्म्मो निःश्रेयसः परः ॥
विप्रसेवैव शूद्रस्य विशिष्टं कर्म्म कीर्त्त्यते ।
यद्यतोऽन्यद्धि कुरुते तद्भवत्यस्य निस्फलमिति ॥
मनुवचनाभ्यां शूद्राणां द्विजसेवातिरिक्तकर्म्मणि नाधिकारप्रसक्तिरिति ।
तथापि
द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान् ।
निर्जयति वै लोकान् शूद्रो धन्यतरस्ततः ॥
वर्णत्रयस्य शुश्रूषां शुचिः शूद्रः करोति यः ।
स्वधर्म्मस्य इति ज्ञात्वा तस्य गृह्णाम्यहं बलिम् ॥
भार्य्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियापरः ।
नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत् ॥ इत्यादि ॥

End. अथ स्त्रीधर्म्मः । स्कन्दपुराणे । लोपामुद्रामुद्दिश्यागस्त्यवाक्यम् ।
सेवते भर्त्तुरुच्छिष्टं इष्टमन्नफलादिकम् ।
महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छति ॥
अविभज्य न चाश्नीयात् देवपितृतिथिष्वपि ।
परिचारकवर्गेषु गोषु ... ... कुलेषु च ॥
संयतापस्करा दक्षा हृष्टा व्ययपराङ्मुखा ।
कुर्य्यात् प्रियमनुज्ञाता नोपवासव्रतादिकम् ॥
स्त्रीधर्म्मिणी त्रिरात्रन्तु ... ... स्वैव दर्शयेत् ।
स्ववाक्यं श्रावयेन्नापि यावत् स्नाता न शुध्यति ॥
सुस्नाता भर्त्तृवदनमीक्षतेऽन्यस्य न क्वचित् ।
अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥
सर्पिर्लवणतैलादिक्षये चापि पतिव्रता ।
पतिं नास्तीति न ब्रूयादायासार्थेन योजयेत् ॥
आयासार्थेन घृतादिकं दद्यं ननु नास्तीति इत्यर्थः ॥
तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत् ।
शङ्करादपि विष्णोर्वा पतिरेकोऽधिकः स्त्रियः ॥
... ...
धन्या सा जननी लोके धन्योऽसौ जनकः पुनः ।
धन्यः स च पतिः श्रीमान् यस्य गेहे पतिव्रता ॥

पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयः ... ।
पतिव्रतायाः धर्म्मेण स्वर्गसौख्यादिभागिनः ॥
एवं भारतादावपि बहुतरं पतिव्रतामाहात्म्यं श्रवणीयम् । नेह विस्तारभिया तत् प्रदर्शितमस्माभिरिति ॥

Colophon. इति गौड़महीमहेन्द्र–श्रीरघुदेवभूपतिसमादिष्ट–श्रीयादवेन्द्रशर्म्मविरचितः शूद्राह्निकाचारसारः सम्पूर्णः ॥

विषयः । शूद्राणां नित्यनैमित्तिकाद्यनुष्ठाननिरूपणम् । तत्र धर्म्मपदार्थनिर्णयः । धर्म्मशास्त्रनिर्णयः । अष्टादशपुराणनिर्णयः । धर्म्मशास्त्रप्रशंसा । शौचपदार्थनिर्णयः । दशविधधर्म्मप्रमाणम् । शूद्राणां प्रातःकृत्यादिनिर्णयः । जलशौचनिर्णयः । मूत्रोत्सर्गनिर्णयः । द्वादशधा मलशुद्धिनिर्णयः । मृत्तिकायां दुष्टादुष्टत्वनिरूपणम् । आचमननिरूपणम् । आचमनपात्रनिषेधः । आसने विशेषनिरूपणम् । शुष्कवासादिविशेषनिरूपणम् । द्विराचमननिर्णयः । दन्तधावननिर्णयः । तस्य विहितनिषिद्धकाष्ठकथनम् । प्रातःसन्ध्याकृत्याननिर्णयः । वस्त्रनिष्पीड़नपादप्रक्षालन-गृहप्रवेशादिनिर्णयः । शङ्खजलस्य गङ्गाजलतुल्यत्वकथनम् । शूद्रस्य मन्त्रपाठानधिकारित्वकथनम् । वारुण्यादौ स्नानविधिः । तर्पणविधिः । भीष्मादितर्पणविधिः । तिथिविशेषे द्रव्यविशेषेण तर्पणविधिः । रोमजवस्त्रादिपरिधानविधिः । देवपूजायामाद्यन्तनिरूपणम् । भक्ष्याभक्ष्यविवेचनम् । स्तुतिनमस्कारप्रदक्षिणादेः फलविशेषकथनम् । निर्म्माल्यधारणस्थापनविधिः । षोड़शोपचारपूजायां उपचारद्रव्यविशेषविधिः । पञ्चमयामार्द्धकृत्य-वैश्वदेवबलिकर्म्महोमद्रव्यादिनिर्णयः । बलिदानप्रकारनिर्णयः । अतिथिपूजा-नित्यश्राद्धनिर्णयः । अतिथिवैमुख्ये दोषकथनम् । भिक्षादानफलम् । गृहस्थप्रशंसा । गोग्रासदानफलम् । दन्तरक्तपाते कर्म्मविशेषनिषेधः । भोजनस्य लक्षणपरिसंख्यादिनिर्णयः । अनिवेद्यवस्तुभोजननिषेधः । देवतामुद्दिश्य निवेदने फलनिर्णयः । भोजने दिङ्नियमः । वामपार्श्वे जलधारणे दोषकथनम् । अशूद्रान्नभोजने दोषकथनम् । मांसभक्षणे विधिनिषेधौ । मांसपरित्यागे फलकथनम् । निषिद्धदुग्धनिर्णयः । भोजनपात्रनिर्णयः । भोजनप्रकारनिर्णयः । भोजने पौर्व्वापर्य्यनियमः । भोजनानन्तरकर्म्मनिरूपणम् । तिथिवारविशेषे निषिद्धद्रव्यनिरूपणम् । रविवारे निषिद्धकर्म्मनिरूपणम् । अमावास्यायां निषिद्धकर्म्मनिरूपणम् । पर्व्वणि निषिद्धकर्म्मनिरूपणम् । संक्रान्तिस्नाननिर्णयः । ग्रहणस्नाने द्रव्यनिर्णयः । रात्रिकृत्यनिर्णयः । शयनविधिः । दारोपगमनविधिः । ऋतावनभिगमने दोषकथनम् । अनेकासां स्त्रीणामृतावुपस्थिते व्यवस्थानिर्णयः । अभिगमनानन्तरं शौचकथनम् । मैथुनादौ मूत्रोत्सारणे शुचिकथनम् । स्त्रीणां धर्म्मनिर्णयः ॥ अथ शूद्राह्निकाचारकथनमुखेन सर्व्ववर्णानामेवाह्निकाचारनिरूपणञ्चेति ॥

No. 372. श्यामाकल्पलता. By रामचन्द्रकविचक्रवर्त्ती. Substance, country-made paper, 18 × 6 inches. Folia, 94. Lines, 11–13 on a page. Extent, 3,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura Mājhapāḍā, Bābu Rāsavihārī Rāya. Appearance, tolerable. Prose and verse. Incorrect.

Beginning. ॐ नमस्तस्यै ।

ज्ञानातीतापि संवित् सृजति जगदुत्पत्ति विश्वैकहेतु-
र्विश्वात्मा बुद्धिचेतःप्रकृतिमहदहङ्कारमात्रास्वरूपा ।
वर्णात्मा वर्णधामा प्रकृतिरिति परा गीयते वेदविद्भि-
र्या वा सैवास्तु तस्यै घनतिमिर × × सर्व्वमूर्त्यै नमोऽस्तु ॥
अज्ञानध्वान्तहंसाय चित्कैरवकलाभृते ।
दीनत्राणकृपाधाम्ने श्रीकृष्णाय नमो नमः ॥
देवीं दुर्द्धरदैत्यदम्भदमनीं नत्वा शिरःपङ्कजे
भूत्वा श्रीगुरुपादपङ्कजरजो ज्ञात्वा च + + ।
तेषामाचरणञ्च तन्त्रनिबन्धानालोक्य यत्नादिमां
श्यामाकल्पलतां सतां वितनुते मोदाय रामः सुधीः ॥
यद्यपि पूर्णानन्दैः सर्व्वरहस्यं स्मरन्ति तं व्यक्त्या ।
तच्च स्वातन्त्र्येण प्रायशः प्रमाणमभिगीतमाचारमार्गेण ॥
साधकसिद्धिफलेयं कल्पलता तन्यतेऽस्माभिः ॥
स्वतन्त्रं वीरतन्त्रञ्च फेत्कारीतन्त्रमेव च ।
कालिकाकुलसर्व्वस्वं कालीतन्त्रञ्च यामलम् ॥
कुलार्णवं तथा कालीकल्पं भैरवतन्त्रकम् ॥
कालिकाकुलसद्भावं तथा चोत्तरतन्त्रकम् ।
वीक्ष्य तत्तत् प्रमाणेन वक्ष्ये मोक्षप्रदायिनीम् ॥
कलौ कल्पद्रुमप्रख्यां कालिकां भवभीतिहाम् ।
तत्रादौ मन्त्रोद्धारं विवृणोति । तदुक्तं स्वतन्त्रतन्त्रे,—
क्रोधीशं विन्दुयुक्कान्तं त्रिमूर्त्त्यग्निसमन्वितम् ।
त्रिर्लिखेत् परतो देवि हूङ्कारद्वयमेव च ॥
मायाद्वन्द्वं समालिख्य वह्निः सम्मर्त्तस्तदक् । इत्यादि ।

End. मोक्षान्तस्य प्रवृत्तस्य महतां सेवितैः पदैः ।
सन्तः प्रस्खलतः सन्तु न्यस्तहस्तावलम्बनाः ॥

सर्व्वतन्त्राणि कार्त्स्न्येन केन ज्ञातानि कुत्र वा ।
यथाज्ञानं मया प्रोक्ता श्यामाकल्पलता त्वसौ ॥
नत्वा नीलनवीननीरदनिभामार्य्यां नमद्वत्सलां
धृत्वा मूर्ध्नि गुरोः पदाब्जयुगलं तन्त्राणि संदृश्य च ।
\+ + + × ×
\+ + + + + ॥

Colophon. इति माधवकविकण्ठाभरणचक्रवर्त्तिसुत-श्रीरामचन्द्रचक्रवर्त्तिविरचिता श्रीश्यामाकल्पलता परिपूर्णा ॥

विषयः । अथादौ द्वाविंशत्यक्षरमन्त्रोद्धारः । अथ मन्त्रभेदः । तत्र मन्त्रभेदेन ध्यानभेदः । यन्त्रभेदः । श्मशानकालीमन्त्रश्च । अथ दीक्षाप्रशंसादिः । तत्र गुरुशिष्यादिलक्षणम् । दीक्षाप्रकारकथनम् । नवचक्रकथनम् । तत्र षड्दलचक्रम् । सिद्धादिचक्रम् । राशिचक्रम् । कुलाकुलचक्रम् । अकडमचक्रम् । कठधचक्रम् । गणचक्रञ्च । अथ कालशुद्धिविवेचनम् । अथ मण्डनादिकथनम् । अथ दक्षिणादेव्या नित्यार्चनविधिः । तत्र प्रातःकृत्याकरणदोषः । स्नानविधिः । सन्ध्यादिविधिः । तर्पणविधिः । कार्य्यविशेषे वस्त्रनियमः । पूजास्थाननिरूपणम् । आसनादिविधिः । तत्र वीरासनविधिः । विजयाशुद्धिः । विशेषतः प्राणायामविधिः । कुलपात्रादिनिरूपणम् । प्राणप्रतिष्ठाप्रयोगः । तत्र ऋष्यादिन्यासविधिः । षडङ्गवर्णन्यासादिः । पञ्चदशाक्षर-श्रीकण्ठन्यासः । मातृका ऋष्यादिविधिः । षोढान्यासः । तत्त्वन्यासः । बीजन्यासश्च । अथ अन्तर्यजनप्रकारः । तत्र मातृकान्यासः । षडङ्गन्यासः । विषमपुष्पकथनम् । मानसजपविधिः । होमविधिश्च । अथ बहिर्यागविधिः । अथ कूर्म्ममुद्राप्रकारः । ध्यानकथनम् । यन्त्रकथनम् । अथ कलसस्थापनविधिः । कलसलक्षणम् । बटुकादिबलिविधिः । अष्टाङ्गार्घनिरूपणम् । अवगुण्ठनमुद्रा । योनिमुद्रा । शङ्खमुद्रा । आवाहनादिमुद्रा । खड्गादिमुद्रा । अष्टादशोपचारः । षोडशोपचारः । उपचारक्रमः । पुष्पादिदाननियमः । नैवेद्यविधिः । नैवेद्यपात्रादिनिरूपणम् । युगभेदेन सुराभेदव्यवस्था । ब्राह्मणस्य मद्यपाननिषेधादिः । मद्यानुकल्पविधानम् । दशविधमद्यकथनम् । तत्र गौडीदाने सर्व्ववर्णानां दोषकथनम् । मद्यशोधनादिविधिः । तत्र मुद्राविधिः । मांसविधिः । मांसानुकल्पविधिः । मत्स्यविधिः । षडङ्गपूजनविधिः । गुरुक्रमः । आवरणदेवतापूजाविधिः । जपविधिः । तत्र मालाविधिः । शासनाविधिः । बलिदानविधिः । प्रदक्षिणलक्षणादिः । अष्टाङ्गप्रणामविधिः । नैवेद्यदाननियमः । आत्मसमर्पणविधिः । तिलकविधिः । सहस्रनामस्तवादिः । कर्पूरादिस्तवः । स्तवराजस्तोत्रम् । ब्रह्मगाथा । स्तवपाठक्रमश्च । अथ देवीमाहात्म्यम् । अथ कवचकथनम् । तत्र विरूपाक्षोक्तकवचम् । अन्यविधकवचञ्च । अथ पुरश्चरणविधिः । वीरपुरश्चरणविधिः । तत्र वर्णभेदेन होमाद्यनु-

कल्पजपनियमः । ब्राह्मणभोजनस्यावश्यकत्वकथनम् । मन्त्रसिद्धितत्त्वकथनम् । सिद्धिस्थानञ्च । अथ कूर्म्मचक्रम् । अथ भक्ष्याभक्ष्यविवेचनम् । अथ जपमालानिर्णयः । मालाप्रतिष्ठाप्रकरणम् । पुरश्चरणे वर्ज्जनीयनिरूपणम् । जपकाले निषिद्धकर्म्मकथनम् । शक्तिनियमः । कौलिकार्चन-फलकथनञ्च । अथ वीरकल्पः । तत्र शान्तिस्तोत्रम् । कुमारीपूजानियमः । अथ तर्पण-विधिः । अथ अन्यप्रकारेण पुरश्चरणविधिः । ग्रहणपुरश्चरणम् । नवरात्रिपुरश्चरणम् । पुर-श्चरणमन्तरेणापि मन्त्रसिद्धिः । अथ काम्यप्रयोगः । लतासाधनप्रकारः । अथ महिषमर्द्दिनी-मन्त्रादिः । अस्याः पूजनक्रमः । अस्याः पुरश्चरणजपादिः । तत्र होमद्रव्यनियमः । महिष-मर्द्दिनीस्तोत्रम् । अस्याः कवचञ्च । अथ नीलक्रमः । तत्र शवक्रमः । स्थाननियमः । अथ जयदुर्गामन्त्रः । तत्र श्मशाने विशेषकथनम् । अथ शवसाधनविधिः । अथ प्रकारान्तरेण वीरसाधनविधिः ॥ अथ आकर्षणप्रयोगः । निग्रहाद्युपायः । अथ उच्चाटनविधिः । अथ बालसंस्कारविधिः । अथ शक्तिशुद्धिकथनम् । तत्र नवकन्याविधिः । स्वयम्भूकुसुमोत्पत्तिकथनम् । अथ कुण्डगोलविधिः । अथ दूतीयागविधिः । अथ सामान्यतः साधनविधिः । तत्र कुलवारादि-नियमः । अथ शिवावलिविधिः । अथ समयाचारः । भावत्रयविवेचनम् । कुलीनाचार-कथनम् । अथ कौलिकानां प्रायश्चित्तविधिः । अथ पशुसंसर्गप्रायश्चित्तम् । मन्त्रमातृगमन-प्रायश्चित्तम् । अनिवेदितद्रव्यभोजनप्रायश्चित्तम् । प्राणिहिंसाप्रायश्चित्तम् । कुलीनार्चनविधिः । होमादिनियमश्च । इति ।

No. 373. श्राद्धक्रियाकौमुदी. By गोविन्दकविकङ्कणाचार्य्यः. Substance, country-made paper, 16 x $2\frac{1}{2}$ inches. Folia, 62. Lines, 6 on a page. Extent, 1,175 çlokas. Character, Bengali. Date, ? Place of deposit, Brāmhaṇamaṇḍalī, *viâ* Bārāsat, Paṇḍita Rāmanārāyaṇa Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

आलोच्याखिलसंग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यगतो विविच्य मुनिभिर्मन्वादिभिः संहिताः ।
श्रीमत्तातपदारविन्दविलसद्भूलीभवोद्देशतः
श्रीगोविन्दकविः करोति गहनां श्राद्धक्रियाकौमुदीम् ॥

अथ वाजसनेयिनां श्राद्धक्रमसंक्षेपः ।

निमन्त्रणं स्वागतञ्च पाद्यमर्घ्यादिकं द्विजे ।
द्विजोपवेशनं दीपो विष्णोरर्च्चा हरिस्मृतिः ॥
तिलसर्षपविक्षेपो द्वारमध्ये च सर्व्वतः ॥ इत्यादि ।

End. ततो वैगुण्यसमाधानार्थं संकल्पपूर्व्वं ॐ तद्विष्णोरित्यनेन श्रीविष्णुः पुण्डरीकाक्षः श्रीहरिरित्यनेन च विष्णुं स्मृत्वा पात्रसमर्पणं पिण्डार्पणञ्च कृत्वा वामदेव्यार्च्चं त्रिः पठित्वा पिण्डानि गोऽजविप्रेभ्यो दत्त्वा अग्नौ जले वा क्षिप्त्वा वस्त्राभ्यां रक्षार्थं दीपमाच्छाद्य पाणिपादौ च प्रक्षाल्य ब्रह्मण्यं ब्राह्मणांश्च प्रणम्य प्रकृतं कर्म्म कृत्वा ब्राह्मणान् भोजयित्वा स्वयं भुञ्जीत । सति शेषे श्राद्धशेषमवश्यं भुञ्जीत । उपवासदिने जिघ्रेत् । गर्भाधानेतरकर्म्मण्याभ्युदयिकश्राद्धवासरे मैथुनं त्यजेत् । अत्र यदर्थं वृद्धिश्राद्धं कृतं दैवात् तद्दिने यदि तत् कर्म्म न स्यात् तदा पुनस्तत्कर्म्मकाले वृद्धिश्राद्धं कर्त्तव्यम् । यदि संस्कार्य्योऽधिकारी तदा संस्कार्य्यपितृभ्यो दद्यात् द्वितीयादिविवाहे वरः स्वपितृभ्यो दद्यात् । अवीरायाः कन्याया विवाहे श्राद्धं नास्ति । इति वृद्धिश्राद्धप्रयोगः ॥*॥

Colophon. इति श्रीगोविन्दकविकङ्कणाचार्य्यविरचिता श्राद्धक्रियाप्रयोगकौमुदी समाप्ता ॥ ० ॥

विषयः । सपिण्डीकरणश्राद्धादिप्रयोगः । वृषोत्सर्गव्यवस्था । वृषोत्सर्गस्थानादिनिरूपणम् । प्रेतक्रियाक्रमः । पर्णनरदाहादिः । सहमरणप्रयोगादिः । गङ्गायामस्थिक्षेपप्रयोगादिः । पूरकपिण्डप्रयोगः । अशौचविशेषे पिण्डदानव्यवस्थादिः । प्रेतक्रियाधिकारिव्यवस्था । अशौचान्तद्वितीयदिनकृत्यम् । वैतरणीगोदाननिरूपणम् । षोड़शदाननिरूपणम् । द्विजदम्पतीपूजननिरूपणम । षोडशपिण्डदानादिप्रयोगः । आभ्युदयिकश्राद्धप्रयोगश्चेति ॥

सत्यमेव जयते

No. 374. श्राद्धदीपिका . By महामहोपाध्यायश्रीभीमः. Substance, country-made paper, 14 × 2 inches. Folia, 94. Lines, 5 on a page. Extent, 1,700 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, very old. Prose. Generally correct.

Beginning. ॐ गुरूनुपास्य मन्वादीन् धर्म्मशास्त्राण्यनेकशः ।
पुराणन्यायमीमांसाकामधेन्वादिसंग्रहान् ॥
समधीत्य क्रमेणैषा रचिता सामवेदिनाम् ।
सन्ध्याद ... ... क्रियानुष्ठानपद्धतिः ॥
... ... वीतमत्सरैः ।
स्वगृह्योक्तविधानार्थमनयैव द्विजातिभिः ॥
अथ कुथुमशाखिनां गोभिलोक्तसन्ध्यास्नानादिविधिर्लिख्यते । रात्रिशेष ...

रात्रिवासस्त्यक्त्वा वासान्तरं परिधाय द्विराचम्य शौचार्थं जलं मृत्तिकाञ्च गृहीत्वा श्वरशताच्छरचेपमात्रं भूदेशं त्यक्त्वा दक्षिणपश्चिमकोणे व्रजेत् । इत्यादि ।

End. अग्रेदत्तरतत्वं स्थापयेत् । ततः कुशण्डिकां समाप्य सर्व्वं होमकर्म्म यथोक्त-प्रकारेण समापयेत् । तत उदीच्य-वामदेव्यगानान्तं सर्व्वं कर्म्म समाप्य दृषवत्स-तरीणामलङ्कारं वाससी गामाचार्य्याय दद्यात् । तथाचोक्तं छन्दोगपरिशिष्टे यथार्थमयज्ञविद्याः । स्मृतिरपि । श्रुतिस्मृतिसमापन्नं तमाचार्य्यं प्रचक्षते । गां यथा दद्यात् तदुच्यते । आचार्य्यं दक्षिणामुखं गन्धमाल्यादिना पूजयित्वा धेनुमलङ्कृत्य पूजयित्वा प्रणम्य कृताञ्जलिः पठेत् । ॐ या लक्ष्मीः सर्व्व-भूतानामित्यादि । पुच्छप्रदेशे स्थित्वा वाक्यावलीं कृत्वा उत्सृज्य दद्यात् । अपरं ग्रन्थविस्तरभयेन दूरीकृतमिति ॥ ० ॥

Colophon. इति महामहोपाध्याय-काञ्जिविल्लीय-श्रीश्रीभीमविरचिता श्राद्धदीपिका समाप्ता ॥ ० ॥ हरये नमः ॥ समाप्तश्चायं ग्रन्थः ॥

विषयः । शौचसन्ध्यादिविधिः । स्नानविध्यादिः । नित्यश्राद्धादिः । प्रेतैकोद्दिष्टश्राद्धादिः । भूमिशय्यादिदानविधिः । साम्वत्सरिकश्राद्धादिः । वृद्धिश्राद्धादिः । अस्थिसञ्चयनश्राद्धादिः । दशाह-कृत्यनिरूपणम् । दृषोत्सर्गविध्यादिश्च ।

No. 375. श्राद्धप्रदीपः. By प्रद्युम्नशर्म्मा. Substance, country-made paper, 14 × 2 inches. Folia, 65. Lines, 5 on a page. Extent, 1,100 çlokas. Character, Bengali. Date, Sk. 1448. Place of deposit, District Vāṅkuḍā Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, very old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।

मन्वादिशास्त्रं बहु वीक्ष्य यत्नतः
प्रणम्य गोपीजनवल्लभं पुरः ।
श्राद्धप्रदीपं प्रथुकप्रबोधकं
प्रद्युम्नशर्म्मा वितनोति साद्भुतम् ॥
पुराणविधिविज्ञितोऽस्ति ... ...
श्राद्धप्रकाशः प्रचुरः प्रयत्नतः ।
ग्रन्थः सतां बोधकरस्तथापि बो-
ऽस्माकं प्रबोधाय ममायमुद्यमः ॥

अथानिरूपिते श्राद्धशब्दार्थे श्राद्धानुष्ठानं निरूपयितुमशक्यत्वात् प्रथमतः

श्राद्धशब्द एव निरूप्यते । अथच किमिदं श्राद्धं नामेति । अत्र कश्चित् जनपतिः पितॄनुद्दिश्य द्रव्यत्यागो ब्राह्मणस्वीकारपर्य्यन्तः श्राद्धमिति । तन्न दैव-श्राद्धादौ तु श्राद्धलक्षणाव्याप्तेः । दैवश्राद्धमपि पितृश्राद्धान्तर्गतमिति चेन्न दैविकं दशमं स्मृतमिति विश्वामित्रवचनेन दैवस्यापि पृथक् श्राद्धत्वात् । इत्यादि ॥

End. ॐ अद्येत्यादि यथासम्भववेदगोत्रशाखानाम्ने ब्राह्मणाय तुभ्यं अमुकगोत्रस्य पितुरमुकदेवशर्म्मणः अमुकगोत्रस्य पितामहस्य अमुकदेवशर्म्मणः अमुक-गोत्रस्य प्रपितामहस्यामुकदेवशर्म्मणः कृतैतत् नित्यश्राद्धीयान्नदत्तोत्सर्गप्रतिष्ठार्थं एतद्रजतं मूल्यम्भाषं ददामि एवं मातामहादीनां दक्षिणोत्सृज्य देया ॥ ॐ अद्येत्यादि यथासम्भववेदगोत्रशाखानाम्ने ब्राह्मणाय तुभ्यं सनकसनन्द-सना-तन-कपिलश्राद्धविरोचनपञ्चशिखासमतिथिमनुष्याणां कृतैतन्नित्यश्राद्धीयान्न-दत्तोत्सर्गप्रतिष्ठार्थं दक्षिणामेतत् काञ्चनमेतन्मूल्यम्भाषं ददानि । तत ॐ नित्यश्राद्ध अन्नदत्तोत्सर्गकर्म्मदसच्छिद्रमस्त्विति अच्छिद्र भवेत् ततः पित्रादिभ्यो नमः ॐ सनकादिभ्यो नमः । स्वारीतः ॥

इमं श्राद्धविधिं पुण्यं कुर्य्याद्वापि पठेत्तु यः ।
स सर्व्वकामसंयुक्तो अमृतत्वञ्च विन्दति ॥
इत्यस्मितिः । य एवं वेत्ति मतिमान् तस्य श्राद्धफलं भवेत् ।
अपदेष्टनुमन्तारौ लोके तुल्यफलौ स्मृताविति ॥

Colophon. इति श्रीचट्टदेशीय-चाकादिद्वी-ग्रामवस्य-सत्पण्डित-श्रीधरशर्म्मतनय-श्रीमत् प्रद्युम्नशर्म्मविरचितः श्राद्धप्रदीपः समाप्तः ॥ * ॥ श्रीश्रीशुभमस्तु । शकाब्दाः १४४८ तारीख ११ वैशाखस्य ॥ ० ॥ श्री० ॥

विषयः । श्राद्धशब्दार्थनिरूपणम् । मातुरपृथग्दानादिविधिः । श्राद्धकरणफलादिः । श्राद्धभेदनिरूपणम् । श्राद्धपात्रादिविवेचनम् । अमावस्याश्राद्धकालादिः । मघात्रयोदशीश्राद्धादिः । सपिण्डीकरणादिविधिः । षोडशश्राद्धलक्षणादिः । अशौचपतितश्राद्धादिः । वृद्धिश्राद्धनित्य-श्राद्धादिश्च ।

No. 376. श्राद्धविवेकव्याख्या. By श्रीनाथशर्म्मा. Substance, country-made paper, 17×3 inches. Folia, 101. Lines, 5 on a page. Extent, 1,800 çlokas Character, Bengali. Date, ? Place of deposit, Vidyākūṭa Tripurā Paṇdita Çyāmacandra Vidyālaṇkāra. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ।

व्यवस्थाद्वैधसम्भ्रान्तिसन्तानच्छेदहेतवे ।

विबुधश्रेणिवन्द्याय नमः श्रीशूलपाणये ॥

श्रीकराचार्य्यपुत्रेण श्रीमच्छ्रीनाथशर्म्मणा ।

व्याख्या श्राद्धविवेकस्य जनकोक्त्या निबध्यते ॥

क्व शूलपाणेर्वचनं दुरूहं क्व धीर्मदीयाल्पतमा तथापि ।

ब्रवीमि तात्पर्य्यलवं तदीयं यदत्र तन्मे सुधियः क्षमध्वम् ॥

इह खलु सुखं दुःखाभावश्चेत्यादि ।

End. इत्यमेव व्यवहारसमावेशोऽपीति प्रतीमः ।

विषयः । शूलपाणिमहामहोपाध्यायकृतस्य श्राद्धविवेकाख्यस्मृतिशास्त्रीयग्रन्थस्य व्याख्या ।

No. 377. श्रीकृष्णामृतम् . By रूपगोस्वामी . Substance, country-made paper, 12 × 5 inches. Folia, 45. Lines, 8 on a page. Extent, 1,000 çlokas. Character, Bengali. Date, Sk. 1658 Mallābda 1024. Place of deposit, District Vā̃kuḍā, Viṣṇupura, Paṇḍita Raghurāma Tarkaratna. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः कृष्णचैतन्याय ॥

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ।

यो धत्ते सर्व्वभूतानामभवायोशतीः कलाः ॥

कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।

यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥

मुखारविन्दनिःस्यन्दमरन्दभरतुन्दिला ।

ममानन्दं मुकुन्दस्य सन्दुग्धां वेणुकाकली ॥

श्रीचैतन्यमुखोद्गीर्णा हरेकृष्णेति वर्णकाः ।

मज्जयन्तो जगत् प्रेम्णि विजयन्तां तदाह्वयाः ॥

श्रीमत्प्रभुपदाम्भोजैः श्रीमद्भागवतामृतम् ।

यद्व्यक्तानि तदेवेदं संक्षेपेण निषेव्यते ॥

इदं श्रीकृष्णतद्भक्तसम्बन्धादमृतां बुधाः ।

आदौ कृष्णामृतं तत्र सुहृद्भिः परिविष्यते ॥

निर्म्मत्सरं परिविष्टारे मयात्र परिमृश्यता ।

प्रधानत्वात् प्रमाणेषु शब्द एव प्रमाण्यते ॥

यतस्तैः शास्त्रयोनित्वादिति न्यायप्रदर्शनात् ।
शब्दस्यैव प्रमाणत्वं स्वीकृतं परमर्षिभिः ॥
किञ्च तर्काप्रतिष्ठानादिति न्यायविधानतः ।
अमीभिरेव सुव्यक्तं तर्कस्यानादरः कृतः ॥
अथोपास्येषु मुख्यत्वं वक्तुमुत्कर्षभूमतः ।
कृष्णस्य तत्स्वरूपाणि निरूप्यन्ते क्रमादिह ॥
स्वयं रूपस्तदेकात्मरूप आवेशनामकः ।
इत्यसौ त्रिविधं भाति प्रपञ्चातीतधामसु ॥ इत्यादि ।

End.

एकविंशे तथा पञ्चविंशे चाध्याय ईरिता ।
माधुरी व्रजदेवीभिर्वेणोरेका महाद्भुता ॥

श्रीविदग्धस्य ।

असमानोर्द्ध्वमाधुर्य्यतरङ्गामृतवारिधिः ।
जङ्गमस्थावरोल्लासिरूपो गोपेन्द्रनन्दनः ॥

यथा तन्त्रे ।

कन्दर्पकोट्यर्बुदरूपशोभा-
नीराज्यपादाब्जनखाञ्चलस्य ।
कुत्राप्यदृष्टश्रुतरम्यकान्ते-
र्ध्यानं परं नन्दसुतस्य वक्ष्ये ॥

श्रीदशमे ।

का स्त्र्यङ्ग ! ते कलपदामृतवेणुगीत-
सम्मोहितार्य्यचरितान्न चलेत् त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदञ्च निरीक्ष्य रूपं
यद्गो द्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥

Colophon.

इति संक्षेपभागवतामृते श्रीकृष्णामृतं पूर्व्वखण्डम् ॥ ०
गौराङ्गपादसरसीरुहमत्तभृङ्गः
श्रीरामपूर्व्वशरणोऽलिखदेतदाशु ।
कृष्णामृतं निखिलवैष्णवतन्त्रसारं
शाकेऽष्टवाणरजनीपकलामितेऽब्दे ॥
पञ्च-वेद-ख-चन्द्रेषु मिते मल्लगताब्दके ।
पीतं कृष्णामृतं वर्णविन्यासस्य स केन वै ॥ ० ॥

वन्दे रूपमचिन्त्याद्भुतहरिभक्तिप्रकाशकं शान्तम् ।
यन्मुखशशधरगलितं विश्वं कृष्णामृतं पिवति ॥ * ॥
श्रीश्रीराधाकृष्णः ॥

विषयः । कृष्णस्वरूपादिनिरूपणम् । भेदत्रयादिनिरूपणम् । नानापुराणादिवचनप्रमाणेन लीलावतारादिनिरूपणम् । पुराणादिवचनप्रमाणेन युगावतारादिनिरूपणम् । स्वरूपावस्थादिनिरूपणञ्चेति ।

No. 378. श्रीराधासुधानिधिः. By **हितहरिवंशगोस्वामी.** Substance, country-made paper, 13 x 6 inches. Folia, 14. Lines, 11 on a page. Extent, 357 çlokas. Character, Bengali. Date, Sk. 1740. Place of deposit, District Vãkuḍā, Kucckol, Bābu Yogindranātha Simha Deva. Appearance, fresh. Verse, Generally correct.

Beginning. ॐ स्वस्ति । श्रीगणेशाय नमः । श्रीराधावल्लभो जयति । अथ श्रीमद्राधासुधानिधिस्तवो लिख्यते । वसन्ततिलकच्छन्दः ।
यस्याः कदापि वसनाञ्चलखेलनोत्थ-
धन्यातिधन्यपवनेन कृतार्थमानी ।
योगी + दुर्गमगतिर्मधुसूदनोऽपि
तस्या नमोऽस्तु वृषभानुभुवो दिशेऽपि ॥
ब्रह्मेश्वरादिसुदुरूहपदारविन्दं
श्रीमत्पराग-परमाद्भुतवैभवायाः ।
सर्व्वार्थसाररसवर्षिकृपार्द्रदृष्टे-
स्तस्या नमोऽस्तु वृषभानुभुवो महिम्ने ॥

End. श्रीराधे श्रुतिभिर्बुधैर्भगवतायाम्य सद्भिर्भवे
स्तोत्रं स्वकृपा + तव रसजा योग्योऽप्यहङ्कारितः ।
पद्येनैव सदा पराधिनिमच स्वर्गे विरुद्ध प्राद्-
काशे स्वेदजलाकुलाङ्घ्रि किमपि प्रीतिं प्रसादीकुरु ॥ (?)
अद्भुतानङ्गलोभस्य नाम्ना रससुधानिधिः ।
स्तवोऽयं कर्णकलशैर्गृहीत्वा पीयतां बुधाः ॥

Colophon. इति श्रीवृन्दावनेश्वरीचरणकृपामात्रविजृम्भित-श्रीराधासुधानिधिः स्तवः समाप्तः ॥ श्रीहितहरिवंशगोस्वामिना विरचितः ॥ शुभमस्तु शकाब्दाः १७४० ।

विषयः । श्रीराधादेव्याः स्तुतिः ।

No. 379. षट्कर्म्मलक्षणटीका. By श्रीराघवेन्द्रशर्म्मा. Substance, country-made paper, 18 × 4 inches. Folia, 8. Lines, 9 on a page. Extent, 250 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamansiṁha Kaṭihāli, Paṇḍita Ānanda Kiçora Nyāyālaŋkāra. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ फेत्कारिणीतन्त्र-तन्त्रसारादिलिखित-षट्कर्म्म-लक्षणानां श्रीवेदान्तवागीशमते टीका श्रीराघवेन्द्रशर्म्मणा विरच्यते ।
कारस्कराच्चासनक उडुम्बरोऽथ चञ्चकः ।
खदिरकुरुरं श्रीचपिप्पली नागरोचितौ ॥ (?) इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । तान्त्रिकस्य षट्कर्म्मलक्षणाख्यग्रन्थस्य टीका ।

No. 380. षट्कारकबोधः. Substance, country-made paper, 13 × 3 inches. Folia, 20. Lines, 5 on a page. Extent, 340 çlokas. Character, Bengali. Date, Sk. 1726. Place of deposit, Vidyākūṭa Tripurā, Paṇḍita Çarat Candra Vidyālaŋkāra. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
भग्नं मारबलं येन निर्ज्जितं भवपञ्जरम् ।
निर्व्वाणपदमारूढं तं बुद्धं प्रणमाम्यहम् ॥
षट्कारकाणि सम्बन्ध उक्तानुक्ततया द्विधा । इत्यादि ।

End. उक्तानुक्तं प्रतिपाद्यं विभक्तिश्च दर्शयित्वा निर्णयः ।

Colophon. इति षट्कारकबोधः समाप्तः । शुभमस्तु । शकाब्दाः १७२६ । सन् १२१४ ।
श्रीरस्तु मयि लेखके नित्यम् ।

विषयः । कातन्त्रीय षट्प्रकारकारकविषयविवरणम् ।

No. 381. षट्चक्रक्रमटीका. By नन्दरामतर्कवागीशः. Substance, country-made paper, $14\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 16. Lines, 6 on a page. Extent, 318 çlokas. Character, Bengali. Date, ? Place of deposit, Kālikaccha, District Tripurā, Paṇḍita Rājacandra Sārvvabhauma. Appearance, old. Prose. Generally correct.

Beginning. प्रत्यूहव्यूहविध्वंसविस्फुरद्गण्डमण्डलम् ।
गजेन्द्रवदनं नौमि शुण्डाताण्डवपण्डितम् ॥
हरिर्बङ्कभयो यस्य रहस्यज्ञानहेतवे ।
श्रीनन्दरामः कुरुते षट्चक्रक्रमदीपनीम् ॥
अथ मङ्गलार्थकः तन्त्रानुसारेण परमानन्दनिर्व्वाहप्रथमाङ्कुरः । परमानन्दपदेन प्रथमोपाय उच्यते । इत्यादि ।

End. तस्य योगिनश्चेतोऽवश्यमभीष्टदैवतपदे इष्टदेवतापदे नरीनृत्यते पुनः पुनर्नृत्यति ॥ ५६ ॥

Colophon. इति श्रीनन्दरामतर्कवागीशभट्टाचार्य्यविरचिता षट्चक्रक्रमटीका सम्पूर्णा ।

विषयः । षट्चक्रक्रमनामकस्य तान्त्रिकयोगग्रन्थस्य व्याख्यानम् ।

No. 382. षट्चक्रटीका. By शङ्करः. Substance, country-made paper, 12 × 5 inches. Folia, 15. Lines, 5 on a page. Extent, 225 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi District 24-Parganās, Paṇḍita Haraprasāda Çāstri. Appearance, tolerable. Prose. Generally correct.

Beginning. प्रणम्य शैलाधिपकन्यकायाः
पदाब्जमज्ञानजविष्णुतुल्यम् ।
प्रतन्यते श्रीयुतशङ्करेण
षट्चक्रटीकाख्य-सुपुस्तिकेयम् ॥ इत्यादि ।

End. ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
तत्परे च शिवो देवः षट् शिवाः परिकीर्त्तिताः ॥
आज्ञिकं (?) मयद्रुद्दे शीघ्रगतिर्यातिं क्रोशशतं क्षणात् ॥

Colophon. इति षट्चक्रटीका ।

विषयः । तान्त्रिकस्य षट्चक्रस्य व्याख्यानम् ।

No. 383. षट्चक्रक्रमदीपिका. By रामभद्रसार्व्वभौमः. Substance, country-made paper, 14½ × 3¼ inches. Folia, 18. Lines, 6 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, Kālīkaccha District Tripurā, Paṇḍita Rājacandra Sārvvabhauma. Appearance, old. Prose. Generally correct.

Beginning. ॐ गुरवे नमः ।
ॐ सपत्नीकं गुरुं नत्वा ... ... ।
रामभद्रसार्व्वभौमः कुरुते चक्रदीपिकाम् ॥
अथ षट्चक्रविवरणम् । तत्र प्रथमं सृष्टिक्रमः । इत्यादि ।

End. तथापि पद्मद्वयसम्पुटमध्ये विस्तारस्य बाधो न भवति । इत्यास्तां विस्तरः ।

Colophon. इति रामभद्रसार्व्वभौमभट्टाचार्य्यविरचितायां षट्चक्रक्रमदीपिकायां षट्-चक्रक्रमविवरणं समाप्तम् ॥

विषयः । सृष्टिनिरूपणम् । पञ्चभूतनिरूपणम् । दशेन्द्रियनिरूपणम् । दशेन्द्रियगुण-निरूपणम् । सप्तपातालस्थाननिरूपणम् । चक्रभेदनिरूपणञ्चेति ।

No. 384 षट्चक्रदीपिकाटीका. Substance, country-made paper, 16 × 3 inches. Folia, 18. Lines, 7 on a page. Extent, 400 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamansiṁha Yaçodal, Paṇḍita Kālīcandra Bhaṭṭācāryya. Appearance, old. Prose. Correct.

Beginning. ॐ नमो भवान्यै । अथेति अथशब्दो मङ्गलपूर्व्वकानन्तर्य्यार्थः । उक्तञ्च ।
ॐ कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्य्यातौ तेन माङ्गलिकावुभौ ॥ इत्यादि ।

End. न विद्यते मलं पापं यस्मात् निर्म्मलं मा श्रीमद्गुरुपादपद्मयुगलमानमितुं शीलमस्य यतं संयतमन्कर्म्मणो यस्य स इति ॥ ० ॥

Colophon. इति पूर्णानन्दीययोगचिन्तामणिनाम-षट्चक्रदीपिकाटीका समाप्ता ॥ * ॥

विषयः । पूर्णानन्दविरचितस्य योगचिन्तामणिनामकषट्चक्रग्रन्थस्य दीपिकाख्यटीकाया व्याख्यानम् ।

No. 385. षट्चक्रनिरूपणटीका. By रामवल्लभः. Substance, country-made paper, 18 × 4 inches. Folia, 20. Lines, 8 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā Vikramapura, Ātpāḍā, Paṇḍita Prasannacandra Vidyāratna. Appearance, new. Prose. Generally correct.

Beginning. मोहान्धकारविध्वंसि भवभीतिभयापहम् ।
भवानीचरणद्वन्द्वं भज भाग्यवशात्मनः ॥

पूर्णानन्दोदितानन्दविरचाङ्कुरकारिकाम् ।
विशदीकुरुते तूर्णं द्विज-श्रीरामवल्लभः ॥

अथेत्यादि । अस्यार्थः । ग्रन्थारम्भे विघ्नविघाताय अथायशब्दो मङ्गलार्थः । षट्चक्राणि क्रमेणोद्गतः प्राप्तः प्रकाशः । परमानन्दस्य मोक्षस्य निर्व्वाह-सम्पादकः प्रथमाङ्कुर उच्यते । षट्चक्रनिरूपणं क्रियते इत्यर्थः । अयं भावः । परमानन्दसम्पादकसामग्री तत्र प्रथमाङ्कुरः प्रथमसामग्रीविशेषः । षट्चक्रं निरूप्यते । अर्थात् परमानन्देन प्रकाश्यते इति यावत् ॥ इत्यादि ।

End. कीदृशं मोक्षज्ञाननिदानं मुक्तिजनकज्ञानस्यादिकारणं पुनः शुद्धं शास्त्रसम्मतं पुनः शुद्धं शोभनप्रकारेण शुद्धं सर्व्ववादिसम्मतमित्यर्थः । योगी कीदृशः यतान्तर्मनाः संयतान्तर्मनाः वशीकृतचित्त इत्यर्थः ॥

Colophon. इति चन्द्रद्वीपान्तर्गतवसतपुराख्यग्रामनिवासि-श्रीरामदुर्लभशर्म्मणा कृता षट्-चक्रनिरूपणटीका समाप्ता ।

विषयः । पूर्णानन्दकृतस्य षट्चक्रनिरूपणस्य व्याख्यानम् ॥

No. 386. षट्पदीमञ्जरी . By शङ्करानन्दतीर्थः . Substance, country-made paper, $17 \times 3\frac{1}{2}$ inches. Folia, 15. Lines, 9 on a page. Extent, 290 çlokas. Character, Bengali. Date, Sk. 1699. Place of deposit, District Vãkuḍā Visṇupura, Paṇḍita Rāmavallabha Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. श्रीकृष्णः ।

निर्जरसम्प्रदानकल्पकल्पभूरुहाकृतिम् ।
दुरन्तविघ्नवारिदप्रभञ्जनं निरञ्जनम् ॥
मदीयचित्तसारसप्रबोधभास्करं परम् ।
रसालमूलवासिनं भजामि विघ्ननायकम् ॥
श्रीनन्दनन्दनममन्दसुरेन्द्रवृन्द-
सान्द्रानुरागपरिभावितपादपद्मम् ।
वंशीरवाम्रतविमोहितगोपगोपी-
सन्दोहबिन्दुमुखमच्युतमानतोऽस्मि ॥
श्रीभाग्यकृच्चरणसारसमादरेण
योगीन्द्रवृन्दमधुपैरुपगीयमानम् ।

सद्भागधेयमखिलार्थनिदानभूतं
कैवल्यपुष्परससम्भृतमानतोऽस्मि ॥
वेदान्तार्थविचारजन्यविषयाविध्वस्तभेदाश्रयं
नानातन्त्रपदार्थसंशयघनध्वान्तार्कमानन्ददम् ।
नानादेशदिगन्तसन्ततयशःप्रासावकाशं गुरुं
श्रीनारायणतीर्थपादमनिशं भक्त्यन्तमूर्त्तिं भजे ॥
मदीयपादजीवनं न्वणामघं धुनोत्यलम् ।
सुरागतावसन्ततं तनोति शं दृगञ्चलम् ॥
यदाननाजरङ्गके विभाति भारती नटी ।
नतः सदा सुधा सदाशिवाख्यदेशिकान् गुरून् ॥
अथ सच्चिदानन्दात्मकमद्वितीयं ब्रह्मैव विमलसत्त्वप्रधानमायोपाधिकं सत् ईश्वरभावमुपजगाम ॥ जीवेशावाभासेन करोतीत्यादि श्रुतेः । स च माया-प्रतिबिम्बित ईश्वरसंक्षेपकृत् ॥ इत्यादि ।

इदानीं भगवच्चरणध्यानसाधनं षट्पदीपठनं प्रार्थयते स्तौति । इति पूर्व्वोक्ताः पद्यन्ते गम्यन्तेऽर्था एतैरिति । पदानि श्लोकाः षसां पदानां समाहारः षट्पदी ॥ यथा षट्पदी भ्रमरी स्थैर्य्येण सरोजे निवसति तथेयं श्रीमच्छङ्करवदनसरोजाद्विनिर्गता षट्पदी तत्कर्त्तुर्मम वदनसरोजे सदा वसतु । तदनेन भगवच्चरणध्यानपूर्व्वक-षट्पदीस्तोत्रपठनस्य पुरुषार्थचतुष्टय-हेतुत्वं सूचितं भवति । ननु नेयं षट्पदी किन्तु सप्तपदी नारायणकरुणा-मयेति श्लोकरूपत्वात् । सत्यं नारायणायेति श्लोकस्य फलश्रुतिपरत्वेन वहिर्भूतत्वादिति षट्पदीत्वमेव । + + + + + + ननु इशशब्दस्य पादचतुष्टयात्मकश्लोकपरतया व्याख्यातत्वे आर्य्याषट्कस्य कथं षट्पदीत्व-मिति चेन्नार्य्याया अपि पादचतुष्टयात्मकत्वेनार्य्यात्मकयोरभेदादार्य्याषट्कस्य तदुपपत्तेः । आर्य्यालक्षणञ्चोक्तं छन्दोग्रन्थविद्भिः ।
श्रीभाष्यकृद्वदनपङ्कजसंप्रसूतं
सद्भक्तिबोधसुनिदानवचोमरन्दम् ।
आस्वाद्य माद्यतितरां मम मानसानि
निःसीमसान्द्रनिजभूमपदं हि लब्ध्वा ॥
षट्पदीनौकया सर्व्वानुद्धार नतोऽस्म्यहम् ।
संसारसागरे मग्नान् यस्तं शङ्करदेशिकम् ॥

भगवद्भक्तिगन्धाढ्यैः कुसुमैर्वाङ्मयैः कृता ।
षट्पदीमञ्जरी सम्यक् योजिता कृष्णपादयोः ॥ ० ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीशिवनारायणानन्दतीर्थगुरुचरण-सेवक-श्रीशङ्करानन्दतीर्थविरचिता षट्पदीमञ्जरी सम्पूर्णा ॥ * ॥

शकाब्दाः १६९९ ॥

विषयः । शङ्कराचार्य्यकृतस्य षट्पदीस्तोत्रस्य व्याख्यानम् ।

No. 387. षट्पद्यमाला . By रामरामभट्टाचार्य्यः . Substance, country-made paper, $17 \times 4\frac{1}{2}$ inches. Folia, 12. Lines, 6 on a page. Extent, 200 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamansiṁha, Serapura, Paṇḍita Cardrakānta Tarkālaṇkāra. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमः परदेवतायै । (अस्य प्रथमपत्रं नास्ति तेन द्वितीयपत्रस्य प्रारम्भ-वाक्यं लिखितम् ।)
परदाराभिशापे च बहवो यत्र वादिनः ।
शिरोच्छेदं भवेद्धिग्धमात्मनः शुद्धिकारणम् ॥ इत्यादि ।

End. दुर्गे पद्यमहावने स्थिरतरे हंसाद्यपत्राश्रिते
तत्त्वज्ञानविवोधपुष्पखचिते मुक्त्यपवर्गैः फलैः ।
तत्त्वज्ञानमहान्धकारनिकरश्यामीकृतश्रीकरे
चश्वेत् कुक्रियचित्तफेरुशिशुना शार्दूलविक्रीडितम् ॥
एतत्, पद्यशताष्टपुष्परचिता माला विचित्रा द्रुलै-
र्नानावर्णमयैर्निकामरचिता श्रीरामरामद्विजैः ॥
श्रीमच्छ्रीगुरुपादपङ्कजसपर्य्यासन्निधौ नित्यश-
स्तत्पादाब्जसुधाभिरञ्जितवपुर्भूयामितीच्छे वरम् ॥ १०८

Colophon. इति श्रीरामरामभट्टाचार्य्यविरचिता षट्पद्यमाला समाप्ता ॥ ० ॥

विषयः । अष्टोत्तरशतश्लोकेन नाडीनां संज्ञास्थितिवर्णादिनिरूपणम् ।

No. 388. संवत्सरप्रदीपः. Substance, country-made paper, 13×4 inches. Folia, 96. Lines, 8 on a page. Extent, 2,300 çlokas. Character, Bengali. Date, ? Place of deposit, Bhāṭpāḍā 24-Parganās, Paṇḍita Rāmendra Nyāyavāgīça. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

जयति श्रीसरस्वत्येवपात्योऽसुरदारणः ।
धर्म्मार्थकाममोक्षार्थि-कृत्स्नप्रत्यूहवारणः ॥
अयने द्वे विषुवे द्वे चतस्रः षडशीतयः ।
चतस्रो विष्णुपद्यश्च संक्रान्त्यो द्वादश स्मृताः ॥
मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
तुलामेषे विषुवती गोलमध्ये तथापराः ॥
मृगो मकरः । इत्यादि ।

End. अकालरचितं सन्ध्यागर्ज्जः ।
सन्ध्यागर्ज्जे तथा प्रातर्दिवा नाध्ययनं चरेत् ।
सायं गर्ज्जे तथा रात्रौ नाधीयीत विचक्षणः ॥
रविवारे च संक्रान्त्यां षष्ठ्यां च सप्तमीतिथौ ।
आरोग्यकामस्तु नरो निम्बपत्रं न भक्षयेत् ॥
अमावास्यां पौर्णमास्यां संक्रान्त्यां पक्षणेऽचनि ।
धनपुत्रकलत्रार्थी शीलापिष्टं परित्यजेत् ॥
मन्दमङ्गलपक्षीषु द्वादश्यां श्राद्धवासरे ।
वस्त्राणां क्षारसंयोगो दहत्यासप्तमं कुलम् ॥ इति प्रकीर्णकं समाप्तम् ।

Colophon. समाप्तश्चायं संवत्सरप्रदीपाख्यो ग्रन्थः ॥ ० ॥

विषयः । संक्रान्तिनिरूपणम् । वैशाखज्येष्ठादिकृत्यम् । अनन्तव्रतादिः । कुक्कुटीव्रतादिः । अघोरादिः । जन्माष्टम्यादिः । क्षयादिनिरूपणम् । युगाद्यानिरूपणम् । दशहरादिनिरूपणम् । सावित्रीव्रतादिः । चातुर्मास्यादिनिरूपणञ्च ।

No. 389. सङ्कल्पकल्पद्रुमः. By विश्वनाथचक्रवर्त्ती. Substance, country-made paper, 15 × 5½ inches. Folia, 14. Lines, 5 on a page. Extent, 250 çlokas. Character, Bengali. Date, ? Place of deposit, Āgaḍtalā Vṛddhanagara, Tripurā, Paṇḍita Mīneçvara Sārvvabhauma. Appearance, tolerable. Verse. Generally correct.

Beginning. नमो वृन्दावनेश्वर्य्यै ।

वृन्दावनेश्वरि वयोगुणरूपलीला-
सौभाग्यकेलिकरुणाजलधेऽवधेहि ।

दासीभवानि सुखयानि सदा सकान्तां
त्वामालिभिः परिवृतामिदमेव याचे ॥ इत्यादि ।

End. हित्वान्याः किल वासना भजत रे वृन्दावनं तं × ×
राधाकृष्णविलासवारिधिरसास्वादं न चेद्विन्दथ ।
त्यक्तुं शक्नुथ न स्पृहामपि पुनस्तत्रैव वृन्दाटवी
विश्रब्धाः शृणुतेममेव सततं संकल्पकल्पद्रुमम् ॥

Colophon. इति श्रीविश्वनाथचक्रवर्त्तिविरचितः सङ्कल्पकल्पद्रुमः समाप्तः ॥

विषयः । राधाकृष्णयोर्लीलावर्णनसुखेन राधाकृष्णे मानसार्पणादिविविधप्रकारभजन-कथनम् ।

No. 390. संक्षिप्तसारकौमुदी. By अभिरामविद्यालङ्कारः. Substance, country-made paper, 14×2 inches. Folia, 17. Lines, 9 on a page. Extent, 350 çlokas. Character, Bengali. Date, Sk. 1760. Place of deposit, Teliveni grāma *viâ* Gadbetā, Paṇḍita Candranātha Cūḍāmaṇi. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ॥ लुक् ॥ अथास्य सकलविषयव्यापकत्वात् ग्रन्थादौ करणं युक्तमिति चेन्न सतन्त्रेक्योर्नियन्तृमशक्यत्वाद् इति केचित् । वयन्तु कारक-पादे कर्त्रादिसंज्ञाविधानपूर्व्वकं प्रथमादिविभक्तीनां प्रथमपुरुषादेश्च विधान-मुक्तम् । इत्यादि ।

End. न पञ्च इत्यादौ कथं नान्तत्वान्न दीर्घ इत्यत आह षसौ लुगिति । नित्यबहु-वचनान्तत्वात् कतिशब्दस्य संख्याप्रश्ने संशय एव कप्तिविधानाच सिद्धौ-सौरभावः इति बोध्यम् ॥ तथासनिक इत्यादि तत्यस्य उत्थितस्य राज्ञः आसनमर्हतीति तदर्हत्यादाविति टिकण् ॥ * ॥

Colophon. इति वन्द्यघटीयगयघटकुलोद्भव-श्रीलश्रीयुताभिरामविद्यालङ्कारभट्टाचार्य्य-विरचितायां संक्षिप्तसारकौमुद्यां षष्ठः सुबन्तपादः समाप्तः ॥ * ॥
शकाब्दाः १७६० ।

विषयः । संक्षिप्तसारव्याकरणस्य सुबन्तपादस्य व्याख्यानम् ।

No. 391. संक्षिप्तसारटीका (व्याकारदीपिकाख्या) By श्रीविद्याविनोदात्मज-श्रीन्यायपञ्चाननः. Substance, country-made paper, 15 × 3¼ inches. Folia, 244. Lines, 8–9 on a page. Extent, 10,980 çlokas. Character, Bengali. Date, Sk. 1634. Place of deposit, Kā̃ṭhālapāḍā *viâ* Naihāṭi, Paṇḍita Harinātha Baṭṭācāryya, bought by the Government of India, Calcutta. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ।

नत्वा श्रीहरिचरणं कृत्वा शरणं पितुः पदञ्च मतम् ।
विमलधियां हितजननी क्रियते व्याकारदीपिका यत्नात् ॥
कोऽपि न्यायपुराणकाव्यनिचयालङ्कारवैशेषिक-
व्याकारश्रुतिनाटकस्मृतिगुरुर्विद्याविनोदः स्थितः ।
तत्पुत्रस्य विचारनिर्म्मलमतेः श्रीन्यायपञ्चानन-
स्यौत्सुक्यं सुधियो विधाय विमलां गृह्णन्तु याचे हितम् ॥
सुगमं निगदेन गम्यते शिशुभिर्दुर्गममेव तत्त्वतः ।
निरवोचमतः प्रयत्नतः परिसंगृह्य च वृत्तिटीकयोः ॥
अनधीत्य शब्दशास्त्रं योऽन्यच्छास्त्रं समीहते ज्ञातुम् ।
... ... ॥

शिवमित्यादि । मङ्गलस्य प्रारिप्सितसमाप्तिं प्रति कारणता विघ्नध्वंसत्वान्वय-व्यतिरेकसमधिगम्येति नैयायिकाः । वयन्तु विघ्नध्वंसं प्रति मङ्गलस्य कारणता समाप्तिस्तु स्वकारणादेवेति ब्रूमः ॥ तथाच गोयीचन्द्रः प्रत्यूहव्यूहनिराकरण-कारणमिति । ... ... उच्यते । सनाम्नो विधीयते । नाम तु तिङन्तादिवत् सुप्शून्यं नामैव यदा प्रथमस्य विशेष्यत्वविवक्षायाः सम्बुद्ध्यन्तात् सु औ जस् इति योग-विभागात् ॥ इत्यादि ॥

End. कति पुरुषाः कति स्त्रियः कति धनानीत्युदाहरणत्रयोपादानं कति शब्दस्य लिङ्गविशेषकार्य्याभावसूचनार्थम् । जसो लुक् कति पञ्चादिरिति कृतेऽपि जस्शसोर्ग्रहणे सिद्धे इत्यादि एकवचनद्विवचनान्तयोः संख्याया नियत-त्वाद्व संख्याप्रश्नार्थं कतिशब्दप्रयोग एव न सम्भवतीति तिङ्सिङ्घो रभाव इति भावः । ... ... यद्वा अत्र एजेचो ... न क्रियते किन्तु जस्शसोर्लुकि च अन्तर्वर्त्तिनो-ऽकारस्यैव औद्भवति । स्वादौ नञ्च विधानेन ... त्येव क्रियतां तथा

सति सवर्णदीर्घेणेष्टापत्तिरेव । प्रथमं सन्धिकार्य्याभावात् अकारस्य न सन्धिः । टा मिस् ङे ङसि ङसामित्यस्य प्रवृत्तौ पश्चात् सवर्णदीर्घः स्यात् यद्वा अल्पत्वान्न्लोपे अन्तर्वर्त्तिनोऽतः स्थाने आदेशाभावे अष्टाभिरिति साध्यस्य सिद्धिर्न स्यात् ॥

Colophon. इति श्रीकुलकलानिधिमहामहोपाध्याय श्रीविद्याविनोदात्मज श्रीन्यायपञ्चाननकृतायां संक्षिप्तसारटीकायां व्याकारदीपिकायां षष्ठः सुबन्तपादः समाप्तः ।

विषयः । संक्षिप्तसाराख्यव्याकरणस्य व्याख्यानम् ।

No. 392. सङ्क्षेपशङ्करजयः. By माधवाचार्य्यः. Substance, country-made paper, 17 × 4½ inches. Folia, 69. Lines, 10 on a page. Extent, 2,000 çlokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Çyāmapukura, Bābu Nagendranātha Vasu. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
प्राचीनशङ्करजये सारः संगृह्यते स्फुटम् ॥
यद्वद्वृद्धानां पटलो विशालो विलोक्यतेऽल्पे किल दर्पणेऽपि ।
तद्वन्मदीये लघुसंग्रहेऽस्मिन्नुद्वीक्ष्यतां शाङ्करवाक्यसारः । इत्यादि ।

End. इन्द्रोपेन्द्रप्रधानैस्त्रिदशपरिवृढैः स्तूयमानः प्रसूनै-
र्दिव्यैरभ्यर्च्यमानः सरसिजभवनादत्तहस्तावलम्बः ।
आरुह्योक्षाणमग्र्यं प्रकटितसुजटाजूटचन्द्रावतंसः
पृष्ट्वाम्नायोक्तमर्थं समुदितमृषिभिर्धाम नैजं प्रतस्थे ॥ * ॥

Colophon. इति श्रीमाधवीये तदुक्तसारदापीठवासगः ।
संक्षेपशङ्करजये सर्गः पूर्णोऽपि षोड़शः ॥
समाप्तश्चायं ग्रन्थः ॥

विषयः । शङ्कराचार्य्यस्य जीवनवृत्तान्तः ।

No. 393. सङ्ख्याप्रकाशटीका. By काशीरामवाचस्पतिः. Substance, country-made paper, 16 × 3 inches. Folia, 28. Lines, 9 on a page. Extent, 650 çlokas. Character, Bengali. Date, ? Place of deposit, District Vā̃kuḍā Viṣṇupura Kādākuli, Paṇḍita Raghurāma Tarkaratna. Appearance, tolerable. Prose. Generally correct.

एवमन्यापि संख्या बोध्या ग्रन्थविस्तारभयान्नोक्ता
कृत्वाञ्जलिद्वयपुटं मुकुटत्तमाङ्गे
युष्मान् प्रणम्य कवयो विनिवेदयामि ।
व्याख्येयमर्थरहितापि सदूषणापि
दृष्ट्वा भवद्भिरवधाय दयाविधेयैः ॥
श्रीश्रीजाने दयाधाने चरणाब्जतले तव ।
श्रीकाशीरामकृतिना कृतिरेषा समर्पिता ।

Colophon. इति संख्याप्रकाशव्याख्या समाप्ता ॥ ० ॥

विषयः । नन्दरामतर्कवागीशभट्टाचार्य्यकृतस्य संख्याप्रकाशनामकस्य नानाशास्त्रसंगृहीत-तत्त्वबोधात्मकग्रन्थस्य व्याख्यानम् ।

No. 394. संग्रहसारः. By रामदेवद्विजः. Substance, country-made paper, 18 × 4 inches. Folia, 63. Lines, 6 on a page. Extent, 1,250 çlokas. Character, Bengali. Date, ? Place of deposit, District Dhākā. Post Office Baidyerbāzār, Kṛṣṇapura, Paṇḍita Madanamohana Bhaṭṭacāryya. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. श्रीरामस्य पदारविन्दयुगलं नत्वाथ वागीश्वरीं
हेरम्बं तपनादिकं पदगुरुं रुद्रं यशोदासुतम् ।
नानाजातकतो विलोक्य सकलं गर्गादिविप्रोदितं
वक्ष्ये संग्रहसारमल्पसुगमं श्रीरामदेवो द्विजः ॥
ज्ञेयोऽत्र प्रथमं हि जन्मसमयश्छायादियन्त्रैः स्फुटं
तत्कालप्रभवा विलग्नसहिता कार्य्या ततश्च ग्रहाः इत्यादि ॥

End. वेदोऽङ्के जलधिर्गजाब्धिसहितो मुन्यग्निभिः पञ्च च
पञ्चाग्निश्रुतिभिः शरः श्रुतिगुणैर्बाणोऽङ्कयुग्मैः सह ।
बाणः कालगुणैः शरोऽम्बरयुगैरङ्केन्दुभिर्मार्गणो
वेदो बाणगुणैर्गुणोऽलविशिखैरस्ताब्धिभिः पावकः ॥

Colophon. (अन्यत् परिसमाप्तिसूचकं वाक्यं नास्ति)

विषयः । षड्वर्गफलम् । नवांशफलम् । लग्नाधिपादिफलम् । शयनादिभाववचनम् । शयनादिद्वादशभावस्य फलम् । सप्तशून्यादिकोष्ठीफलम् । तन्वादिभावनिरूपणम् । शुभग्रह-

ॐ नमो गणेशाय ॥

विरञ्चिपूर्वो निजधर्म्मसेतून्
युगे युगे सत्त्वमयानि धत्ते ।
वपूंषि नानागुणकर्म्मभाञ्जि
भूयात् स देवो भवतां विभूत्यै ॥

भट्टाचार्य्यशिरोरत्नन्यायालङ्कारसूनुना ।
संख्याप्रकाशकव्याख्या काशीरामेण तन्यते ॥

अथ सकलशास्त्राभिज्ञः श्रीमान् नन्दरामतर्कवागीशभट्टाचार्य्यः इदानीन्तनान् मन्दबुद्धीन् पूर्व्वपूर्व्वपण्डितकृत नानाविधतत्त्वग्रन्थाध्ययनासमर्थानवलोक्य परमकारुणिकतया अध्ययनभावनाभ्यां तत्त्वग्रन्थेभ्यः सारमाकृष्य संख्या-कथनमिषेण संख्याप्रकाशकनामकग्रन्थं संक्षिप्तसारं तेषां हितार्थं रचितवान् । अथ एषोऽपि तेषां नातिसुगमो बभूव अतो यथामति तद्व्याख्याने ममोद्यमः । तत्र तावत् ग्रन्थकृत् ग्रन्थसमाप्तिप्रतिबन्धकीभूतविघ्नसम्भावनया तन्नाशाय कृतमीश्वरनमस्कारं शिष्यशिक्षार्थमादौ निबध्नन् सुचिरतरकालीनविबुध-पदावस्थितिहेतवे यशसे स्वनामयौगिकग्रन्थनामद्वारा प्रवृत्त्यङ्गमभिधेयञ्चाह देहवानित्यादि । यः शुद्धसत्त्वस्वरूपया आत्ममायया देहवानिव पाञ्च-भौतिकदेहविशिष्ट इव भाति तथाहि ईश्वरस्य शुद्धसत्त्वात्मिका मायैव देहः । इत्यादि ।

सत्यमेव जयते

अन्येति अन्यापि द्वात्रिंशदादिकापि संख्या मदुक्तया परीपाट्या रीत्या बोद्धव्या । ननु कथं अनुक्तज्ञानं भविष्यति तत्राह ईङ्गितेनेति हि यतः धीराः पण्डिता ईङ्गितेनापि परहृत्स्थितं जानन्ति तथाच यदि धीरा ईङ्गितेनापि परहृत्स्थितं जानन्ति तदा उक्तया परिपाट्या ते तत् ज्ञास्यन्ति तन्न चित्रमिति भावः । मयापि यत्किञ्चित् अन्यसंख्या प्रदर्श्यते यथा गीताध्यायपाठनाश्या(?) अपराधा द्वात्रिंशत् यथा—

अहन्यहनि यो मर्त्यो गीताध्यायन्तु संपठेत् ।
द्वात्रिंशदपराधांश्च अहन्यहनि मुच्यते ॥ इति ।

ते च अपराधा वराहपुराणान्निष्कृष्य लिख्यन्ते । भगवद्भक्तानां चानियमितान्न भोजनम् ॥ १ ॥ अजीर्णे सति विष्णोरुपसर्पणं ।३२॥ व्यभिचारिभावास्त्रय-स्त्रिंशत् तदुक्तं काव्यप्रकाशे ॥ ३३॥

त्रयस्त्रिंशदमी भावाः समाख्याताः स्वनामत इति ।

॰। विप्रस्त्रीयोगकथनम् । पञ्चस्फुटनिरूपणम् । सिंहासनादियोगफलम् । मास-
...दिनिरूपणम् । अष्टवर्गनिरूपणम् । सप्ताष्टवर्गनिरूपणम् । वर्षदशानिरूपणम् ।
...निरूपणम् । केतुपताकिनिरूपणम् । नाचविकदशानिरूपणम् । तस्यान्तर्दशा-
...णम् । पञ्चस्वरानिरूपणम् । पञ्चस्वरामते आयुर्गणनम् । योगिनीदशानिरूपणम् । तस्याः
...न्तरदशानिरूपणम् । आयुर्दशानिरूपणम् । तीर्थज्ञाननिरूपणम् । गुरोरष्टवर्गमते पुत्रादि-
मतनिरूपणम् । नष्टकोष्ठीज्ञानम् । चतुर्दशकोष्ठीनिरूपणम् । अयनादिलग्नमाननिरूपणम् ।
जातचक्रनिरूपणम् । मासफलनिरूपणञ्च ।

No. 395. सत्क्रियासारदीपिका. Substance, country-made paper, 13 × 4 inches. Folia, 49. Lines, 7 on a page. Extent, 1,000 çlokās. Character, Bengali. Date, ? Place of deposit, District Vãkuḍā Kucekol, Bābu Yogīndranātha Siṁha Deva. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीश्रीराधाकृष्णः ।

प्रणम्य सच्चिदानन्दं जगतां सेव्यमीश्वरम् ।
श्रीकृष्णपरमानन्दमनन्याभीष्टदायकम् ॥
वक्ष्मि गच्चिद्द्विजादीनामनन्यानां विशेषतः ।
सत्क्रियासारदीपिकां तां विवाहादिपद्धतिम् ॥
श्रीमद्गोपालभट्टोऽयं साधूनामाज्ञया भ्रमम् ।
भगवद्धर्मरक्षार्थं भक्तानां वैदिकी तु या ॥
कृता याप्यनिरुद्धेन भीमभट्टेन या कृता ।
श्रीमद्गोविन्दानन्देन कर्म्मिणां पद्धतिः कृता ॥
श्रीनारायणभट्टेन कण्ठानान्तु वैदिकी ।
भट्टश्रीभवदेवेन छन्दोगानान्तु या कृता ॥
वर्णाश्रमान्त्यजादीनां वेदैः पौराणिकादिभिः ।
मन्वादिधर्म्मशास्त्रोक्तैर्वचनैः सप्रमाणकैः ॥
श्रीमद्गोविन्दभक्तानां सेवानामपराधतः ।
मया तथा कृता किन्तु पितृदेवार्चनं विना ॥
तन्त्वपरग्रन्थकारवत् ग्रन्थकर्तृत्वेनात्मद्विषस्य स्वनाम दातुमनुचितम् । यथा,—
अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते ।

इति दोषश्रवणभयात् । तथापि स्वपूज्यानां साधूनामाज्ञया श्रीमद्गोपालभट्टनामायं कोऽपि जीवः श्रीमद्गोपालभट्टत्वेनेति श्रीकृष्णचैतन्यचरणारविन्दमकरन्दसततपायित्वेन सदैव साधुनिर्देश्य भावः । एवं विशिष्टोऽहं श्रीकृष्णं प्रणम्य श्रीकृष्णशब्दार्थः पुरैव व्याख्या किं विशिष्टं सच्चिदानन्दं गुणातीतानिर्व्वचनीयपरममनोहरलावण्यघनसुख स्वरूपं अतएव जगतां सेव्यं । अत्रायं भावार्थः ॥ इत्यादि ॥

End. ततोऽपरे श्रीमन्नारायणस्य श्रीमत्स्यादिविविधावतारोपासकाः । तत्तन्निज-निजसेवकपार्षदत्वेन तेषां तेषां तान् तान् पार्षदभक्तान् प्रपूजयेयुः । अयं भावार्थः ।

Colophon. अतःपरं खण्डितम् ॥

विषयः । वैष्णवानां अन्यकर्म्मत्यागविधिनिरूपणमुखेन व्याख्यासहित-वैष्णवकर्म्मादि-निरूपणम् ।

No. 396. सदाशिवसंहिता. Substance, country-made paper, $12 \times 2\frac{1}{2}$ inches. Folia, 12. Lines, 8 on a page. Extent, 250 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Rūparāma Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो रामचन्द्राय ।

श्रीश्रुतय ऊचुः ।

श्रुतमस्माभिरीशान रहस्यं परमाद्भुतम् ।
इदं विश्वं कथं जातं सौमित्रे वद तत्त्वतः ॥

सौमित्रिरुवाच ।

शृणुध्वं श्रुतयः सर्व्वा रहस्यं सृष्टिसम्भवम् ।
यथादौ परिसम्भूतं यस्मिन्नेव प्रलीयते ॥
सृष्टेरग्रे परं धाम्नां संवादं समभूत् किल ॥ इत्यादि

End. गोलोके नियतं वासं सत्यं सत्यं वदाम्यहम् ।
देवैरपि दुराधर्षाः कियद्ब्रह्मगणैरपि ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
अटनं सर्व्वतीर्थेषु प्रदानं सर्व्वसम्पदाम् ॥

एतद्धि ध्याननयोगस्य कलां नार्हन्ति षोड़शीम् ।
ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥
स्वर्णस्तेयसुरापानगुरुतल्पयुतानि च ।
कोटिकोटिसहस्राणि ह्युपपापानि यान्यपि ॥
सर्व्वाण्यपि प्रणश्यन्ति रामधामविलोकनात् ॥ ० ॥

Colophon. इति सदाशिवसंहितायां निरुक्तलक्षणायां श्रीरामानुजश्रुतिसंवादे गोलोकवर्णनं नाम द्वितीयोऽध्यायः ॥ ॐ तत्सत् ॥

विषयः । प्रथमाध्याये रामानुजश्रुतिसंवादेन निजरूपवर्णनादिः । द्वितीयाध्याये गोलोकवर्णनादिश्च ॥

No. 397. सद्वैद्यभावावलिः. By जगन्नाथगुप्तकवीन्द्रः. Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 9 on a page. Extent, 125 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Gāupāḍā grāma, Bābu Rājakumāra Dāsa. Appearance, new. Verse. Generally correct.

Beginning. नमो गणेशाय ।
आचारादिगुणाश्रीनां प्रतप्तकनकद्युतिम् ।
नमामि कुलदामायां सानन्दं कुलदेवताम् ॥
महावंशोद्भवा वैद्या येऽप्यपि च महोज्ज्वलाः ।
ये च भावान्तरं प्राप्तास्तद्वच्मि समासतः ॥
नगर्य्यां सेनहाटायां गतिर्येषां न विद्यते ।
तेषां सद्वैद्यसद्भावज्ञानाय खलु कथ्यते ॥
आदौ पूर्व्वक्रमेणैव दुहिवंशो निगद्यते ।
गणहित्रुमाधवाख्य दुहिवंशसमुद्भवाः ॥
गणसेनस्य तनयौ श्रीधरो हरिवंशकः ।
श्रीपतिरघुपत्याख्यौ श्रीधरस्य सुतावुभौ ॥ इत्यादि ।

End. अनेन यो भिषग्वंशः सूत्रेणापि न वर्णितः ।
स एव साध्यो विज्ञेयो भुवसम्यग्वंशजे ॥
भिषग्वरः काश्यपवंशचन्द्र-
मणिस्वरूपोऽजनि कायुगुप्तः ।

तस्यात्मजोऽभूद्वनमालिगुप्तः
पुण्येषु सक्तो वनमालिभक्तः ॥
ततोऽभवत् कार्पटिनामधेयः
सुतः पवित्रो मदनस्ततोऽभूत् ।
सुतोऽभवत् तस्य सुतः प्रतिष्ठः
क्षितौ जगन्नाथ इति प्रदिष्टः ॥
सुधाकरस्तस्य सुतः सुदक्षः
सुधाकरस्तत्कुलकैरवेषु ।
पुण्यौघतुङ्गीकृतकायवंशः
क्षितिं गतोऽभूत् + + + रिवांशः ॥
सुधाकरस्यापि सुतः सुशीलो
मृत्युञ्जयः शुद्धमतिर्बभूव ।
तस्यात्मजोऽभूत् कविराजसंज्ञो
विद्वद्वरोऽभूदपि राघवाख्यः ॥
सुतोऽभवत् तस्य च रामभद्रो
विद्वद्गणेन्द्रः कविचन्द्रसंज्ञः ।
उदारबुद्धि + + पुण्यकर्मा
तस्यात्मजोऽभूच्छिवनाथनामा ॥
तस्यात्मजः सूक्ष्ममतिः सुशीलः
ख्यातो जगन्नाथ इति क्षितौ यः ।
तेन प्रतेने भिषजां समासात्
सद्वैद्यजानां सदसद्विचारः ॥

Colophon. इति श्रीजगन्नाथगुप्तकवीन्द्रकृतसद्वैद्यभावावलिः समाप्ता ॥

विषयः । अम्बष्ठकुलजातानां केषाञ्चित् सद्वैद्यानां वंशावलिकथनम् । तत्र तेषां सद्-सद्भावप्राप्तिकथनञ्च । अथ दुद्धिवंशकथनम् । दुद्धिवंशजातस्य गणसेनतनयस्य श्रीधरसेनस्य वंशकथनम् । हिङ्गुसेनवंशवर्णनम् । माधवसेनवंशवर्णनम् । विनायकसेनवंशवर्णनम् । छमन-सेनवंशवर्णनम् । विकर्त्तनसेनवंशवर्णनम् । वलभद्रसेनवंशवर्णनञ्च । अथ दासवंशवर्णनम् । तत्र नारायणदास-निमदास-अरविन्ददास-जयदासानां वंशादिवर्णनञ्च । अथ त्रिपुरगुप्तवंशादि-कथनम् । कायगुप्तवंशादिवर्णनञ्च ॥ इति ।

8. **सन्तानद्वादशीव्रतम्.** Substance, palm-leaf, 13 × 1½ inches. Lines, 2 on a page. Extent, 50 çlokas. Character, Bengali. ? Place of deposit, Vidyākūṭa Tripurā, Bābu Kedāranātha ...ṭācāryya. Appearance, new. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ सन्तानद्वादशीव्रतम् । तत्र प्रथमं सूर्य्यार्घ्यं दत्वा स्वस्तिवाचनपूर्व्वकं संकल्पं कुर्य्यात् विष्णुरोमित्यादि ।

End. इदं सन्तानकं नाम याः करिष्यन्ति भक्तितः ।
अवैधव्यन्तु सौभाग्यं लभन्ते सन्ततिं शुभाम् ॥

Colophon. इति सन्तानद्वादशीव्रतकथा समाप्ता ।

विषयः । शुभसन्तानादिलाभकारकव्रतविशेषसाधननियमादिकथनम् ।

No. 399. सम्बन्धविवेकः. By भवदेवभट्टः. Substance, country-made paper, 14 × 3 inches. Folia, 12. Lines, 6 on a page. Extent, 250 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Kātihāli, Paṇḍita Rājakṛṣṇa Nyāyabhūṣaṇa. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय । अथ सम्बन्धं विवेचयिष्ये । तत्र मनुः ।
असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने ॥
या मातुः सपिण्डा न भवति सा दारकर्म्मणि दारत्वसम्पादके कर्म्मणि तथा मैथुने मिथुनसाध्येऽग्न्याधानादौ पुत्रोत्पत्तौ च प्रशस्तेति सम्बन्धः । इत्यादि ।

End. सर्व्वत्र प्राङ्मुखो दाता ग्रहीता च उदङ्मुखः ।
अयन्तूक्तविधिर्ज्ञेयो विवाहे तु व्यतिक्रमः ॥
व्यतिक्रम इति प्रत्यङ्मुखः सम्प्रदाता ग्रहीता प्राङ्मुखः ॥ उक्तम्,—
प्राङ्मुखायाभिरूपाय वराय शुचिसन्निधौ ।
प्रत्यङ्मुखस्तु दाता वै कन्यां दद्यात् स्वलङ्कृतामिति ।

Colophon. इति भवदेवभट्टकृतः सम्बन्धविवेकः समाप्तः ॥ * ॥

विषयः । विवाहसम्बन्धविचारादिमुखेन सपिण्डादिनिरूपणम् । उद्वाहादिनिरूपणञ्च ।

No. 400. सम्मोहनतन्त्रम्. Substance, country-made pa inches. Folia, 44. Lines, 12 on a page. Extent, 1,800 çlokas. acter, Nāgara. Date, ? Place of deposit, Govardhana Sarāi Bo Paṇḍita Bindhyeçvarīprasāda Dube. Appearance, old. Verse. Gene correct.

Beginning.

ॐ नमः श्रीमङ्गलमूर्त्तये ।
साकारत्वं निराकारज्ञानसागररूपिणे ।
देवानां देवदेवाय तस्मै श्रीगुरवे नमः ॥
देव्युवाच ।
देवदेव महादेव सर्व्वसिद्धिप्रवर्त्तक ।
त्वत्तः श्रुतं मया सर्व्वं रहस्यातिरहस्यकम् ।
इदानीं देवदेवेश रहस्यमपरं विभो ॥
शिव उवाच ।
रहस्यातिरहस्यञ्च कथं त्वयि निवेद्यताम् ।
तथापि तव सद्भक्त्या रहस्यमपि कथ्यते ॥
काली तारा छिन्नमस्ता सुन्दरी बगला रमा ।
मातङ्गी भुवना सिद्धविद्या च भैरवी तथा ॥
धूमावती च दशमी महाविद्या दश स्मृताः ।
चण्डेश्वरी लघुश्यामा त्रिपुटादिप्रयोगतः ॥
त्रयोदश महाविद्याः शृणुष्व षोडशी शिवे ।
दश पूर्व्वास्तु संगृह्य मतङ्गीञ्च शूलिनीम् ॥
अश्वारूढां महाविद्यां त्रैलोक्यविजयाभिधाम् ।
वाराहीमन्नपूर्णाञ्च कलासंख्या प्रकीर्त्तिता ॥
महाकालमते देवी एकपञ्चाशदीरिता ।
महालक्ष्मीं समारभ्य महाकालकलात्मकम् ।
विद्यासङ्ख्या त्वया प्रोक्ता वितथं पूर्व्ववत् भवेत् ॥ इत्यादि ।

End.

चत्वारिंशत्प्रभेदेन ब्रह्मराक्षसजातयः ।
पूर्व्वक्रमेण संसाध्य दुष्टानेतान् विनाशयेत् ॥
गोपनीयं गोपनीयं गोपनीयं पुनः पुनः ।
रहस्यातिरहस्यञ्च रहस्यातिरहस्यकम् ।
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥

इति श्रीमद्वीरभ्यतारासम्भादे सम्मोहनतन्त्रे द्वितीयखण्डे शाक्तानातिवर्णने दशमः पटलः ।

विषयः । पीठवार्त्ताप्रभेदेन लिपिभाषाप्रभेदेन च शाम्भवानां विंशतिभेदविद्यापीठ-निर्णयः । पुष्पनिर्णयः । गौड़ादिदेशभेदे तन्त्रादिभेदनिरूपणम् । दशमहाविद्यानिरूपणम् । यन्त्रभेदादिनिर्णयश्च ॥

No. 401. सर्व्वतोभद्रचक्रटीका. By गौरीकान्तचक्रवर्त्ती. Substance, country-made paper, 12 × 3½ inches. Folia, 5. Lines, 10 on a page. Extent, 175 çlokas. Character, Bengali. Date, ? Place of deposit, Kā̃ṭhālpāḍā *viâ* Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, very old. Prose and verse. Generally correct.

Beginning. ॐ नमः श्रीसूर्य्याय नमः ।
अथातः सम्प्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ।
विख्यातं सर्व्वतोभद्रं सद्यः प्रत्ययकारकम् ॥
ऊर्द्ध्वग्रं विन्यस्य तीर्य्यग्रेखास्तथा दश ।
एकाशीतिपदं चक्रं जायते नात्र संशयः ॥
अकारादिस्वराः कोष्ठे ईशादि विदिशि क्रमात् ।
दक्षिमार्गेण दातव्याः षोड़शैव चतुर्भ्रमम् ॥ इत्यादि ।

End. वर्त्तमानेति ग्रहादीनां वर्त्तमाने शून्ये शोधितषट्चक्रक्रमेण विंशत्यंशकल्पनया तद्भागो ह्रसति कुग्रहे तद्भागो वर्त्तते इत्यर्थः । देशध्वंसा इत्यादि सर्व्वं सुगमम् ॥

Colophon. इति सर्व्वतोभद्रचक्रटीका गौरीकान्तचक्रवर्त्तिकृता समाप्ता ॥ ० ॥

विषयः । तन्त्रोक्तस्य सर्व्वतोभद्रचक्रादेर्व्याख्यानम् ।

No. 402. सापेक्षवादः. Substance, country-made paper, 11 × 2 inches. Folia, 3. Lines, 7 on a page. Extent, 40 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Pilkhānā Vāḍḍānagara, Paṇḍita Kailāsacandra Tarkaratna. Appearance, old. Prose. Correct.

Beginning. ॐ नमो दुर्गायै । समासघटकपदोपस्थाप्येन समासाघटकपदार्थस्य नान्वयः । आकाङ्क्षाविरहात् । अतएव ऋद्धस्य राजमातङ्गा इत्यादौ ऋद्धादि-पदार्थस्य राजादौ योग्यतासत्त्वेऽपि नान्वयः । यद्यपि तत्समभिव्याहार-

रूपाकाङ्क्षा सम्भवति तथापि समभिव्याहारमात्रं नाकाङ्क्षा ।
बोधविशेषे पदविशेषयोः समभिव्याहारः । इत्यादि ।

End. ननु कथमिदमुक्तं यावता गमेस्तस्य कर्मणो धात्वर्थेऽभिनिवेशात् धा- रकर्म्मता । यथा चलं गच्छति । चलयति ॥

Colophon. सापेक्षवादः समाप्तः ।

विषयः । सापेक्षत्वेऽपि गमकत्वात् समास इति न्यायस्य स्वरूपादिविवेचनम् ।

No. 403. सारनिर्णयः. By रमाकान्तचक्रवर्त्ती. Substance, palm-leaf, 17 × 1½ inches. Folia, 30. Lines, 3 on a page. Extent, 600 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Vaidyervāzār, grāma Candrakīrtti, Paṇḍita Rajanīkānta Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
काशीशचरणाम्भोजं चतुर्वर्गफलप्रदम् ।
नत्वा वक्ष्यामि यत्नेन स्फुत बोधविनायकम् ॥
अर्थवदधातुरप्रत्ययः प्रातिपदिकम् । धातुभिन्नं प्रत्ययभिन्नं यदर्थवत् तत् प्रातिपदिकसंज्ञं भवति अभिधेयनिवृत्तिप्रयोजनधनेषु यद्यप्यर्थशब्दस्तथा- प्यभिधेयवचनोऽर्थशब्दो गृह्यते । अभिधेये निवृत्त्यादीनामन्तर्भावात् । यत्- प्रयोगे यत् प्रतीयते स तस्यार्थः । तथाचोक्तम् ।
शब्देनोच्चार्य्यमाणेन यद्वस्तु प्रतिपद्यते ।
तस्य शब्दस्य तद्वस्तु ज्ञायतामर्थसंज्ञया ॥
स चार्थश्चतुर्धा भिद्यते जातिद्रव्यगुणक्रियेति । तथाचाह ।
शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः ।
चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः ॥
स्वार्थो जातिद्रव्यगुणक्रियास्वरूपभेदात् पञ्चविधः स्वार्थो विशेषणार्थानुसम्भागे वृक्ष इत्यादि उदाहरणं विशिष्टार्थबुद्धिं प्रति विशेषणार्थस्य कारणत्वात् । तथाच । नागृहीतविशेषणा बुद्धिर्विशेष्येषूपजायते । तथाच जातौ वृक्षः जातिरत्र विशेषणं प्रति निमित्तभूतं वृक्षत्वम् । नित्यमनेकव्यक्तिवृत्ति सामान्यं जातिः । गुणः सहजो धर्म्मः यथा पटस्य शुक्लो गुणः । क्रिया धात्वर्थः साध्यरूपा तथाच सिद्धं कारकं साध्या क्रिया यथा पक्तुः पाकः ।

द्रव्यं गुणाश्रयः यथा दण्डिनो दण्डः । स्वरूपमजात्यात्मकमसाधारणरूपं यथा डित्थस्य डित्थत्वम् । अर्थवदप्रत्ययधात्विति सिद्धे यत् नञ्द्वयकरणं तत् तत्पुरुषनिरासार्थम् ॥ इत्यादि ।

End. तस्यापत्यं । तस्येति षष्ठ्यन्तमनुकीर्त्य लुप्तपञ्चमीनिर्देशः । षष्ठ्यन्तादपत्येऽभिधेयेऽण् भवति । न पतति वंशो येन जातेन तदिदापत्यं प्रकृत्यर्थो विशेषणं प्रत्ययार्थो विशेष्यः उपगोरपत्यं औपगवः । एको गोत्रे । गोत्रे वंशेऽभिधेये एक एव प्रत्ययो भवति न द्वितीय इत्यर्थः एतत् सूत्राभावादौपगवस्यापत्य मित्यर्थे प्रत्ययः कथं न स्यात् । सत्यं एकेनैवापतनार्थस्य प्रतिपादितत्वात् कथमपरः प्रत्ययः । कथं गार्गायणः एवं वात्स्यायन इति एकेनापतनार्थप्रतिपादितत्वात् पुनः प्रत्ययविधानं प्रशंसार्थमापादयतीति । तेन युक्तं रागात् । रज्जत्यनेनेति रागः रागवाचिनः शब्दात् तेन युक्तमित्यर्थेऽण्प्रत्ययो भवति । कुसुम्भेन रक्तं कौसुम्भं वस्त्रम् । ... ... तस्य समूहे । षष्ठ्यन्तात् समूहेऽर्थेऽण्प्रत्ययो भवति । वायसानां समूहो वायसं काकमित्यादि ।

Colophon. इति मधुसूदनतर्कवागीशात्मज श्रीरमाकान्तचक्रवर्त्तिविरचिते सारनिर्णये तद्धितप्रकरणीयपरसूत्रार्थविवेचनं समाप्तम् ॥

विषयः । कलापे नाम-कारक-समास-तद्धितप्रकरणानां न सन्ति सम्यक् परिस्फुटानि सूत्राणीत्यनेनात्र सारनिर्णये पाणिन्यादिव्याकरणोक्तसूत्राणां विवेचनं कृतम् । तत्र प्रथमे नामप्रकरणम् । द्वितीये विस्तरेण कारकप्रकरणम् । तृतीये समासप्रकरणम् । चतुर्थे संक्षेपतस्तद्धितप्रकरणञ्च ॥

No. 404. सारस्वतप्रदीपः. By विद्याभूषणः. Substance, country-made paper, 14 × 2½ inches. Folia, 47. Lines, 4 on a page, Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha, Serapura, Paṇḍita Durgāsundara Kṛtiratna. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्य देवदेवाय बालानां सुखहेतवे ।
सारस्वतप्रदीपोऽयं पद्यैः संरच्यते मया ॥
अकारादिहकारान्ताः सिद्धवर्णाः प्रकीर्त्तिताः ।
एतद्दुर्गादिसंज्ञाया विधानार्थमिहोदितम् ॥

आद्यन्ताभ्यामिमे याच्चा प्रत्याहारं जिघृक्षता ।
वक्ष्यमाणक्रमेणैव ते तथोक्ताः पुरातनैः ॥ इत्यादि ।

End. पुनर्णवा-चुम्बति-लम्बुतः ।
नरीश्वत्येन नर्णर्त्ति प्रख्यानं चन्द्रगोमिना ।
हरिनाथो विप्रयूना दौर्भागिनेय इत्यपि ॥
चात्रयूना स एव वाक्येनैत्याकृतिगणः स्मृतः ।

Colophon. इति श्रीविद्याभूषणविहतौ सारस्वतप्रदीपे नामविहतिर्द्वितीयः प्रकाशः ।

विषयः । सारस्वतव्याकरणस्य टीका ।

No. 405. सिद्धान्तदीपः. Substance, country-made paper, 13 × 3 inches. Folia, 28. Lines, 6 on a page. Extent, 700 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Paṇḍita Candrakānta Vidyāratna. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः सरस्वत्यै ॥ अथ शब्दप्रमाणं निरूप्यते । तत्र भ्रमप्रमादविप्रलिप्सा-रहितेन पुरुषेण प्रयुक्तं वाक्यं प्रमाणम् । तत्र भ्रमोऽतत्त्वप्रकारकं ज्ञानम् । प्रमादो ऽनवधानता । विप्रलिप्सा प्रतारणेच्छा एभिः प्रयुक्तं वाक्यन्तु न प्रमाजनकं किन्त्वप्रमाजनकमेव ॥ इत्यादि ।

End. किन्तु सर्व्वनाम्नो व्यावर्त्तकत्वाभावादारोपस्योत्कटत्वेन साध्यवसानत्वं अध्यव-सानमुत्कटरूपं अनयोर्लक्षणयोः सादृश्यसम्बन्धहेतुकत्वे गौणीलक्षणाहेतु-कत्वं यथा गौर्व्वाहिको गौरयमित्यत्र । सम्बन्धान्तरहेतुकत्वे तु शुद्धलक्षणात्वं यथा आयुर्घृतमायुरिदमिदमिति ॥ * ॥

Colophon. समाप्तोऽयं सिद्धान्तदीपः ॥ * ॥ श्रीदुर्गा शरणम् ।

विषयः । शब्दप्रमाणनिरूपणमुखेन शक्तिग्रहादिनिरूपणम् । शब्दबोधविशेष्यविशेषण-भावकथनम् । नञर्थविचारः । एवकारव्युत्पत्तिविचारः । सति सप्तम्यर्थनिरूपणम् । क्त्वाप्रत्य-यार्थविचारः । आख्यातवाच्यनिर्द्धारणवाक्यव्युत्पत्तिलक्षणादीनां निरूपणञ्च ।

No. 406. सिद्धान्तरत्नम्. (सटीकम्) By **बलदेवविद्याविभूषणः.** Substance, country-made paper, 12 × 4 inches. Folia, 128. Lines, 12 on a page. Extent, 3,000 çlokas. Character, Nāgara. Date, Samvat 1947. Place of deposit, Hātuā Mahārājā's Library. Appearance, fresh. Prose and verse. Generally correct.

ॐ नमः कृष्णाय ।

वेदास्तथा स्मृतिगिरो यमचिन्त्यशक्तिं

सृष्टिस्थितिप्रलयकारणमामनन्ति ।

तं श्यामसुन्दरमविक्रियमात्ममूर्त्तिं

सर्व्वेश्वरं प्रणतिमात्रवशं भजामः ॥ इत्यादि ।

टीकायाः । श्रीगणेशाय नमः । श्रीश्यामसुन्दरो जयति । ॐ नमः पूर्णप्रमितये गोविन्दाय । यस्य श्रीनन्दनामपीयूषवर्षैरासीद्विश्वं धूततापं किलैतत् । इत्यादि ।

End. आनन्दतीर्थस्रुतमच्युतं मे

चैतन्यभास्वत्प्रभयातिफुल्लम् ।

चेतोऽरविन्दप्रियतामरन्दं

पिबत्यलिः सच्चवितत्त्ववादः ॥ २६ ॥

Colophon. इति सिद्धान्तरत्नाख्ये भाष्यपीठके पुरुषार्थनिर्णयोऽष्टमः पादः ॥ ८ ॥

टीकायाः । इति श्रीगोविन्दभाष्यपीठकटिप्पण्यामष्टमः पादो व्याख्यातः ॥ ८ ॥ लिख्यते राधामोहनव्रजवासिना मया मिते फाल्गुणमासे मासोत्तमे शुक्लपक्षे सोमवारे सम्पूर्णम् । सम्बत् ॥ १९४७ ॥

विषयः । प्रथमपादे, सुखप्राप्तिदुःखपरिहारयोर्लोकप्रवृत्तिदर्शनात् केनोपायेन तौ निष्पद्येते इत्यादि निरूपणप्रसङ्गेन, प्रकृतिपुरुषविवेकादेव त्रिविधदुःखनिवृत्तिर्भवतीति श्रुति-स्मृति पातञ्जल-गौतमादिमतैः निर्णयः । अपिच केन प्रकारेण प्रकृतिपुरुषविवेको जायत इत्यस्यापि नाना-विधविचारपूर्व्वकं स्थापनम् । अस्य च प्रथमपादस्य "परमपुरुषार्थोपायनिर्णय इति" नाम ॥ द्वितीयपादे च, भगवत्प्राप्तिविषये साक्षात् साधनीभूतयोर्ज्ञानभक्त्योरैश्वर्य्यमाधुर्य्यविषयत्वरूपेण द्वैविध्यनिर्व्वाचनम् । एवं के भक्त्या के चापि ज्ञानेन भगवन्तं प्राप्ता इत्यस्यापि विचारपूर्व्वकं निर्व्वाचनम् । भगवतश्चैश्वर्य्यादिनिरूपणञ्च । अस्य च द्वितीयपादस्य भगवदैश्वर्य्यादिनिर्णय इति नाम ॥ तृतीये च पादे, भगवान् सर्व्वेश्वरः जन्मादिविकारशून्य इत्यादीश्वरतत्त्वनिरूपणम् । तस्य च श्रुत्यादिप्रमाणप्रदर्शनपूर्व्वको विचारः । एवं नानारूपमाश्रित्य भगवान् लोकपालनाय पृथिवीमवतीर्णः सन् केन केन नाम्ना भक्तैराहूत इत्यस्यापि निर्व्वाचनम् । एव"मेको ह वै नारायण आसीन्न ब्रह्मा न च शङ्कर" इत्यादिश्रुतिमाश्रित्य विष्णुपरमत्वसिद्धिश्च । अस्य च तृतीय-पादस्य विष्णुपारम्यनिर्णय इति नाम ॥ चतुर्थे च पादे, ब्राह्मणो हि भगवतो मुखं, बाहुश्च क्षत्रियः, वैश्यो ह्यूरू, पादद्वयाच्च शूद्राः समजायन्त इत्यादिकथनम् । स एव भगवान् विष्णुः समस्तस्यास्य जगतः सृष्टिपालने संहारञ्च करोतीत्यादीनां श्रुत्यादिप्रमाणप्रदर्शनेन निरूपणम् । परब्रह्मणोऽपि सगुणत्वनिर्गुणत्वनिर्व्वाचनं कृत्वा वेदस्य नित्यत्वस्थापनञ्च । अस्य च चतुर्थपादस्य

"विष्णोः सर्व्ववेदवेद्यत्वनिर्णय इति" नाम ॥ पञ्चमपादे तु, जीवात्मनोऽज्ञानाद् च प्रपञ्चस्य अद्वैतज्ञाननिवर्त्तनीयत्वमित्यादीनां विचारः। एवं द्वैतमतस्य प्रतिषेधादि पूर्व्वकाद्वैतज्ञानोपायनिर्णयश्च। अस्य च पादस्य "केवलाद्वैतनिरास" इति नाम। षष्ठ च, जीवात्मा हि सगुणत्वदशायामेव समस्तानि कर्म्मफलानि भुनक्ति। मोक्षे तु जाते जीवात्मनि गुणसंसर्गाभावात् अनन्तानन्दब्रह्मभावप्राप्तिर्भवति। इत्यादीनां विचारमुखेन वेदादिप्रमाण-प्रदर्शनम्। एवं निराकारपक्षीयश्रुत्यादीनामन्यविषयव्याख्यया स्वपक्षोपयोगित्वस्थापनं प्रकारान्तरेण केवलाद्वैतनिरूपणञ्च। अस्य च पादस्य विधान्तरेण केवलाद्वैतनिरास इति नाम ॥ सप्तमा-ष्टमयोस्तु पादयोः, पुरुषार्थनिर्णय एव विषयः ॥ बलदेवविद्याविभूषणनामा कश्चिद्विपश्चिद्ब्रह्म-सूत्रेषु गोविन्दभाष्याभिधानं विवरणं निर्म्माय बहुत्वविषयत्वात् तस्य दीर्घाकारत्वं विचिन्त्य तदुपवेशाय स्वर्णपीठं निर्म्मातुमिच्छुः स एव सिद्धान्तरत्नाख्यं पीठकं निर्म्ममे इत्यस्य विशेष-विवरणमिति।

No. 407. सिद्धान्तरत्नाङ्कुरः. By शिवरामः. Substance, palm-leaf, 17×1 inches. Folia, 161. Lines, 3 on a page. Extent, 3,500 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Thānā Rāṇīnagara, grāma Kuṇḍā, Paṇḍita Rāmacaraṇa Nyāyālaṇkāra. Appearance, tolerable. Prose. Correct.

Beginning. नमो गुरवे।

प्रणम्य सर्व्वज्ञपदारविन्दं
गुरुञ्च यत्नाच्छिवरामधीरः।
कातन्त्रशेषाब्धिषु सन्निगूढं
सिद्धान्तरत्नाङ्कुरमातनोति ॥
क्व ममाणीयसी बुद्धिः श्रीपतेर्वचनं क्व वा।
तथाप्यत्र प्रवृत्तस्य कारणं शङ्करस्मृतिः ॥
गोपीनाथादिविदुषां निबन्धाः सन्ति यद्यपि।
तथापि मन्दबुद्धीनां बोधनाय ममोद्यमः ॥

ग्रन्थारम्भे विघ्नविघाताय कृतं हरिनमस्कारं शिष्यशिक्षार्थमादौ निबध्नाति संसारेति। अस्यार्थः। हरिं नत्वा कातन्त्रपरिशिष्टं ब्रूम इत्यन्वयः। कातन्त्रशब्दः कौमारव्याकरणे रूढः। परिशिष्यते यत् तत्परिशिष्टम्। इड्ड्रा-गमादिकार्य्यम्। कातन्त्रस्य परिशिष्टमिति अवयवावयविसम्बन्धे षष्ठ्याः

समासः । कातन्त्राशयभूतं परिशिष्टमित्यर्थः । यद्यपि तत्तत्प्रयोगेषु दृष्टा-गमादयः सिद्धा एव तथापि प्रकृतिप्रत्ययादिभिः प्रतिपदं नोक्तमिति सूत्रादिना निरूप्यन्ते इति न दोषः । इत्यादि ।

End. अथ परे भनविहिते द्वितीयादयः कृदाख्यातसमासादिभिरविहिते प्रथमे-त्युक्तम् । भवन्मते तदभावात् प्रथमा न प्राप्नोतीति परिशिष्यतामित्याह । नाप्नोति । असिद्धेषु उत्पत्तिशून्येषु साधनानि उपाया युज्यन्ते न कदाचि-न्निष्पन्नेषु इति भावः ॥ यथा दृष्टं तथा लिखितमिति ।

Colophon. (आदर्शेऽस्मिन् परिसमाप्तिसूचकं वाक्यं नोपलभ्यते)

विषयः । श्रीपतिदत्तकृतकातन्त्रपरिशिष्टस्य व्याख्यानम् ।

No. 408. सुपद्ममकरन्दः. Substance, country-made paper, 16×3 inches. Folia, 23. Lines, 7 on a page. Extent, 600 çlokas, Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā *viâ* Naihāṭi, Paṇḍita Rāmatāraṇa Ṭhākura. Appearance, tolerable. Prose. Generally correct.

Beginning. अधातुविभक्त्यर्थवदित्यादि । सुवादयो धातवो विभक्तयः सुप्तिङश्च । अधीयानान्तु सुपस्तिङ्क्षः सर्व्वनामकार्य्यं प्रत्येव । इह धातुश्च विभक्तिश्च इति समाहारद्वन्द्वगर्भो नञ्तत्पुरुषो बहुव्रीहिर्वा न पुनर्धातोर्विभक्ति-रिति षष्ठीतत्पुरुषः । इत्यादि ।

End. नक्षत्राधिकरणे तृतीयासप्तम्यौ भवतः । पुष्येणेति । पुष्येण युक्तः कालः । युक्तः कालो नक्षत्रादित्यण् । लुबविशेषे तस्यैवाणो लुप् । एवं मघासु कृत-निर्व्वापः पितृभ्यो मां वसज्जयदिति भट्टिः लुबिति किं मघासु ग्रहः । नक्षत्रेति किं पञ्चालेषु वसति ॥ * ॥

Colophon. इति सुपद्ममकरन्दे षष्ठो बिन्दुः ॥

विषयः । सुपद्मव्याकरणस्य विभक्तिप्रकरणस्य टीका ।

No. 409. सुबन्तदुर्घटः. Substance, country-made paper, 13×2½ inches. Folia, 17. Lines, 9 on a page. Extent, 450 çlokas. Character, Bengali. Date, ? Place of deposit, District Vākuḍā Viṣṇupura, Paṇḍita Rāmavallabha Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. श्रीरामः । सर्व्वविषयव्यापकत्वात् सन्निपाते तु श्वादिप्रकरणे । सूत्रं विधीयताम् । अत्र च लुक् सुपोऽव्ययादि क्रियतां तथा च वृद्धिः स्यात् नामधातुत्वेन सुपोऽव्ययादिति चेन्न सन्निपादविच्छित्तस्थानि- त्वाच पौर्व्वापर्य्यसम्बन्धविच्छित्तत्वाच इति केचित् । तदसत् इह्यादेर्नित्य- दर्शनात् । इत्यादि ।

End. ननु औदित्यकत्वा ओदिति कथं न कृतं नकारस्य ओकारे एजेचोऽता इत्यनेनापि तत्सिद्धेः ॥ उ । जस्शसोर्लुकि पदान्तमकारलुकि च अकारस्य औत्स्यादिति सन्देहः स्यात् । जस्शसोर्लुगित्यस्य पूर्व्वानुवादित्वात् दुरादौ लोपात् ॥

न यत्रां टीक्यते चेतन्मूलं बालावबुध्यते ।
उदिते मन्मतौ भानौ चोततेति परं + + ॥ ० ॥ (?)

Colophon. इति सुबन्तस्य दुर्घटः समाप्तः ॥ ॐ नमः शिवाय ॥

विषयः । सुबन्तपादस्य व्याख्यानम् ।

No. 410. सुरतदीपिका. Substance, country-made paper, 18×3 inches. Folia, 5. Lines, 9 on a page. Extent, 150 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasimha Yaçodala, Pandita Kālicandra Bhaṭṭācāryya. Appearance, old. Verse. Correct.

Beginning. ॐ नमो गणपतये । एतासामेव मधुना रतिरञ्जितानां वामानां चतस्रो वयोदशा बोद्धव्याः उक्ताश्च रतिरहस्ये । इत्यादि ।

End. एभिर्हि बन्धनोपायै यः कामयति कामिनीम् ।
तस्य तुष्टा भवेन्नारी स्वात्मानञ्च समर्पयेत् ॥

Colophon. इति सुरतदीपिकायां चतुर्थाध्यायः ॥ ० ॥

विषयः । नारीणां दशावस्थादिनिरूपणमुखेन तासां रमणोपायादिनिरूपणम् ।

No. 411. सूर्य्यशतकम्. By मयूरशर्म्मा. Substance, country-made paper, 13×3 inches. Folia, 12. Lines, 6 on a page. Extent, 200 çlokas. Character, Bengali. Date, ? Place of deposit, Kāṭhālpāḍā *via* Naihāṭi, Pandita Rāmatāraṇa Ṭhākura. Appearance, old. Verse. Generally correct.

ऽ. ॐ नमः श्रीसूर्य्याय ।

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सक्तैरिवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकालं कमलवनरुचे वारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥ इत्यादि ।

End. देवः किं बान्धवः स्यात् प्रियसुहृदथवाचार्य्य आहोस्विदार्य्यो
रक्षा रत्नं प्रदीपो गुरुरुत जनको जीवितं बीजमोजः ।
एवं निर्णीयते यः क इति च जगतां सर्व्वदा सर्व्वदासौ
सर्व्वाकारोपकारी दिशतु दशशताभीषुकेयन्नितम्वः ॥ (?)

Colophon. इति श्रीमयूरशर्म्मकृतं सूर्य्यशतकं समाप्तम् ।

विषयः । श्रीसूर्य्यदेवस्य स्तवः ।

No. 412. **सूर्य्यशतकस्तोत्रटीका.** By **जगन्नाथशर्म्मा**. Substance, country-made paper, 12×1 inches. Folia, 28. Lines, 4 on a page. Extent, 600 çlokas. Character, Bengali. Date, ? Place of deposit, Ḍhākā, Paṇḍita Candrakānta Nyāyālaṃkāra. Appearance, old. Prose. Generally correct.

Beginning. ॐ गणेशाय नमः ।

यस्मिन्नस्तमिते यतः सुवनुते(?)ऽप्युद्गच्छतीदं जग-
ज्जुष्टं दृष्टिविशिष्टहृष्टजनताभिः सर्व्वदायं भवेत् ।
रात्रौ रात्रिकरप्रभानिकरतोऽहःपद्मशोभाकरः
पद्मिन्या विरही प्रभाकरकरप्रोत्साद + + + भजे ॥
यं नत्वा त्वजरं वपुः सुरगणाः संप्रापुरेनःकुले-
र्मुक्ता मुक्तिविरोधिभिर्मुनिगणाः संस्तूय दिव्यैः स्तवैः ।
तं नत्वा कवितार्थसूर्य्यशतकस्तोत्रस्य टीका जग-
न्नाथेनैव सुतन्यते हितकरी केलिश्च विद्वत्प्रिया ॥
पुरा किल शरचन्द्रखण्डमण्डितकपालकपालितारकब्रह्मदानवारितचेतश्चीर्ण-कलेवरो वाराणस्यामशेषशास्त्रविचारसङ्ग्रामवेदवेदान्तादिविद्याविनवेतन-प्रदीकृतानेवासिभटजिताशेषब्रह्माण्डभाण्डोदर + + सुण्डमण्डनविद्वद्-गणवैरी रीतिचयान्वितकवितात्याजितकविराजराजिकाव्यसुजातगर्व्व स्तपः-खर्व्वीकृताशेषतपोधनो महामहोपाध्यायः श्रीमन्मयूरभट्टः पूर्व्वजन्मदुरदृष्ट-

हेतुकगलितकुहज्जुष्टो ग + + + समो वान्धवस्कन्धावलम्बी
मन्दिरसङ्कीर्णद्वारावलम्बनाशक्तास्तस्मादुपविष्टः पूर्व्वजन्मदुरदृष्टदुष्कृ
षनोद्गेमुर्यान्त्रिवाशीत्वाद्दिव्याजेन रश्मिराजिरयमण्डल × × × मेव
वर्न्नं स्तौति जम्भारातीभेति। अस्यार्थः। भानवीयाः सूर्य्यसम्बन्धिनो
भानवो रश्मयः वो युष्माकं विभूत्यै विशेषसम्पत्तये भूयासुरित्यन्वयः। इत्यादि।

End. कौस्तुभपारिजातचन्द्रामृतप्रभृतयो न वान्धवा भ्रातरः पाणौ हस्ते पद्मं मच
नरकरिपोर्विष्णोरुरःस्थलौ वक्षःस्थलं वासवेश्म वसति + + + + + +
+ वा आदधाना धारयन्तौ ॥ ४१ ॥

Colophon. इति श्रीजगन्नाथशर्म्मविरचित-श्रीसूर्य्यशतकस्तोत्रटीकायां रश्मिवर्णनं समाप्तं ॥

विषयः। मयूरभट्टकृतसूर्य्यशतकाभिधानस्तोत्रस्य रश्मिवर्णनाम्नं व्याख्यानम् ॥

No 413. स्तवमाला. By रघुनाथगोस्वामी. Substance, country-made paper, 12 × 4 inches. Folia, 44. Lines, 10 on a page. Extent, 1,400 çlokas. Character, Bengali. Date, ? Place of deposit, District Vãkuḍā Kuckol, Bābu Yogindranātha Simha Deva. Appearance, old. Verse. Generally correct.

Beginning. ॐ श्रीश्रीकृष्णचैतन्यचन्द्रो जयति ॥
गतिं दृष्ट्वा यस्य प्रमदगजवर्य्योऽखिलजना
मुखञ्च श्रीचन्द्रोपरि दधति थुत्कारनिवहम्।
स्वकान्त्या यः स्वर्णाचलमधरयेच्छौधु च वच-
स्तरङ्गैर्गौराङ्गो हृदय उदयन्मां मदयति ॥
अलङ्कृत्यात्मानं नवविविधरत्नैरिव वल-
द्विवर्णत्वस्तम्भास्फुटवचनकम्पाश्रुपुलकैः।
हसन् स्विद्यन् नृत्यन्निति गिरिपतेर्निर्भरमुदा
पुरः श्रीगौराङ्ग इति ... ... ॥ इत्यादि ॥

End. यत्पादाम्बुजयुग्मविच्युतरजःसेवाप्रभावादहं
गान्धर्व्वासरसो गिरीन्द्रनिकटे कष्टोऽपि नित्यं वसन्।
तत्प्रायो गणपालितो जितसुधाराधामुकुन्दाभिधाः
उद्गायामि शृणोमि मां पुनरहो श्रीमान् स रूपोऽवतु ॥

Colophon. इति श्रीमद्रघुनाथदासगोस्वामिना विरचिता स्तवमाला समाप्ता ॥ ० ॥

। गौराङ्गस्तवः । गोवर्द्धनस्तवः । व्रजविलासस्तवः । राधाष्टकं । नन्दाष्टकं ।
ष्टकं । चैतन्यचन्द्राष्टकञ्च ।

No. 414. स्मरणमङ्गलैकादशकम्. By रूपगोस्वामी. Substance, yellow paper, 13 × 3½ inches. Folia, 6. Lines, 2½ on a page. Extent, 35 çlokas. Character, Bengali. Date, ? Place of deposit, Āgaḍtalā Vṛddhanagara, Paṇḍita Mineçvara Sārvvabhauma. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीराधाकृष्णाभ्यां नमः ।
श्रीराधाप्राणबन्धोश्चरणकमलयोः केशशेषाद्यगम्या
या साध्या प्रेमसेवा व्रजचरितपरै गाढ़लौल्यैरलभ्या ।
सा स्यात् प्राप्ता यया तां प्रथयितुमधुना मानसीमस्य सेवां
भाव्यां रागाध्वपान्थव्रजमनुचरितं नैत्यिकं तस्य नौमि ॥ इत्यादि ।

End. ताम्बूलैर्गन्धमाल्यै र्व्यजनहिमपयः-पादसम्बाहनाद्यैः
प्रेम्णा संसेव्यमानौ प्रणयिसहचरीसञ्चयेनाप्तशातौ । (?)
वाक्कायान्तेरितािभिर्निभृतरतिरसैः कुञ्जसुप्तालिसङ्घौ
राधाकृष्णौ निशायां सुकुसुमशयने प्राप्तनिद्रौ स्मरामि ॥

Colophon. इति श्रीमद्रूपगोस्वामिना विरचितं श्रीराधाकृष्णयोरष्टकालिकलीलावलि-
स्मरणमङ्गलं समाप्तम् ॥

विषयः । श्रीराधाकृष्णयोर्निशान्ताद्यष्टकालिकविहरणरूपमङ्गलस्मरणम् ॥

No. 415. स्मृतितत्त्वविनिर्णयः. By रामभद्रः. Substance, country-made paper, 15½ × 3 inches. Folia, 163. Lines, 7 on a page, Extent, 4,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Sākhuyāri Kulapura, Paṇḍita Vrajakānta Smṛtipañcānana. Appearance, fresh. Prose and verse. Correct.

Beginning. ॐ नमो दुर्गायै ।
विलोक्य बहुशास्त्राणि रामभद्रकृती स्मृतीः ।
विदधाति यथैकत्र स्मृतितत्त्वविनिर्णयम् ॥
प्रायशः सङ्कल्पानामेव कर्म्मणामारम्भकलादादौ स एव निरूप्यते । इत्यादि ।

End. शूद्रस्य मार्कण्डपुराणमिति यदुक्तं तदापद्विषयबलाङ्गोजनविषयम्
विषयं वेत्ति शूलपाणिः ॥ ० ॥ श्रीः ॥

विषयः । नित्यनैमित्तिककर्म्मादीनां व्यवस्थादिः ।

No. 416. स्मृतिसंक्षेपः. By नरोत्तमः. Substance, country-made paper, 16×3 inches. Folia, 14. Lines, 6 on a page. Extent, 1,100 çlokas. Character, Bengali. Date, ? Place of deposit, District Mayamanasiṁha, Nahātā, Paṇḍita Haracandra Vedāntavāgīça. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमस्तारायै ।
अज्ञानतिमिरध्वंसि संसारार्णवतारकम् ।
मुक्तिप्रदं पदं यस्य नत्वा संगृह्यते मया ॥
चूर्णकेन सुबोधेन नरोत्तमद्विजेन वै ।
कथ्यते स्मृतिसंक्षेपं शृण्वन्तु द्विजसत्तमाः ॥
अथाशौचसंक्षेपः । इत्यादि ।

End. अथ षोड़शदानम् ।
भूम्यासनं जलं वस्त्रं प्रदीपोऽन्नं ततः परम् ।
ताम्बूलं छत्रगन्धञ्च माल्यं फलमतःपरम् ।
शय्या च पादुका गावः काञ्चनं रजतन्तथा ॥

Colophon. श्रीकालीपदे मम मतिरास्ताम् ॥ ० ॥

विषयः । अशौचादिनिरूपणमुखेन सद्यमरणव्यवस्था मुमुर्षुकृत्यादिनिरूपणम् । तथा षोड़शदानादिनिरूपणञ्च ।

No. 417. स्मृतिसर्व्वस्वम् . By नारायणः. Substance, country-made paper, 15×3 inches. Folia, 194. Lines, 7 on a page. Extent, 5,000 çlokas, Character, Bengali. Date, Sk. 1754. Place of deposit, District Vāṅkuḍā Viṣṇupura, Paṇḍita Rāmānuja Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. श्री गणेशाय नमः ।
सर्व्वकर्म्मनिमित्तस्य मासस्यादौ निरूपणम् ।
चान्द्र-सौर-सावन-नाक्षत्रिकाश्चतुर्विधाः ॥

तत्र शुक्लप्रतिपदादिदर्शान्तो मुख्यश्चान्द्रः । कृष्णप्रतिपदादिपूर्णिमान्तो गौणः । यत्तिथ्यादि तत्तिथ्यन्तोऽन्यश्च । यथा कृष्णद्वितीयादिकृष्णद्वितीयान्तः । किन्त्वत्र पूर्व्वतिथिं त्यक्त्वा गणना अतस्त्रिंशत्तिथ्यात्मकः स्यात् । तेन यदि शुक्ला पञ्चमी क्षततिथिस्तदा तां त्यक्त्वा शुक्लषष्ठीमादाय गणनया परशुक्लपञ्चमीपर्य्यन्तो मासस्तत्र प्रथममासिकः स्यादेवम् । इत्यादि ।

End. दिवा सन्ध्यायाञ्च नैव स्त्रीगमनम् । ततो मृज्जलाभ्यां शौचं मूत्रवत् कृत्वा स्नायादृतौ तु न स्नानम् । नार्य्यास्तु न स्नानम् । मैथुनात् परं शौचात् पूर्व्वं मलमूत्रोत्सर्गो न करणीयः । उपवासं कृत्वा पराह्ने पुष्यर्क्षे श्वेतपुष्पायाः कण्टकारिकाया मूलमुत्थाप्य ऋतुस्नातायाश्च चतुर्थेऽहनि प्राक्शिरः संविष्टाया दक्षिणनासापुटे निशि उदकेन पिष्ट्वा दक्षिणाङ्गुष्ठानामिकाभ्यां गृहीत्वा पतिः ।

ॐ औषधीस्त्रायमाणा सहमाना सरस्वती ।
अस्याहं बृहत्याः पुत्रः पितुरिव नाम जनयेत् ॥

इति मन्त्रं पठित्वा नस्यं दद्यादिति स सुपुत्रं जनयतीति । परञ्च पिप्पलीमरीचार्द्रकनागकेशरचूर्णमाज्यमिश्रितं चिरं भुञ्जीतेति ॥ रतिसम्बन्धिरात्रिवासः परिधाय वैधकर्म्म न करणीयमिति शिवम् ॥ * ॥

गुरूणां पादपद्मानां कृपया समुपार्ज्जितम् ।
नारायणीयं सर्व्वस्वं पुत्रपौत्रेषु तिष्ठतु ॥
धीरा धीरवराः सुनिर्म्मलधियो वेदाविदाम्नानदाः (?)
काव्यव्याकरणाद्यशास्त्रनिपुणा विद्याकराः सत्वराः ।
पुस्तीयं सुकृता मया मितधियाश्वार्थे भ्रमाद्दिद्यते-
ऽस्यां दुष्यं परिचिन्त्य चेदिति वदेत्तद्दूषणीयं तदा ॥ * ॥

Colophon. इति स्मृतिसर्व्वस्वं समाप्तम् ॥ * ॥ शकाब्दाः १७५४ ॥ ॐ रामः शरणम् ।

विषयः । मासादिनिरूपणम् । मलमासे कर्त्तव्याकर्त्तव्यादिनिरूपणम् । अद्भुतादिनिरूपणम् । एकादशीद्वादश्यादितिथिकर्म्मव्यवस्थादिः । अष्टकामघात्रयोदश्यादिव्यवस्था । आसन्नमृत्युकृत्यान्त्येष्टिक्रियादिनिरूपणम् । श्राद्धादिनिरूपणम् । अशौचादिव्यवस्था । द्रव्यशुद्ध्यादिनिरूपणम् । प्रायश्चित्तादिनिरूपणम् । विवाहादितिथिनक्षत्रादिनिरूपणम् । गण्डादियोगनिरूपणम् । विवाहादिनिरूपणम् । दशफलादिनिरूपणम् । अरिप्रध्वंसादियोगनिरूपणम् । दायभागव्यवस्थादिः । आह्निकादिनिरूपणम् । तर्पणादिनिरूपणम् । ऋत्वभिगमनादिनिरूपणञ्चेति ।

No. 418. **स्वप्रकाशरहस्यम्.** Substance, country made paper inches. Folia, 12. Lines, 7 on a page. Extent, 500 çlokas. Ci ter, Bengali. Date, ? Place of deposit, District Pharidpura, Parg Idilpura, Post Office Pālangga grāma, Dhānukā, Pandita Rajanikānta Tarka ratna. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः सरस्वत्यै । प्रभाकरस्त्वेवमाह । ज्ञानं नानुव्यवसायग्राह्यं परन्तु स्वयमेव स्वस्वाश्रयमात्मानञ्च गृह्णाति एवञ्च घटज्ञात्याद्याकारकव्यवसाय एव घटमहं जानामीत्याकारकः तस्य च मितिमात्रं ...... प्रत्यक्षरूपता घटादिरूपमेयांशे च क्वचित् प्रत्यक्षरूपता क्वचिच्चानुमित्यादिरूपता । अथैव-मांशिकतया प्रत्यक्षत्वादीनां जातित्वानुपपत्तिरिति चेदिष्टमेवैतत् गुणगत-जातिमनङ्गीकुर्व्वतामस्माकं । ननु तर्हि किमिदमंशे प्रत्यक्षत्वं न तावत् तद्‌ दृत्तीन्द्रियसन्निकर्षजन्यत्वं तन्मते ज्ञाननिष्ठेन्द्रियसन्निकर्षस्य ज्ञानग्रहाजनक-त्वात् ज्ञानांशे प्रत्यक्षत्वानुपपत्तेः नापि तद्विषयकज्ञानाजन्यत्वं ज्ञानानु-मित्यादीनां ज्ञानविषयकपरामर्शजन्यतया ज्ञानांशे प्रत्यक्षरूपतानुपपत्तेः । न चेष्टापत्तिः मितिमात्रप्रकाशे सर्व्वमेव प्रत्यक्षमित्यादिग्रन्थविरोधात् । यच्च तत्वानुमेयज्ञानांशे प्रत्यक्षात्मकत्वं नोपपद्यत एव परन्तु स्वात्मकज्ञानांश एव तच्च नानुपपद्यं स्वस्य स्वविषयकज्ञानाजन्यत्वात् न च यत्र स्वविषयकपरा-मर्शात् स्वविशेष्यकानुमितिः तत्र का गतिरिति वाच्यं सामान्यलक्षणायाः प्रत्यासत्तित्वं मन्यमानानामस्माकं स्वपूर्व्वविषयकज्ञानस्यैवासम्भवात् ॥ इत्यादि ॥

End. अतो न्यायनये घटज्ञानवानहमित्यादिशब्दबोधे योग्यताज्ञानहेतुताकल्पना-धिक्यात् गौरवं अप्रकाशमते घटादिरूपपदार्थोपस्थितिरेव योग्यताज्ञाना-त्मिका तथैवात्मादिरूपैकपदार्थतादृशज्ञानादिरूपापरपदार्थवत्त्वरूपयोग्यताया नियमतोऽवगाहनात् । अतः पदार्थोपस्थितिहेतुतयैव वा निर्व्वाहेण न तत्र योग्यताज्ञानस्य हेतुत्वान्तरकल्पनमित्येतदपि हेयमेव नैयायिकमते दर्शित-बहुलाघवेन तादृशाल्पगौरवस्याकिञ्चित्करत्वादिति ॥

Colophon. इति स्वप्रकाशरहस्यम् ॥

विषयः । प्रमात्वं स्वतो ग्राह्यमिति केचिद्वदन्ति गुरूणां मते ज्ञानस्य स्वप्रकाशकत्वात् तत् ज्ञानप्रामाण्यं तेनैव गृह्यते भट्टानां मते ज्ञानमतीन्द्रियं मुरारिमिश्राणां मते अनुव्यवसायेन ज्ञानस्य प्रामाण्यं गृह्यते इत्यादिविप्रतिपत्तिनिरासः ।

419. स्वर्गसाधनम् . By रघुनन्दनभट्टाचार्य्यः. Substance, country-paper, 18 × 5 inches. Folia, 48. Lines, 7 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, ? Place of deposit, Naihāṭi, District 24-Parganās, Mahāmahopādhyāyā Paṇḍita Haraprasāda Çāstrī. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

क्रियाधिकारिणो वाच्यास्तथा चान्त्येष्टिपद्धतिः ।
अशौचनिर्णयोऽशौचविहितायाश्च क्रियापि च ॥
दानक्रिया वृषोत्सर्गं श्राद्धश्राद्धादि षोड़श ।
प्रतिसंवत्सरश्राद्धं तथा पार्व्वणतीर्थकम् ॥
विशेषोऽपरपक्षस्याप्यमावास्यां व्रतस्य च ।
उच्यते चात्र संक्षेपात् रघुनन्दनशर्म्मणा ॥ अथाधिकारिणः । इत्यादि ॥

End. संक्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा ।
श्राद्धे जन्मदिने चैव न कुर्य्यात् तिलतर्पणम् ॥
प्रतिप्रसवमाह ।
अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च ।
उपाकर्म्मवृषोत्सर्गे युगादौ मतवासरे ॥
रविशुक्रदिने चैव न दुष्येत् तिलतर्पणम् । तीर्थेऽपि न दोषः ।
तीर्थमात्रे तु कर्त्तव्यं तर्पणं सतिलोदकैः ।
अन्यथा कारयेत् यस्तु स विष्ठायां कृमिर्भवेत् ॥
आब्रह्म स्तम्बपर्य्यन्तं जगत् तृप्यत्विति क्रमात् ।
अञ्जलित्रितयं दद्यादिति संक्षेपतर्पणम् ॥

Colophon. इति रघुनन्दनभट्टाचार्य्यकृतः स्वर्गसाधनाख्यो ग्रन्थः सम्पूर्णः ॥०॥

विषयः । क्रियाधिकार्य्यन्त्येष्टिपद्धत्यादिक्रियानिचयानां संक्षेपेण निरूपणम् ।

No. 420. हंसदूतटीका . By नृसिंहः. Substance, country-made paper, 12 × 2½ inches. Folia, 17. Lines, 13 on a page. Extent, 650 çlokas. Character, Bengali. Date, ?. Place of deposit, District Vāṅkuḍā, Viṣṇupura, Paṇḍita Rāmavallabha Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः श्रीकृष्णाय ॥

योगीन्द्रैः शुकनारदप्रभृतिभिर्मन्याभिरं भावितं
सानन्दं विधिशङ्करामरगणैर्वन्द्यं सदाभीष्टदम् ।
श्रीराधाललितादिभिः सुललितैर्भावैर्मुदाराधितं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥
वन्दे सनातनं नित्यं रूपञ्च स्वामिनं परम् ।
यो × × हंसदूताख्यं कृतं काव्यं सुदामयम् ॥
ध्यात्वा श्रीरूपचरणं मूढधीरप्यहो सदा ।
तद्व्याख्यानं वितनुते श्रीमहेशो यथामति ॥
किन्तु मर्षध्व चापल्यं मम मूढस्य सूरयः ।
बालकानां सुबोधार्थं व्याख्यानं क्रियते मया ॥
यदत्र न्यूनमधिकं विरुद्धार्थञ्च यद्भवेत् ।
तत्सर्वं पण्डितैः शोध्यं शिरसैव कृतोऽञ्जलिः ॥
अथ परमभागवतः कविकुलधुरीणः श्रीरूपगोस्वामी अनवरतश्रीकृष्णचरितनिमग्नचित्तोऽपि काव्योपदेशेन हंसदूताख्यं प्रबन्धमभाण इष्टदेवतास्मरणरूपं मङ्गलमाचरति । दुकूलमित्यादि । कोऽपि अनिर्व्वचनीयः पदार्थः मे मम हृदि मनसि स्फुरतु आविर्भावं करोतु प्रार्थनायां लोट् । इत्यादि ।

End. अखिलत्वात् शेषो नास्ति ।

विषयः । श्रीरूपगोस्वामिप्रणीतस्य हंसदूताख्यकाव्यस्य व्याख्यानम् ।

No. 421. हरिकेलिकलावती. By कविकेशरी. Substance, country-made paper, 14 × 3 inches. Folia, 14. Lines, 5 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Vaidyervāzār grāma, Kṛṣṇapurā, Paṇḍita Kālikṛṣṇa Vidyāvinoda. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः श्रीकृष्णाय । ॐ नमः श्रीराधायै ॥

प्रणिपत्य हरिं चरणाम्बुजभवप्रभुरामरकोटिनुताङ्घ्रियुगम् ।
हरिकेलिमहं कलयामि गुरोश्चरणाम्बुजचुम्बिमनोमधुपः ॥

अथ बाहुजकैतवजातमहासुरसैनिकभारविषण्णतरा ।
धृतधेनुतनूररविन्दभुवोऽगमदन्तिकमश्रुमुखी वसुधा ॥
अधिगम्य तदीरितमाधिकरं सुरसिद्धमुनिप्रकरेण युतः ।
स च दुग्धपयोनिधितीरगतः प्रणिपत्य निवेदितवान् हरये ॥
प्रणयाच्च विधेरवनेश्च शुचः सुकृताच्च यदोः परमः पुमान् ।
स च सावततार निहन्तुमरीन् वसुदेवगृहे सह लाङ्गलिना ॥
भगवान् सकृपो व्रजवासिगणे प्रतिपद्य स नन्दगृहं हलिना ।
बहुलोदितमङ्गलकेलिकुलैरथ गोकुलदेशमलङ्कृतवान् ॥
अवतंसितपुष्पितपल्लवकं यमुनातटिनीपतले मिलितम् ।
समवेक्ष्य ततो हरिरेति सखी ललितोक्ति... मवदत् ॥ इत्यादि ॥

End.

इति कंसरूपं विनिहत्य रणोन्मदलाङ्गलिघातितबन्धुगणम् ।
पितरौ च ववन्द ननन्द यदूनथ नन्दमुखान् विससर्ज च सः ॥
उपसुप्तपदोत्तरसेनमसौ कृतवान् मथितारिपदे भगवान् ।
विजहार च तत्र पुरे रमणीरमणीयमहोत्सवरङ्गपरः ॥
इति... धरणेरवतीर्य धुरं जगदेकधुरन्धर एष हरिः ।
... ... ॥
चरितस्य हरेरिदमेव परं शुकदेवमुखोदितमाधिचरम् ।
अधिगम्य महामुनिभागवताद्गणितं शृणुत प्रयतेन मया ॥
इति × लघुचिन्तनजातशतोत्तरविंशतितोटकबन्धपदा ।
कविकेशरिणा हरिभक्तिमता हरिकेलिकलावतिका रचिता ॥

Colophon. इति हरिकेलिकलावत्यां कंसवधो नाम पञ्चमः सर्गः ॥

विषयः । अस्ति चास्मिन् शतिसङ्कुले पञ्चसर्गात्मके खण्डकाव्ये तत्रभवतो भगवतः श्रीहरेश्चरितवर्णनम् । तत्र प्रथमसर्गे,— गोपवेशधरस्य गोष्ठं गतस्य भगवतो दर्शनाय रुचिराननवतीप्रभृतीनां गोपरमणीनां संवादः । द्वितीयसर्गे,— गोष्ठस्थितेन भगवता गोविन्देन समं गोपीनां सङ्गमवर्णनम् । तृतीयसर्गे,— रासविहारवर्णनम् । चतुर्थसर्गे,— भगवतः कंसपुरदर्शनम् । पञ्चमसर्गे,— कंसवधश्चेति ॥

No. 422. **हरिनामार्थतत्त्वम्** . By **दासगोस्वामी** . Substance, made paper, 12×5 inches. Folia, 4. Lines, 8 on a page. Extent ... çlokas. Character, Bengali. Date, ? Place of deposit, Agartala, Vṛddhanagara, Tripurā, Paṇḍita Mīneçvara Sārvvabhauma. Appearance, tolerable. Verse. Generally correct.

Beginning. अथ महामन्त्रः ।
लोकानामुद्धरणार्थं हरिनाम प्रकाशयेत् ।
यस्मादिह मुच्यते लोको महापापं कलौ युगे ॥
हरेकृष्णपदद्वन्द्वं ... ... इत्यादि ।

End. हकारस्यामला ख्याता रे महाबाहुरेव च ।
हकारे मङ्गला देवी रेकारे च सुमेधसः ॥
... ... ।
हरिनामानुसेविनां कुञ्जकोट्यानु संस्थितिः ॥

Colophon. इति श्रीदासगोस्वामिना विरचितं हरिनामार्थतत्त्वम् ॥

विषयः । " हरे हरे " इति नाम्नो नानाप्रकारेण व्याख्यानम् ।

Addenda to No. 360.

(शिवतत्त्ववटीकायाः) ।

ननु पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति ॥

स्मृत्युक्तचतुर्दशविद्यास्थानबहिर्भूतत्वात् तन्त्रमार्गस्य तदन्तर्गतशिवतत्त्वग्रन्थस्यापि तथात्वात्तदन्तर्गतान्यकृत्यन्तराण्यपि मलमूलाभावान्न व्याख्येयानि । ननु ज्योतिषिकानां ग्रहणमिव कौलिकानामपि निग्रहानुग्रहादिकं प्रत्यक्षं फलमस्ति श्रुतिमूलकत्वेऽनुपपन्नं सत् तच्छास्त्रस्य श्रुतिमूलत्वं द्रढयति । तथा मन्वादिस्मृतीनामिव तन्त्राणामपि वेदमूलत्वं कृत्वा युक्तं व्याख्येयत्वमिति चेन्न । भाषामन्त्राणामपि प्रत्यक्षफलत्वेन श्रुतिमूलकत्वापत्तेः । न चेष्टापत्तिः गावी गोणीत्यादिभाषाणामशक्तिजापभ्रंशरूपत्वात् । अपभ्रष्टस्वरूपवर्णस्य वेदशब्दस्य ।

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
सर्व्वो वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधादित्यनर्थहेतुत्वस्मरणात् ॥

तथाच तैत्तिरीयास्त्वष्टा हतपुत्र इत्यनुवाके इन्द्रस्य शत्रुं शातयितारं पुत्रमिच्छन् त्वष्टा स्वाहेन्द्रशत्रुर्वर्द्धस्वेति मन्त्रे इन्द्रशत्रुपदमन्तोदात्तं न प्रयुक्तवान् । किन्तु मौढ्यादुदात्तमेव युक्तं तेनेन्द्र एव तत्पुत्रनाशकोऽभूत् इत्यामनन्ति । तस्माद्भाषामन्त्राणां शबरादिसिद्धवचस्त्वादेव वीर्य्यवत्त्वम् । न वेदमूलकत्वसिद्धिः । तेष्वपाठात् । किञ्च युक्तवर्णास्तत्तत्सिद्धवचनात् भाषादिबीजभावेन संहता आवर्त्त्यमानाः सन्तस्तद्बीजार्थभूतां देवतामभिमुखीकुर्व्वन्तीति । अक्षरास्तु संख्यामन्त्रवाचिनः । न किञ्चित्त्वमभिमुखीकर्त्तुं शक्नुवन्ति । तेषां तद्वाचकत्वात् । तस्मादवैदिकत्वादवेदमूलत्वात् अनर्थकत्वाच्च न व्याख्येयान्यक्षरयन्त्राणीति प्राप्ते ब्रूमः । न तावन्मन्त्राणां चतुर्द्दशविद्यास्थानबहिर्भूतत्वमस्ति पुराणपदेनैव भारतादीतिहासानामिव तेषामपि संग्रहात् । तेन तद्वदेवैषां श्रुतिमूलकत्वेन प्रामाण्यम् । सर्व्वेश्वरप्रणीतत्वेन भगवद्गीतादिवदभ्यर्हितत्वञ्च । नापि तद्गतानां मन्त्राणां पौराणमन्त्राणामिव वैदिकत्वमस्ति । सामराजादिविद्यानां प्रत्यक्षेण श्रुतिष्वेवोपलभ्यमानत्वात् । दर्शयन्ति चागमविदः श्रुतिष्वेव मन्त्राणामुद्धारम् । श्रीमन्महाभागवते यन्त्ररामायणे चास्माभिरपि कृष्णषडक्षर-रामषडक्षरयोरुद्धारो दर्शितो दाशतयीष्वेव । तस्मात्तन्त्राणां वेदमूलत्वं तन्त्रस्थमन्त्राणां वैदिकत्वञ्च सिद्धम् । एवं भाषामन्त्राणां अक्षरानुपूर्व्व्या अवैदिकत्वेऽपि तदर्थानां वैदिकत्वादेव वीर्य्यवत्त्वम् । यथा व्यासादिप्रणीतानां विष्णुसहस्रनामस्तोत्रादीनाम् । अवैदिकस्य मन्त्रतन्त्रादेरदृष्टद्वारेण सर्व्वथाप्यर्थसाधकत्वसम्भवात् । सम्भवति च व्यासशबरादीनां संस्कृतभाषया देशभाषया वा वेदार्थग्रन्थनसामर्थ्यम् । तपःप्रभावनिबन्धनञ्च तद्ग्रथितायाः वर्णानुपूर्व्व्या अवैदिकत्वेऽपि तदर्थानां वैदिकत्वादेव वीर्य्यवत्त्वगतिकृत्समर्थार्थकारित्वम् । (?) तस्मात् सिद्धं पौराणमन्त्राणां भाषामन्त्राणाञ्च वैदिकत्वम् । आनुपूर्व्वीभेदाच्च सर्व्वेषां वर्णानामनुलोमप्रतिलोमज्ञानाच्च यथासम्भवमेषामुच्चारणेऽधिकार इति । न किञ्चिदवद्यम् । यत्तु असत्त्ववाचिनो कान (?) किञ्चित्तत्त्वमभिधातुं सन्निधापयितुं वा समर्था इत्यनर्थकानि तन्मयानि यन्त्राणि इत्युक्तम् । तत्रोच्यते । यथा भूबीजाङ्कुरतद्रूपमध्यसहस्रदलविराट्संज्ञं (?) चतूरूपं

शब्दक्रमेण परापश्यन्ती मध्यमा वैखरीतिभेदेन (?) चतुर्विध-
वाच्यम्। यथा च तरौ स्कन्धशाखादिकं फलानि शलाटवश्चैवं वि-
कृतत्वं वियदादि जडयूथं देवतावर्गो जीववर्गश्च। तथाकारो वै सर्वा
वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति विराड्वाचिनो-
ऽकारस्य कृत्स्नवाङ्मयत्वं श्रुतमिति यावान् वाच्यो व्यूहस्तावान् वाचक-
व्यूहोऽपि वाग्विभूतिरूपः। तथाच श्रुतिः। यावद्ब्रह्मविशिष्टः तावती
वागिति। एवं सति संख्यावाचिनोऽप्यङ्काः संख्येयं देवतादिसङ्घं वा देवता-
वाचि यदवयवभूतवर्णसङ्घं वाभिदधति। दृष्टश्चैतल्लोकवेदयोर्यत्सङ्घानां
संख्यावाचित्वम्। तथाद्यं भूमिर्यमावग्नयो वेदा वर्णा रसाः ऋषयो गजा
वसवः दिशो रुद्राश्चादित्या विश्वे मनवस्तिथयः कला इति सङ्घाना-
मेकत्वादि(?)संख्यावाचित्वं ज्योतिषे छन्दोविचित्यां च प्रसिद्धम्। तथा द्वितीय-
मपि चर्योविद्या द्वादशशतं दक्षिणा दशेन सचवदक्षिणेन यजेतेत्यादौ
संख्यया वेदगवादिकमेवाभिधीयते न लोकसुवर्णादि।

एवमेकपादे विनिश्चित्य नौश्चतुर्भिर्वशीकुरु।
पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव॥
एकायनोऽसौ द्विपदस्त्रिमूलश्चतूरसः पञ्चविधः षडात्मा।
सप्तत्वगष्टविधो नवाक्षो दशच्छदी द्विज(?) गोष्ठ्यादिष्च इत्यादौ॥

एकादिशब्दैर्बुद्धीश्वरादितत्त्वाभिधानाच्च प्रसिद्धम्। न च संख्यायाः संख्येय-
विशेष्यवाचित्वेनेयमर्थलक्षणा दोषः। ईश्वरसंकेतप्रकृप्तार्थत्वात्। स्वं सङ्केत-
प्रकृप्तार्थं नेयार्थमिति भण्यत इत्याकरे चाधुनिकसंकेतप्रकृप्तार्थस्यैव नेयार्थ-
त्वाभिधानात्। ईश्वरसङ्केतप्रकृप्तार्थत्वञ्चैषां एकस्मै स्वाहा द्वाभ्यां स्वाहेति
चतुर्थ्या संख्यावाचिनां शब्दानां देवतावाचित्वावगमादङ्कयन्त्रप्रज्ञापकमन्त्र-
लिङ्गाच्चावगम्यते। तथाहि श्रूयते।

द्वात्रिंशं षड्विंशांश्चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम्।
यज्ञं विमाय कवयो मनीषा ऋक्सामाभ्यां रथं प्रवर्त्तयन्ति॥

अस्यार्थः। कवयो यज्ञं विना ऋक्सामाभ्यां रथं प्रवर्त्तयन्तीत्यन्वयः। कवयः
क्रान्तदर्शिनः। यज्ञं य इति कादि नव टादि नव पादि पञ्च याद्यष्टा-
विंशत्यागमप्रसिद्धरीत्या य एक उच्यते। ज्ञ इति जकारञकारयोर्योगे च
ज्ञ श्रुतत्वात्। शून्यवाची नुंकारो ऽनर्थकः तेन ज्ञ इत्यष्टावुच्यन्ते। तामिमां
नवसंख्यां विमापविधेन रूपेण नीत्वा एकोऽष्टौ सप्त-द्वि-त्रि-षट्-पञ्च-चत्वारि,
इत्येवं क्रमेण संस्थाप्य ऋक्सामाभ्यां। ऋक्सामञ्च ऋक्सामञ्चेति समाहार-

योरेकशेषः । स्वकोष्ठात् तृतीयया पंक्त्या तृतीयेन च कोष्ठेन सह एवं चक्रयन्त्राख्यं उपासनायन्त्रं प्रवर्त्तयन्तीत्यर्थः । मनीषा मनीषया । षोडश-कोष्ठयन्त्रे यथेकाद्याङ्कौ प्रथमद्वितीयकोष्ठयोस्ते भवतस्तर्हि तृतीयपंक्तेस्तृतीय-चतुर्थकोष्ठयोर्विज्ञार्द्धपूरणावङ्कौ लेख्यौ ।

वाञ्छा मदर्द्धं स्फुटयति ... ...

... ...

... ... (पञ्चचत्वारिंशत्) ... ...

... ... मदेवं वर्णपदादीनामिवाङ्कानामभिधायकत्वात् ओमित्येतदक्षर-मिदं सर्व्वमिति दर्शनेन वाच्यवाचकशब्दभेदाभिधानात् । उक्तरीत्या प्रत्यक्षं श्रुतिमूलकान्यङ्कयन्त्राण्यपि स्वाभिधेय-देवतासन्निधायकत्वात् तान्यपि व्याख्येयानि । साधकैः सर्व्वसिद्धार्थमादरणीयानि चेति सिद्धमतो युक्तैवेयं प्रतिज्ञा यन्त्रावलीमङ्कमयीं व्याकुर्म्मेऽह इति ॥ इत्यादि ।

INDEX OF AUTHORS.

नामानि ।	पत्रे ।
अच्युतचक्रवर्त्ती	१७३
अनन्तभट्टः (महामहोपाध्यायः)	१९५
अनन्तरामः	९१
अभिरामविद्यालङ्कारः	३९२
अर्जुनमिश्रः	२९८
आनन्दवनः (मुकुन्दवनशिष्यः)	३२३
आनन्दानन्दनाथः (सहजानन्दस्य पुत्रः)	१४७
कणादतर्कवागीशः	१३
कमलाकरभट्टः (रामकृष्णभट्टस्य पुत्रः, भट्टनारायणस्य पौत्रः) ...	२०७
कविकर्णपूरः	२९, ३३२
कविकेशरी	४१८
कवितार्किकः	८१
कार्त्तिकेयसिद्धान्तः	२९२
कालीशङ्करः	३४१
काशीनाथतर्कालङ्कारः	१५५, २३२, २३५
काशीरामवाचस्पतिः	२५, ३९४
काशीश्वरः	३५६
किशोरीमोहनगोस्वामी	९६
कुल्लूकभट्टः	३२९
कुवेरशर्म्मा	२६०
कृपारामः	३४१
कृष्णः	१३२
कृष्णकान्तविद्यावागीशः	३५४
कृष्णकिशोरः	३४१
कृष्णचन्द्रः	,,

सत्यमेव जयते

ने ।	पत्रे ।
…जीवनः	३४१
कृष्णदासः	७१, २५३
कृष्णदासगोस्वामी	२०४
कृष्णदाससार्व्वभौमः	२२६
कृष्णदेवस्मार्त्तवागीशः	२३६
कृष्णमोहनः	३२१
कृष्णानन्दः	१८२
केशवभट्टः	१५१
गङ्गाहरिशर्म्मा	२८
गङ्गेशशर्म्मा	४४
गदसिंहः (शिवसिंहस्य पुत्रः)	२६०
गदाधरभट्टाचार्य्यः	२२५
गुरुप्रसादन्यायभूषणः	३७१
गुरुप्रसादशर्म्मा	२७६
गोपालः	१८३
गोपालचक्रवर्त्ती	२५७
गोपालन्यायपञ्चाननः	७८
गोपालपञ्चाननः (आगमवागीशभट्टाचार्य्यस्य पौत्रः, हरिनाथभट्टाचार्य्यस्य पुत्रः)	१४२
गोपालभट्टः	३६७
गोपालमिश्रः	१८३
गोपीकान्तः	३०६
गोपीनाथतर्काचार्य्यः	२२०
गोपीरमणतर्कपञ्चाननः	२६
गोरक्षनाथः	६३
गोविन्दरामसिद्धान्तवागीशः	१८४
गोविन्दाचार्य्यः	३१५
गोविन्दानन्दकविकङ्कणाचार्य्यः	१६६, २७४, ३७०, ३१८

नामानि ।

गोविन्दानन्दशर्म्मा ९
गोविन्दानन्दाचार्य्यः २८४
गौरीकान्तः ३४१
गौरीकान्तचक्रवर्त्ती ४०३
गौरीकान्तभट्टाचार्य्यः १४९
गौरीवरशर्म्मा १८९
चतुर्भुजभट्टाचार्य्यः १५, २५६
चन्द्रशेखरवाचस्पतिः १९४
जगदीशतर्कालङ्कारः (महामहोपाध्यायः) २११
जगदीशपञ्चाननः २९, २५५, २८५
जगन्नाथगुप्तः (कवीन्द्रः) ३९९
जगन्नाथचक्रवर्त्ती २७, १४६
जगन्नाथदत्तः १०३
जगन्नाथशर्म्मा २७७, ४११
जयतीर्थमुनिः ३३४
जीवगोस्वामी ३१
जुमरनन्दी १९८
ज्ञानानन्दपरमहंसः ८१
ज्ञानानन्दब्रह्मचारी १४०
त्रिलोचनदासः (माधवदासकवीन्द्रस्य पुत्रः) ४९
दनोकाचार्य्यः २००
दासगोस्वामी २१२, ४२०
दिगम्बरभट्टः ३३०
दुर्गसिंहः ३३, ५३, २१७
धन्वन्तरिकरः ३०
धोयीकविराजः २२१
नन्दकिशोरशर्म्मा २९३
नन्दकुमारगोस्वामी ११७

न । ... पत्रे ।

ाङ्कतः २२३
न्दरामः ३५
नन्दरामतर्कवागीशः ३८५
नरसिंहचक्रवर्त्ती १८६
नरहरिः १७
नरहरिसरकारः ८६
नरोत्तमः ४१४
नागभट्टः १६२
नारायणः २५०, ४१४
नारायणतर्काचार्य्यः १६१
नारायणभट्टः (रामेश्वरभट्टस्य पुत्रः) १६०
नित्यनाथसिद्धः ३१४
नृसिंहः ४१७
नृसिंहकविराजः २६५
न्यायपञ्चाननः (विद्याविनोदात्मजः) ३६३
पद्मनाभदत्तः २२४
परमानन्दचक्रवर्त्ती ५६
पुरुषोत्तमदेवः १३८
पुरुषोत्तमाचार्य्यः ३३५
पूर्णानन्दपरमहंसः ५७, १३६
प्रद्युम्नशर्म्मा ३८०
प्रेमेन्द्रन्यायरत्नः २११
बलदेवविद्याभूषणः ४०६
बालगोपालेन्दुः २०३
ब्रह्मानन्दः (परमहंसपरिव्राजकावधूतः) १५३
भवदेवभट्टः २३७, ४०१
भार्गवरामः ३३२
भीमः (महामहोपाध्यायः) ३७६

सत्यमेव जयते

नामानि ।
मथुरानाथचक्रवर्त्ती ... ...
मथुरानाथतर्कवागीशः १६, १७, ३५७, ३५
मधुसूदनः ३२६
मयूरशर्म्मा ४१०
महेशशर्म्मा ६८, १६६, ३६६
महेश्वरन्यायालङ्कारः २२७
माधवशर्म्मा (बुधवाणकुलोद्भूतः, रघुनाथस्य पुत्रः,
मतिनाथस्य कनिष्ठः, गोविन्दस्याग्रजस्य) २
माधवाचार्य्यः ३६४
मालाङ्कः ३४४
मुकुन्दरामदैवज्ञः ३६६
मोहनचन्द्रविद्यावाचस्पतिः १७२, २३८, ३६७
यादवेन्द्रविद्याभूषणः २४०
यादवेन्द्रशर्म्मा ३७३
रघुनन्दनन्यायप्रगल्भः ६
रघुनन्दनन्यायालङ्कारः ६२
रघुनन्दनभट्टाचार्य्यः ४१७
रघुनन्दनभट्टाचार्य्यः (हरिहरभट्टाचार्य्यस्य पुत्रः) ६६, १५६, १७८, १६१, २२३
रघुनन्दनवन्द्योपाध्यायः २५१
रघुनन्दनवैद्यः २५२
रघुनन्दनशिरोमणिः ३५६
रघुनाथगोस्वामी ४१२
रघुनाथचक्रवर्त्ती ६, १८८
रघुनाथतर्कवागीशः (नपाडीयः) १८
रघुनाथदासः ६५
रघुनाथदासगोस्वामी ४१२
रघुनाथभट्टः ८४
रघुनाथभट्टगोस्वामी ६४

पत्रे ।

.ाथेन्द्रशिवयोगी ५९

.घुरामशिरोमणिः (रघुमणिविद्याभूषणस्य छात्रः) १७४

रत्ननाथभट्टाचार्य्यः १०१

रत्नेश्वरचक्रवर्त्ती ६

रत्नेश्वरन्यायालङ्कारः ३११

रमाकान्तः ८६

रमाकान्तचक्रवर्त्ती २२६

रमाकान्तचक्रवर्त्ती (मधुसूदनतर्कवागीशस्य पुत्रः) ४०५

रमानाथचक्रवर्त्ती ३५७

रमानाथशर्म्मा (वेदगर्भतर्काचार्य्यस्य पुत्रः) २७४

रमापतिसिद्धान्तः १५६

रविचन्द्रः ११

राघवेन्द्रशर्म्मा १३६, ३८५

राधाकृष्णशर्म्मा १२०

राधामोहनगोस्वामी २३६

रामकान्तः १९७

रामकिशोरचक्रवर्त्ती १५

रामकुमारन्यायभूषणः (रामगतिवाचस्पतिपुत्रः) ४१

रामकृष्णः ३३८

रामकृष्णभट्टः ३२५

रामकृष्णभट्टाचार्य्यः १८०

रामगतिसेनः ३०४

रामगोपालः ३४१

रामगोपालकविः ६२

रामगोविन्दः ७९

रामगोविन्दशर्म्मा (रामगोपालचक्रवर्त्तिनः पुत्रः) ३४९

रामचन्द्रः ३१९

रामचन्द्रकविचक्रवर्त्ती (माधवकविकण्ठाभरणस्य पुत्रः) ३७६

नामानि ।

रामचन्द्रद्विजः (?) ... ...

रामचन्द्रन्यायालङ्कारः ३१

रामचन्द्रवाचस्पतिः १९०

रामचन्द्रविद्याभूषणः २१८

रामचन्द्रशर्म्मा (काश्मीरकुलसमुद्भवहरिहरात्मज·) ... ३९, ४०, ४१

रामजयविप्रः १५४

रामदासचक्रवर्त्ती ४५

रामदुर्ल्लभशर्म्मा (See Colophon of notice, no. 885.) ... ३८८

रामदेवद्विजः ३९६

रामनाथसिद्धान्तः २१९

रामभद्रः ४१३

रामभद्रसार्व्वभौमः ३८६

रामरत्नवन्द्योपाध्यायः ६१

रामरामभट्टाचार्य्यः ३९०

रामवल्लभः ३८७

रामशरणः ३५३

रामहरिद्विजः १४८

रूपगोस्वामी ३४, २६४, ३८२, ४१२

रूपरामन्यायपञ्चाननः ५३

लोकनाथशर्म्मा ११

लौहित्यवरसेनः १२१, २२९, २३१, २३२

वररुचिः ४७, १९३, २१४

वराहमिश्रः २२९

वर्द्धमानोपाध्यायः ८८, १६६

वलिनारायणः १७७

वल्लभः ३२

वल्लभदेवः ३६४

वल्लालसेनः १६९

सत्यमेव जयते

नामानि ।	पत्रे ।
वाचस्पतिमिश्रः	१००
वागीश्वरः	३४१
विद्याचन्द्रात्मजः	१
विद्याधरशर्म्मा pupil of जगद्वल्लभभट्टाचार्य्यः	२७५
विद्यानिधिः	१३४
विद्यानिवासः	१६४
विद्याभूषणः	४०५
विद्यारण्यतीर्थः	३४२
विद्यावागीशभट्टाचार्य्यः	८६
विद्याविनोदाचार्य्यः	१८७
विद्यासागरभट्टाचार्य्यः (श्रीकान्तपण्डितस्य पुत्रः)	४७
विराजगोस्वामी	६७
विल्वेश्वरतर्काचार्य्यः	२४३
विश्वनाथचक्रवर्त्ती	२७२, ३६१
वीरेश्वरः	३४१
वृन्दावनदासः	३१३
शङ्करः	३८६
शङ्करः (द्रविड़जः)	३५६
शङ्करशर्म्मा	४६
शङ्करानन्दतीर्थः	३८८
शङ्कराचार्य्यः (गौड़ः)	३६४
शिवदाससेनः (अनन्तसेनस्य पुत्रः)	१६२
शिवरामः	४०८
शिवरामतर्कपञ्चाननः	३७
शिवाचार्य्यः	१८१
शूलपाणिः	३४, १५८, ३३५, ३५०
श्यामसुन्दरः	३४१
श्यामसुन्दरभट्टाचार्य्यः	१४

सत्यमेव जयते

नामानि ।	पत्रे ।
श्रीकण्ठतीर्थः … … … … … …	२६०
श्रीकण्ठशर्म्मा … … … … … …	३७२
श्रीकान्तदासः … … … … … …	३४६
श्रीकृष्णदासगोस्वामी … … … … …	२०४
श्रीकृष्णविद्यालङ्कारः … … … … … …	५४
श्रीनाथशर्म्मा … … … … … …	३८१
श्रीपतिचक्रवर्त्ती … … … … … …	७
श्रीहर्षकृती … … … … … …	२७७
षष्ठीदासविशारदः (जयकृष्णतर्कवागीशस्य पुत्रः) … … …	१९९
समीराचार्य्यः … … … … … …	९३
सर्व्वविद्यालङ्कारभट्टाचार्य्यः … … … … …	५२
सार्व्वभौमभट्टाचार्य्यः … … … … … …	९६
सीतारामः … … … … … … …	३४१
हरगोविन्दः … … … … … …	१३२
हरानन्ददासकविचन्द्रः … … … … …	१०७
हरिकृष्णधीरः … … … … … …	१७५
हरिचरणः (रसिकश्यामस्य शिष्यः) … … … …	९०
हरिनाथमिश्रः … … … … … …	१६४
हरिरामः … … … … … … …	४९
हलायुधमहाकविः … … … … … …	१९५
हितहरिवंशगोस्वामी … … … … …	३८४
हृदयानन्दविद्यालङ्कारः … … … … …	१३७
हेमकारः … … … … … … …	२१३

ख-वाण-ऋतु चन्द्रे च शाके परिमिते मया ।
लिखिता जयदेवस्य टीप्पनीयं प्रयत्नतः ॥
प्रणम्य भारतीं देवीं श्रीनारायणशर्म्मणा ।
लिखिता शब्दशास्त्रस्य सम्मता शोधिता सुरैः ॥
श्रीमाधवाय नमः ।

विषयः । गीतगोविन्दनामकस्य कृष्णलीलाविषयकस्य काव्यस्य व्याख्या ।

No. 91. गीतगोविन्दप्रबोधः, By रमाकान्तः । Substance, country-made paper, 15 × 3 inches. Folia, 57. Lines, 6 on a page. Extent, 1,617 çlokas. Character, Bengali. Date, ? Place of deposit, Dháká, Paṇḍita Candrakánta Nyáyálaṅkára. Appearance, old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।
गोपिकालकविधासु राधिका-
भ्रूविभङ्गपरिकम्पितान्तरः ।
नव्यनीरधररञ्जितरोचरः
श्यामलो जयति नन्दनन्दनः ॥
प्रणम्य मान्यान् बहुमानपूर्व्वं-
मन्यानुपस्थाय कृताञ्जलीकम् ।
श्रीगीतगोविन्दप्रबोधमूर्व्वीं-
देवो रमाकान्त इमञ्चकार ॥
अनेकशः पूर्व्वविचक्षणानां
विस्तारिताः सन्ति यदस्य टीकाः ।
तथापि संक्षेपविशेषहेतो-
र्मम श्रमः सद्भिरयं न बाध्यः ॥
इह खलु नानाविधबुधजनगणसम्मत-निखिलविघ्नशमनकृष्णनमस्कारकाम-स्तत्क्रीडास्तवनच्छलेन तमेव प्रथमं प्रतिपादयन्नाह मेघैरिति । यमुनायास्तीरे राधामाधवयोः रहःकेलयो जयन्ति । रहसि निर्ज्जने सुरते रतिविषये वा केलयो रहःकेलयः । तथाच रहः सुरतगुह्ययोरिति रभसः । रहो गुप्तं यथा स्यात् इति क्रियाविशेषणं वा । इत्यादि ।

Bengali. Date, ? Place of deposit, Kánṭhálpáḍá, Post office, Naiháṭí, Paṇḍita Rámatáraṇa Ṭhákura. Appearance, old. Prose and verse. Incorrect.

Beginning. अस्य प्रथमपत्रं नास्ति तेन द्वितीयपत्रस्य प्रारम्भवाक्यं लिखितम् ॥
गयायां पिण्डप्रदानेन यनादिमोचे ?
मोचायितौ तीर्थबलप्रभावादवीचिसंज्ञं नरकं गतौ तौ ॥
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
प्रीणयामीति यत्तोयं त्वया दत्तमरिन्दम ।
तेनास्मद्युगपद्योगो जातो वाक्येन सत्तम ॥ इत्यादि ।

End. श्राद्धं ईश्वरीकुण्डे चकाराद्रुक्मिणीकुण्डे च श्राद्धकर्त्तुः सिद्धो भवतीत्यर्थः । गौरी चेति तत्र महेश्वरकुण्डे मतङ्गलाभः पूजनात् सर्व्वसौभाग्यं प्रापितो भवतीत्यर्थः ॥

Colophon. इति गयाप्रकाशः समाप्तः ॥

विषयः । गयामाहात्म्यादिनिरूपणमुखेन तत्तीर्थकर्त्तव्यकर्म्मविषयनिरूपणम् ।

No. 90. गीतगोविन्दटीका, (सर्व्वाङ्गसुन्दरी) । Substance, country-made paper, 15 × 2½ inches. Folia, 65. Lines, 6 on a page. Extent, 1,500 çlokas. Character, Bengali. Date, Sk., 1650. Place of deposit, Káṇṭhálpáḍá *viá* Naiháṭi, Paṇḍita Rámatáraṇa Ṭhákura. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य जगतामीशं कृष्णरूपं सनातनम् ।
क्रियते गीतगोविन्दटीका सर्व्वाङ्गसुन्दरी ॥
मेघैर्म्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयमित्यादि । इत्यादि ।

End. किम्भूताः सानन्दा आनन्देन सह वर्त्तमानाः । किं तदित्याह गान्धर्व्वकलासु यत् कौशलं अस्ति यद्वैष्णवमनुध्यानं यत् शृङ्गारे विवेकतत्वम् । यत् काव्येषु लीलायितम् । किम्भूतस्य कृष्णैकतानात्मनः । कृष्णश्चासौ एकतानश्चेति कृष्णैकतानं । तदेव आत्मा यस्य एकातानोऽनन्यवृत्तिः ॥

Colophon. इति गीतगोविन्दे महाकाव्ये स्वाधीनभर्त्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः समाप्तोऽयं ग्रन्थः । शकाब्दा १६५० ।